श्रीमत्कविकुलतिलक-

श्रीमद्वादिराजश्रीमत्पूज्यचरणविरचिता

युक्तिमल्लिका

भेदसौरभम्

श्रीमत्सत्यप्रमोदतीर्थश्रीचरणविरचितया

विवृत्या

समलंकृतम्

सम्पादक :- केशव श्रीनिवासाचार्य कट्टि

प्रकाशिका :- जयसत्यप्रमोदनिधिसमितिः

बेंगलूर-४.

१९९२

श्रीमत्कविकुलतिलक-

श्रीमद्वादिराजश्रीमत्पूज्यचरणविरचिता

युक्तिमल्लिका

भेदसौरभम्

श्रीमत्सत्यप्रमोदतीर्थश्रीचरणविरचितया

विवृत्या

समलंकृतम्

सम्पादक :- केशव श्रीनिवासाचार्य कट्टि

प्रकाशिका :- जयसत्यप्रमोदनिधि

बेंगलूर-४.

१९९२

युक्तिमल्लिका - भेदसौरभम्

प्रकाशिका :

जयसत्यप्रमोदनिधिसमितिः
पूजामन्दिरम्,
श्री उत्तरादि मठ
बेंगलूर – ५६० ०४

© सर्वेऽधिकाराः स्वायत्तीकृताः

गणकीकृत-अक्षरसंयोजनम् :

धनंजयः वरखेडकरः
सुधा मुद्रण
उत्तरादिमठीयावारः
शंकरपुरम्, बेंगलूर–५६०००४

॥ श्री दिग्विजयरामो विजयते ॥

भूमिका

पञ्चभेदांश्च विज्ञाय विष्णोः स्वाभेदमेव च ।
निर्दोषत्वं गुणोद्रेकं ज्ञात्वा मुक्तिर्न चान्यथा

इति श्रीभगवत्पादीयं वचनं मुमुक्षूणां भेदपञ्चकज्ञानं सर्वथाऽपेक्षितमित्यनुशास्ति अतीतसौरभाभ्यां विष्णोः गुणोद्रेको निर्दोषत्वं च न्यरूपिषाताम् । अथेदानीं साधनचिन्ताऽवसरः । साधनं चोपासना उपास्योपासकयोः भेदमन्तरा नैव सङ्घाघटीति । स च भेदश्चेदपरमार्थः तदाऽसदुपासनाऽनर्थकरी पर्यवस्यति । दूरे पुरुषार्थसाधनम् । तत्पारमार्थ्य-संसिद्धये सर्वज्ञत्वाज्ञतादिविरुद्धधर्मलक्षणविश्वसत्यताऽवश्यमेव साधनीया । न हि संभवति भेदकधर्माः मिथ्या भेदस्तु सत्य इति । व्याघातादेव । अन्ते फलस्वरूपचर्चा अवकाशमासादयति तदेवमतीतसौरभाभ्यामुपक्षेप्यं वर्तिष्यमाणसौरभयो- रुपक्षेपकं सौरभमिदं सौरभमालायाः वैजयन्त्याः स्थाने मध्यस्थानं समलङ्करोति । अत्रादौ मान्त्रवर्णिकस्य अनन्तशब्दस्य पदपरिकल्पितसर्ववस्त्वात्मकत्वरूपदुरर्थं दूरीकृत्य गुणानन्त्यमर्थो व्यवस्थाप्यते ।

अन्योन्याभावस्य धर्मिस्वरूपतां प्रस्ताव्य प्रागभावादित्रयाणां स्वरूपचर्चाऽत्रापूर्वा सहृदयहृदयङ्गमा प्रचकास्ति । प्रागनादित्रयः स्वगोत्रकलहप्रियाः । तेषामेकतमः स्वस्थितिकाले इतरयोः सत्तां न सहते । सर्वेऽपि स्वसत्तादशायां प्रतियोगिसत्ताऽसहिष्णवः । अत एवात्यन्ताभावः प्रतियोग्य-प्रामाणिकत्वनियतः । अन्योन्याभावस्तु यथायथं क्वचित् प्रामाणिकप्रतियोगिकः कुत्रचिदप्रामाणिकप्रतियोगिकोऽपि इति ।

एतद्दर्शितमध्वानमनुरुध्यैवास्माभिः "भगवतो निर्दोषत्वलक्षणम्" इत्यनेन ग्रन्थेन अत्यन्ताभावस्य सर्वथाऽप्रामाणिकप्रतियोगिकत्वमेवेति सिद्धान्तसारः सुविपुलप्रमाणोदाहरणेन समस्थापि ।

सौरभमिदं निरवकाशानामपि भेदप्रमाणानां दुराग्रहमात्रेण परपरिकल्पितदुरर्थान् दूषयति । तत्र तत्र सुदृढतराभिः उभयतः पाशारज्जुभिः कुसमयिनः क्लेशयति । सतां दुर्मतजनितदुर्वासनां नाशयति । भेदामृतसौगन्ध्यं सतां स्वान्तेषु समन्ततः समावासयति । सिद्धान्ततत्त्वानि पोषयति । युक्तिरसिकान् हर्षयति । प्रौढचर्चासाहित्यशृङ्गाररससंमिश्रणेन भूषयति । उपास्यं श्रीहयग्रीवं नितान्तं सन्ततं सन्तोषयति । अतः साध्वेवोच्यते—

"सर्वे सदागमा गावः दोग्धा श्रीवायुनन्दनः ।
वत्सः श्रीवादिराजार्यो दुग्धं भेदामृतं महत् ॥' इति ।

तदिदं प्रतिपदं स्वादुस्वादु भेदामृतं स्वादं स्वादं साधुहृदः प्रमोदनैर्भर्यमासादयेयुरिति समाशास्महे ।

श्री श्रीसत्यप्रमोदतीर्थश्रीचरणाः

श्री कट्टि सत्यध्यानाचार्येण सौहार्देन
प्रदत्तं श्रीनिवासाय
Date -26-9-92
चातुर्मास्यसन्दर्भे

भेदसौरभम्

विषयानुक्रमणिका

विषयः	श्लो. सं.
अनन्तशब्दार्थः	१-४३
आनन्दमयाधिकरणार्थः परभाष्यस्योत्सूत्रत्वम्	९२-१३३
जन्मादिनये परभाष्यस्य उत्सूत्रत्वम्	१३४-१४७
यत इत्यत्र पञ्चम्या उपादानार्थत्वनिरासः लक्षणस्य तटस्थत्वदूषणम्	१४८-२११
भेदप्रतिपादकानि सूत्राण्युदाहृत्य तदर्थचर्चा	२१२-२८५
'त्रयाणामेकभावानां' इति भा. श्लोकार्थः	२८६-३३४
सात्त्विकादिविभागकथनेन पुराणानां परस्परविरोधपरिहारः	३३५-३५८
भयं द्वितीयाभिनिवेशतः स्यादिति श्लोकार्थः	३५९-३८४
अहं भवान्न चान्यस्त्वं इति श्लोकार्थः	३८५-४०२
यथोल्मुकाद्विष्फुलिङ्गादिति श्लोकार्थः	४०३-४१२
सुपर्णावेतौ इति श्लोकार्थः	४१३-४२१
नित्यो नित्यानामिति श्रुत्यर्थः	४२२-४४९
जीवस्यौपाधिकत्वनिरासेन अणुत्वसमर्थनम्	४५०-४८०
अविद्याया उपाधित्वनिरासः	४८१-५२९
एकजीववादनिरासः	४३०-४३३
बहुजीववादनिरासः	४३४-५४९
'सर्वं खल्विदं ब्रह्म' इति श्रुत्यर्थः	५५०-५९७

उभयतः पाशारज्जवः	५९८-६०९
मायिमतस्य दुर्नीतिपरत्वम्	६१०-६१९
अंशांशिभावविचारः	६२०-६७६
एकजीववादनिरासः	६७७-७३५
भेदो मिथ्या भेदत्वादित्यनुमाननिरासः	७३६-७४७
अत्यन्ताभावस्य अप्रामाणिकप्रतियोगिकत्वसाधनम्	७४८-७९५
अभेदानुमाननिराकृतिः	७९६-८०४
स्वमते प्रत्यक्षानुमानागमाः	८०५-८८५
अद्वितीयमिति श्रुत्यर्थः	८८६-८९७
नेहनानेति श्रुत्यर्थः	८९८-९१९
ब्रह्माहमस्मि इति श्रुत्यर्थः	९२०-९४९
एकविज्ञानेन सर्वविज्ञानं इति प्रतिज्ञाऽर्थः	९५०-९८६
तत्वमसिश्रुत्यर्थः	९८७-१०६१
'ये स्मरन्त्यात्मनि भिदां' इति श्रुतिगीतिकाद्यर्थाः	१०६२-१०७४
अखण्डार्थतादूषणम्	१०७५-११७२
मायामतस्यासुरत्वसमर्थनम्	११७३-११८९
तात्पर्यार्थस्यैव ग्राह्यत्वसमर्थनम्	११९०-१३३७
भेदवाक्यानां अनुवादकत्वनिरासः	१३३८-१३८७
मिथ्योपासनायाः खण्डनम्	१३८८-१४८३
नेति नेतीत्यादिवाक्यार्थः	१४८४-१४९६
विद्याऽऽत्मनि भिदाबोधः इति वाक्यार्थः	१४९७-१५२०
बिम्बप्रतिबिम्बभावोक्त्या भेदसमर्थनम्	१५२१-१५९०
समर्पणम्	१५९१

प्रकाशकानां निवेदनम्

परमपूज्यानां श्रीमदुत्तरादिमठाधीशानां श्री श्री १००८ श्री **सत्यप्रमोदतीर्थानां** प्रभूतानुग्रहबलेन तैरेव स्थापितोऽयं **"जयसत्यप्रमोदनिधिः"** माध्वसमुदायं विश्वतोमुखां उन्नतिं निनीषुः विधायकांश्च नैकान् उपक्रमान् वितन्वन्,

१) वेदान्ताध्येतृभ्यः छात्रेभ्यः विद्वद्भ्यश्च धनसहायं,

२) विद्यार्थिवेतनं,

३) उपयुक्तानां शास्त्रग्रन्थानां प्रकाशनं,

४) धार्मिकानां तथा शैक्षणिकानां शिबिराणां कृते वित्तसहायं,

५) तान्त्रिकशिक्षणप्रपित्सुभ्योऽपि विद्यार्थिभ्यः वेतनं च विदधाति ।

"श्रीसुधा"मासपत्रिकामाध्यमेन तत्त्वज्ञानस्य प्रचारं विदधाति । प्रकृते च स्वामिपादाः जयसत्यप्रमोदनिधिद्वारा श्रीवादिराजतीर्थोपनिबद्धायाः युक्तिमल्लिकायाः भेदसौरभं विवृतिनाम्न्या स्वप्रसूतया टिप्पण्या सहितं प्रकाशयन्तः शास्त्राध्येतॄन् सर्वान् माध्वान् उपाचक्रिरे ।

इमं ग्रन्थं प्रकशितवद्भ्यः स्वामिपादेभ्यः अनन्तान् अनुबन्धसध्रीचीनान् धन्यवादान् समर्पयामः ।

तथा सम्पादकेभ्यः श्री कट्टी केशवाचार्येभ्यः उचितकाले मुद्रकेभ्यः धनंजयमहोदयेभ्यः तथा पि. आर. एम्. देसाई महोदयेभ्यश्च नैकान् धन्यवादान् समर्पयामहे ।

अध्यक्षः
एम्. एम्. जोशी.

निर्वाहक धर्मदर्शी
श्रीमुष्णं रङ्गनाथाचार्यः

जयसत्यप्रमोदनिधिः बेङ्गलूरु



॥ श्री दिग्विजयरामो विजयते ॥

अथ युक्तिमल्लिकायां भेदसौरभम्

सर्ववस्त्वात्मकत्वं च यदनन्तत्वमीरितम्।
तदयुक्ततमं मन्ये युक्तायुक्तविचारणे ॥ १ ॥

रामं दिग्विजयं सुनिर्मलतनुं विभ्राजमानं सदा
श्रीसीतायुतमूलराममनलं सद्वंशरामं तथा।
व्यासं विठ्ठलमप्रमेयसुसुखं मध्वं जयीन्द्रं गुरून्
अन्यान्मद्गुरुमानमामि सततं मद्योग्यसौख्याप्तये ॥

अथैतेषां कृपालेशमुपजीव्यैव केवलम्।
बुद्धिशुद्ध्यै यथाबोधं विवृण्वे भेदसौरभम् ॥

भगवतो, गुणैः सर्वैरुदीर्णत्वं, दोषवर्जितत्वं च सौरभद्वयेन समर्थितम्। एवं वस्तुनिर्णये सञ्जाते किं मया कार्यमिति अधिकारिणः बुद्धिरुत्पद्यते। अथेदानीं तस्योपासना नित्यमादरेण कर्तव्येति विधीयते। सा च विष्णोर्जीवजडात्मकात्प्रपञ्चादत्यन्तभिन्नत्वनिश्चये सत्येव सञ्जाघटीति। सः अत्यन्तभेदः सौरभेऽस्मिन् सौत्रयुक्तिभिरुपपाद्यत इति पूर्वसङ्गतिः स्वस्मिन्नेकवाक्यता च।

'सत्यं ज्ञानमनन्तं' इति मन्त्रवर्णोक्तमनन्तत्वलक्षणं 'देशतः कालतश्चैव गुणतश्च त्रिधा ततिः। सा समस्ता हरेरेव न ह्यन्ये पूर्णसद्गुणाः ॥' इति प्रमाणेन परिष्कृतम्। मायिभिः तत्त्वप्रदीपिकायां अनन्तशब्दस्यार्थः अन्यथैव वर्णितः। अन्तशब्दस्य देशकालवस्तुपरिच्छिन्नत्वे व्युत्पन्नत्वात् ब्रह्मणि तन्न भवतीत्युक्ते सर्ववस्त्वभेद एव तस्य लभ्यते इति। तदेतदपाकरोति सर्ववस्त्वात्मकत्वमित्यारभ्य तत् त्रिवर्णं पदमिदं त्रिविक्रमपदोपममित्यन्तैः द्वानवतिश्लोकैः॥ अयुक्ततममिति। स्वमतविरुद्धत्वात् पूर्वोत्तरविरोधात् प्रमाणान्तरविरोधाच्चेति भावः ॥ १ ॥

समस्तवस्तुरूपत्वं न तावत्स्वस्य शोभते ।
जडानृतविरोधित्वं यद्ब्रह्मणि जगौ स्वयम् ॥ २ ॥

स्वमतविरुद्धत्वं उपपादयति **समस्तेति** । समस्तवस्तुरूपत्वम् । मायिना स्वभाष्ये अनन्तशब्दार्थतया वर्णितमिति शेषः । **स्वस्य**– मायिभाष्यकारस्य ॥ न शोभते इति सुकुमारोक्तिः ॥ व्याघातदोषापादकतया लज्जाकरमिति भावः ॥ अनृतविरोधतामात्रेण सत्यत्वं, जडविरोधितामात्रेण च ज्ञानत्वं ब्रह्मणः कथयन् अनृतात्मकतां जडात्मकतां च कण्ठोक्त्या प्रतिषिध्य पुनः तत्तद्वस्त्वात्मकं अनन्तशब्दार्थत्वेन आचक्षाणः कथं न व्याहतभाषी भवेदिति भावः ॥ २ ॥

श्रुतिः प्राग्ज्ञानमित्याह यतस्तज्जडरूपता ।
न तस्याश्च मता नापि शब्दस्य हृदयङ्गमा ॥ ३ ॥

पूर्वोत्तरविरोधमुपपादयति **श्रुतिरिति** । **प्राक्**= अनन्तत्वकथनात् पूर्वम् । ज्ञानमित्युपलक्षणं सत्यमित्यपि ग्राह्यम् । एवं यतः उत्तरत्र गुणपूर्तिवाचिब्रह्मशब्देन लक्ष्यमाह । **तत्**= तस्मात् । तस्य ब्रह्मण इति वा । **जडरूपता**= अनृतरूपता, अपूर्णता च । **तस्याः**= श्रुतेः । **न मता**= पूर्वोत्तरविरोधप्रसङ्गान्न विवक्षिता ॥ **शब्दस्य**= अनन्तेत्यस्य **हृदयङ्गमा**= व्युत्पत्तिबललभ्या । अन्तशब्दस्य त्वदुक्तवस्तुतः परिच्छेदरूपेऽर्थेऽभिधानाद्यभावादिति भावः ॥ ३ ॥

यद्देशतो व्याप्तिमाह देशतस्सोन्तशून्यताम् ।
कालतो व्याप्तिमाचष्ट कालतश्चान्तशून्यताम् ॥ ४ ॥

विभोस्तदणुरूपत्वं नित्यस्यानित्यरूपताम् ।
कथं पुनरसौ ब्रूयान्न हि सस्वात्मघातकः ॥ ५ ॥

देशतः अन्तशून्यत्वं नाम परममहत्परिणामवत्त्वम् । एवं कालतः अन्तशून्यत्वं नाम अनादिनित्यत्वम् । एतदुभयाभिधानेन ब्रह्मणः अणुमध्यमपरिमाणवद्भ्यः तथा आद्यन्तवद्वस्तुभ्यो भेदः स्फुटमुक्तः । पुनः

त्वदुक्तरीत्या वस्तुतः परिच्छेदराहित्यकथनेन पूर्वोक्तवस्त्वभेदोक्तौ श्रुतेः स्वव्याघातेनाप्रामाण्यं स्यादित्याह द्वाभ्यां **यदित्यादिना** ॥ ४ ॥ ५ ॥

देशकालव्याप्ततोक्त्या यत्तद्भिन्नमभूत्पुरा ।
कथं पुनर्वस्तुरूपात्तत एव तदेकता ॥ ६ ॥

किं च तिष्ठतु तावदितरवस्तुभेदनिषेधः । व्याप्तेः भेदसापेक्षतया देशकालयोः ब्रह्मणो व्याप्तत्वोक्त्या ताभ्यामेव भेदः परेणाङ्गीकार्य इत्याह **देशेति** ॥ ६ ॥

सकृच्छ्रुतान्तशब्देन परिच्छेदं स्थलद्वये ।
वदंस्तदैवभेदं च कथमेकत्र वक्ति सः ॥ ७ ॥

किं चात्रानन्तशब्दघटकोऽन्तशब्दः सकृदेव श्रुतः । तस्य च तथा स्थलद्वये परिच्छेदोऽर्थः एकत्र भेदरूपोऽर्थः आश्रितः । तत्र प्रष्टव्यं किमेष सकृदेवार्थद्वयं वक्ति उत विलम्बेन । आद्यमाक्षिपति **कथमिति** ॥ ७ ॥

न हि द्विजिह्वः शब्दोऽसौ नापि त्रिक्षणवर्तिनः ।
विरम्य व्यापृतिर्युक्ता नापि सा विदुषां मता ॥ ८ ॥

तत्र हेतुः **न हीति । द्विजिह्वः**= व्याहतभाषी । अन्यत्र सर्पः । 'द्विजिह्वौ सर्पसूचकौ' इति अमरः । द्वितीये दोषमाह **विरम्य व्यापृतिरिति** । पूर्वं परिच्छेदमर्थं उक्त्वा पश्चाद्भेदरूपार्थकथनस्य विलम्बितत्वेन आशुतरविनाशिपदस्य तदयोगादिति भावः । यतः स्थित्वा स्थित्वा व्यापारः चेतनधर्मः स चाचेतने शब्दे न संभवतीति भावः । यत्र 'अन्नात्पुरुषः' 'स वा एष पुरुषोऽन्नरसमयः' इत्यत्र अन्यशब्दस्य प्रसिद्धान्न-परमात्मरूपार्थद्वयाश्रयणं तत्र नान्नशब्दः सकृत्पठितः । नाप्येकया वृत्त्या । परमात्मनि परममुख्यवृत्तेः अन्यत्र हीनमुख्यवृत्तेराश्रितत्वात् । रसशब्देन विशेषणरूपज्ञापकसद्भावात् । 'अद्यतेऽत्ति च भूतानि' इति श्रुत्यैवार्थान्तरस्य निर्वचनात् । प्रकृते तु नैवम् । त्वया तस्यैव पदस्य विशेषणं

विनाऽपि, एकयैव वृत्त्या, अन्तरेणैव निर्वचनाभिधानादिज्ञापकं, परस्परव्याहतस्यार्थद्वयस्य, युगपदेव स्वीकारात् । तदेतदाह **नापीति** ॥ ८ ॥

देशकालान्तशून्यत्वं देशकाले च वर्तनम् ।
यथा वस्त्वन्तशून्यत्वं तथा वस्तुषु वर्तनम् ।
भवेत्परं द्विधा नैकपंक्तौ यत्परिवेषणम् ॥ ९ ॥

'मय्यनन्तगुणेऽनन्ते' इति श्रुत्याद्यनुसारेण अत्र गुणतोऽनन्तत्वमेव लक्षणमभिप्रेतम् । तुष्यत्विति न्यायेन परोक्तं वस्तुनोऽनन्तत्वमर्थमभ्युपगम्यापि तदन्तशून्यत्वमित्यस्य, तत्र सर्वत्र वर्तनं, तदशेषाधारत्वं वा लोकानुगुणं अर्थद्वयं उपपाद्य तेनैव सिद्धान्ताभिप्रेतमर्थं साधयति द्वाभ्यां **देशेत्यादिना** ॥ देशकालौ देशतः कालतश्चान्तशून्यावित्युक्त्या तयोः सर्वदेशकालयोर्वर्तनरूपं व्याप्तत्वमेव लभ्यते । एवं परमात्मनः वस्तुतोऽन्तशून्यत्वोक्त्याऽपि सर्ववस्तुषु वर्तनरूपं सर्ववस्तुव्याप्तत्वमेव श्रुत्यविरुद्धो लोकानुरोधी च मनोहरोऽर्थोऽस्तु । किं भेदराहित्यरूपदुरर्थोक्तिदुर्व्यसनेन । एवं सति प्रायपाठविरोधोऽपि परिहृतः स्यादित्याह **द्विधेति** ।

बहुवस्त्वाश्रयत्वं वा भवेल्लोकनिदर्शनात् ।
रत्नतोऽनन्त इत्याहुर्यतो रत्नाकरं जनाः ।
तथा गुणानन्तता च स्याद्गुणैः पूर्णता हरेः ॥ १० ॥

एवं तदाधारत्वरूपं अर्थान्तरमपि लोकनिदर्शनेन सङ्गमयति **बह्विति** । रत्नतोऽनन्त इत्युक्ते रत्नाकरः समुद्रो बहुरत्नाश्रय इति यथा तथा वस्तुनः अनन्त इत्युक्ते सकलवस्त्वाश्रयत्वमेव लभ्यते । इदं चार्थद्वयं "यो मां पश्यति सर्वत्र सर्वं च मयि पश्यति" इति गीताऽनुरोधीति ध्येयम् । अभ्युपगमेनोक्तार्थद्वयस्य सिद्धान्तार्थोक्त्युपयोगमाह **तथेति** । **गुणैः पूर्णतेति** । गुणकर्मकप्रवेशनकर्तृता गुणकर्तृकप्रवेशकर्मता अर्थद्वयानुसारेण ग्राह्या । तदुक्तं सुधायाम् "असावोङ्कारस्तस्य जिज्ञास्यस्य गुणैरानन्दाद्यनन्तगुणैर्गुणान्वोततां वक्ति" इति ॥ १० ॥

अन्तो नेत्येव शब्दार्थस्स तु योग्यो विमृ(ग्य) श्यते ।
देशतः कालतश्चान्तो नाम देशाच्च कालतः ॥ ११ ॥

परिच्छेदस्स चेयत्ता सा च क्वचिदसङ्गतिः ।
क्वचिच्च सङ्गतिस्ताभ्यां शून्यता सर्वसङ्गमः ॥ १२ ॥

तत्सर्वदेशकालेषु संबन्धोऽनन्तता यथा ।
समस्तगुणसंबन्धो गुणानन्त्यं तथा विभोः ॥ १३ ॥

अतो न पंक्तिभेदोऽस्ति पंक्तिपावनपंक्तिषु ।
अंतस्य तन्निषेधस्य सर्वत्रैकविधत्वतः ॥ १४ ॥

संबन्धश्च यथायोगं संयोगो द्रव्ययोस्तयोः ।
गुणानां गुणिनश्चैवं गुणगुण्यात्मता परम् ॥ १५ ॥

अस्तु वा ब्रह्मणो देशकालयोराधेयत्वं गुणान्प्रति त्वाधारत्वमिति कथञ्चित्संबन्धमात्रे विशेषः । तथाऽपि योग्यतावशादङ्गीकार्य एष तृतीयः गुण एव । तथा सत्येव देशकालगुणव्याप्तिरूपेषु त्रिषु स्थलेष्वपि, अनन्तशब्दस्य परिच्छेदरूपेयत्ताया एकस्यैवार्थस्य, नञा निषेधरूपार्थलाभेन प्रायपाठानुगुण्यम् । देशकालाभ्यां भगवतः संबन्धः सयोगः, गुणैस्तु तादात्म्यं इति संबन्धे विशेषस्तु यथायोग्यो गुण एव न दोषावह इत्याह पञ्चभिः ॥ **अतो नेत्यादिना** ॥ ११–१५ ॥

शिशोर्वृद्धस्य यूनश्च यथायोग्यं हि भोजनम् ।
भिन्नभिन्नान्नदाने हि पंक्तिभेदं विदुर्बुधाः ॥ १६ ॥

एवंरूपस्य विशेषस्य गुणत्वे लोकानुभवं निदर्शयति **शिशोरिति । भिन्नेति ।** योग्यतामनतिक्रम्येत्यादिः ॥ १६ ॥

एकान्नस्य यथायोगं दाने को नेति शंसति ।
अतो वस्तुपरत्वोक्तिर्वस्तुतत्वाज्ञतावशात् ॥ १७ ॥

वस्तुपरत्वोक्तिः= वस्तुनः प्रपञ्चस्य **परत्वोक्तिः** परेण ब्रह्मणा भेदनिषेधेन तादात्म्यार्थकथनम्। **वस्तुतत्वाज्ञतावशात्=** वस्तुनः ब्रह्मणः तत्त्वं स्वातन्त्र्यादिकम्, तथा वस्तुनः प्रपञ्चस्य तत्त्वं नित्यातादृशत्वं तदुभयाज्ञानवशात् ॥ ॥१७॥

किं चान्तशून्यतैवात्र शक्योर्थो योग्यतावशात्।
आनेयमन्यद्योग्यं च नैतदुक्तप्रकारतः ॥ १८ ॥

अन्यत् भेदराहित्यवचनम्। योग्यं नेति संबन्धः। प्रमाणविरोधात्, परेण जडाभेदानङ्गीकारात् विशिष्टयोर्जीवपरमात्मनोरभेदानुपगमात्, लक्षणया चिन्मात्रैक्यपरत्वोक्तेश्च पराभिप्रेतनिरङ्कुशमहत्त्वासाधकत्वाच्चेति भावः ॥ १८ ॥

महत्त्वस्य विरोधित्वादपि नैतदिहोचितम् ॥ १९ ॥

'ब्रह्मविदाप्नोति परम्' इति प्रतिज्ञावाक्योक्तस्य परस्य ब्रह्मण एव हि अनन्तशब्देन लक्षणोक्तिः। तस्य च लक्षणवचनस्य, अपरेण प्रपञ्चेन अभेदपरत्वोक्तौ परस्यैव अपरत्वप्राप्त्या लक्ष्यलक्षणवाक्ययोः व्याघातः स्फुट एवेत्याह **महत्त्वस्येति** ॥ १९ ॥

आधारभूतौ यद्देशकालावखिलवस्तुनः।
ताभ्यामवध्यभावस्तु तौ द्वौ सर्वौ च नः प्रभोः।
आधारभूतावित्यर्थे फलत्याधाररूपिणः ॥ २० ॥

गुणाश्चाधेयरूपास्ते तैरवध्युज्झितिर्हरेः।
सर्वस्य गुणराशेश्च स्वस्मिन्नाहिततां नयेत् ॥ २१ ॥

'अवध्यभावस्तु' इत्यस्य 'इत्यर्थे फलति' इत्यनेनान्वयः। आधाररूपिण इत्यत्र प्रभोरित्यनुकर्षः। गुणाश्चेत्यनेन अन्वयः ॥ २० ॥ २१ ॥

यद्धर्मी स्वयमाधारो धर्मास्त्वाधेयरूपिणः ।
अतोन्तशब्दस्त्रिस्थान्यामप्यवध्यर्थको भवेत् ॥ २२ ॥

देशकालनिरूपितमाधेयत्वं ब्रह्मण उक्तम् । एवं तर्हि गुणनिरूपितमपि आधेयत्वमेव संबन्धस्तस्य भवेत् नोक्तरीत्या आधारत्वम् इत्यतः प्रागुक्तं मा विस्मार्षीः इत्याह **यद्धर्मी इति** । इदं चाभ्युपगम्योक्तम् । वस्तुतस्तु देशकालौ प्रत्यपि प्रभोराधारत्वमेव 'एको दाधार भुवनानि विश्वा' 'भर्ता सन् भ्रियमाणो बिभर्ति' इति श्रुतेः । तदुक्तं 'अक्षरमम्बरान्तधृतेः' इति ॥ २२ ॥

नार्थभेदस्ततोऽस्माकं मते सुजनसंमते ।
वस्तुस्वभावानुगुण्यात्फलं स्वात्यम्बुकार्यवत् ॥ २३ ॥

अभ्युपगतं संबन्धे वैषम्यं लोकनिदर्शनेन सङ्गमयति **स्वात्यम्ब्विति** । तदुक्तं नीतिशतके 'सन्तप्तायसि संस्थितस्य पयसो नामापि न ज्ञायते । मुक्ताकारतया तदेव नलिनीपत्रस्थितं राजते । स्वात्यां सागरशुक्तिमध्यपतितं तन्मौक्तिकं जायते ॥' इति ॥ २३ ॥

महद्गुणत्वाद्यमनन्तमाहुरिति च स्फुटम् ।
यतो भागवते प्रोक्तं ततोप्येतदसङ्गतम् ॥ २४ ॥

स्वोक्तं गुणानन्त्यं अर्थं भागवतसमाख्यया सङ्गमयति **महदिति** । **प्रोक्तम्**= आहुरिति विद्वद्रूढिप्रदर्शनपूर्वकं प्रकर्षेणोक्तम् ॥ २४ ॥

अर्थद्वये न सन्देहस्तृतीयेऽर्थे हि संशयः ।
अतो विशिष्य तं व्यासो निर्णयायान्ववर्णयत् ॥ २५ ॥

समाख्यावाक्ये गुणानन्त्यमात्रं कुतः कथितम्, अनन्तशब्दस्यैव अर्थद्वयं देशकालाभ्यामानन्त्यं कुतो नोक्तमित्यतस्तदंशे वादिविवादाभावात् देशकालव्याप्तेरपि गुणत्वेन गुणानन्त्योक्तौ तल्लाभाच्चेत्याह **अर्थेति** ॥ २५ ॥

सद्भावं यापयेद्यस्मात्सत्यस्तस्मात्किल प्रभुः ।
भावप्रधानो निर्देशोस्त्यन्तर्णीतो यतश्च णिच् ॥ २६ ॥

'सत्यं ज्ञानमनन्तं ब्रह्म' इति मन्त्रवर्णोक्तानि लक्षणानि विवरीतुं सृष्ट्यादि षट् प्रकरणानि प्रवृत्तानि । तत्र आनन्दमयप्रकरणं अनन्तशब्दविवरणम् । आनन्दपूर्णता च न सर्वगुणपूर्णतां विना घटते 'यो वै भूमा तत्सुखं नाल्पे सुखमस्ति' इति श्रुतेः । एवं च गुणपूर्णतैवानन्तशब्दार्थ इति पर्यवसितार्थसमर्थनायोत्तरप्रबन्धः । 'तत्र लक्षणेषु सत्यत्वं सृष्ट्या' 'तस्माद्वा एतस्मादात्मन आकाशः सम्भूत इति सृष्टिप्रकरणेन उक्तम्' इति सुधोक्तमाह **सद्भावमिति** । सच्छब्दः सद्भाववाची । 'सद्भावे साधुभावे च सदित्येतत्प्रयुज्यते' इति गीतायाम् । सद्भावो जन्म । यथोक्तं गीताभाष्ये 'सद्भावशब्देन प्रजननं सूचितमि'ति । तथा च जन्मवाचिनि कर्मण्युपपदे यातेरन्तर्णीतण्यर्थादातपेऽनुपसर्गे क इति कप्रत्यये कृतेऽयमस्मयादीनि छन्दसि इत्युपपदस्य भसंज्ञायां सत्यमिति भवति' इति । **भावप्रधानः=** पदार्थताऽवच्छेदकमुख्यविशेष्यकबोधजनकः ॥ २६ ॥

सत्त्वं सृष्टिस्संहृतिश्च जीवनं च विदां मते ।
कार्यात्मना विशरणं कारणस्य जनिर्मता ॥ २७ ॥

सृद्धातोर्विशरणं चार्थ इत्यपि संमतम् ।
यतः प्रागसतस्सत्त्वमुत्पत्तिरिति चोच्यते ॥ २८ ॥

अवसादनमप्युक्तं तद्धात्वर्थतया यतः ।
ततस्सत्त्वं संहृतिश्च भवेच्छब्दविदां मते ॥ २९ ॥

विद्यमानत्वमप्याहुस्सत्त्वं जीवनमेव तत् ।
इदं चाद्यैः प्रकरणैस्त्रिभिर्विव्रियते किल ॥ ३० ॥

सत्यशब्दं सृष्टिसंहर्तृजीवनकर्तृत्वरूपार्थत्रयपरतया निर्वक्ति चतुर्भिः श्लोकैः **सत्यमित्यादिना** ॥ सद्भावः जन्मेत्युक्तम् । तत्कथमित्यतः द्वेधा तद्दर्शयति

कार्यात्मनेति प्रागसत इति च। कारणात्मना सतः कार्यात्मना विकार एव जन्मेत्युक्तं भवति। तदनेन असदेवोत्पद्यते इत्यसत्कार्यवादिनः एवं सदेवोत्पद्यते इति सत्कार्यवादिनश्च निराकृता वेदितव्याः। '**विशरणं** शैथिल्यलक्षणम्। सदेः क्विबन्तस्य सत्त्वमिति रूपम्। तस्य संहृतिरर्थः। एवं अस्तेः शत्रन्तस्य भावप्रधानं सत्त्वमिति रूपम्। तस्य जीवनमर्थः। तथा च सत् सत्वं जीवनं विशरणं वा भूतानां यापयतीति सत्यमित्युक्तं भवति॥ **इदं**= सत्यशब्दोक्तं सृष्टिसंहारजीवनहेतुत्वरूपं लक्षणत्रयम्। **आद्यैः** ब्रह्मवल्ल्यां इत्यादिः। **प्रकरणैः** सृष्टिप्रकरणं अन्नमयप्रकरणं प्राणमयप्रकरणं चेत्येतैः क्रमेण त्रिभिः॥ २७॥ २८॥ २९॥ ३०॥

यत आत्मन आकाश इति भूतजनिं परात्।
आह सृष्टिर्महासृष्टिस्तेन नाल्पेति शंसति ॥ ३१ ॥

ब्रह्मणो लक्षणं नोचेत्कुम्भकारेऽपि गच्छति।
अबाध्यत्वमपीतो न तत्सृष्टिकथयापि न ॥ ३२ ॥

'सद्भावं यापयेद्यस्मादि'त्यादिना भाष्यकृता स्वेतरसर्वस्रष्टृत्वं लक्षणं सत्यशब्दार्थतयोक्तम्। तद्विवृणोति **यत** इत्यादिना **सार्धश्लोकेन**। अत्र स्रष्टत्वं इत्येवोक्तौ कुलालादौ अतिव्याप्तिः। अतः **सर्वेति** तदाह **महासृष्टिरिति**। आदिकालीनेत्यर्थः। तत्र ज्ञापकमाह **यत इत्यादिना**। तावत्युक्तेऽसंभवः अतः **स्वेतरेति**। अत्र विवक्षितसृष्टेः पराधीनविशेषावाप्तिरूपत्वात्। तस्याश्च आत्मशब्दवाच्ये पूर्णे ब्रह्मणि असंभवात्। तदेतदुक्तं श्रुतौ **आत्मन इति**। पराभिमतं सत्यशब्दार्थं निराह **अबाध्यत्वमिति**। **इतः** प्रपञ्चमात्रे अतिव्याप्तेः। हेत्वन्तरं **सृष्टिकथयेति** न हि अबाध्यत्वोक्तेः सृष्टिकथया सङ्गतिरस्ति इति भावः॥ ॥३१॥३२॥

वाग्विश्वं सत्यमित्याद्या यदबाध्यं जगज्जगौ।
ततोऽपि न यतोऽन्यत्र गतं प्राहुरलक्षणम्।
सूत्रे जन्मादिहेतुत्वलक्षणोक्तेश्च नेतरत् ॥ ३३ ॥

उक्तां प्रपञ्चेऽतिव्याप्तिं प्रमाणयति **वागिति**। सूत्रविरोधं च परोक्तार्थस्याह **सूत्रेणेति** ॥ ३३ ॥

अतः श्रुतिमतं वेत्ति प्राणोऽसौ भारतीपतिः।
अन्यस्तामन्यथीकुर्वंच्छून्ये तमसि पात्यते ॥ ३४ ॥

अतस्स्वेतरसर्वस्य स्रष्टृता सत्यता भवेत् ॥ ३५ ॥

भारतीपतिरिति हेतुगर्भं विशेषणम्। भारत्याः श्रुत्यभिमानित्वादिति हृदयम् ॥ ३४ ॥ ३५ ॥

पुनरन्नमयत्वोक्त्या महासंहर्तृतोच्यते।
अद्यतेत्ति च भूतानीत्युक्तेस्संहर्तृताऽन्नता ॥ ३६ ॥

सर्वजगत्संहर्तृत्वं लक्षणं अन्यशब्दार्थ उक्तः। तत्र सर्वजगदित्यनुक्तौ भेकसंहर्तरि सर्पे गतम्। सर्वजगदिति विशेषणे श्रुतिं प्रमाणयति **भूतानीति**। अत्तीत्यनेन संहर्तृत्वं च प्रमापितं ज्ञेयम्। अत्र सर्वेति विशेषणं यथायोग्यमनुसन्धेयम्। यथोक्तं तत्त्वसंख्यानटीकायां 'तत्र स्थितिनियमौ सर्वत्र। सृष्टिसंहृती नित्यानित्यस्यानित्यस्य च' इत्यादिना ॥ ३६ ॥

प्राचुर्यार्थो मयट्प्रोक्तस्स्वयं सूत्रकृतैव हि।
सूचनात्खलु तत्सूत्रमतः पंचसु तं नयेत् ॥ ३७ ॥

सर्वेति विशेषणस्य सूत्रे ज्ञापकमाह **मयदिति**। 'उपलक्षणत्वं शब्दानामानन्दमयपूर्विणामि'ति भाष्योक्तमाह **पञ्चस्विति** ॥ **सूचनादिति**। 'लघूनि सूचितार्थानि' इति सूत्रलक्षणोक्तेरिति भावः ॥ ३७ ॥

इति लक्षणसूत्रोक्तं तृतीयं लक्षणं श्रुतिः।
प्राहान्नमयतावाचा निन्द्यदेहस्तुनिर्न सा ॥ ३८ ॥

सूत्रेति । जन्माद्यस्येति सूत्रेत्यर्थः । **उक्तं** तद्भाष्योदाहृतस्कान्दपुराणे उक्तम् । **तृतीयमिति** । 'सृष्टिस्थितिश्च संहारो' इत्यत्र तृतीयतयोक्तमित्याशयः । ननु अन्नान्पुरुषः इति पूर्वत्र प्रसिद्धान्नपरिणतकोशस्यैव प्रतीतेः कुतोऽत्र अन्नमयशब्देन संहर्तृत्वरूपापूर्वार्थाश्रयणमित्यतः तत्रैव श्रुतावुत्तरत्रोदाहृतश्लोकोक्तस्तुत्यानुगुण्या-दित्याह **प्राहेति** । अस्याः श्रुतेः सकलप्रजास्रष्टृत्वप्राप्यत्वादिमहामहिमवर्णनपरायाः कथमपि 'देवसंज्ञितमप्यन्ते कृमिविड्भस्मसंज्ञितं' इति भागवते निन्दितस्य कोशाख्यदेहस्य वर्णनपरत्वासंभवादित्याह **नेति** ॥ ३८ ॥

रौद्रव्यापारताशङ्का छेदायास्यादितः कथा ॥ ३९ ॥

ननु श्रुत्या सृष्टिस्थितिसंहाराः क्रमशो वर्णनीयाः । अन्नमयप्रकरणेन सृष्टिसंहारयोः, पश्चात्प्राणमयप्रकरणेन जीवनरूपस्थितेर्वर्णनमित्येवं क्रमोल्लङ्घनेन वर्णने को विशेषहेतुरित्यतः वादिविवादसदसद्भावावेत्याह **रौद्रेति** । उपलक्षणम् । चतुर्मुखेत्यपि ग्राह्यम् । विष्णुर्जीवनहेतुरित्यत्र सर्वे सम्प्रतिपद्यन्त इति भावः ॥ ३९ ॥

प्राणनं जीवनं प्रोक्तं प्राचुर्यार्थे यतो मयट् ।
अतः प्राणमयत्वोक्त्या महापालकतोच्यते ॥ ४० ॥

'प्राणं देवा अनुप्राणन्ति मनुष्याः पशवश्च ये' इति अनुव्याख्यानोक्तदिशा प्राणशब्दस्य प्रागुक्तसत्यशब्दसमानार्थकत्वं दर्शयति **प्राणनमिति** । तथा च प्राणन्ति प्रवर्तन्ते जीवन्ति वा सर्वभूतान्यनेनेति निरुक्तिर्ज्ञेया ॥ ४० ॥

सर्वसामान्यवेत्तृत्वं ज्ञानत्वमिति च श्रुतिः ।
मनोमयगिरा प्राह यतो धातुस्स बोधने ॥ ४१ ॥

मनोमयं प्रकरणस्य ज्ञानशब्दार्थत्वं स्पष्टयति **सर्वेति** । विज्ञानमयप्रकरणस्य तच्छब्दार्थत्वं तु स्पष्टमेव ॥ ४१ ॥

यतो घटपटत्वादिसामान्यान्यपि वस्तुषु ।
सन्ति चित्रेष्वनन्तानि तत्तद्वेत्तापि सर्ववित् ॥ ४२ ॥

विशिष्य सर्ववेत्तृत्वं ज्ञानत्वमिति सा पुनः ।
विज्ञानमयतोक्त्या वीत्युपसर्गयुताऽब्रवीत् ॥ ४३ ॥

प्रागुक्तज्ञानतामात्रं सर्वज्ञत्वेन यत्ततः ।
न चेद्घटादिवृत्तेश्च ज्ञानत्वात्स्यादलक्षणम् ॥ ४४ ॥

'ननु अवबोधने' इति धातोर्भावे असुन्प्रत्यये विहिते मन इति ज्ञानमिति चैकार्थता भवति । अत्र ज्ञानं ब्रह्मेति लक्षणेऽभिहिते सकलचेतनसाधारण्यादलक्षणमेतदित्याशङ्कायां नावबोधमात्रं ज्ञानमिह विवक्षितम् । किन्तु सकलपदार्थसामान्यविशेषविषयकमित्यतो नातिव्याप्तिरि'ति सुधोक्तिमनुरुध्याह **यत इत्यादिभिस्त्रिभिः** । ज्ञानशब्दस्य वेत्तृत्वार्थत्वाद्वृत्तिज्ञानेऽतिव्याप्तिशङ्काऽनवकाश इत्याह **न चेदिति** ॥ ४२ ॥ ४३ ॥ ४४ ॥

सृष्ट्युक्त्याप्राप्तसार्वज्ञलक्षणस्येदमीरणम् ॥ ४५ ॥

जन्माद्यष्टके विज्ञानस्यापरिगणितत्वशङ्कां निराह **सृष्टीति** । तदुक्तं कर्मनिर्णये 'बुद्धिपूर्वकं सर्वकर्तृत्वात्सर्वज्ञत्वादयो गुणा उक्ता' इति । तट्टीकायां च 'कर्तृत्वं च कार्यकारकक्रियाफलाभिज्ञानतदिच्छाप्रयत्नपूर्वकः स्पन्दः । ततः सर्वकर्तेत्युक्ते सर्वज्ञः' सत्यकामः सत्यसङ्कल्पः समस्तशक्तिसमन्वित एवोक्तो भवतीति कथं नानेन ब्रह्मणः सगुणत्वसिद्धिरि'ति ॥ ४५ ॥

आनन्दमयवाचाऽन्ते स्वोक्तानन्तत्वमेव सा ।
जगौ किल तदानन्त्यमानन्दादिगुणैर्न किम् ॥ ४६ ॥

मन्त्रवर्णे अन्ते प्रोक्तस्यानन्तत्वलक्षणस्यैव विवरणं आनन्दमयप्रकरणेनान्तिमेनेति सुस्पष्टमेवेत्याह **किलेति** । अतोऽनन्तशब्दस्य गुणतः अपरिच्छेद एवार्थः न त्वेव परोक्तः वस्त्वभिन्नत्वरूपः प्रकरणविरोधादित्याह **तदिति** ॥ ४६ ॥

य(द्या)दानन्दो भवेन्नासौ कथं सृज्यं सृजेदिति ।
श्रुत्युक्तं सा जगौ सृष्ट्यै पूर्णानन्दाख्यलक्षणम् ॥ ४७ ॥

'महानन्दत्व एवास्य हेतुः कोऽन्यादिति स्फुटम्' इति अनुव्याख्यानोक्तं आह **यदीति**। **श्रुत्युक्तं**= श्रुत्या सोपपत्तिकं समर्थितम्। विष्णोरनानन्दत्वे जगतो निश्चेष्टकत्वप्रसङ्गनेनेति भावः ॥ ४७ ॥

सृष्ट्याद्यष्टकमध्यस्थज्ञानमोक्षप्रदत्वयोः।
उपयुक्ततया चैतद् द्वयं सूत्रकृतो मतम् ॥ ४८ ॥

एतद् द्वयमिति ज्ञानप्रदत्वोपयुक्ततया मनोमयविज्ञानमयप्रकरणाभ्यां सर्वज्ञत्वं मोक्षप्रदत्वोपयोगितया आनन्दमयप्रकरणेव आनन्दपरिपूर्णत्वं इत्येवं लक्षणद्वय-मिति योज्यम् ॥ ४८ ॥

व्याप्तत्वसर्वशक्तत्वदयालुत्वादिकान्गुणान्।
सृष्ट्यर्थान्संग्रहीतुं सा प्रागनन्तगुणान् जगौ ॥ ४९ ॥

'कर्तृत्वात्सगुणं' इति प्रागुक्तदिशा सृष्टिरनन्तगुणानाक्षिपतीत्याह **व्याप्तत्वेति** ॥ ४९ ॥

तत्तत्पूर्त्यै तत्र चैकं गुणं पूर्णमवर्णयत् ॥ ५० ॥

अनन्तशब्दस्य सकलगुणपरिपूर्णत्वार्थकत्वे तत्प्रपञ्चनपरेणानन्दमय-प्रकरणेन इतरगुणप्रहाणेन आनन्दगुणमात्रस्य पूर्णता कुतोऽभ्यधायीत्यतः उपलक्षणतयेत्यवेहीत्याह **तत्तदिति**। कण्ठतस्तद्ग्रहणं च सकलगुणमूर्धन्यत्वात्, 'यो वै भूमा तत्सुखं नाल्पे सुखमस्ति' इति श्रुत्या तेन सर्वगुणपूर्तिलक्षणस्य भूमत्वस्य स्वत एव लाभाच्चेति भावः ॥ ५० ॥

जन्मादिकर्तृतोक्त्या च सूत्राभिप्रेतलक्षणम्।
गुणानन्त्यं किल हरेस्ततोऽप्यानन्त्यमाहसा ॥ ५१ ॥

ततोऽपि। जन्मादिहेतुत्वलक्षणस्य ब्रह्मशब्दोक्तप्रधानभूतगुणपूर्णत्वलक्षण-सम्भावकत्वादपि ॥ ५१ ॥

यद्यप्येकैकसुगुणसंपूर्तिरपि लक्षणम् ।
जीवात्यन्तविभेदाय तथापि बहुकीर्तनम् ॥ ५२ ॥

नन्वनेकलक्षणोक्तिवैयर्थ्यम् । एकैकस्य व्यभिचाराभावादित्यत आह **जीवात्यन्तविभेदायेति** । संवादेन भेदज्ञाने दार्ढ्यसंपादनायेत्यर्थः । विभवादपीति ज्ञेयम् ॥ ५२ ॥

पृथक्पृथग्लक्षणतां वक्तुं वाऽनन्तविस्तृतेः ।
अशक्त्या वा सर्व(सि)शुद्ध्यै
तत्राद्यगुणशोधनम् ॥ ५३ ॥

एवं तर्हि अतिदार्ढ्यार्थं विशिष्य प्रत्येकं अनन्तलक्षणोक्तिः स्यादित्यतः श्रुतेस्तत्र सामर्थ्याभावादेव नैवमित्याह **पृथगिति** ॥ ५३ ॥

गुणास्सर्वेऽपि सिद्धास्स्युरानन्दस्य प्रपञ्चने ।
इत्यानन्दमयं स्तौति सर्वेयं वाऽन्तिमस्तुतिः ।
यदियं षट्प्रकरणी गुणानेवागृणात्प्रभोः ॥ ५४ ॥

सर्वगुणानां पूर्णानन्दाविनाभावं प्रागुक्तं स्मारयति **गुणा इति** ॥ प्रकारान्तरेण प्रकरणशुद्ध्या अनन्तत्वलक्षणविवरणपरेण अन्तिमेन आनन्दमयप्रकरणेन सर्वगुणपूर्णतालाभमाह **सर्वेति** । सर्वा इयं इति पदच्छेदः । बुद्धिसन्निहिता सृष्ट्यादि षट्प्रकरणी इत्यर्थः । **अन्तिमस्तुतिः** लक्षणेऽन्ते श्रुतस्य अनन्तत्वलक्षणस्य प्रपञ्चनरूपा । तत्कथमित्यत आह **यदिति** । **गुणान्** सत्यज्ञानपदोदितान् जगज्जन्मादिकर्तृत्वसर्वज्ञत्वादीन् । कतिपयगुणवर्णनं तु अनन्तगुणवत्त्वोपलक्षणाय दिग्दर्शनमात्रमिति भावः ॥ ५४ ॥

साकारत्वविदुःखत्वाप्राकृतत्वास्तितादयः ।
एकैकाङ्गबृहत्त्वाद्याः किं न सिद्ध्यन्ति तत्स्तुतौ ।
यतः प्रियशिरस्त्वाद्या अपि तस्य स्तुतौ स्तुताः ॥ ५५ ॥

किं चात्र प्रकरणेषु न केवलमन्नमयादिशब्दनिर्वचनमात्रलब्धानां किन्तु आनुषङ्गिकतयाऽम्नातानां सर्वेषां गुणानामेव संसिद्धिरिति निदर्शनाय लेशतस्तत्प्रकारं दर्शयति **साकारत्वेत्यादिना**। पुरुषविधत्वोक्त्या साकारत्वं, प्रियमेव शिरः इति अप्रियदुःखव्यावृत्त्या विदुःखत्वं, 'विज्ञानं यज्ञं तनुते,' 'आनन्द आत्मा' इत्यादिना ज्ञानानन्दरूपत्वोक्त्या अप्राकृतत्वं, पञ्चरूपमपि ब्रह्म जीवाद्भिन्नं अस्ति इति जानतां, 'सन्तं एनं मुक्तियोग्यं सुखिनं विदुरि'ति पञ्चप्रकरण्या अर्थसंग्राहके श्लोके फलकथनेन जीवात्यन्तभेदं, पुच्छस्यापि पूर्णत्वोक्त्या स्वगतभेदवर्जितत्वं, आदिपदेन 'सर्वमेव त आयुर्यन्ति' इत्यादिना मोक्षहेतुत्वं इत्यादीनां गुणानां स्तुतिलाभो यथायथं विभावनीयः ॥ ५५ ॥

यतस्सूत्रकृता मान्त्रवर्णिकं गीयते त्विति।
प्रोक्तैकवाक्यता तस्मान्मन्त्रार्थोऽन्यः कथं वद ॥ ५६ ॥

अनन्तशब्दस्य गुणपूर्त्यर्थकत्व एव व्याख्येयस्य मन्त्रवर्णस्य व्याख्यानभूतपञ्चप्रकरण्याश्च सूत्रोक्तः एकवाक्यतालाभो नान्यथेत्याह **यत इति**॥ ॥५६ ॥

एवं श्रुत्यर्थकुशलास्सर्वत्राप्येकवाक्यताम्।
कुर्युस्त्वाचार्यवन्तश्चेत्तिरस्कुर्युर्न चेच्छ्रुतिम् ॥ ५७ ॥

आचार्यवन्तः श्रीमत्पूर्णप्रमतिगुरुकारुण्यसरणिं प्रपन्नाः जयतीर्थादयः। अनन्तशब्दस्य वस्त्वपरिच्छेदमर्थं प्रजल्पतां वाक्यभेददोषापत्त्या श्रुतितिरस्कारः स्फुट एवेत्याह **न चेदिति** ॥ ५७ ॥

सूत्रोक्तसूचितान्येवं लक्षणानि श्रुतिस्सती।
प्राक्प्रस्ताव्यपुनश्चैवं विचार्योपरता किल ॥ ५८ ॥

सूत्रोक्तसूचितानि। जन्मादिसूत्रे उक्तानि तत्सूचितानि च। **सती** मीमांसान्यायोपकृतत्वात् प्रबला। प्रस्ताव्येत्यनेन उपक्रमः, विचार्य इत्यनेन अभ्यासादीनि उपरता इत्यनेन उपसंहारः इति तात्पर्यलिङ्गान्युक्तानि ध्येयानि ॥५८ ॥

प्राक्सर्वकर्तृतां पश्चात्तत्सिद्ध्यै सर्ववेत्तृताम् ।
सुखशक्तिकृपाद्याप्त्यै साऽन्ततोनन्ततां जगौ ॥ ५९ ॥

प्राक् सत्यपदेन । **तत्सिद्ध्यै** कर्तृत्वशरीरान्तर्गतत्वेनैव कर्मनिर्णय-टीकोक्तरीत्या सिद्धामिति भावः । जगश्रेष्टकत्वाऽन्यथानुपपत्त्या तद्धेतुव्यपदेशा-दिति सूत्रोक्तन्यायेन सुखशक्त्योः; परप्रयोजनार्थं सृष्टिनिर्वाहाय कृपादेः **आप्त्यै** सिद्ध्यै । **सा** मन्त्रवर्णश्रुतिः । अनेन लक्षणत्रयस्य निर्देशक्रमे उपपाद्योपपादकत्वं निमित्तमुक्तं ध्येयम् ॥ ५९ ॥

मुखतस्सूत्रकारोक्तं प्रागुक्तं ब्रह्मलक्षणम् ।
पश्चात्तत्सूचिते वा द्वे लक्षणे सान्वशिक्षत ॥ ६० ॥

निमित्तान्तरमप्याह । **मुखत इति ॥ प्रागुक्तम् ।** सूत्रे कण्ठत उक्तं जगज्जन्महेतुत्वं आदौ सत्यपदेनोक्तम् । **द्वे** सर्वज्ञत्वानन्तत्वे ॥ ६० ॥

इमां हि शास्त्रमर्यादामाचार्यस्तत्ववादिनाम् ।
वेद तस्मात्तदुदितं तत्त्वं नान्यदिति स्थितम् ॥ ६१ ॥

आचार्यः कश्छन्दसां योगमावेद इति श्रुत्युक्तः 'क'शब्दवाच्यो भाविचतुर्मुखः ॥ ६१ ॥

इतोऽप्यनन्तशब्दार्थो न परोदीरितो भवेत् ।
अनन्तमिति चैकत्र श्रुतिराह स्थलान्तरे ॥ ६२ ॥

आनन्दमिति तत्स्थाने प्राह तेनात्र योग्यता ।
गुणस्यैवास्ति तत्त्यागे दोषस्स्यादिति तर्कये ॥ ६३ ॥

स्थलान्तरे शाखान्तरे । **तत्स्थाने** अनन्तपदस्थाने । **प्राहे**त्यनेन 'सत्यं ज्ञानमानन्दं' इति समाख्याया निरवकाशत्वमुक्तम् । **योग्यता** समाख्यारूप-

प्रमाणविरोधाभावः । दोषः समाख्योतलङ्घनरूपः अनन्तगुणापलापदोषश्च ॥ ६२ ॥
॥६३ ॥

यतोऽस्त्येकपदस्यान्येष्वजहत्स्वार्थलक्षणा ।
आनन्दादिगुणैस्तस्मादानन्त्यं स्यादिदं प्रभोः ॥ ६४ ॥

श्रुत्योरेकार्थतैवं स्यादन्यथा भिन्नवाक्यता ॥ ६५ ॥

शाखान्तरे उक्तस्य आनन्दपदस्य उपलक्षणतया अनन्तगुणपरत्वम् । अन्यथा श्रुत्योः परस्परं विरोधापत्तिः । अतो युक्तं वाक्ययोरन्योन्यसमाख्यात्वमित्याह **यत** इत्यादिना । अभ्युपगम्य चेदमुक्तम् । समाख्यावाक्ये आनन्दरूपैकगुणमात्रोक्तावपि परोक्तस्य वस्त्वपरिच्छेदार्थानुपपत्तिरेवेत्यपि ध्येयम् ॥ ६४ ॥ ६५ ॥

नाल्पे सुखमिति श्रुत्या पूर्णत्वं सुखकारणम् ।
यदुच्यते ततो देशकालसद्गुणपूर्णता ॥ ६६ ॥

आनन्दत्वस्य सिद्ध्यर्थं हेतुत्वेनेह कीर्त्यते ।
इति वा सङ्गतिर्वाच्या समाख्यावाक्ययोस्तयोः ॥ ६७ ॥

मास्तु लक्षणा । आनन्दप्रयोजकतयैव गुणपूर्णत्वं संसिद्ध्यति । अतोऽपि समाख्यात्वं श्लिष्टम् । प्रयोज्यप्रयोजकभावश्च श्रुतिसिद्ध इत्याह **नेति** । "यो वै भूमा तत्सुखं नाल्पे.सुखमस्ति भूमैव सुखम्" इति श्रुतिमनेनाभिप्रैति । अत्र निरुपपदेन सुखशब्देन शाखान्तरे आनन्दशब्देन च पूर्णसुखमेवोच्यते । यदनन्याधीन-पूर्णानन्दसुखं स भूमा गुणतः पूर्णः इति व्यत्ययेनान्वयः । भूमैव सुखमित्यत्राप्येवम् । अल्पे अपूर्णे सुखं पूर्णसुखं नेति व्याप्त्युपपादनम् ॥ ६६ ॥ ६७ ॥

सौन्दर्येण समग्रेण ज्ञानेन च बलेन च ।
पूर्णस्य ह्याप्तकामस्य विभोर्नित्यस्य च प्रभोः ॥ ६८ ॥

सुखमेव भवेत्पूर्णं दुःखस्यावसरोऽपि न ।
तत्पूर्णसौख्यसिद्ध्यर्थमानन्त्योक्तिश्च शोभते ॥ ६९ ॥

प्रभोः स्वतन्त्रस्य गुणनियामकस्य। हेतुगर्भं विशेषणम्। तेनैव सर्वदा आनन्दादिसर्वगुणपूर्णत्वस्य दुःखादिदोषवर्जितत्वस्य च सिद्धेः। तदुक्तं अनुव्याख्याने, "यदधीना गुणाश्चैव दोषा अपि हि सर्वशः। गुणास्तस्य कथं न स्युः स्युर्दोषाश्च कथं पुनः ॥" इति ॥ ६८ ॥ ६९ ॥

अतो देशाश्च कालाश्च गुणतश्चान्तशून्यता ।
श्रुत्युक्तं तदनन्तत्वं नान्यत्तत्त्वमिति स्थितम् ॥ ७० ॥

अतः मन्त्रवर्णस्य षट्प्रकरण्याश्चैकवाक्यतासमर्थनेन ॥ ७० ॥

अनन्तश्रुतितश्चैव ह्यनन्तगुणता यतः ।
सिद्धा ततश्च नैर्गुण्यवादो मोदाय नेष्यते ॥ ७१ ॥

'अनन्तगुणता सिद्धेत्यनेन गुणसौरभेण, नैर्गुण्यवादो मोदाय नेष्यते' इत्यनेन शुद्धिसौरभेण, च अस्य सौरभस्य सङ्गतिरुक्ता ध्येया ॥ नञः अभावो विरोधश्चार्थौ । तथा च सुखाभावः, सुखविरोधिदुःखाप्तिश्च नैर्गुण्यवादस्य फले उक्ते भवतः ॥ ७१ ॥

किञ्चोक्तरीत्या देशाश्च कालाश्च गुणतस्तथा ।
नान्त इत्युदिते सर्वदेशकालगुणैस्सदा ।
संबन्ध इति शब्दस्य शक्यार्थस्त्वेक एव च ॥ ७२ ॥

स च योग्यतया धर्मेऽधर्मधर्मित्वमिष्यते ।
संयोगो देशकालाभ्यामिति सर्वस्य संमतम् ॥ ७३ ॥

एवं च वस्तुतोऽप्यस्य नान्त इत्युदिते सति ।
सर्वैश्च वस्तुभिस्सिद्ध्येत्सदा संबन्ध एव हि ॥ ७४ ॥

स्वमते व्याप्तित्रयोक्तिर्नान्योन्यं गतार्था परमते तु नैवमिति वक्तुमुपक्रमते **किं चेत्यादिना**। तथा हि। स्वमते, देशतः अनन्त इत्येवोक्तौ क्षणे, कालतः अनन्त इत्येवोक्तौ परमाणौ, उभाभ्यामानन्त्योक्तौ अव्याकृताकाशादौ अतिव्याप्तिपरिहाराय गुणत आनन्त्योक्तिरर्थवती। परमते तु प्रष्टव्यम्। वस्तुतः अनन्त इत्युक्ते देशतः कालत इत्यत्रेव सकलवस्तुसंबन्ध इत्यर्थः प्रायपाठानुरोधिनः तावदेष्टव्यः ॥ ७२ ॥ ॥७३ ॥ ७४ ॥

स च कुण्डपटादौ चेत्संयोगो देशकालवत् ॥ ७५ ॥

तत्तद्गुणक्रियाद्यैश्चेत्केषाञ्चिद्वादिनां मते।
संयुक्तसमवायादिः स्यात्संबन्धोऽपरेऽपि वा ॥ ७६ ॥

अयं च देशव्याप्त्युक्त्या गतार्थत्वान्न सार्थकः ॥ ७७ ॥

तत्र वस्तुशब्देन किं कुण्डपटादीनि द्रव्याणि विवक्षितानि उत तद्गतगुणक्रियादीनि, आहोस्विद्भगवन्निष्ठसद्धर्मा एव। नाद्यौ इत्याह **स चेति**। स च संबन्धः द्रव्यैः संयोगः गुणक्रियादिभिश्च संयुक्तसमवायोऽपरो वा भवतु। सः देशतः व्याप्तत्वोक्त्यैव सिद्ध इति तेन पुनर्वस्तुतोऽनन्तत्वोक्तिर्गतार्थैव ॥ ७५ ॥ ७६ ॥ ॥७७ ॥

यदि स्वनिष्ठसद्धर्मैस्संबन्धः शुभवस्तुभिः।
तदा स्याद्धर्मधर्मित्वं तच्चानन्त्यं गुणेन हि।
अतस्तन्न पृथक्प्रोचुस्तत्त्वज्ञास्तत्त्ववादिनः ॥ ७८ ॥

न तृतीयः इत्याह **तच्चेति**। तथा च घट्टकुटीप्रभातन्यायः इति भावः। **तत्** वस्तुतोऽनन्तत्वम्। वस्तुतोऽनन्तत्वोक्तिस्तव सर्वथाऽनर्थजनन्येव इति निष्टङ्कितमिति प्रघट्टिकार्थः ॥ ७८ ॥

धनैः पूर्णस्तदैव स्याद्धनं च बहुलं यदि।
तद्गुणैःपूर्णतावाचा गुणानां पूर्णताप्यभूत् ॥ ७९ ॥

समस्तगुणसंपूर्णमिति गीतातात्पर्यस्य टीकायां, समस्तेत्यनेनापौनरुक्त्याय 'संपूर्णमिति गुणानां प्रत्येकं संपूर्णतामाह' इत्युक्तम्। तदिदानीं स्मृतियुक्तिभ्यां समर्थयति **धनैरित्यादिना**। मणिरत्नकनकादिषु अन्यतमस्यैव बहुत्वे धनेन पूर्ण इत्येव लोको व्यवहरति। न तु धनैरिति। धनैरित्युक्ते तु प्रत्येकं मण्यादीनां धनानां बहुलत्वं ज्ञायते। एवं गुणेन पूर्ण इत्युक्तौ यत्किञ्चिदेकतमस्यैव पूर्णता लभ्येत। तावन्मात्रं मा लाभि इति गुणैरित्युच्यते। एवं एकैकशः अपूर्णैर्गुणैः साहित्यमात्रविवक्षायां समस्तगुण इत्येव वक्तुमुचितम्। न तु समस्तगुणसंपूर्ण इति। गुणैः समस्तः संपूर्ण इत्युक्तौ तु न केवलं गुणानां समस्तत्वलक्षणं आनन्त्यं किं नाम प्रत्येकं ज्ञानानन्दादीनां अपि तथात्वं लभ्यते इत्याह **गुणानामिति** ॥ ७९ ॥

अनन्तगुण इत्युक्त्वा प्रागसंख्यान्गुणान्स्मृतिः।
गुणांश्च पूर्णान्सैवाह ह्यनन्तो गुणतस्त्विति ॥ ८० ॥

स्पष्टस्मृतिबलादप्येवमित्याह **अनन्तेति**। **स्मृतिः** 'मय्यनन्तगुणेऽनन्ते गुणतोऽनन्तविग्रहे' इति भागवतम् ॥ ८० ॥

महद्गुणत्वादिति च महत्तामाह तां गुणे।
महत्त्वं त्वपरिच्छित्तिरिति सर्वे विदुर्बुधाः ॥ ८१ ॥

प्रत्येकं गुणानां अपरिच्छिन्नत्वलक्षणं महत्त्वं स्पष्टं अभिदधत् स्मृत्यन्तरं चाह **महदिति**। 'यमनन्तमाहुः' इति वाक्यशेषः। आहुरिति प्रयोगबाहुल्यकथनेन विद्वद्रूढिरप्यत्र प्रमाणमुक्तं ध्येयम्। **महत्त्वमिति**। अपरिच्छिन्नाकाशे एव महाकाशशब्दप्रयोगादिति भावः ॥ ८१ ॥

यथास्ति देशादानन्त्ये देशस्याप्यन्तशून्यता।
तथा गुणेनानन्त्येऽपि गुणस्याप्यन्तशून्यता ॥ ८२ ॥

प्रकृतिर्देशतोऽनन्तेत्युक्तिनिर्वाहाय देशस्यैव तावदानन्त्यं उररीकरणीयम्। यथोक्तं न्यायामृते अनन्तश्रुत्यर्थभङ्गे 'यथा देशाद्यपरिच्छेदाभिप्रायेण आकाशोऽनन्त इत्युक्ते देशादेराकाशतुल्यतया सत्त्वे सत्येव तदपरिच्छेदमात्रं सिद्ध्यति' इत्यादि।

एवं गुणतोऽनन्त इति प्रयोगनिर्वाहायैव प्रत्येकं गुणस्यानन्त्यं स्वीकर्तव्यमिति युक्त्यन्तरमुक्तार्थे आह **यथेति** ॥ ८२ ॥

वाच्यावश्यं न चेत्तस्य गुणतोऽनन्ततैव न ।
न ह्यल्पबलवान्मर्त्यो बलेनानन्त उच्यते ॥ ८३ ॥

व्यतिरेकनिदर्शनेन उक्तं न्यायं द्रढयति **न हीति** ॥ ८३ ॥

गुणसंख्यावधिर्नेति योऽनन्तगुण ईरितः ।
स एव गुणतोऽनन्तः प्रत्येकं गुणपूर्तितः ॥ ८४ ॥

इत्येव वाच्यस्स्मृत्यर्थो न चेत्स्यात्पुनरुक्तता ।
तत्सिद्धास्स्मृतियुक्तिभ्यां गुणाः पूर्णाः पृथक्पृथक् ॥ ८५ ॥

'मय्यनन्तगुणे' इति स्मृतौ अनन्तगुणे इति गुणतोऽनन्तविग्रहे इति च द्विवारमनन्तगुणशब्दोऽनन्तशब्दनिर्वचनाय प्रयुक्तः । अत एकः गुणसंख्याया निरवधित्वं अपरः प्रत्येकं गुणपूर्तिं चाभिधत्ते इति अवश्यमङ्गीकार्यम् । अन्यथा पौनरुक्त्यापत्तेरिति वक्ति **गुणेति** । फलितमाह **तदिति** ॥ ८४ ॥ ८५ ॥

न चेत्स क्वचिदज्ञस्स्यात्कदाचिद्वाज्ञता पतेत् ।
तद्देशकालव्याप्तस्य धर्मव्याप्तिर्बलादपि ॥ ८६ ॥

किं च गुणानां प्रत्येकं परिच्छिन्नत्वं कुत इति प्रष्टव्यम् । गुणिन एव परिच्छिन्नत्वात् उत गुणानां संयोगवदव्यावृत्तित्वात् । नाद्यः इत्याह **देशकालव्याप्तस्येति** । **बलात्** व्याप्तिबलात्, धर्मिणो यावती व्याप्तिः धर्मस्यापि तावती, यथा घटगतरूपस्य, इति दर्शनादिति भावः । उपलक्षणतया ज्ञानरूपगुणस्य परिच्छिन्नत्वोक्तौ बाधकमाह **न चेदिति** । देशतः परिच्छिन्नत्वोक्तौ क्वचिदिति कालतः परिच्छेदोक्तौ कदाचिदिति विवेको द्रष्टव्यः ॥ ८६ ॥

किं संयोगवदन्येऽपि गुणा रूपरसादयः ।
अव्याप्यवृत्तयो धर्मिव्याप्तौ व्याप्ता गुणाश्च तत् ॥ ८७ ॥

न द्वितीय इत्याह **किमिति**। किं आक्षेपे । संयोगवदिति परमतेनोक्तम् । स्वमते तस्याप्यव्याप्यवृत्तित्वानङ्गीकारात् ॥ ८७ ॥

सङ्कोचानौचित्यतश्च गुणतोऽनन्तता त्वियम् ।
बहुत्वाच्च महत्त्वाच्च गुणानामिति गम्यते ॥ ८८ ॥

वस्तुतस्तु गुणतोऽनन्त इत्येतावन्मात्रोक्त्यैव 'मुख्यामुख्ययोर्मुख्ये संप्रत्यय इति न्यायेन गुणानां संख्ययेव देशकालाभ्यामपि निरवधिकत्वं सिद्ध्यत्येव । समाख्यास्मृत्युदाहरणं तु उपष्टम्भकतयैवेत्याह **सङ्कोचेति। अनौचित्यत्वतः**= उक्तन्यायविरोधादित्यर्थः ॥ ८८ ॥

अपरिच्छिन्नधर्माणां तत्सत्यानां खधर्मिवत् ।
परिच्छिन्नत्वदज्ञानकल्पितत्वकथा वृथा ॥ ८९ ॥

अपरिच्छिन्नधर्माणां यावद्द्रव्यभाविनां देशकालसमव्याप्तत्वात् अभिन्नानामिति भावः । यथोक्तं तत्त्वविवेके 'यावद्वस्तु न भेदवत्' इति । तट्टीकायां च 'यत्पुनर्यावद्द्रव्यभावि तत्र भेदो नास्ति । किन्त्वत्यन्ताभेद एवेति' । **तत्** तस्मात् । अपरिच्छिन्नधर्माणां परिच्छिन्नत्वकथा, सत्यानां त्वदज्ञानकल्पितत्वकथा इति यथाक्रममन्वयः । द्वन्द्वान्ते श्रूयमाणः त्वप्रत्ययः प्रत्येकमभिसंबध्यते । यद्वा परिच्छिन्नं यत् कल्पकत्वेनाभिमतस्य तवाज्ञानं तेन कल्पितत्वकथा इति योज्यम् । सत्यस्य कल्पितत्वमेव नेति भावः । परिच्छिन्नत्वदज्ञानेति परमतेन स्वरूपकथनम् । यद्वा अज्ञानकल्पितत्वं नाम तदुपादेयत्वं परमतेऽभिप्रेतम् । अज्ञानं च परिच्छिन्नम् । अन्यथा ब्रह्मवत्तन्निवृत्त्यनुपपत्त्यापातात् । न हि परिच्छिन्नस्य अज्ञानस्य अपरिच्छिन्नधर्मोपादानत्वं सङ्घटीति । उपादानोपादेययोः समानदेशता-नियमादिति दूषणं द्रष्टव्यम् ॥ ८९ ॥

अमायिको हरिस्सिद्धस्तद्धर्मा अप्यमायिकाः ।
अणुभ्योऽखिलजीवेभ्यो विभेदश्च विभोरभूत् ॥ १० ॥

अज्ञानसामान्यकल्पितत्वनिरासेन तद्विशेषमायाकल्पितशङ्का गर्भस्रावेणैव निरस्तेत्याह **अमायिक इति । विभोः** व्याप्तस्य । हेतुगर्भं विशेषणम् । तथा **विभोः** स्वतन्त्रस्य गुणपूर्णस्य । तदनेन जीवेश्वरौ धर्मिसमसत्ताकभेदवन्तौ, अणुत्वमहत्व, स्वातन्त्र्यपारतन्त्र्यादिविरुद्धधर्माधिकरणत्वात् इति प्रयोगः सूचितः । अणुभ्य इत्युपलक्षणम् । व्याप्तेभ्यः परतन्त्रेभ्यः रमाऽव्याकृताकाशप्रकृत्यादिभ्यः एवं मध्यमपरिमाणेभ्यो भूभूधरादिभ्यो भेदसिद्धिरपि निष्प्रत्यूहा ॥ १० ॥

विरूद्धधर्मध्रौव्येण भेदोऽपि ध्रुवतामगात् ।
अतोऽनन्तश्रुतिर्वादद्वयस्याप्युत्तरं ददौ ॥ ११ ॥

न च विरुद्धधर्मत्यागेनाभेदप्रत्याशा । प्रमाणसिद्धानां ध्रौव्येण त्वद्दुरभिलषिताविवक्षामात्रेण तत्त्यागायोगादेवेत्याह **विरूद्धेति** ॥ यथोक्तं चन्द्रिकायां निर्दोषश्रुतिसाक्षिभ्यां प्रमिते ब्रह्मजीवयोः । सर्वशक्त्यल्पशक्तित्वे मिथ्येति च न युज्यते ॥ इति ॥ **वादद्वयस्य** अत्यन्तभेदस्य स्थापनेन अभेदवादस्य भेदाभेदवादस्य च । यद्वा गुणानन्त्यसाधनेन नैर्गुण्यवादस्य अष्टगुणवत्त्वाभिधायकतार्किकवादस्य इत्यादि बोध्यम् । **ददौ ।** समस्तगुणसंपूर्णं इति गीतातात्पर्ये नारायणं विशिंषन् भाष्यकारः । श्रुतिरिति कर्तृत्वोपचारस्युकरणेऽपि निरवकाशत्वरूपातिशयस्फोरणाय ॥ ११ ॥

तत् त्रिवर्णं पदमिदं त्रिविक्रमपदोपमम् ।
पराजयाय दैत्यानां जयाय च सतामभूत् ॥ १२ ॥

त्रिवर्णं त्र्यक्षरम् । अन्यत्र रक्तशुभ्रनीलाख्यवर्णत्रयोपेतम् । **इदं पदं** अनन्ताख्यम् । **पदोपमं** चरणसदृशम् । त्रिविक्रमेति 'त्रीणि पदा विचक्रमे' इति श्रुतिं सूचयति । **दैत्यानां** मायावाद्यादीनां अन्यत्र बल्यादीनाम् । **पराजयाय** निग्रहाय अन्यत्र ऐश्वर्यभ्रंशाय । **सतां** तत्त्ववादिनां अन्यत्र इन्द्रादीनाम् । **जयाय**

सिद्धान्तस्थापनाय अन्यत्र त्रैलोक्यैश्वर्यलक्षणोत्कर्षसिद्धये। तदुक्तं श्रुतौ 'वसु स्पार्हमुत जेत्रोत दाता' इति। अनेन भेदसौरभोपक्षेपोऽपि कृतो ज्ञेयः ॥ ९२ ॥

सर्वोपनिषदामर्थं निर्णेतुं बादरायणः।
निर्ममे ब्रह्मसूत्राणि सूचनात्सूत्रमुच्यते ॥ ९३ ॥

अत्र मायी प्रत्यवतिष्ठते। अनन्तशब्दस्य न गुणपूर्णत्वमर्थः। न चानन्दमयशब्दसमाख्यया तत्सिद्धिः। स्यादेवं यदि स शब्द आनन्दप्राचुर्यमभिचक्षीत। न चैवम्।तस्य कोशवाचित्वादेव। सूत्रे तत्पदस्य ब्रह्मणि समन्वयोक्तिरप्ययुक्ता। तत्प्रकरणस्थे श्लोके ब्रह्मणः आनन्दमयपुच्छत्वेन 'ब्रह्म पुच्छं प्रतिष्ठा' इत्याम्नानात्। तदेवावयवोऽवयवी चेत्यसामञ्जस्यप्रसङ्गात्। श्रुतिसूत्रयोश्च श्रुतेरेव प्राधान्येन तद्विरोधे 'गुणे त्वन्यायकल्पने'ति न्यायेन सूत्राणां कथञ्चिद्योजनीयत्वात्। अत आनन्दमयस्याब्रह्मत्वेन न तत्समाख्यया अनन्तशब्दस्य गुणपूर्णत्वार्थकत्वं किन्तु मदुक्तरीत्या वस्त्वपरिच्छेदात्मकत्वमेवेति। तदेतदपाकर्तुं यत् श्रुतेः सूत्रापेक्षया प्राधान्यमित्युक्तं तत् तावत् प्रमाणविरोधादेव दूषयति सर्वेत्यादिभिः अन्वगादित्यन्तैः सप्तभिः श्लोकैः। **निर्णेतुमिति**। 'पुनस्तस्यार्थवित्तये। चकार ब्रह्मसूत्राणि येषां सूत्रत्वमञ्जसा' इति 'शब्दजातस्य सर्वस्य यत्प्रमाणश्च निर्णय' इति च स्मृतेरित्याशयः। ननु कतिपयैः सूत्रैः कथमनन्तवेदार्थनिर्णय इत्यतः उक्तं **सूचनादिति**। विश्वतोमुखत्वादल्पाक्षरत्वाच्चेत्यर्थः ॥ ९३ ॥

अतस्तत्सूचितं ग्राह्यं किं पुनस्सकृदीरितम्।
तदभ्यस्तं समस्तं तु चूडारत्नायते विदाम् ॥ ९४ ॥

अतः सूचितस्यापि सूत्रार्थत्वात्। **तदभ्यस्तं** सप्तभिः सूत्रैः समर्थितम् ॥ ॥९४ ॥

निर्णायकानुसारेण निर्णेयस्य गतिं विदुः।
अध्वनीनस्य स ह्यध्वा यो दीपेन प्रदर्शितः ॥ ९५ ॥

निर्णयापेक्षया निर्णायकस्य प्राबल्यमिति न्यायं विद्वत्संमत्या दृष्टान्तोक्त्या च द्रढयति **निर्णायकेति**। अथ्वा निर्णेयः, दीपः निर्णायकः। दीपोऽपि सूत्रवत्संशयादिनिरासक इति युक्तं तस्योपमानत्वम्। संशयादिनिरासेन अनुग्राहिकाया इतिकर्तव्यतायाः करणापेक्षयाऽपि प्राबल्यं प्रदानसूत्रे गुरुप्रसादस्य शिष्यप्रयत्नापेक्षया बलवत्त्वव्युत्पादनेन निर्णीतमित्याह **हीति** ॥ ९५ ॥

चोरः प्रदीपनाशं च कामयेत्कामुकोऽपि वा।
राज्ञ्या राजगृहं रात्रौ यान्त्या सोर्थ्यः पदे पदे ॥ ९६ ॥

चोरः मायी। **प्रदीपनाशं** सूत्रार्थापलापम्। यदुक्तमभियुक्तैः 'अचूचुरद्वेदसमूहवाहं ततो महातस्करमेनमाहुरि'ति। **कामुकः** गुणपूर्णत्वापलापेन ब्रह्मात्मैक्यकामुकः। कीचकवदयोग्यार्थदुरभिलाषी। **राज्ञ्या** श्रुत्या। राजगृहं विष्णोः सर्वोत्कर्षम्। **यान्त्या** प्रतिपादयन्त्या। **रात्रौ** दुर्भाष्यसन्तमससन्ततौ। **सः** सूत्राख्यानुग्राहकः। **पदे पदे** स्वघटकानन्तवैदिकपदानां समन्वयसिद्ध्यर्थम्। तदुक्तं सुधायां 'ब्रह्ममीमांसाशास्त्रानुपकृता हि वेदादयो विष्णोरवाचकास्तदुपकृताश्च तद्वाचका भवन्तीति' ॥ ९६ ॥

अतस्सूत्रं तिरस्कृत्य यः श्रुत्यर्थमतत्त्ववित्।
वक्ति स श्रुतिसुन्दर्याः कण्ठात्सूत्रं जिहीर्षति ॥ ९७ ॥

अतः सूत्राणामेव अनुग्राहकत्वेन प्राधान्यात् **सूत्रं** गुणपूर्णत्ववर्णनपरं आनन्दमयाधिकरणं **तिरस्कृत्य** कोशपरतया अन्यथा योजयित्वा, **अतत्त्ववित्** विपरीतज्ञानी, **सः** मायी कण्ठात्सूत्रं महातात्पर्यविषयीभूतम्। विष्णोर्गुणोत्कर्षरूप-मर्थं **जिहीर्षति** अपलपितुमीहते ॥ ९७ ॥

उपकर्तर्यपकृतिः कृतघ्नस्यैव शोभते।
धर्मवक्त्री कथं जह्यात्सूत्रं स्वार्थकृते कृतम् ॥ ९८ ॥

उपकर्तरि स्वभाष्यमूलभूतसूत्रकारे । **अपकृतिः** तद्विरुद्धभाषित्वं **कृतघ्नस्य** मायिनः । **धर्मवक्त्री** धर्मव्यवस्थापनपरा 'न हि धर्मादिसिद्धिः स्यान्नित्यवाक्यं विना क्वचिदि'त्युक्तेः । **जह्यात्** तद्विरुद्धार्थं वर्णयेत् ॥ ९८ ॥

सतीमप्यसतीं कर्तुं चकमे दशकन्धरः ।
सा वायुतनयादेशैस्तृप्ता तन्मार्गमन्वगात्   ॥ ९९ ॥

सतीं भगवता बादरायणेन प्रणीतां मीमांसाकृतिं **असतीं कर्तुं** असाधुनिबन्धतमसावकुण्ठितत्वेन अप्रणीतामिव कर्तुं **दशकन्धरः** दशजिह्वः बहुव्याहतभाषी इति यावत् मायी । चकमे इत्यनेन तस्य दुष्कामनामात्रं तु तत्र; न पुनरर्थसिद्धिरित्याह **सेति** । वायुतनयस्य मध्वस्य उपदेशैः भाष्यवचनैः । **तन्मार्गं** तत्प्रदर्शितं भगवदवयवावयविनोः अत्यन्ताभेदरूपमर्थं **अन्वगात्** सज्जनान् समशिक्षयन् । अन्यत्र दशकन्धरः रावणः । **वायुतनयः** रामवचोनयः हनूमान् तस्य **आदेशैः** रामसन्देशरूपवचोभिः ॥ ९९ ॥

ब्रह्मशब्दबलात्पुच्छमेव ब्रह्मेति दुर्धियः ।
श्रुतिस्सूत्राध्वनाऽऽनन्दमयं ब्रह्मविशंसति   ॥ १०० ॥

आनन्दमयनयस्य मायिभाष्यं सूत्रविरोधितया दुर्भाष्यमिति समर्थयते **ब्रह्मेत्यादिना** । **दुर्धियः** मायिनः वदन्तीति शेषः । पुच्छमेव नत्वानन्दमयं अवयविनं इत्येवकारार्थः । निराह **श्रुतिरिति** । **सूत्राध्वना** आनन्दमयोऽभ्यासादिति आनन्दमयस्य अवयविनोऽपि ब्रह्मत्वप्रतिपादकसूत्रानुसारेण । **क्वचि** 'असन्नेव स भवति' इत्यादिश्लोके ॥ १०० ॥

प्राक्प्रस्ताव्यानन्दमयं श्लोके तत्रोदिते श्रुतिः ।
द्विरुक्तब्रह्मशब्देन कथं ब्रह्म न तं जगौ   ॥ १०१ ॥

प्राक् 'अन्योन्तर आत्माऽऽनन्दमयः' इत्युपक्रमे । आनन्दमयं अवयविनम् । **तत्र** अवयविनि विषये । **उदिते श्लोके इति** । 'तदप्येष श्लोको भवति' इत्यत्र तत् इत्यनेन तत्र उक्ते अर्थे आनन्दमयावयविविषये इति स्पष्टमुक्तेः

श्लोकप्रकरणयोरेकार्थत्वं सिध्यतीति भावः। **द्विः=** द्विवारं 'असद्ब्रह्मेति' 'अस्ति ब्रह्मेति' इत्येवम् ॥ १०१ ॥

श्लोकश्लोक्यो यतोऽन्यत्र सर्वत्राङ्गीकृतोऽत्र च।
श्लोक्योऽङ्ग्येव यदि ब्रह्मशब्दशक्त्या-
ऽपकृष्यते ॥ १०२ ॥

तर्ह्येकस्य द्वयोश्शक्त्या स्यादङ्गिन्येव कर्षणम्।
द्वयोर्हि शक्तिर्महती चतुर्भिस्सङ्गृहीतयोः ॥ १०३ ॥

श्लोक्यः प्रतिपाद्यः। **अन्यत्र सर्वत्र=** इतरेषु अन्नमयादिचतुर्षु प्रकरणेषु। **अङ्गीकृतः=** अङ्ग्येवेत्यत्रापि उपस्कर्तव्यम्। अतः इति लभ्यते। **अत्र च** आनन्दमयश्लोकेऽपि। **अङ्गी एव** अङ्गीकर्तव्य इति शेषः। प्रायपाठानुरोधात्, 'तदप्येष' इति स्पष्टोक्तेश्चेति भावः। एवमपि **यदि ब्रह्मशब्दशक्त्या** पुच्छे ब्रह्मपदप्रयोगादिति यावत्। **अपकृष्यते=** अङ्गाङ्गिनोर्भेदं परिकल्प्य ब्रह्मशब्दः अङ्गिनः प्रच्याव्य अङ्गविषयतया योज्यते। **तर्हि** अङ्गाङ्गिनोरभिन्नयोरुभयत्र ब्रह्मपदसंबन्धसंभवेऽपि अन्यतरस्मिन्नेव तद्योजनीयमिति दुराग्रहे **एकस्य** पुच्छे श्रुतस्यैकब्रह्मशब्दस्य। **द्वयोः शक्त्या** अङ्गिनि पूर्वोक्तरीत्या द्विवारं पठितब्रह्मशब्दसमभिव्याहारशक्त्या, अङ्गिन्येव **कर्षणं=** आकृष्य योजनं न्याय्यमिति शेषः। तत्र युक्तिद्वयं आह **द्वयोरिति**। सकृत्प्रयोगात् द्विवारं प्रयोगस्य बलवत्त्वादिति भावः। **चतुर्भिरिति** अन्नमयादिषु चतुर्षु प्रकरणेषु अङ्गिन एव श्लोके वर्णितत्वात् अत्रापि तस्यैव प्रकारस्य अनुसर्तव्यादिति भावः ॥ १०२ ॥ ॥१०३ ॥

दृढसूत्रनिबद्धस्य कथं चास्यापकर्षणम्॥
उत्कर्षो ह्यस्मदर्थे स्यादपकर्षस्त्विहोच्यते ॥ १०४ ॥

इतश्चैवमित्याह। **दृढेति**। आनन्दमयं पक्षीकृत्य सूत्रकृता ब्रह्मशब्दो हेतुकृतः। तस्य हेतोः पक्षादन्यत्र तद्रीत्याऽपकर्षणे स्वरूपासिद्धो हेतुः स्यादिति

आक्षिपति **कथमिति**। आनन्दमयशब्दस्य पक्षगतस्य पुच्छब्रह्मणि लक्षणेति त्वदीयभाष्यं तु सूत्रविरुद्धमिति त्वयैवाभ्युपगतमिति तिरस्कारार्हमेवेति भावः। सर्वथाऽस्मदुक्त एवार्थः श्लाघ्य इत्याह **उत्कर्ष इति**। श्रेष्ठे, ऊर्ध्वभागे पठिते च अङ्गिनि आकर्षणं योजनमिति हृदयम्। **अपकर्षः** निकृष्टे अधोभागे पठिते च पुच्छे योजनम्। **उच्यते** त्वयेति शेषः। इदं प्रतिबन्दीग्रहणमात्रम्। वस्तुतस्तु द्वयोरपि पूर्णयोरङ्गाङ्गिनोरपकर्षोत्कर्षावेव नेति बोध्यम् ॥ १०४ ॥

सर्वोत्कृष्टा च विद्येयमुत्कर्षं सहते परम्।
अपकर्षेऽपि ते कोशस्यैकदेशं विशेन्न सा ॥ १०५ ॥

इयं आनन्दमयविद्या। **सर्वोत्कृष्टा** सर्वापेक्षितानन्दरूपगुणपूर्णत्वस्य परमात्मनः प्रतिपादनपरत्वात्। केवलं पूर्वोक्तनिर्वचनानुरोधेन उत्कर्षमेव सहते। त्वद्भाष्यरीत्या तु जडकोशत्वकथने विद्याया निकृष्टत्वं तत्रापि तदेकदेशपुच्छत्वकथने निकृष्टतरत्वं चापद्यते। न तद्युक्तिसहम्। न खलु स्वयं योग्या सती विद्या आत्मनोऽयोग्यतरत्वापादकं जडपुच्छप्रतिपादनपरत्वं जातु समीहेतेति भावः ॥ १०५ ॥

अतः श्रुतेस्सूत्रकृतश्चैको मार्गो निरर्गलः।
खलस्य सूत्रभाष्यार्थप्रवृत्तस्यापरो भवेत्।
निमित्तसाम्येऽप्येकत्र पक्षपाताद्दुराग्रही ॥ १०६ ॥

अतः सूत्राणां श्रुत्यनुग्राहकत्वात्। **श्रुतेः** तन्मुख्याभिमानिन्या लक्ष्म्याः। **सूत्रकृतः** तत्पतेः बादरायणस्य च **एको मार्गः** अन्योऽन्यानुकूलभावः, **निरर्गलः** विरोधासहिष्णुः। **खलस्य** तयोरन्योन्यं दूरीकरणदुरीहादूषितस्य रावणस्येवेति ध्वनिः। **अपरः** श्रुतेः सूत्राद्वियोजनदुरुद्यमः। तदुक्तमनुव्याख्याने 'ब्रह्मताऽवयवेऽपि स्यात्तथाऽवयविनि स्वतः' इत्यादिना॥ **निमित्तसाम्येऽपि** अवयवावयविनोः ब्रह्मशब्दप्रवृत्तिनिमित्तपूर्णत्वसाम्येऽपि ॥ १०६ ॥

उभयोर्ब्रह्मताऽयोगादेकत्यागो यदीष्यते ।
सर्वस्य ब्रह्मता तर्हि केन वा घोषिता भुवि ।
शिष्यो ब्रह्म गुरुर्ब्रह्म सर्वं ब्रह्म जगत्किल ॥ १०७ ॥

मोदानन्दप्रमोदादि न ब्रह्म किल चिन्मये ।
ब्रह्मणस्सुखरूपत्वे सुखस्य ब्रह्मता न किम् ॥ १०८ ॥

एकस्य अवयविनो ब्रह्मत्वत्यागः । अयमाशयः । भेदो मिथ्या भेदत्वादिति युक्त्या सर्वप्रमाणसिद्धभेदमात्रापलापिनः मायिनः अवयवावयविभेदसत्यत्वकथने हेतोर्व्यभिचारः स्फुट एव इत्यपहसनीयैषा स्वव्याघातकरी प्रक्रियेति ॥ १०७ ॥ ॥१०८ ॥

आनन्दं ब्रह्म कं ब्रह्मेत्यादि वेदो न किं श्रुतः॥ १०९ ॥

आनन्दमिति श्रुतौ आनन्दस्य पूर्णत्वमुक्त्वा तस्यैव ब्रह्मत्वोक्तेश्चानन्दमयस्य ब्रह्मत्वं सिद्धमित्याह **आनन्दमिति** ॥ १०९ ॥

विरुद्धजीवब्रह्मैक्ये यस्याशा भूयसी तव ।
अङ्गाङ्गिनोः कुतो नैक्यमेकजातीययोर्वद ॥ ११० ॥

किं च 'एकमेवाद्वितीयं ब्रह्म' इति श्रुतौ एकशब्देन स्वगतो भेदो निषिध्यते इति त्वयैव 'वृक्षस्य स्वगतो भेदः पत्रपुष्पफलादिभिः' इत्यादिना व्याख्यातत्वेन अत्र पुनरङ्गाङ्गिनोर्भेदकल्पनं स्वव्याहतमित्याह **अङ्गेति** ॥ ११० ॥

केशस्य ब्रह्मता दृष्टा केशवस्यापि किं न सा ॥ १११ ॥

केशस्येति ॥ यथोक्तमनुव्याख्याने, "ब्रह्मताऽवयवेऽपि स्यात्तथाऽवयविनि स्वतः । यथैव कृष्णकेशस्य कृष्णस्य ब्रह्मताऽखिला ॥ दर्शिता चैव पार्थाय निस्सीमाः शक्तयोऽस्य हि ।" इति । **केशस्य** कृष्णस्य । 'परंब्रह्म परंधाम पवित्रं परमं भवान्' इति गीतोक्तेः । 'सर्वमेतदृतं मन्ये यन्मां वदसि **केशव**' इति च ॥ १११ ॥

पुच्छस्य ब्रह्मतायां तु मध्यस्याब्रह्मता कथम्।
मृत्पुच्छं मृण्मयस्योक्ष्ण इत्यज्ञाभाणकं स्मर॥ ११२ ॥

मृदिति ॥ दृष्टान्ते अवयवावयविनोर्भेदाभेदसद्भावेऽपि अभेदमात्रमुपादाय दृष्टान्तोक्तिरिति मन्तव्यम् ॥ ११२ ॥

किं च त्यजसि चेदेकं पूर्वं त्यज भजापरम्।
साक्षात्सूत्रविरुद्धार्थे मतिरासीत्कथं तव।
उत्सूत्रभाष्यं दुर्भाष्यं लक्षणज्ञान्विचारय ॥ ११३ ॥

उपसंहारस्योपक्रमापेक्षया प्राबल्यपर्यालोचनयाऽपि आनन्दमयस्यैव ब्रह्मत्वं सिध्यति न तु त्वद्रीत्या पुच्छस्येत्याह **किं चेति**। **पूर्वं** प्रकरणे पूर्वप्रतिपादितं पुच्छस्य ब्रह्मत्वम्। **अपरं** उपसंहारश्लोके ब्रह्मशब्दाभ्यासेन समर्थितं आनन्दमयस्य ब्रह्मत्वम्। एवं सति सूत्रविरोधोऽपि तव परिहृतः स्यदिति वक्ति **साक्षादिति** ॥ **मतिः** दुर्मनस्त्वम्। कथमिति मृदूक्तिः। वस्तुतस्तु 'तस्मिन्दुर्मनसि तदेव शोभनं स्यात्' इत्यभियुक्तवचनेन तव तामसस्वरूपानुरूपैव दुर्मतिरिति हृदयम्। **उत्सूत्रेति**। तदुक्तं 'स्वसूत्रजातस्य विरुद्धभाषी' तद्भाष्यकारोऽहमिति ब्रुवन्यः' इति वर्णयतः **लक्षणज्ञानान्** सुमध्वविजयकृत इति भावः ॥ ११३ ॥

क्रीडतेऽनन्तरूपैर्यस्तांश्चैकीकुरुते प्रभुः।
तदा मूलं न किं ब्रह्म तानि रूपाणि वा न किम् ॥ ११४ ॥

क्रीडते 'अङ्गाङ्गित्वेन भगवान् क्रीडते पुरुषोत्तमः' इति भाष्योक्तेः। **एकीकुरुते** 'पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते' इति श्रुतेः ॥ ११४ ॥

पादौ ब्रह्म करौ ब्रह्म मध्यं ब्रह्म शिरो हरेः।
ब्रह्मैवेदं सर्वमिति श्रुत्या ह्येषोऽर्थ ईरितः ॥ ११५ ॥

'सर्वं खल्विदं ब्रह्म' इति श्रुतिं प्रकृतानुरूपार्थे प्रमाणयति **पादाविति** ॥ ॥११५ ॥

आब्रह्माण्डं हि पादोऽस्य रोम्णि ब्रह्माण्डराशयः ।
शिशोर्मुखे जगत्सर्वं किं न पूर्णं परात्मनः ॥ ११६ ॥

ज्ञानिनां प्रत्यक्षाच्च पादरोममुखाद्यवयवानां प्रत्येकं पूर्णतामाह ॥ **आब्रह्माण्डमिति**। पाद इति त्रिविक्रमावतारदर्शिनां बल्यादीनां, रोम्णीति वराहरूपदर्शनश्चतुर्मुखस्य, शिशोरिति च यशोदायाः प्रत्यक्षाणि क्रमेणोक्तार्थे प्रमाणान्यनुसन्धेयानि ॥ ११६ ॥

आनन्दमयमध्यस्यानन्दो ब्रह्मेति किं न सा ।
सहेतुकं ब्रह्मभावमाह संशयनुत्तये ॥ ११७ ॥

अन्तरङ्गज्ञापकम् निरवकाशमाह **आनन्दमयेति**॥ भृगुवल्ल्यां खलु 'आनन्दाद्ध्येव खल्विमानि भूतानि जायन्ते' इति आनन्दस्य जगत्सृष्ट्यादि-लक्षणहेतुकथनेन ब्रह्मभावः समर्थितः। स एवानन्दः ब्रह्मवल्ल्यां आनन्दमयस्य 'आनन्द आत्मा' इति आत्मशब्दितमध्यदेह उक्तः। भृगुवल्ल्यां 'तस्मा एतत् प्रोवाच' इति प्रत्येकं अन्नादिरूपाणां एतच्छब्देन ब्रह्मवल्लीस्थरूपाणामेव परामर्शः स्फुटमवगम्यते। तेन उभयोरपि प्रकरणयोरेकवाक्यतया एकस्थानत्वमवसीयते। तेन तत्रोक्त आनन्दः, अत्रोक्तः आनन्दमयश्चैक एवेति संसिध्यति। तथा च आनन्दमयस्यैव आनन्दमयो मध्यदेह इति अवयवावयविनोरैक्यं यदा सिद्धम् तदा समानन्यायेन पादभूतब्रह्मण आनन्दमयत्वे संशय एव नास्कन्दतीत्याह **सहेतुकमिति**॥ ११७ ॥

अङ्गस्य पूर्णतायां हि किं वाच्याऽङ्गिनि पूर्णता ।
पदस्थौल्याददतिस्थौल्यं किं नास्तीभकलेवरे ॥ ११८ ॥

प्रौढिवादेन आनन्दमयस्य परिपूर्णतायां परप्रक्रिययैव सिद्धां युक्तिमाह **अङ्गस्येति**। आनन्दमयः अवयवी, पूर्णः, पूर्णावयवत्त्वात् यदवयवः यथाभूतः तदवयव्यपि तथाभूतः यथा स्थूलपादोपेतः गजकलेवरोऽपि स्थूलः इति प्रयोगोऽवगन्तव्यः। अत्र दृष्टान्तेऽवयवावयविनोर्भेदाभेदौ। दार्ष्टान्तिके तु

अत्यन्ताभेदः। तेन दृष्टान्ते अवयविनोऽवयवापेक्षयाऽतिशयस्थौल्यरूपातिशयवत्त्वेऽपि, दार्ष्टान्तिके ब्रह्मणि उभयोरपि एकविधमेव निरतिशयम् पूर्णत्वमिति विशेषोऽवगन्तव्यः। आनन्दमयस्य पूर्णतासिद्धिस्तु निष्प्रत्यूहा। तच्च परस्यानिष्टमेव ॥ न चासिद्धिः। पादस्य ब्रह्मत्वेन पूर्णतायाः परेणैवाङ्गीकारात् ॥ ॥११८ ॥

पुच्छे ब्रह्मपदादन्यन्न ब्रह्म यदि ते मते।
तर्ह्यनानन्दता पुच्छे मध्यस्यानन्दताश्रुतेः ॥ ११९ ॥

ते मते अङ्गि अङ्गाद्भिन्नं इति मते। **अन्यत्** अङ्गि अङ्गान्तरम् वा। अङ्गाङ्गिनोर्भेदे अङ्गानामपि परस्परम् भेदः बलादापतति यतः **तर्हि** पादमध्यदेहयोर्भेदस्यापि अङ्गीकर्तव्यताऽऽपत्त्यां। **श्रुतेः** 'आनन्द आत्मा' इति श्रुतेः। **पुच्छस्य** मध्यदेहभिन्नस्य पादस्य। मध्यस्य आनन्दत्वे अपरिहार्यम्। तच्च तवानिष्टमिति त्वन्न्यायस्त्वामेव हन्तीति भावः ॥ ११९ ॥

क्रयविक्रयपक्षे स्यादुभयोश्च द्विरूपता।
तदुत्सूत्रस्वभावत्वादेव सूत्रविसर्जनम् ॥ १२० ॥

यदि पुनरुक्तदोषपरिहाराय अङ्गयोरभेदमुपगम्य पुच्छस्य आनन्दरूपताम् ब्रूयाः तर्हि अङ्गाङ्गिनोरप्यभेदापत्त्या आनन्दमयस्य ब्रह्मतासिद्धिः। **तत्** श्रुतिसूत्रयोर्विरोधगन्धस्याभावात्। **सूत्रविसर्जनम्** सूत्रस्य निर्निमित्तम् अप्रामाण्यकल्पनम्। **उत्सूत्रस्वभावात्** न केवलम् कपटयतिवेषधारणेन किं नाम तत्पूर्वमपि गोदावरीतरणसमये अनादरेण यज्ञोपवीतप्रहाणाच्च। तदुक्तम् मणिमञ्जर्यां "नदीं तर्तुमवातरत्। तस्या ओघैर्हृते ब्रह्मसूत्रे तामुत्ततार सः। मां त्वं त्यजसि चेत्सूत्र त्वां प्रागेवाहमत्यजमि"त्यादि ॥ १२० ॥

यस्त्वं समन्वयाध्यायात्पादमेकं व्ययोजयः।
तस्यानन्दमयात्पुच्छविच्छेदे किं भयं च तत्॥ १२१ ॥

उत्सूत्रस्वभावत्वम् स्थलान्तरेऽपि तत्प्रदर्शनेन द्रढयति **यस्त्वमिति**। समन्वयाध्यायान्तर्गतस्यापि चतुर्थपादस्य सांख्यमतनिराकरणपरतया भाषितत्वादिति भावः। उत्सूत्रं अत्र आनन्दमयस्य पादच्छेदः तत्र समन्वयाध्यायात् चतुर्थपादच्छेदः इति सूत्रविरुद्धदुर्भाषणम् तव स्वभाव एव न प्रमादमूलं इति भावः ॥ ॥१२१ ॥

प्राचीनचुम्बने मन्द दन्तभङ्गस्तवोचितः।
न व्यासस्य खलश्रेणीदन्तभङ्गकृतो हरेः ॥ १२२ ॥

प्रथमसूत्रभाष्ये एव मायिना त्वयाऽयं स्वभावः विसङ्गतस्य अध्यासभाष्यस्य उद्गमनेन आविष्कृत इत्याह **प्राचीनेति**। अत्र उत्सूत्रभाषणेति वक्तव्ये चुम्बनेत्युक्तिः परनारीसङ्गकृतो मायिनस्तस्यैव 'यस्ताड्यते' इत्याद्युक्तिं स्मारयति। **दन्तभङ्गः** महातमसि पातितस्य 'पंक्तिर्ग्राव्णां गरिम्णा ग्लपयति हि भवद्द्वेषिणो विद्वदाद्य' इति वर्णितगुरुतरग्रावग्रामप्रहारेणेति पूरणीयम्। नियामकतया तत्रावस्थितस्य भगवतस्तु दुःखसाक्षित्वेऽपि न लेपप्रसक्तिरित्याह **न व्यासस्येति**। तदुक्तं 'नरकेऽपि वसन्नीशो नासौ दुःखभुगीश्वरः' इति ॥ १२२ ॥

यद्यानन्दमयः कोशस्तत्पुच्छे ब्रह्मता कथम्।
साकारस्य जडस्यास्य ब्रह्मता न हि ते मते ॥ १२३ ॥

अधिष्ठानतया ब्रह्मत्वोक्तावन्यत्र किं न सा ॥ १२४ ॥

किं च पुच्छशब्दस्य पादो वाऽर्थः अधिष्ठानं वा। नाद्य इत्याह **यदीति**। विरुद्धधर्मवतोः सामानाधिकरण्योक्तैक्यायोगादिति भावः ॥ न द्वितीय इत्याह **अधिष्ठानतयेति**। सर्वजगदारोपाधिष्ठानस्य विशिष्य आनन्दमयकोशमात्राधिष्ठानोक्तेरयोगात् ॥ १२३ ॥ १२४ ॥

यद्यानन्दमयो ब्रह्म पुच्छस्य ब्रह्मता कथम्।
उभयोर्ब्रह्मताऽयोगे महान्किल तवाग्रहः ॥ १२५ ॥

अथैतद्दोषपरिजिहीर्षया आनन्दमयः कोश इति पक्षं त्यक्त्वा ब्रह्मेति अस्मदुक्तं पक्षं अङ्गीकुर्याः तर्हि घट्टकुटीप्रभातन्याय इत्याह ॥ १२५ ॥

अतोऽतत्वावेदिकेयं श्रुतिरासीत्तवैव हि ।
सूत्रकल्पद्रुमच्छेदे कुठारः क्वास्ति ते वद ॥ १२६ ॥

अतः अर्थद्वयेऽपि पुच्छस्य त्वन्मते ब्रह्मताऽयोगात् । एवकारेण न स्वमते दोषलेशावकाशोऽपि इति लभ्यते । अङ्गाङ्गिनोरुभयोरपि पूर्णत्वेन भगवतो महिमातिशयस्यैव लाभात् । तथा च त्वन्मते श्रुतेरतत्वावेदकत्वेन कुण्ठितशक्तित्वात् न तद्बलेन सूत्रस्यान्यथीकरणं इत्याह **सूत्रेति** ॥ कुण्ठितधारेण कुठारेण काष्ठस्यापि छेदनं असंभावितं किमुत स्वरूपतः अच्छेद्यस्य कल्पद्रुमस्येति ध्वनिः ॥ ॥१२६ ॥

श्रुतौ महानादरस्ते सर्वे जानन्ति पण्डिताः ।
ब्रह्मण्याम्रेडितश्रुत्या तटस्थं यस्य लक्षणम् ॥ १२७ ॥

महान् आदर इति पदच्छेदो मुखतः । तदा काक्वा परिहासो बोध्यः । वस्तुतस्तु महाऽनादरः इति समस्तं पदम् । कर्मधारयः । **आम्रेडितं** बहुवारं कथितम् । **तटस्थं** अविद्यानिष्ठतया व्याख्यातम् । इदं चोपलक्षणम् ॥ 'न वेदा न वर्णाश्रमाचारधर्माः' इति स्वरूपेणैव वेदानां मिथ्यात्वं, अबोधकत्वं, अतत्वावेदकत्वं च भाषमाणस्य यस्य इत्यपि योज्यम् ॥ १२७ ॥

किञ्च श्रुतावादरश्चेत्पुच्छस्थब्रह्मतास्तु ते ।
अन्यस्याब्रह्मता कस्मात्स्वीकृता न हि सा श्रुता ॥ १२८ ॥

विशिष्यैकत्र यद्युक्तमर्थान्नान्यत्र तद्यदि ।
तर्हि युक्तिबलादेव ब्रह्मता न श्रुतेर्बलात् ॥ १२९ ॥

किं च 'ब्रह्म पुच्छं' इति श्रुतिः आनन्दमयस्य ब्रह्मत्वाभावं न श्रावयति । किं तु 'अवयवी न ब्रह्म अवयवस्य ब्रह्मत्वात्' इति युक्तिविरोधेनैव सूत्रस्य अन्यथीकरणं

त्वयैष्टव्यम् । न त्वदुक्तरीत्या श्रुतिविरोधेनेत्याह द्वाभ्यां **किञ्चेत्यादिना** ॥ १२८ ॥ ॥१२९ ॥

युक्तिस्तु दुर्बला साक्षात्सूत्रादाप्ततमोदितात् ।
अतस्तवेषुस्त्वां हन्ति गुणे त्वन्यायकल्पना ॥ १३० ॥

अस्तु तर्हि उक्तयुक्तिविरोधेनैव सूत्रबाध इत्यत आह **युक्तिस्त्विति । दुर्बला**= मृण्मयवृषभे अवयवावयविनोरभेदस्य दृष्टत्वेन भग्नव्याप्तिका, 'वृक्षस्य स्वगतो भेद' इत्यादिना 'भेदत्रयं प्राप्तं निषिध्यते' इत्यन्तेन त्वयैव भेदस्य निराकरणेन स्वव्याहता, 'एवं धर्मान् पृथक्पश्यन् तानेवानुविधावति' इत्यादि पूर्वोदाहृतश्रुतिस्मृतिविरुद्धा चेति साधनासमर्था । सूत्रकृता परमाप्ततमेन उदाहृतास्तु, ब्रह्मशब्दाभ्यासः, जगच्चेष्टकत्वं, मुक्तिहेतुभूतज्ञानविषयत्वं, मान्त्रवर्णिकत्वं, मुक्तप्राप्यत्वं, इत्यादयो युक्तयः बहव आगमिकाश्च इति प्रबलाः । अतो हीनबलया त्वद्युक्त्या न सूत्रबाधः संभवति, किंतु वैपरीत्यमेवोचितमित्याह **अत इति** । कल्पनेत्यनन्तरमितीति शेषः । इषुरित्यनेन संबध्यते ॥ १३० ॥

यदेकत्र विनिर्णीतश्शास्त्रार्थो ह्यपरत्र च ।
इत्याहुरार्यास्तत्तेऽर्थः स्वार्थं व्यभिचरेदपि ॥ १३१ ॥

'ननु गुणे त्वन्यायकल्पने'ति न्यायः श्रुतियुक्त्योर्विरोधस्थले एव निर्णीतः न युक्त्योः परस्परम् विरोधे इति मन्दाशङ्कां व्युदस्यति **यदिति** ॥ सर्वप्रमाणसाधारण एवायं न्याय इति भावः ॥ १३१ ॥

पादस्य ब्रह्मतोक्तौ हि सर्वस्य ब्रह्मता बलात् ।
यतो भवेत्ततस्तेऽर्थः प्रबलार्थहतो भवेत् ॥ १३२ ॥

दृष्टान्ताभिमते मृद्गवादौ सर्वत्राभावात्सपक्षशून्यत्वात्त्वदुपन्यस्तो हेतुर्विरुद्धश्चेत्याह **पादस्येति । बलात्** अवयवावयविनोरभेददर्शनबलात् ॥ १३२ ॥

एवं च युक्तिश्रैष्ठ्येऽपि यदग्रे सूत्रखण्डनम् ।
अर्थादुत्सूत्रभाष्यत्वमुत्तरत्रापि तद्वदेत् ॥ १३३ ॥

उत्तरत्रापीति स्वभावस्यानपायादिति भावः । वदेदिति करणे कर्तृत्वोपचारः ज्ञापने असंदिग्धत्वरूपातिशयद्योतनार्थः ॥ १३३ ॥

किं च निर्विकृतेरेव निमित्तत्वं परात्मनः ।
कुलालवद्यतो युक्ता तदयुक्ता तटस्थता ॥ १३४ ॥

उत्सूत्रभावस्य मायिभाष्यव्यापित्वं तदीयजन्माधिकरणीयभाष्यनिदर्शनेनापि साधयति **निर्विकृतेरित्यादिना** । 'तस्मादशेषकर्तैको निर्विकारो जगत्पतिः' इति अनुव्याख्यानं हृदि कृत्वाऽऽह **कुलालवदिति** ॥ कारणं भवत् उपादानं निमित्तं वा भवेत् । ब्रह्म तु न उपादानं निर्विकारत्वात् । तच्च अपराधीनत्वात् । तदुक्तं सुधायां सकलोऽपि खलु विकारोऽपराधीनो भवति' इति । चेतनत्वादेव च तस्योपादानत्वं न संभवति । 'न चेतनविकारः स्याद्यत्र क्वापि ह्यचेतनं' इत्यनुव्याख्यानोक्तेः । अतो निमित्तकारणत्वमेवैष्टव्यम् । तच्च ब्रह्मणि उपपन्नतरमिति न सूत्रे लक्षणाश्रयणं युक्तमिति भावः ॥ १३४ ॥

पञ्चमी च निमित्तेऽस्तु यदि पाणिनिशिक्षया ।
उपादाने पञ्चमीयं तस्य शिक्षान्तरं स्मर ॥ १३५ ॥

यतः पदं यतः प्रोक्तं तेन सार्वविभक्तिकम् ।
तदपोसृजतेत्याद्या प्रथमा च सहस्रशः ॥ १३६ ॥

ननु 'यतो वा इमानि भूतानि जायन्ते' इति श्रुतौ यत इति पञ्चमी श्रूयते जनिधातुश्च । पाणिनिना 'जनिकर्तुः प्रकृतिरि'ति सूत्रेण प्रकृतिलक्षण उपादाने पञ्चमी विहिता । अतः तत्सूत्रविरोधात्कथं श्रुतेः निमित्तत्वं व्याख्यानार्हं इत्यतः चतुर्धा तन्निरस्यति **पञ्चमीति** । स्यादप्येवं कथञ्चिद्यदि यतः इति तसिल्प्रत्ययान्तम् स्यात् । किं तु तसिप्रत्ययान्तमेव । तसिश्च सार्वविभक्तिक इत्यत्र व्याकरणसंमतिमाह

शिक्षान्तरमिति। अतोऽत्र तृतीयाविभक्त्याश्रयणात् 'कर्तृकरणयोस्तृतीये'ति कर्तृत्वमेव सिध्यतीत्याह **यत इति**। सुस्पष्टश्रुतिसहस्रसमाख्यया चैवमित्याह **तदिति** ॥ १३५ ॥ १३६ ॥

अतो विभक्तिव्यत्यासोऽप्यत्र सर्वत्र शोभते।
सोऽपि च्छन्दसि तेनोक्तस्ततः काऽनुपपन्नता॥ १३७ ॥

अस्तु वा यत इति पञ्चमी। तथाऽपि 'व्यत्ययो बहुलं' इति सूत्रानुसारेणात्र विभक्तिव्यत्यासेन तृतीयाविभक्तिरेव व्याख्येयेत्याह **विभक्तीति**। 'छन्दस्युभयथे'ति स्पष्टानुशासनमप्यत्रास्तीत्याह **छन्दसीति**। 'येन जातानि जीवन्ती'त्यत्रैव वाक्ये तृतीयायाः श्रुतत्वाच्चेत्यपि बोध्यम् ॥ १३७ ॥

स्वमूलसूत्रमुत्सृज्य श्रुतौ कृतरतेस्तव।
परसूत्रं परित्यज्य कुतो नासीच्छ्रुतौ रतिः ॥ १३८ ॥

किं च 'ब्रह्म पुच्छं प्रतिष्ठे'ति श्रुतेरापातार्थं परिगृह्य तद्विरोधमविद्यमानमेवापाद्य त्वया खलु स्वभाष्यमूलसूत्रं तिरस्कृतम्। तस्य तव निरवकाशश्रुतिशतावसितार्थविरोधेऽपि सावकाशे परकीयपाणिनीयसूत्रे रतिनटनं वञ्चनमात्रमूलमित्याह **स्वेति** ॥ १३८ ॥

छन्दस्युभयथाप्यस्ति कार्ये नास्ति द्वयी गतिः।
लक्षणस्य तटस्थत्वे सर्वं कार्यमकर्तृकम् ॥ १३९ ॥

जनिकर्तुरिति सूत्रस्य सावकाशत्वं उक्तं स्मारयति **छन्दसीति**। श्रुतीनां निरवकाशत्वं द्योतयति **कार्ये इति**। यत्कार्यं तत्सकर्तृकमेवेति व्याप्तेः। सृष्टेः प्राग्विद्यमानं खलु एकमेवाद्वितीयं ब्रह्म। तस्य च कर्तृत्वानङ्गीकारे जगदकर्तृकमेवापद्यते इति भावः। नैष दोषः। मया ब्रह्मणः उपादानत्वस्येव कर्तृत्वस्याप्यङ्गीकारादिति चेन्न। उपादानत्वस्य दूषितत्वात्। कर्तृत्वमात्राङ्गीकारे तु अनुज्ञया वर्तामहे इत्याशयः ॥ १३९ ॥

जिज्ञास्ये लक्षणं नाभूदजिज्ञास्येऽस्ति यन्ति किम्।
तद्ब्रह्मेत्युपदेश्यं किं जिज्ञासा कस्य कथ्यताम् ॥ १४० ॥

सूत्रे जिज्ञास्यत्वेनोक्तं ब्रह्मैव न मायेति परस्यापि संमतम्। न च तत्रापि विवदितव्यम्। यत्प्रयन्ति इति प्राप्यत्वस्य, 'तद् ब्रह्म' इति परामर्शस्य च अविद्यायामसंभवादेव। अतः द्वितीयसूत्रोक्तं लक्षणं ब्रह्मण एव भवितुं युक्तं न त्वेवाविद्याया इत्याह **जिज्ञास्य इति** ॥ १४० ॥

यदि श्रुत्या पुच्छमेव ब्रह्म लक्षणवत्तदा।
श्रुतेर्बलाद्ब्रह्म भवेदनन्यार्था यतस्त्वियम् ॥ १४१ ॥

किं च यस्या ब्रह्मश्रुतेर्बलात्त्वया पुच्छं ब्रह्मेत्यङ्गीकृतं तस्या एवानन्यार्थाया ब्रह्मश्रुतेः कारणवाक्येऽपि सद्भावात् लक्षणलक्षितं ब्रह्मैव त्वयाङ्गीकार्यमित्याह **यदीति** ॥ १४१ ॥

अन्तस्सूत्रमिवोक्तं च बहिस्सूत्रं विसृज्यताम्॥ १४२ ॥

नन्वेवं पाणिनिसूत्रविरोध उक्त इति तत्राह **अन्तरिति**। स्वभाष्यमूलभूतं अन्तःसूत्रम्। अतथाभूतं पाणिनिसूत्रं तु बहिःसूत्रम्। त्वया खलु गुणे त्वन्यायकल्पनेति न्यायव्याजेन अन्तःसूत्रं तिरस्कृतम्। तेनैव न्यायेन पाणिनिसूत्रमेव श्रुतेर्बलात्त्यज्यताम्। लक्षणस्य स्वरूपलक्षणत्वमेव स्वीक्रियतामिति भावः ॥ ॥१४२ ॥

यदि ते पाणिनेस्सूत्रे (भ)भाराच्छ्रुतितिरस्कृतिः।
लक्षणस्य तटस्थत्वं तर्हि व्यासानुशासनात्।
ब्रह्मानन्दमयं भूयात्पुच्छं स्यात्तव पृष्ठतः ॥ १४३ ॥

अथ तटस्थत्वसिद्ध्यर्थं तन्न्यायस्यैव परित्यागः तर्हि आनन्दमयस्य ब्रह्मत्वसिद्धिरित्याह **ब्रह्मेति। पुच्छं=** ब्रह्म पुच्छमेव न तु आनन्दमय इति ते वादः **तव पृष्ठतः स्यात्=** सभायां प्रतिवादिनं प्रति उदाहरणानर्हः स्यात्। तथा, **तव**

सूत्रापलापिनः **पुच्छं=** लाङ्गूलं **पृष्ठतः स्यात्** त्वं पशुवत् विदुषां निन्द्यो भवेरित्याशयः ॥ १४३ ॥

अतः पुच्छश्रुतिस्तेऽभूद् ह्रस्वकौपीनपुच्छवत्।
एकं सन्धित्सतो वाक्यमपरं च्यवते यतः ॥ १४४ ॥

ज्ञेयमुभयतः पाशारज्जुरित्याह **अत इति** ॥ १४४ ॥

यदा मूलभ्रमादेव टीकां त्यजसि संमताम्।
तदा मूलप्रमारूढां टीकां काकोऽपि न स्पृशेत् ॥ १४५ ॥

अपि च टीकानुसारेण मूलं योज्यमिति स्थितिः। यदाहुः। व्याख्यानतो विशेषार्थप्रतिपत्तिरिति। सूत्रं च सर्वज्ञप्रणीतं श्रुतेः स्वतन्त्रव्याख्यानम्। त्वं तु श्रुतेस्त्वत्कुकल्पितम् दुरर्थं परिगृह्य तद्विरोधमापाद्य सूत्रमन्यथयितुं प्रक्रान्तः। व्याख्यानस्य प्राबल्यं सर्वसंमतं त्वया अवधीरितम्। समानन्यायेन सूत्रविरोधे तद्व्याख्यानाभिमतस्य त्वद्भाष्यस्यैव तिरस्करणीयता बलादापतिता इत्याह **यदेति** ॥ अयं पुनर्विशेषः। सूत्ररूपटीका प्रमाणसंमता। तव तु भाष्यं अप्रमाणं स्वव्याहतिविजृंभितं च। एवमीदृशं भाष्यं एकदृष्टिर्वायसोऽपि दूरात्परिहरेत् किं पुनर्विवेकिन इत्याह **काकोऽपीति** ॥ १४५ ॥

परिस्पन्दक्रियामात्रं मास्तु वा व्याप्तवस्तुनः।
जगज्जन्मादिकरणक्रिया हेया कुतो वद ॥ १४६ ॥

निमित्तमस्तु तद्ब्रह्म जगज्जालस्य कालवत्।
उपादानत्ववार्ता च नात्र श्रौताध्वशोधने ॥ १४७ ॥

ननु कर्तृत्वस्य स्वरूपलक्षणत्वे निष्क्रियत्वश्रुतिविरोध इति चेत् किं सा श्रुतिः परिस्पन्दक्रियामात्रं निषेधति उत क्रियासामान्यं वा। आद्ये प्रकृते न काचिदस्माकं हीयते। 'स्वतन्त्रः कर्ते'ति स्मृतिसिद्धायाः इतरकारकप्रयोजकत्वरूपाया स्वातन्त्र्यपर्यवसन्नायाः क्रियायाः अनपायात्। निमित्तकारणे, काले इव,

परिस्पन्दराहित्यस्य अकिञ्चित्करत्वात्। उपादानत्वस्य प्रागेव निरस्तत्वादित्याह **परिस्पन्देति** ॥ अभ्युपगम्य चेयमुक्तिः। वस्तुतः परिस्पन्दस्यापि तस्मिन् प्रमितत्वात्। यथोक्तं जन्माधिकरणे सुधायां 'परिस्पन्दाभावे प्रमाणाभावात्। परममहत्परिमाणमस्तीति चेत् न। अणुमध्यमपरिमाणाभ्यां सत्प्रतिपक्षत्वात्' इति। क्रियासामान्यनिषेधपक्षस्तु 'पराऽस्य भक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च' इत्यादिप्रमाणपराहतः ॥ १४६ ॥ १४७ ॥

लक्षणस्य तटस्थत्वकथापि व्याहता तव।
यद्व्याप्तं लक्ष्यमात्रे स्यादलक्ष्ये नैव वृत्तिमत् ॥ १४८ ॥

तल्लक्षणं नास्य साधारणो धर्मोऽपि तत्किल।
कथामन्यगतो धर्मो लक्षणं स्यात्तदीर्यताम् ॥ १४९ ॥

तटे ब्रह्मान्ये, अज्ञाने विद्यमानं, ब्रह्मण्यविद्यमानं, तटस्थलक्षणमिति परेणाभिप्रेयते। तदेतद् व्याहतमिति प्रतिजानीते लक्षणेति। तत्समर्थनाय 'यो धर्मो लक्ष्ये व्याप्त्या वर्तते न वर्तते चान्यत्र स धर्मो लक्षणमित्युच्यते' इति पद्धत्युक्तं लक्षणस्वरूपं अनुवदति **यदिति**। त्वदुक्तं तु सम्यक् तदन्यथाभूतं अलक्षणमेवेत्याह **कथमिति** ॥ १४८ ॥ १४९ ॥

काकोऽपि हि गृहस्थस्य गृहस्थो बोधयेद्गृहम्।
गते तस्मिंस्तेन कृतमुत्तृणत्वं हि बोधकम् ॥ १५० ॥

गृहस्थः। व्यावृत्तिधीकाले गृहसंबन्धी। **बोधयेत्**। इतरव्यावृत्ततयेति शेषः। एवं बोधकमित्यत्रापि। **उत्तृणत्वं** गृहस्थमिति लिङ्गव्यत्ययेन योज्यम्। व्यावर्तकस्य व्यावर्त्यसंबन्धः सर्वथा व्यावृत्तिधीकाले एवापेक्षित इति हृदयम् ॥ १५० ॥

कदाचिद्गुरुसंबन्धः कुरुसंबन्ध एव च।
गुरोष्टीका कुरोः क्षेत्रमित्यत्रापि हि वर्तते ॥ १५१ ॥

गुरूणां टीका, कुरूणां क्षेत्रमित्यादावपि इयमेव गतिरित्याह **कदाचिदिति**। इदं च मुखतः। गुरुकृतत्वं कुरुपालितत्वं वा व्यावृत्तिधीकालेऽपि विद्यमानमेवात्रापि व्यावर्तकमित्याशयः। तेन न पूर्वोक्तनियमभङ्गः ॥ १५१ ॥

सर्वथा तदसंबद्धस्तत्रोपकुरुते कथम्।
महिष्याः क्षीरवत्त्वे स्याद्गोवृषस्य तु किं फलम्।
काकस्य कार्ष्ण्याद्धवलः प्रासादस्स्यात्र चेत्तव ॥ १५२ ॥

अन्यथाऽतिप्रसङ्गावाह **महिष्या इति**। **काकस्येति च** ॥ १५२ ॥

किं चोपलक्षणं ह्येतल्लक्षणं तु न तादृशम्।
घटस्य लक्षणं पश्य पटस्य ब्रह्मणस्य च ॥ १५३ ॥

तिष्ठतु तावदुपलक्षणवार्ता। लक्षणस्थले त्वदीयतटस्थत्वचोद्यस्यैवानवकाश इति निदर्शनैर्द्रढयति **घटस्येति** ॥ १५३ ॥

व्यतिरेक्यनुमानं हि लक्षणं पक्षधर्मता।
व्यावृत्तिश्च विपक्षेभ्यस्तस्य चावश्यकी न किम्॥ १५४ ॥

किं च लक्षणम् हेतूकृत्य खलु लक्ष्ये व्यावृत्तिः व्यतिरेकिणा साधनीया। तस्य लक्ष्यावृत्तित्वे गोः एकशफत्वमित्येव स्वरूपासिद्धिः, अलक्ष्यवृत्तित्वे शृङ्गित्वमित्यत्रेव अनैकान्तिकत्वं, लक्ष्यैकदेशावृत्तित्वे शबलमित्यत्रेव भागासिद्धिः इति दोषाः स्युः। सर्वथा त्वदभिमतं तटस्थं लक्षणमसाधकमेव स्यादित्याशयः॥ ॥१५४ ॥

कथं सूत्राभिमतयोर्यत्तदोर्वृत्तिरुच्यताम्।
यदुक्तलक्षणोपेतं तद्ब्रह्मेति हि योजना ॥ १५५ ॥

जिज्ञास्यब्रह्मणो लक्षणजिज्ञासायां हि जन्मादिसूत्रं प्रवृत्तम्। तत्र यत इति यच्छब्दोक्तं ब्रह्मैव भवितुं युक्तं नैवाज्ञानम् तस्याजिज्ञासितत्वेन असाङ्गत्यापत्तेरिति भावेन सूत्रयोर्योजनां दर्शयति **यदिति** ॥ १५५ ॥

तल्लक्षणस्य ताटस्थ्ये ज्ञेयताऽपि तटे तव ॥ १५६ ॥

उक्तयोजनानङ्गीकारेऽसङ्गतिमाह **तदिति** ॥ १५६ ॥

यदि लक्षणवन्मायाभ्रान्त्यधिष्ठानतैव ते।
ब्रह्मलक्षणमाशास्यं तर्हि सूत्रकृतः प्रभोः ॥ १५७ ॥

आरोपोस्या यत इति वचने का दरिद्रता।
अन्तरा ब्रह्मसूत्राणि किमब्रह्मापि सूत्रितम् ॥ १५८ ॥

त्वद्रीतेः सूत्राभिप्रेतत्वे जन्मादिसूत्रविन्यासः अन्यथैव स्यादित्याह **यदिति**। तदुक्तं सुधायां "तर्हि यतोऽस्य जन्मादि सा माया तदाश्रयो ब्रह्मेति निर्देशः स्यात्। न तु जन्माद्यस्य यतस्तद्ब्रह्मेति" इति। **दरिद्रतेति** स्वायत्ते शब्दप्रयोगे किमित्यमुख्यम् प्रयुंज्महीति न्यायादिति भावः। सूत्राणां ब्रह्मसूत्रेत्यभिधानमेव मध्ये ब्रह्मभिन्नस्य अज्ञानस्य सूत्रणं विरुणद्धि इत्याह **अन्तरेति**। मध्ये इत्यर्थः ॥ १५७ ॥ ॥१५८ ॥

श्रुतेरनुसृतौ च स्यात्तटस्थं नैव लक्षणम्।
यत्पदोदितमेवार्थं तत्पदेन हि सा जगौ ॥ १५९ ॥

आनन्दमयनये श्रुत्यनुसारव्याजेन सूत्राण्यन्यथीकृतानि मायिना। इदानीं तेन जन्मादिनये सूत्रस्यैव श्रुतेरप्यन्यथीकरणं दर्शयति **श्रुतेरिति**। यतो वा 'इमानि भूतानि' इत्यादिश्रुतौ यच्छब्दत्रयप्रस्तुतमेव अर्थं खलु तद्ब्रह्म इत्यत्र तच्छब्दः परामृशति इति स्फुटम्। मायिरीत्या यच्छब्दैरज्ञानस्य वचनाभिप्राये श्रुतावुत्तरत्र तदज्ञानं इत्येव निर्देशः स्यात्। न तु तद्ब्रह्मेति। अतः स्पष्टः श्रुति विसंवादस्तद्भाष्यस्येति भावः ॥ १५९ ॥

एवं च निर्गुणत्वोक्त्या तटस्थं लक्षणं न ते ।
आरोपाधिष्ठानताख्यधर्मस्यावश्यकत्वतः ।
तटस्थमायायोगस्य बोध्यत्वादेरवर्जनात् ॥ १६० ॥

किंच निर्गुणश्रुतिविरोधापत्तिपरिजिहीर्षया खलु मायावादिना लक्षणस्य ताटस्थ्यमाश्रितम् । न च तद्युक्तम् । तावताऽपि श्रुतिविरोधतादवस्थ्यात् । निर्गुणं हि सकलधर्मविकलम्, असङ्गं च तेनाङ्गीकृतम् । लक्षणं च स्वरूपं वा तटस्थं वा असाधारणधर्म एव । न चेत्तेन व्यावृत्तिबुद्धिः न स्यात् ॥ तथा च निर्धर्मकस्य असाधारणधर्म इति व्याघातः । लक्षणमपि तटस्थं काकादिकं लक्ष्यसंबन्धवदेवोपलब्धम् । असङ्गाभिमतस्य ब्रह्मणस्तत्संबन्धोक्तिरपि व्याहतैव । श्रुतिविरोधोक्तिरपि व्याहता । निर्धर्मके तस्मिन् श्रुतिबोध्यत्वादिधर्माणामप्यसंभवादेव । तथा च तन्मतरीत्यैव लक्षणं तटस्थमिति चोद्यानवकाश इत्याह **एवं चेति** ॥ १६० ॥

किं च निर्गुणताध्रौव्ये लक्षणस्य तटस्थता ।
लक्षणस्य च ताटस्थ्ये निर्गुणत्वं ध्रुवं भवेत् ।
अतोऽन्योन्याश्रयः स्यान्न परमात्मपदाश्रयः ॥ १६१ ॥

ध्रौव्ये श्रुत्यर्थतया निश्चितत्वे । **न परमात्मपदाश्रयः** परमात्मेत्युदाहृतः आश्रयः । 'उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः' इत्युक्तार्थस्य अङ्गीकारः तेन च हरेश्चरणमूलप्राप्तिश्च न स्यादिति ध्वनिः ॥ १६१ ॥

श्रुतिमात्रबलोसि त्वं श्रुतिसूत्रबला वयम् ॥ १६२ ॥

बलोऽसीत्यापाततः । उक्तरीत्या श्रुतेस्त्वदभिमतनिर्गुणाबोधकत्वादेव ॥ ॥१६२ ॥

अथोपादानता प्राप्ता पाणिनेरनुशासनात् ।
सा चायुक्ता ब्रह्मणीति तटस्थं लक्षणं यदि ।
इदं च तर्हि युक्तं नेत्युत्प्रेक्षा जायते मम ॥ १६३ ॥

प्राप्ता 'यतो वा' इति श्रुतौ त्वया प्रसञ्जिता। ननु वस्तुवृत्त्या सूत्रार्थभूता ॥ ॥१६३ ॥

व्यासस्य शासनं ज्यायः पाणिनेरनुशासनात्।
अमुख्यमेव बाध्यं स्यान्नामुख्यान्मुख्यबाधनम्॥ १६४ ॥

ज्यायः भाष्यमूलत्वेन अन्तरङ्गत्वात् प्रधानम्॥ १६४ ॥

स च श्रौतमिमं धर्मं ब्रह्मण्यनुशशास हि।
अतः पाणिनिसूत्रं तदन्यत्र स्यान्न लक्षणम्।
जारानुसरणाज्ज्यायः पत्युः पादोपसर्पणम् ॥ १६५ ॥

अनुशशास जिज्ञास्यस्य लक्षणकथनार्थमेव सूत्रप्रणयनादिति भावः॥ **अन्यत्र** शृङ्गाच्छरो जायते इति लौकिकप्रयोगेषु। स्यात् इति अभ्युपगमः। तत्रापि अविकृतस्य अपायावधिभूतभागस्यैव विभक्तिप्रकृत्यर्थता इति भावः। **लक्षणं** सूत्रोक्तम्। **अन्यत्र** ब्रह्मणः अन्यत्र मायायाम्। **न** स्यादिति आवर्तते। न गच्छति असम्भवादेवेति भावः। **जारः** बहिरङ्गं पाणिनिसूत्रम्॥ **पत्युः** ब्रह्मसूत्रस्य॥ १६५ ॥

अविकारित्वतस्तस्य नैवोपादानता मता।
अतः कर्तैव जगतः श्रुतौ सूत्रे च कथ्यते ॥ १६६ ॥

सतः विकारिण एव चोपादानत्वं लोके दृष्टम्। त्वदभिमता माया सद्विलक्षणत्वान्नोपादानम्। ब्रह्म तु अविकारित्वादिति कर्तृत्वमेव लक्षणं श्रुतिसूत्रोक्तमित्याह **अत इति**॥ १६६ ॥

निष्क्रियत्वश्रुतिश्चास्य क्रियया शास्त्यलेपनम्।
अकर्तारं हि तं प्राहुर्यः कृत्वापि न लिप्यते।
श्रुतिसूत्रोक्तकर्तृत्वबाधाय यतते न सा ॥ १६७ ॥

भगवतः क्रियाश्रयत्वरूपकर्तृत्वे निष्क्रियत्वश्रुतिविरोध इत्यत आह **निष्क्रियत्वेति**। तदुक्तं गीतायां 'तस्य कर्तारमपि मां विद्ध्यकर्तारमव्ययम्। न मां कर्माणि लिम्पन्ति' इति। अक्लिष्टकारित्वादकर्तेत्यभिधीयते इति च वायुपुराणे। तथा च लोकविलक्षणक्रियावत्त्वान्निष्क्रियत्वश्रुतिरुपपन्ना। तदुक्तं गीताभाष्ये 'वैलक्षण्यात्कर्ताऽप्यकर्ता। तथा हि श्रुतिः विश्वकर्मा विमनाः' इत्यादीति॥ ॥१६७॥

मणिः प्रवर्तते मालाकारसन्दर्शिताध्वना।
न चेदाकाशशब्दोक्तं परं ब्रह्म कथं वद।
आकाशश्रुतिसामर्थ्याज्जडाकाशः कथं न सः ॥ १६८ ॥

मणिः ऋगाद्या अपरविद्याः। **मालाकारः** तासां विष्णौ समन्वयसमर्थनेन अक्षराधिगतिकरणत्वरूपपरविद्यात्वसम्पादकः सूत्रकारः। **अध्वा** उपक्रमादिन्यायः। **सामर्थ्यात्** अविद्वल्लोकप्रसिद्धिबलात्॥ १६८॥

तदानन्दमयं कोशं कर्तुं स्वेन निरूपितम्।
गुणे त्वन्यायक्लृप्त्याख्यन्यायं स्वयमहोजहौ॥ १६९॥

अहो आश्चर्यम्। मायिन उन्मत्तप्रलापित्वं इति शेषः। आकाशनये सूत्रस्य प्रधानत्वं श्रुतेर्गुणत्वेन तदनुसारित्वं च स्वयमङ्गीकृत्य आनन्दनये पुनः तद्वैपरीत्येन गुणप्रधानत्वं प्रलपतः व्याहतभाषिणः कथमुन्मत्तता न स्यादिति भावः॥ १६९॥

प्रधाने ब्रह्मसूत्रेऽस्मिन्यदन्यायं चिकीर्षति।
गुणभूतान्य(सूत्रा)शास्त्रार्थे बहुमानपुरस्कृतः ॥ १७० ॥

सइदंसर्वमसृजतेतिश्रुतिसमाख्यया।
कर्तृत्वमिह हेतुत्वं नोपादानत्वमिष्यते ॥ १७१ ॥

अन्यत्रापि गुणप्रधानभावाकलने तस्य अनवस्थितत्वं स्फोरयति **प्रधान इति** ॥ तथा च तद्रीतिः 'मणिस्रजं वा प्लवगोऽव्यवस्थः' इत्यभियुक्तोक्तन्यायमनुकरोतीति भावः ॥ १७० ॥ १७१ ॥

वेदे वेदानुसरणं पाणिनेश्च स्थले स्थले ।
यतश्च यत इत्येतत्पदं सार्वविभक्तिकम् ॥ १७२ ॥

स्थले स्थले इति ॥ तदुक्तं गुणसौरभे 'छन्दस्ययस्मयादीनीत्येवं शब्दानुशास्तिकृत् । अमानयद्धि यन्मार्गं' इति । **पदं** सार्वविभक्तिकतसिप्रत्ययान्तम् ॥ १७२ ॥

यतोऽर्थानुपपत्तिश्च शब्दस्यानुपपत्तितः ।
प्रबला लक्षणावृत्तेर्न चेदवसरः कथम् ॥ १७३ ॥

यत इति ॥ तदुक्तं गुणसौरभे "तत्तत्पदार्थसामर्थ्यानुपमर्देन शब्दतः । अर्थो बोध्यो न शब्दस्य सत्त्वादर्थोपमर्दनमि"त्यादौ (श्लो. ८५८) अन्यथा योग्यताविरहाच्छब्दस्याप्रामाण्यापत्तेरिति भावः । **लक्षणावृत्तेरिति** । 'मुख्यार्थबाधे तद्योगे' इति लक्षणाबीजोक्तेः । पूर्वायोगे परग्रहः इत्यनुव्याख्यानोक्तेश्च ॥ १७३ ॥

ब्रह्मजिज्ञासया प्राप्तं सुतं प्रति पिता कुतः ।
अन्यगं लक्षणं ब्रूयाद्बोध्ये ब्रह्मण्यसंभवि ॥ १७४ ॥

'अधीहि भगवो ब्रह्मेत्युक्तोऽन्नप्राणपूर्वकम् । आह ब्रह्म कथं तन्न' इत्यनुव्याख्यानोक्तं हृदि कृत्वाऽऽह **ब्रह्मेति** ॥ **पिता** वरुणः लोकपालः दिक्पतिः । अनेन तस्य विवक्षितार्थतत्त्वज्ञानं करणपाटवं चोक्तं ज्ञेयम् । ब्रूयादिति वचनेन कार्येण विवक्षा च । **प्राप्तं** उपसन्नम् । **सुतं** भृगुम् । तदनेन प्रसङ्गस्य श्रोतुश्च आनुकूल्ये प्रदर्शिते । ब्रह्मणि इत्यनेन प्रथमसूत्रोक्तगुणपूर्णत्वं लक्षणं द्योत्यते । तत्संभावनार्थं उपदिष्टमिदं द्वितीयं लक्षणं ब्रह्मणः स्वरूपलक्षणमेव सर्वथा युक्तं नान्यथेत्याह **अन्यगमिति** विमतं लक्षणं, ब्रह्मनिष्ठं, ब्रह्मजिज्ञासुं प्रति आप्तेनोपदिष्टत्वादिति प्रयोगः सूचितः ॥ १७४ ॥

स्वगृहे दीपिकाभावे प्रार्थयन्तेऽन्यदीपिकाम् ।
सति ब्रह्मस्थकर्तृत्वे तटस्थं स कुतो वदेत् ॥ १७५ ॥

सतीति 'ब्रह्माख्यमस्योद्भवनादिहेतुभिः स्वलक्षणैर्लक्षितभावनिर्वृति' इत्यादिप्रमाणैः सिद्धे सति इत्यर्थः ॥ १७५ ॥

मोक्षोपयोगिज्ञानाय साक्षान्मोक्षविरोधिनि ।
अज्ञाने स्थितदुर्धर्मं को ज्ञानप्रस्तुतो वदेत् ॥ १७६ ॥

ब्रह्माश्रितत्वान्मायायाः तल्लक्षणकथनं परम्परया मोक्षायोपयुज्यते इत्यतो ब्रह्माश्रितमज्ञानं इति मिथ्याज्ञानं साक्षात्तमःसाधनमेवेत्याह **साक्षादिति**। तदुक्तं 'अज्ञताऽखिलसंवेत्तुर्घटते न कुतश्चने'ति ॥ १७६ ॥

आनन्दादेव विज्ञानादेवेति यमसौ भृगुः ।
ब्रह्म पश्यन्निरणयत्कथं सोऽन्यं गतो वद ॥ १७७ ॥

किंच भृगुः खलु पितुरुपदेशं प्राप्य तपस्तप्त्वा ब्रह्मसाक्षात्कृत्य तस्मादेव जगज्जन्मादिकं इति निरणैषीत् । प्रत्येकं रूपसाक्षात्कारानन्तरं अन्नादेवेमानि भूतानि जायन्ते इत्यादिना सावधारणनिर्णयोक्तेः । अभ्यस्तेन अवधारणार्थकैवकारेण अन्यनिष्ठत्वं लक्षणस्य स्फुटं व्यावर्त्यत इत्याह **आनन्दादिति** ॥ १७७ ॥

अपायेऽवधिभूतं यद् ध्रुवं तत्रास्ति पञ्चमी ।
स्वोदराच्च प्रधानस्यापाये तादृक्सृजन्प्रभुः ॥ १७८ ॥

अतस्तेनैव सूत्रेण पञ्चमी परमात्मनि ।
जनिधातुप्रवेशोऽपि यतो न विकृतो ह्यसौ ॥ १७९ ॥

किं चास्तु वा यत इत्यत्र पञ्चम्यर्थे तसिल् । अथापि सा ध्रुवमपाये अपादानमि'ति सूत्रविहितैव । अपायावधिभूतत्वमपादानत्वं च प्रपञ्चं प्रति ब्रह्मणः 'यथोर्णनाभिः सृजते गृह्णते च' इति श्रौतदृष्टान्तसिद्धिमिति न कोऽपि क्षुद्रोपद्रव

इत्याह **अपाय** इति ॥ जायते इत्यत्र जनिधातुरपि निर्विकारे तस्मिन्नपादानत्वमेव वक्तीत्याह **जनीति** ॥ १७९ ॥

जनिकर्तुः प्रकृतिरित्यत्र प्रकृतिशब्दतः ।
उपादानं तु स ब्रूते तस्य चावसरोऽत्र न ॥ १८० ॥

यदि तर्हि 'जनिकर्तुः प्रकृति'रित्यत्रत्यस्य उपादानवाचिप्रकृतिशब्दस्य का गतिरिति चेल्लौकिकप्रयोगविरुद्धत्वाद्दुर्गतिरेव गतिरित्याह **जनीति** ॥ १८० ॥

कार्याकारेण विकृते नोपादाने तु पञ्चमी ।
मृद्घटो जायते क्षीरं दधि जातमिति क्षितौ ।
लोका व्यवहरन्त्यस्मादिदन्त्विति न कश्चन ॥ १८१ ॥

लौकिकप्रयोगविरोधमभिनीय दर्शयति **कार्येति** ॥ १८१ ॥

शृङ्गस्याप्येकदेशस्य शराकारेण विक्रिया ।
तत्राप्यविकृते भागे पञ्चमी विक्रियावधौ ॥ १८२ ॥

सा च तेनैव सूत्रेण तस्मात्त्वमिव नः प्रभौ ।
विरोधाचरणात्सूत्रं चित्रं तद्यत्र कुत्रचित् ॥ १८३ ॥

अवकाशं न लभते व्यर्थतामर्थतोगमत् ।
जनिकर्तुः प्रकृतिरित्युक्तिस्तत्र भयङ्करी ॥ १८४ ॥

'शृङ्गाच्छरो जायते' इति प्रयोगेऽपीयमेव गतिरित्याह **शृङ्गस्येति** ॥ 'जनिकर्तुरित्यनेनापादानसंज्ञायामपि वृत्तौ पुत्रात्प्रमोदो जायते' इत्यस्याप्युदाहृतत्वात् । न्यासेऽपि प्रकृतिपदं हेतुमात्रपरमित्याश्रित्य असति प्रकृतिग्रहणे उपादानतैव स्यात् । प्रत्यासत्तेर्नेतरस्य । प्रकृतिग्रहणात्सर्वस्य कारणस्य भवतीति प्रकृतिपदम् । पुत्रात्प्रमोदो जायते इत्यादौ अनुपादानेऽपि अपादानसंज्ञार्थमित्युक्तत्वात् । अत्र विस्तरो न्यायामृते 'ब्रह्मण उपादानत्वे प्रमाणभङ्गे' । **तत्रापीति** ॥

तदुक्तं प्रकृत्यधिकरणे 'गोमयतस्तथा ॥ वृश्चिकश्चेवमाद्येष्वप्यपादानत्वमिष्यते' इत्यनुव्याख्यानव्याख्यानसुधायां "जनेः कर्तुर्या प्रकृतिरुपादानसंसृष्टापायावधिभूतं द्रव्यं तत्कारकमपादानसंज्ञं भवतीति" इति । तथा च सूत्रे प्रकृतिशब्दः उपादानपरश्चेत् लोकविरोधादपार्थकः । अपादानपरश्चेत् 'ध्रुवमपाये' इति सूत्रेणैव गतार्थत्वात् निरर्थकः इत्याह **यत्र कुत्रचिदिति**। सर्वथा नास्माकं विरोधायेत्याह **तत्रेति** ॥ ॥१८४ ॥

यथोपादानतामुक्त्वा यस्तटस्थीकरोति ताम् ।
अबद्धं स पठित्वान्ते कुचोद्यं कुरुतेऽबुधः ॥ १८५ ॥

तथा च पाणिनिसूत्रस्य मायिनोऽर्थकथनमबद्धम् । तमर्थमाश्रित्य ब्रह्मण उपादानत्ववर्णनं कुचोद्यमित्याह **अबद्धमिति** ॥ १८५ ॥

किं चोपादानमात्रेण कार्यं स्यान्नावयोर्मते ।
अतः कर्तुरवश्यत्वे न तद्वाच्यं कथं वद ॥ १८६ ॥

अपि च निमित्तोपादानोभयरूपं ब्रह्मेति खलु तव सिद्धान्तः । अतो मुख्यार्थस्य कर्तृत्वस्य त्वयाप्यङ्गीकाराल्लक्षणाश्रयणं तव निर्निमित्तमित्याह **कथं वदेति** ॥ १८६ ॥

तस्मात्त्वयाऽपि वक्तव्यः कर्तैवात्र न चापरः ।
ईक्षितृत्वबलान्नोचेत्कथं सांख्यं जिगीषसि ॥ १८७ ॥

अथापि लक्षणाश्रयणे तस्य बाधकमाह **ईक्षितृत्वेति** ॥ ईक्षणकर्तृत्वात् ब्रह्मैव जगत्कारणं न प्रधानमिति ईक्षतिनये त्वया सांख्यनिराकरणादिति भावः ॥ १८७ ॥

तव यः श्वा कथं व्याघ्रस्स परस्य भविष्यति ।
अनिच्छतापि कर्तृत्वमतो वाच्यं त्वयापि हि ॥ १८८ ॥

यः ईक्षणकर्तृत्वरूपोऽर्थः **श्वा** गौणत्वान्न ब्रह्मनिष्ठः । **परस्य** सांख्यस्य । **व्याघ्रः** तदभिमतप्रधाननिरासकः ॥ १८८ ॥

जडे च नैव कर्तृत्वमीशासिद्धिप्रसङ्गतः ।
तस्मात्तटस्थतास्य स्याल्लक्षणस्य कथं वद ॥ १८९ ॥

नैवेति । ज्ञानेच्छाप्रयत्नानां तत्रासंभवादिति भावः । निमित्तान्तरमाह **ईशेति** । **तस्मात्** कर्तृत्वस्य सर्वथा ईश्वरे अभ्युपगमनीयत्वात् ॥ १८९ ॥

क्रियावेशप्रसङ्गेन कर्तृत्वं न चितो यदि ।
जडावेशप्रसङ्गेन तर्ह्यज्ञानं कथं चिति ॥ १९० ॥

असङ्गो ब्रह्मणो लेपाभाव एवेति प्रागुक्तम् । अथापि क्रियासङ्गः क्रियाऽऽवेशरूप इति परिकल्प्य कर्तृत्वं चेन्नाङ्गीक्रियते तर्हि अज्ञानावेशः ततोऽप्यतिशयलेपरूपतया सुतरां ब्रह्मणि नाङ्गीकार्य इत्याह **जडेति** ॥ १९० ॥

जडामिश्रं हि तद्ब्रह्म केवलश्रुतिचोदनात् ।
समस्समाधिर्मिथ्यात्ववार्तया ते द्वयोरपि ॥ १९१ ॥

अयं पुनर्विशेषः । ब्रह्मणि क्रिया 'स्वाभाविकी ज्ञानबलक्रिया चे'त्यादिश्रुतिसिद्धा । जडमिश्रता तु 'केवलो निर्गुणश्चे'त्यादि श्रुतिविरुद्धेत्याह **जडेति** ॥ ननु अज्ञानस्य मिथ्यात्वेन तदावेशोऽपि न ब्रह्मणोऽसङ्गत्वं व्याहन्यते इति चेत् क्रियाऽऽवेशोऽपि तथात्वमस्त्वित्याह **सम इति** ॥ १९१ ॥

मम तु ब्रह्मगाज्ञानं मृषा शास्त्रार्थवत्त्वतः ।
कर्ता जीवोऽपि हि यदा शक्तः किमु तदा प्रभुः ॥ १९२ ॥

इदं चोपेत्योक्तम् । ब्रह्मणि अज्ञानस्य मिथ्यात्वेऽपि कर्तृत्वं सत्यत्वमेव । 'अज्ञानां ज्ञानदो विष्णुः ज्ञानिनां मोक्षदश्च सः' इति प्रमाणसिद्धज्ञानादिदातृत्वाभावे शास्त्राणां वैयर्थ्यापत्तेरिति आह **शास्त्रेति** । कैमुत्येनापि तस्य कर्तृत्वसिद्धिं दर्शयति **कर्तेति** । **प्रभुः** स्वतन्त्रः जीवानां बिम्बभूतः । न हि प्रतिबिम्बस्य जीवस्य स्वातन्त्र्येण क्रियेति भावः ॥ १९२ ॥

निष्क्रियत्वश्रुतेर्भीश्चेत्कथं स्यात्ते गतागतम् ।
व्यावहारिकमेतच्चेत्क्रियेयं चास्तु तादृशी ।
न हि निष्क्रियवागेकां क्रियामेव निषेधति ॥ १९३ ॥

ते ब्रह्मभिन्नतया त्वदभ्युपगतस्य त्वदादिजीवसमुदायस्य । इयं ब्रह्मगता । **अस्त्विति**। न हि व्यवहारनिर्वाहकातिरिक्तं सत्यत्वं इष्टं दृष्टं वेति भावः । ननु निष्क्रियत्वश्रुतिः निरुपाधिके ब्रह्मण्येव क्रिया निषेधति । जीवस्तु सोपाधिक इति चेत् त्वदाशामात्रमेतत् । श्रुतौ तु सामान्यतो निषेधिकायां निरुपाधिक-पदाश्रवणादित्याह **न हीति**॥ इदं चापाततः । असङ्गस्य तव ब्रह्मण उपाधिसंबन्धस्यैव दुर्वचत्वादित्यपि द्रष्टव्यम् ॥ १९३ ॥

चित्रं चित्रक्रियागारसंसारे न तटस्थता ।
जगज्जन्मादिकरणक्रियामात्रे तु सा किल ॥ १९४ ॥

जगति क्रियामभ्युपगम्य जगत्कारणे ब्रह्मणि तदनङ्गीकुर्वाणं अपहसति **चित्रेति**। कारणे क्रियाऽभावे कार्यस्वरूपस्यैवानिष्पत्त्या कुत एव तत्र क्रियाप्रसक्तिरिति भावः ॥ १९४ ॥

ममं सर्वज्ञ इत्युक्तविज्ञानक्रियया सह ।
योनिरित्युक्तकर्तृत्वक्रियास्त्येव न विक्रिया ॥ १९५ ॥

निषेधवचसां खलु प्रमितेतरनिषेधकत्वमिति स्थितिः । 'यः सर्वज्ञ' इति श्रुत्या ब्रह्मणि ज्ञानरूपक्रिया, 'यद्भूतयोनिमि'ति श्रुत्या च कर्तृत्वरूपक्रिया च प्रमिते इति ते न निषेधार्हे । अतो निष्क्रियत्वश्रुतिः 'न कर्मणा वर्धते नो कनीयान्' इति श्रुत्यनुसारिणी उपचयापचयरूपविक्रियामेव ब्रह्मणि निषेधतीति वक्तुं युक्तमित्याह **ममेति** ॥ १९५ ॥

निष्क्रियत्वश्रुतेस्सत्त्वात्तटस्थं लक्षणं यदि ।
तर्ह्यज्ञानं तटस्थं स्याददद्वितीयश्रुतेर्बलात् ॥ १९६ ॥

श्रुतिविरोधाच्चेत् कर्तृत्वं तटस्थं स्यात् तर्हि अद्वितीयश्रुतिविरोधात् अज्ञानमपि तटस्थं स्यादेवेत्याह **निष्क्रियत्वेति** ॥ १९६ ॥

अनादिब्रह्मणोऽज्ञानमनाद्येव हि ते मते ।
द्वितीयं तत्कृतं तस्मात्तृतीयमखिलं जगत् ।
तेनाविद्यानिषेध्यैव वागेषेति मतिर्मम ॥ १९७ ॥

अज्ञानस्य द्वितीयत्वं त्वत्प्रक्रियाऽनुसारेण न्यायप्राप्तमित्याह **अनादीति** ॥ ब्रह्म प्रथमं, तद्वदेव अनादिभावरूपत्वेनाभ्युपगतं त्वदज्ञानं द्वितीयं, अज्ञानकार्यं जगत् तृतीयं इति क्रमः । तथा च 'एकमेवाद्वितीयम्' इतीयं तव श्रुतिभुजङ्गी ब्रह्मणि अज्ञानं द्वितीयतया निषेधन्ती, प्रपञ्चं च तृतीयतयाऽवशेषयन्ती त्वत्प्रक्रियामेव हिनस्तीति विचित्रा ते शास्त्रगतिरिति भावः ॥ १९७ ॥

किं चाविकारवचनाज्जगद्रूपविकारकृत् ।
तटस्थमस्तुतेऽज्ञानं ब्रह्म निर्मलवस्तु तत् ॥ १९८ ॥

किं च 'निर्विकारोऽक्षरः शुद्धः' इति श्रुतिः ब्रह्मणो विकारं प्रतिषेधति । अज्ञानं च अतदाकारावभासलक्षणविक्षेपरूपविकारकारि इति ते प्रसिद्धम् । तथा च श्रुतिः द्वितीयं विकारकारणं चाज्ञानं प्रतिषेधतु, तेन च ब्रह्म निर्मलं अज्ञानकलङ्कविधुरं विलसतु प्रपञ्चश्च मायाजालविनिर्मुक्तम् निराबाधमवतिष्ठताम्, एतत्सर्वं च त्वत्प्रक्रिययैव न मत्प्रक्रिययेति विजयतामस्मत्प्रतिबन्दीग्रहणमिति भावः ॥ १९८ ॥

अतः प्रथमतस्सूत्रकृदुक्ते ब्रह्मलक्षणे ।
असंभवोऽतिव्याप्तिश्च सिद्धान्तो यस्य धीमतः ।
स भाष्यकृत्किल गुरुः श्रोता तत्र च कश्चन ॥ १९९ ॥

तटस्थः कोऽपि न स्यादित्यकरोद्ब्रह्मलक्षणम् ।
यतः शिक्षणमेवेदं सूत्राणां नार्थरक्षणम् ॥ २०० ॥

तदेवं प्रथमसूत्रे एव छलजातिवारिधिः भाष्यं उत्सूत्रं, भाष्यकारो वञ्चकः श्रावकश्चाविवेकीत्युपहसति **अत इति** ॥ **तटस्थः** तटे स्थित्वा श्रोता । **ब्रह्मलक्षणं** तटस्थं इति विभक्तिव्यत्ययेनान्वयः । अगत्या लक्षणमेव तटस्थमकरोदिति भावः । तत्साधूक्तमभियुक्तैः 'तं तत्क्षणाद्यो न दिधक्षति स्म' इति ॥ १९९ ॥ २०० ॥

अतो लक्षणसूत्रस्य बलाज्ज्ञानबलादिभिः ।
गुणैर्युक्तमभूद्ब्रह्म लक्षणेन गुणेन च ॥ २०१ ॥

एतावता समर्थितं प्रमेयजातं संगृह्णाति **अत इति**। लक्षणसूत्रस्य स्वरूपलक्षणत्वसमर्थनेन तत्सिद्धजन्माद्यष्टककर्तृत्वात् तदन्तर्गततयैव ज्ञान-बलादिभिर्गुणैर्युक्तं ब्रह्म सिद्धमिति भावः । तदुक्तं कर्मनिर्णयटीकायां "कर्तृत्वं च कार्यकारकक्रियाफलाभिज्ञानतदिच्छाप्रयत्नपूर्वकः स्पन्दः । ततः सर्वकर्तेत्युक्ते सर्वज्ञः सत्यकामः सत्यसङ्कल्पः समस्तशक्तिसमन्वित एवोक्तो भवति" इति । लक्षणेन गुणेन इति सामानाधिकरण्यम् । चशब्देन 'कर्तृत्वात्सगुणं ब्रह्म' इति भागवत- पुराणसंमतिमाह ॥ २०१ ॥

सजातीयविजातीयव्यावृत्तिश्च यतः फलम् ।
चेतनाचेतनजगद्भिन्नमासीत्ततस्सदा ॥ २०२ ॥

सजातीयेति । तदुक्तं जन्माधिकरणसुधायां 'लक्षणं हि सजातीयविजातीय-व्यवच्छेदार्थं भवति । **तथा चानेन** लक्षणेन सजातीयाज्जीवाद्विजातीयाज्जडाच्च ब्रह्म व्यावर्तितं सूत्रकारेण' इति ॥ २०२ ॥

पितृत्वाच्च पतित्वाच्च तदभूदुत्तमोत्तमम् ।
पूर्वसूत्रे विमुक्त्यर्थं ज्ञेयत्वोक्तेर्न मायिकम् ॥ २०३ ॥

'करोति पितृवद्विष्वं पूर्णाशेषगुणात्मकः' इत्यनुव्याख्यानं हृदि कृत्वाऽऽह **पितृत्वादिति** । **न मायिकमिति** । 'अज्ञानां ज्ञानदो विष्णुर्ज्ञानिनां मोक्षदश्च सः' इति पूर्वाधिकरणोदाहृतप्रमाणबलेनेति भावः ॥ २०३ ॥

नेहनानेति वाक्याच्च गुण्यभिन्ना गुणाश्च ते ॥ २०४ ॥

चेत्यनेन 'विज्ञानमानन्दं ब्रह्मे'त्यादि तादात्म्यबोधकसामानाधिकरण्योक्तीः समुच्चिनोति ॥ २०४ ॥

गुणगुण्यादिभावाच्च बोध्यबोधकभावतः ।
तद्विशेषाश्च ते सूत्रकर्तृकर्मवदेव हि ॥ २०५ ॥

गुणगुणिनौ परस्परं सविशेषाभिन्नौ । सत्यप्यभेदे भेदेन व्यवह्रियमाणत्वात् सूत्रकृत्सूत्रकर्मणी इव इति प्रयोगोऽभिप्रेतः । न चासिद्धिः । अभेदस्य प्रमितत्वात् । गुणस्य लक्षणतया बोधकत्वेन गुणिनः परमात्मनो लक्ष्यतया बोध्यत्वेन इत्येवं भेदेन व्यवहारविषयत्वात् । नापि दृष्टान्तः साधनविकलः । एकस्यैव बादरायणस्य सूत्रकृत्त्वेन बोधकतया सूत्रप्रतिपाद्यत्वेन तत्कर्मतया बोध्यतया इत्येवं भेदेन व्यवहारविषयत्वादिति भावः । विशेषव्युत्पादने विस्तरः गुणसौरभे ॥ २०५ ॥

आनन्दमयसूत्रोक्तरीत्या सोऽपि सुखाकृतिः ।
निराकारः कथं कुर्याद् ध्वस्तहस्तकुलालवत् ॥ २०६ ॥

सूत्रोक्तेति । प्रियमेव शिरः इत्यादिना शिरःपाणिन्मध्यदेहपादवत्वोक्तिरीत्येत्यर्थः । आनन्दमयेत्युपलक्षणम् । जन्मादिसूत्रेत्यपि ग्राह्यम् । विमतः करचरणाद्याकारवान् कर्तृत्वात् कुलालवत् । व्यतिरेकेण ध्वस्तहस्तादिकुलालवत् इति प्रयोगो ध्येयः । विपक्षे 'तदैक्षत' 'पद्भ्यां भूमिरजायत' 'पातालमेतस्य हि पादमूलम्' इत्यादिश्रुतिविरोधा बाधकाः । एतेन 'शरीरजन्यत्वमितरत्राप्युपाधिरि'ति भगवत्पादोक्तिर्विवृता भवति ॥ २०६ ॥

तस्मात्समस्तश्रुत्यर्थसूचनात्सूत्रमुच्यते ॥ २०७ ॥

समस्तश्रुत्यर्थेति । गुणपूर्णत्वं, जगद्भिन्नत्वं, गुणानाममायिकत्वं, स्वगतभेदराहित्यं, विशेषः सुखाकृतित्वं, इत्यादिश्रुत्यर्थेत्यर्थः ॥ २०७ ॥

एवं यो वेत्ति सूत्रार्थं स बन्धात्परिमुच्यते ।
न चेत्सूत्रार्थविच्छेदाच्छिद्यते यमकिङ्करैः ॥ २०८ ॥

विच्छेदात् विरुद्धभाषणात्, सूत्राणां पूर्वपक्षत्वकम्पनेन तत्प्रामाण्यविच्छेदाच्च । **यमकिङ्करैः** वायुकिङ्करैः । 'उद्गाढं पात्यमानास्तमसि तत इतः किङ्करैः पङ्किले ते' इत्याद्युक्तेः ॥ २०८ ॥

विस्तरस्त्वस्य सर्वस्य भाष्यादिष्वेव दृश्यताम् ।
मूलशास्त्रार्णवोत्सिक्तबिन्दून्वन्दामहे वयम् ॥ २०९ ॥

बिन्दून् एकदेशामात्रम् । **वन्दामहे** भक्त्या वर्णितवन्तः ॥ २०९ ॥

तस्मादुत्सूत्रभाष्यस्य कर्ता दुर्भाष्यकृद्ध्रुवम् ।
भाष्यकारस्तु भगवान्मध्वो विद्वच्छिरोमणिः ॥ २१० ॥

अतः परकृतं भाष्यं भाष्यं नाभूत्सभान्तरे ।
तस्मात् सूत्रोदितो ह्यर्थो निराकर्तुं न शक्यते ॥ २११ ॥

तुरेवार्थः मध्वः इत्यनेनान्वेति ॥ तेन तदतिरिक्ताः सर्वे एकविंशतिः कुभाष्यकृत एवेत्यभिप्रैति ॥ २१० ॥ २११ ॥

स च स्थित्यदनाभ्यां चेत्याह भेदं सयुक्तिकम् ।
द्विशाखासंमतिं भेदे भेदेनैनमधीयते ॥ २१२ ॥

उभयेऽपीति सूत्रेऽसौ भेदोक्त्या चान्यतां क्वचित् ।
भेदस्य व्यपदेशाच्चान्य इत्यत्र ससूत्रकृत् ॥ २१३ ॥

इदानीं सुस्पष्टं भेदसमर्थनपराणि सूत्राणि दर्शयति दशभिः श्लोकैः । **सयुक्तिकमिति** । जीवब्रह्मणोः नैक्यं इति प्रतिज्ञोपस्कर्तव्या । अदनतद्रहितस्थित्युक्तेः इति हेत्वर्थः । यथोक्तं भागवते सूत्रकृतैव । 'एकस्तयोः खादति पिप्पलान्नं अन्यो निरन्नोऽपि बलेन भूयान्' इति । अन्तर्यामिनये सूत्रं ॐ शारीरश्चोभयेऽपि हि

भेदेनैनमधीयते ३ॐ इति। अन्तर्यामी शारीरः जीवो न। आत्मनः अन्तर इति माध्यन्दिनायनाः विज्ञानादन्तरो विविक्त इति काण्वाश्चैनं जीवं प्रकृतादन्तर्यामिणो भेदेनाधीयते। आत्मविज्ञानशब्दयोर्जीवार्थत्वादिति भावः। सूत्रे उभौ इत्यनुक्त्वा उभये अधीयते इति बहुवचनप्रयोगेण शाखाप्रवर्तकबहुपुरुषसंमतिः सूच्यते। अन्तर्नये ३ॐ भेदव्यपदेशाच्चान्यः ३ॐ इति सूत्रम्। विष्णुरिन्द्रादिभ्यः अन्यश्च। कुतः। इन्द्रस्यात्मा वायोरात्मानमित्यादौ इन्द्राद्यन्तर्यामित्वोक्त्या भेदव्यपदेशादित्यर्थः॥ २१२ ॥ २१३ ॥

क्वचिच्च भेदव्यपदेशादित्यूचे तथा क्वचित्।
भेदस्य व्यपदेशाच्चेत्याह सूत्रद्वयं त्विदम् ॥ २१४ ॥

आनन्दमयनये ३ॐ भेदव्यपदेशाश्च ३ॐ इति सूत्रम्। यतो वाच इत्यादिना आनन्दमयस्य पूर्णानन्दत्वोक्तेः। 'स यश्चायं पुरुषो यश्चासावादित्ये इत्यादावधिष्ठातृत्वादिना भेदस्य व्यपदेशात् इत्यर्थः। एवं द्युभ्वादिनये ३ॐ भेदव्यपदेशात्' इति चकाररहितं सूत्रान्तरम्। 'जुष्टं यदा पश्यत्यन्यमीशमस्य महिमानमि'ति भेदव्यपदेशादित्यर्थः। अत्र विगतः अपदेशः अपार्थकदेशना यस्मादिति व्युत्पत्त्या अतिसार्थकवचनत्व यद्वा विशिष्टश्चासौ अपदेशश्च इति व्युत्पत्त्या अपदेशशब्दस्य पृथगुपदेशादिति सूत्रानुसारेण उपदेशार्थकत्वमाश्रित्य विशिष्टोपदेश इति वा अर्थद्वयं बोध्यम्॥ २१४ ॥

विशेषणेन भेदस्य व्यपदेशेन चेति च।
सयुक्तिकं भेदमाह यत्सार्वज्ञं विशेषणम् ॥ २१५ ॥

अदृश्यत्वादिनये ३ॐ विशेषणभेदव्यपदेशाभ्यां च नेतरो ३ॐ इति सूत्रम्। अत्र नये अन्योन्याभावात्मकं लिङ्गं समन्वीयते। अन्योन्याभावस्य च सूत्रे गुणत्वोक्त्या न विष्णोः तत्स्वरूपता विरुद्धा। इतः श्लोकत्रये वक्ष्यमाणसूत्रचतुष्टयं तादात्म्यनिषेधकान्योन्याभावार्थकनञ्घटितत्वेन साक्षाद्भेदबोधकमिति विशेषो शोध्यः। विशेषणेत्यादिसूत्रस्यायमर्थः। चिदचित्प्रकृती विरिञ्चिरुद्रौ इत्येवमेकीकृतौ इतरौ, न अदृश्यत्वादिगुणकौ, कुतः। 'यः सर्वज्ञ' इति विशेषणात्

परतः परत्वविशेषणाच्च, 'तस्मादेतद् ब्रह्म' इति अन्यमीशमिति च विरिञ्चिरुद्रयोर्भेदव्यपदेशाच्च इति। अत्र च अचित्प्रकृतिभेदोक्त्या सर्वजडभेदसिद्धिः। चित्प्रकृतिभेदोक्त्या कैमुत्येन सर्वमुक्तभेदसिद्धिः विरिञ्चिरुद्रभेदोक्त्या कैमुत्येन सर्वसंसारिजीवभेदसिद्धिः समर्थिता ज्ञातव्या ॥ ॥२१५ ॥

शारीरोऽनुपपत्तेर्न नेतरोनुपपत्तितः।
इति सूत्रद्वये चोक्तो भिन्नो जीवस्सयुक्तिकम् ॥ २१६ ॥

सर्वगतत्वादिनये 'ॐ अनुपपत्तेस्तु न शारीरः ॐ' इति सूत्रम्। अस्यार्थः सर्वत्रोच्यमानं शरीरसम्बन्धी आदित्यो जीवो वा न। तयोरणुत्वेन सर्वगतत्वानुपपत्तेः इति। अत्र जीवभेदोक्तिः स्पष्टा। आनन्दमयनये ॐ नेतरोऽनुपपत्तेः ॐ इति सूत्रम्। अस्यार्थः आनन्दमयादिः इतरः चतुर्मुखादिर्न मुक्तिहेतुज्ञानविषयत्वानुपपत्तेरिति। तथा च पूर्वपक्षीकृतहिरण्यगर्भरुद्रप्रकृतिसर्वजीवेभ्यो भेदसिद्धिर्निष्प्रत्यूहा ॥ ॥२१६ ॥

यत्र प्रतीके न हि स इति सूत्रे स सूत्रकृत्।
प्रतीको ब्रह्म नैवेति स्पष्टमाचष्ट भिन्नताम् ॥ २१७ ॥

प्रतीकाख्या हि नामादिप्राणपर्यन्तदेवताः।
देवतैक्यस्य चायोगे नरैक्ये का कथा ततः ॥ २१८ ॥

ॐ न प्रतीके न हि सः ॐ इत्यस्यार्थः, प्रतीके नामादिप्राणपर्यन्तदेवतासु ब्रह्मेत्युपासनं न कार्यम्। कुतः स विष्णुः प्रतीकं न भवति। अतस्तयोरैक्याभावान्न तयोपास्तिः कार्येति। तदितरजीवैक्यनिषेधस्तु कैमुत्यसिद्धः इति वक्ति देवतेति ॥ ॥२१७ ॥ २१८ ॥

मुक्तोपसृप्यतामाह तद्योगं शास्ति मुक्तिगम्।
सुप्त्युत्क्रान्त्योर्भिदामाह स्पष्टं जीवः परात्पृथक् ॥ २१९ ॥

भेदस्य पारमार्थिकत्वसिद्धये मौक्तभेदसाधकसूत्राण्याह त्रिभिः मुक्तेत्यादिना। ॐ मुक्तोपसृप्यव्यपदेशात् ॐ इति सूत्रस्यायमर्थः। अमृतस्यैष सेतुरिति मुक्तोपसृप्यत्वव्यपदेशान्न प्रधानं वायुरुद्रजीवा वा द्युभ्वाद्यायतनं किं तु विष्णुरेव इति। ॐ अस्मिन्नस्य च तद्योगं शास्ति ॐ इति सूत्रस्यायमर्थः। अस्य इतरस्य जीवस्य। अस्मिन् प्रकरणे। तेनानन्दमयेन ब्रह्मणा सहयोगं सम्बन्धं मुक्तावपि 'सोऽश्नुते' इति श्रुतिः शास्ति इति। सम्बन्धश्च भेदव्याप्त इति भेदसिद्धिः। ॐ सुषुप्त्युत्क्रान्त्योर्भेदेन ॐ इति सूत्रस्यायमर्थः। सुषुप्त्युत्क्रान्तिप्रकरणयोः प्राज्ञेनात्मना संपरिष्वक्त इति प्राज्ञेनात्मना अन्वारूढ इति च जीवेशयोर्भेदेन व्यपदेशादिति। तथा च स्वप्नादिद्रष्टा विष्णुरेव न जीव इति ॥ २१९ ॥

उपदेशादिति प्राह फलाध्यायेऽपि स प्रभुः।
मुक्तं जीवं च संपद्याविहायेति पृथग्जगौ ॥ २२० ॥

उपदेशादित्यनेन गृहीतस्य ॐ पृथगुपदेशात् ॐ इति सूत्रस्यायमर्थः। जीवः परमात्मना पृथक् भिन्नः न त्वभिन्नः। कुतः। उपदेशात् भिन्नोऽचिन्त्यः परमो जीवसङ्घादिति श्रुतेः। यतस्त्वसौ नित्यमुक्तो ह्ययं च बन्धान्मोक्षं तत एवाभिवाञ्छेदिति वाक्यशेषान्मुक्तिप्रदत्वोक्त्या भेदस्य तात्विकत्वसिद्धिः। ॐ संपद्याविहाय स्वेन शब्दात् ॐ इति सूत्रस्यायमर्थः। ज्ञानी परंब्रह्म संपद्य प्राप्याविहाय परंब्रह्मानतिक्रम्य स्वेनरूपेणावस्थितः सन् भोगान्भुंक्ते। एतं सेतुमाप्यैतेनैव सेतुना मोदते इत्यादिश्रुतेरिति ॥ २२० ॥

जगद्व्यापारवर्जं त्वित्यत्र सावधिवैभवम्।
मुक्तस्याह हरिं सर्वजगज्जन्मादिकारणम्।
वक्ति स्मादौ ततोऽप्यन्यो मुक्तानां परमा गतिः ॥ २२१ ॥

सावधीति सृष्ट्यादिव्यापारवर्जं न तु सृष्ट्यादिकामानपि मुक्तः आप्नोति। विष्णुस्तु नैवमित्याह हरिमिति। आदौ जन्मादिसूत्रे। 'मुक्तानां परमा गतिः' इत्यनेन मुक्तभेदे भारतमपि प्रमाणयति ॥ २२१ ॥

भेदमाघोषयमास सूत्रे सूत्रे स सूत्रकृत्।
पञ्चधा यो भिनत्तीदं स भेदः केन वार्यते ॥ २२२ ॥

भेदं जिज्ञासानये गुणपूर्णत्वलक्षणोक्त्या प्रतिज्ञातम्। **आघोषयामास**= अध्यायचतुष्टयेन समर्थयामास। समन्वयस्य तत एव निर्दोषत्वस्य जीवेषु साधकत्वस्य, विष्णौ फलप्रदत्वस्य च स्थापनादिति भावः। इदं सेश्वरं जगत्। **पञ्चधा भिनत्ति** 'जीवेशयोर्भिदा चैव जीवभेदः परस्परम्। जडेशयोर्जडानां च जडजीवभिदा तथा। पंचभेदा इमे नित्याः सर्वावस्थासु सर्वदा' इति प्रमाणोक्तरीत्या भेदपञ्चकवत्त्वेन समर्थयति। केन वार्यते इत्याक्षेपः। तदुक्तं न्यायसुधायां 'अनेन लक्षणेन' सजातीयाज्जीवाद्विजातीयाज्जडाच्च ब्रह्म व्यावर्तितं सूत्रकारेण। जीवैक्यनिराकरणसूत्रस्यारंभः कथं जीवैश्वरैक्यवादिनां स्यात्' इति। अद्वैतभाष्यरीत्याऽपि सर्वेषां सूत्राणां भेदपरत्वं श्रीसत्यध्यानतीर्थश्रीचरणप्रणीत 'भेदपराण्येव खलु ब्रह्मसूत्राणि' इति ग्रन्थादवसेयम्॥ २२२ ॥

व्यासविस्तृतमूर्तीनां श्रुतीनां तत्पदे पदे।
जीवेशभेदे तात्पर्यमितिहासपुराणयोः ॥ २२३ ॥

श्रीव्यासकृतयोर्नित्यं महातात्पर्यमत्र हि।
सूत्रानुसारि यत्सर्वं शास्त्रमित्यतिमङ्गलम् ॥ २२४ ॥

विस्तृतेति। 'चतुर्धा व्यभजत्तांश्च चतुर्विंशतिधा पुनः' इत्याद्युक्तरीत्या विभक्तेत्यर्थः। यद्वा सूत्रव्युत्पादितन्यायानुग्रहेण निर्णीतार्थकेत्यर्थः। पदे पदे= अपर्यायानन्तयौगिकपदानाम्। **तात्पर्यमिति।** समर्थितं चैतत् 'गुणोत्कर्षे देवदेवस्य विष्णोर्महातात्पर्यं नैव चान्यत्र सत्यं' इति प्रतिज्ञापूर्वकं भगवत्पादैः तत्त्वनिर्णयादौ। श्रीव्यासकृतयोरिति हेतुगर्भम्। समानकर्तृकत्वादन्योन्यसंवादवतोरिति भावः। **सूत्रानुसारीति।** 'शब्दजातस्य सर्वस्य यत्प्रमाणश्च निर्णयः' इत्युक्तेः। **अशेषं** पौरुषेयापौरुषेयसमस्तसदागमजातम्। **अतिमङ्गलं** 'मङ्गलानां च मङ्गलं' इत्युक्तपरममङ्गलविष्णूत्कर्षतात्पर्यकं अत एव मोक्षरूपमङ्गलमहापुरुषार्थप्रदं च॥ ॥२२३ ॥ २२४ ॥

स्वस्मिन्नध्यात्मसंबन्धभूयस्त्वादेव केवलम् ।
प्राणोऽहमिति शक्रेण प्रोक्तं तत्प्राणतास्य न ॥ २२५ ॥

इत्यैक्यवचसां सूत्रे लक्षणागतिरीरिता ।
सोऽहं ब्रह्माहमित्यादिरीत्या शाखाप्रलम्बिनाम् ॥ २२६ ॥

इदानीं मुखतः ऐक्यपरतया प्रतीयमानानां श्रुतीनां सूत्रे अन्यार्थपरत्वस्थापनपूर्वकं गतिसमर्थनेन नैक्यमिष्टं सूत्रकृत इत्याह **स्वस्मिन्नित्यादिना** । तथा हि, 'न वक्तुरात्मोपदेशादिति चेन्न अध्यात्मसंबन्धभूमा ह्यस्मिन्' इति सूत्रस्यायमर्थः । वक्तुः बृहतीसहस्रवक्तुर्विश्वामित्रस्य इन्द्रेण प्राणो वाऽहमस्मि ऋषे इति आत्मन एव प्राणतयोपदेशान्न प्राणो ब्रह्मेति चेन्न । कुतः । हि यस्मात् अस्मिन् प्रकरणे अध्यात्मं देहेषु विष्णुदेहभूतेषु विश्वामित्रादिषु संबन्धभूमा संबन्धबाहुल्यं व्यपदिश्यते यतः अतः प्राणो विष्णुरिति । यद्वा अस्मिन्निन्द्रे अधिकात्मनः संबन्धभूमा आवेशबाहुल्यम् । हि यस्मात् अस्ति अतस्तदपेक्षया प्राणोऽहमस्मि इत्युक्तिरिति । तथा चान्तर्यामिदृष्ट्यैव ऐक्यव्यपदेशः न त्वेव स्वरूपैक्यनिमित्तक इति भावः । सन्निधानमेव लक्षणाबीजम् । अस्य वाक्यस्य ऐतरेयभाष्योक्तरीत्याऽर्थान्तरं भावदीपे वर्णितमप्यत्रानुसन्धेयम् । सोऽहमस्मि, ब्रह्माऽहमस्मि, इत्यादिवाक्येषु, एतज्जातीयेषु सर्वत्र इयमेव गतिरनुसरणीयेत्याह **स इति** । तदुक्तं अन्तरनये भाष्ये, 'अन्तर्यामिणमीशेशं अपेक्ष्याहं त्वमित्यपि ॥ सर्वे शब्दाः प्रयुज्यन्ते सति भेदेऽपि वस्तुषु' इति ॥ शाखाशब्देन वाक्यानां अपौरुषेयत्वं सूचयति । तेन विरोधेऽर्थान्तरकथनमेव न्याय्यं न तु पुनरन्यतरस्याप्रामाणिकत्व-कथनं इति ज्ञायते । तदुक्तं तत्त्वोद्योते 'वेदवेदानुसारेषु विरोधेऽन्यार्थकल्पना' इति । वेदेऽपि अमुख्यवृत्त्याऽर्थान्तरवर्णनस्यौचित्यं कर्मनिर्णयटीकायां समर्थितमिति भावः ॥ २२६ ॥

वक्तुरात्मोपदेशेपि शक्रस्यात्मा हरिर्न चेत् ।
आत्मेति तूपगच्छन्तीत्यत्र जीवात्मनः कथम् ।
हरिणैक्यं वदेद्व्यासो न हि ते शक्रतोधिकाः ॥ २२७ ॥

ईषदध्यात्मसंबन्धात्तादृग्वाक्यप्रवर्तनम् ।
असूचयद्धि सूत्रेऽस्मिंस्तेनैक्यं न क्वचित्तव ॥ २२८ ॥

एवं वक्तुरित्यादिसूत्रे स्वरूपैक्यं निराकृत्य अन्तर्याम्यैक्यं स्थापयता सूत्रकृता अन्यत्र 'आत्मेति तूपगच्छन्ति' इत्यादि सूत्रेष्वपि अद्वैतिभिः कथ्यमानः स्वरूपैक्यपरः सूत्रार्थः पराकृत इत्याह **आत्मेति** ॥ त्रैलोक्याधिपत्यभिमतः देवेन्द्रोऽपि चेन्न ब्रह्म किंतु तत्सन्निधानविशेषेणैव स्वयोग्योत्कर्षवान् का कथा तदा तदवराणां क्षुद्रजीवानां तदैक्यवार्ताया इति भावः । इदं च उपलक्षणम् । अस्मिन्नेव सूत्रे अध्यात्मशब्देनैव आत्मशब्दोदितविष्णुदेहभूतविश्वामित्रादिसर्वजीवेषु संबन्ध-बाहुल्यस्य 'प्राणस्त्वं प्राणः सर्वाणि भूतानि' इति वाक्यार्थतया व्यवस्थापितत्वाच्चेति बोध्यम् ॥ २२७ ॥ २२८ ॥

परमात्मेति तद्ब्रह्म जानन्ति ज्ञापयन्ति च ।
इत्यर्थो मे सशब्दो यत्स्वभावे परमात्मनि ॥ २२९ ॥

आत्मेतीति सूत्रे आत्मशब्दः परमात्मपर एवेत्याह **परमात्मेति** ॥ **स्वभावे** स्वः स्वतन्त्रो भावः परमात्मा तस्मिन् । सूत्रितं च 'द्युभ्वाद्यायतनं स्वशब्दात्' इति सूत्रे आत्मशब्दस्य परमात्मार्थकत्वम् । अङ्गीकृतं च अद्वैतिभाष्यकृता तथैव । अद्वैतिनस्तु परमात्मेति शब्दमध्याहृत्य आत्मशब्दस्य जीवार्थं कल्पयित्वा ऐक्यं सूत्रस्यास्यार्थं वर्णयन्ति । तेषामध्याहारो दोषः । एवं स्वव्याघातमपि अचेतयतां आत्मशब्दस्य जीवरूपामुख्यार्थत्वकल्पनं च । अस्य सूत्रस्य अद्वैत्यभिमतार्थ-स्यायुक्तता 'भेदपराण्येव खलु ब्रह्मसूत्राणि' इति ग्रन्थे निपुणतरमुपपादिता द्रष्टव्या ॥ ॥२२९ ॥

यस्सत्त्वाच्चावरस्येति सत्तां वक्तीतरस्य च ।
अप्रधानस्य सर्वस्य स मिथ्यात्वं कथं वदेत् ॥ २३० ॥

ॐ तदनन्यत्वमारम्भणशब्दादिभ्यः ॐ इति सूत्रस्यायमर्थः । स्वतन्त्रसाधनस्य ब्रह्मानन्यत्वम् । न ततोऽन्यत्वम् । कुतः । किं स्विदासी-

दधिष्ठानमारम्भणं कतमत्स्वित्कथासीदिति स्वतन्त्राधिष्ठानाद्याक्षेपकशब्दात्। अपरतन्त्रत्वात् स्वतन्त्रत्वात् साधनसत्तादिप्रदत्वादित्यादिपदोक्तव्यतिरेकिहेतुभ्यश्च इति। इदं सूत्रं जगन्मिथ्यात्वं वक्तीति मायावादिनः। तदेतन्न केवलं जगतः भेदस्य च साधकैः पूर्वोदाहृतसूत्रैर्विरुद्धं किं तु एतदधिकरणीयगुणसूत्रेन सत्वाच्चावरस्येति सूत्रेणेत्याह **स इति**। इदं खलु सूत्रं प्रधानसूत्रोक्तार्थे हेतुमाह। यद्यपि अद्भयः संभूतो हिरण्यगर्भः इत्यादि श्रुत्यन्तरेषु ब्रह्मेतरस्य अबुपलक्षितस्य भूतादिसाधनजातस्य सत्त्वं कथ्यते तथाऽपि तत्सर्वं अवरमेव न तु पुनः प्रधानमिति स्वतन्त्रसाधनस्य न ब्रह्मणोऽन्यत्वमिति। तथा च भूतादिसाधनजातस्य सुस्फुटं सत्यत्वं श्रावयन्ती तदवरत्वकथनमुखेन ब्रह्मभेदं च प्रतिपादयन्ती इयं सूत्रकृदुक्तिः कथं न अद्वैतस्य प्रतिकूला भवेदित्याह **कथमिति**॥ यः सूत्रकारः सः कथं वदेदित्यन्वयः॥ २३०॥

स्वतन्त्रकारणस्यान्यस्येशे शून्यत्वतःपरम्।
तदनन्यत्वमप्याह क्वचित्सूत्रे स सूत्रकृत्॥ २३१॥

शून्यत्वतः अभावात्। परं केवलम्। न तु पुनः इतरसाधनस्य स्वरूपेणाभावात्॥ २३१॥

यदुच्चस्य न नीचैक्यं यतस्सच्च न बाध्यते।
अतोऽधिकरणेऽस्मिंश्च मिथ्यात्वादेः कथापि न॥ २३२॥

ब्रह्मणि 'तत्सत्यं' इतिवत् प्रपञ्चेऽपि 'विश्वं सत्यं' इति सेत्सतीत्याह **यत इति**। यथोक्तं मायिभाष्ये यथा च कारणं ब्रह्म त्रिषु कालेषु सत्त्वं न व्यभिचरति एवं कार्यमपि जगत् त्रिषु कालेषु सत्वं न व्यभिचरतीति॥ २३२॥

अप्रधानस्य जगतस्सत्वं सिद्धमभून्मम।
हे(तू)तुं करोति यद्व्यासस्तत्सत्त्वं केन नेष्यते॥ २३३॥

इतश्चैवमित्याह **हेतुमिति**। न हि कोऽपि प्रेक्षावान् स्वप्रतिज्ञायां हेतूकृतस्य सत्त्वस्य स्वरूपासिद्धिं सहत इत्याह **यदिति**॥ २३३॥

किं च भोक्तुः परात्मत्वापत्तेस्सोप्यविभागवान्।
इति चेन्नेति यां पूर्वपक्षीकृत्य निषेधति ॥ २३४ ॥

अविभागाभिधां जीवब्रह्मणोरेकतां तु ताम्।
सिद्धान्तयति यस्सूत्रभाष्यकृत्किल दोष्यसौ ॥ २३५ ॥

ॐ भोक्त्रापत्तेरविभागश्चेत्स्याल्लोकवत् ॐ इति सूत्रस्यायमर्थः। भोक्तुर्जीवस्य मोक्षे ब्रह्मत्वापत्तेः परेऽव्यये सर्व एकीभवन्ति इत्यादिषु श्रवणात् तयोरविभागो भेदाभावः इति चेन्न श्रौतस्यैकीभावप्रयोगस्य लोकवत् सादृश्यैक्यमत्यैक्यनिमित्तादिनैव स्यात् उपपत्तेः न स्वरूपैक्यपरत्वमिति। एवं चात्रैक्यं पूर्वपक्षीकृत्यैव सूत्रे तन्निषेधस्य कण्ठतः सिद्धान्तितत्वात् न कापि ऐक्यं सूत्रार्थः अत एव न श्रौतार्थोऽपीत्याह **किं चेति**॥ यानित्यस्य तामिति उत्तरश्लोकस्थेनान्वयः। अयमर्थः। मायावादिनः खलु अत्र अभिदाया दूषणमेव सूत्रसिद्धान्त इति अभ्युपगच्छन्ति। तथाऽपि सः अविचारितरमणीयो व्यावहारिकः कृपणधियां स्थूलबुद्धीनां समाधानार्थमेवाभिहित इति निन्दित्वा परमार्थतः अभेदमेवार्थं उत्तरसूत्रार्थतया वर्णयन्ति। असौ दोषी सूत्रार्थनिन्दकः भाष्यकृत् किलेत्यपहासः ॥ २३४ ॥ २३५ ॥

भोक्त्रापत्तेस्तदविभागश्चेत्स्याल्लोकवत्त्विति।
एकीभवन्तिवाचाऽत्र प्राप्तमुक्तैक्यशङ्कया ॥ २३६ ॥

एकीभवन्ति गोष्ठेषु गाव इत्यादि लोकवत्।
स्यादित्याह समाधानं तेन मुक्तोऽपि नैक्यवान्।
इति प्राप्तमतो भेदं परमार्थीचकार सः ॥ २३७ ॥

एवं स्वसिद्धान्तितं भेदमर्थं विशदयन् मुक्तावभेदं निराकृत्य स्थापितो भेदः, परमार्थ इत्येव सिद्ध्यतीत्याह द्वाभ्यां **भोक्त्रेत्यादिना** ॥ २३६ ॥ २३७ ॥

तस्माद्भेदोऽप्रतिद्वन्द्वस्तत्र तत्रोदितो भवेत्।
मुक्तोपसृप्यताद्युक्त्या स्थिरीचक्रे पुनश्च तम्॥ २३८ ॥

युक्त्या= द्युभ्वाद्यायतनं विष्णुरेव न रुद्रादिः अमृतस्यैष सेतुः इति मुक्तोपसृप्यत्वयुक्त्या ॥ २३८ ॥

चेतनाचेतनजगद्ब्रह्मैक्याद्भोग्यवस्तुनः।
भोक्तृतापि भवेत्तेन विभागो भोक्तृभोग्ययोः॥ २३९ ॥

न स्यादिति यदीहार्थश्शङ्काग्रन्थस्य कथ्यते।
तर्हि नेति समाधा(त्रा)जडैक्यं नैव कथ्यते॥ २४० ॥

इत्येव वाच्यं शङ्कां तामङ्गीकृत्य समादधत्।
नाभिप्रैतीममर्थं स सूत्रकृद्वदतांवरः॥ २४१ ॥

पराभिमतमर्थमनुवदति **चेतनेति**। जगति चेतनं भोक्तृ अचेतनं भोग्यं इति तावद्विभागेन व्यवहारः। न स युक्तः। उभयोरपि ब्रह्मोपादानकत्वेन उपादानोपादेययोश्चाभेदेन ब्रह्मैक्यमापतितम्। एवं यत् यदभिन्नाभिन्नम् तदभिन्नमिति न्यायेन भोक्तृभोग्ययोरप्यन्योन्यमभेदप्राप्त्या विभागेन अयं भोक्ता इदं च भोग्य इति विभागेन व्यवहारो न स्यादिति, शङ्काभागस्य सूत्रखण्डस्यार्थः। दूषयति तर्हीति। एवं चेत् शङ्काग्रन्थस्याशयः तर्हि जडाजडयोरैक्यमेव नास्ति अतो घटते लोकव्यवहारः इत्येव स्वमतरीत्या परिहारो वक्तव्यः। न तु पुनः स्वसिद्धान्तस्यापि विप्रतीयं जडाजडैक्यमङ्गीकृत्य लोके समुद्राभिन्नानामपि फेनवीचीतरङ्गबुद्बुदादीनां यथा न इतरेतरभावापत्तिः तथा स्यादत्रापीति समाधानसूत्रखण्डस्यार्थवर्णनं अतिस्थवीयः इति ॥ २३९ ॥ २४० ॥ २४१ ॥

मम तु प्रापकीभूतवेदस्योक्तस्य का गतिः।
इति शङ्कां समाधातुं लोकदृष्टिमदर्शयत्।
ऐक्यं तु नोररीचक्र इति सर्वं समञ्जसम्   ॥ २४२ ॥

तस्मादनेन सूत्रेण पराभेद्येन सूत्रकृत्।
बबन्धाद्वैतिनां कण्ठं वाग्बन्धायेति मे मतिः ॥ २४३ ॥

वेदस्य 'परेऽव्यये सर्व एकीभवन्ति' 'यत्र तु सर्वमात्मैवाभूत्' इत्यादिकस्य। **लोकदृष्टि** 'स्वातन्त्र्ये च विशिष्टत्वे स्थानमत्यैक्ययोरपि। सादृश्ये चैक्यवाक् सम्यक् सावकाशा' इत्यनुव्याख्यानोक्ताम्। तथा च विश्वतोमुखत्वादिदं सूत्रं मुक्तौ अभेदवचनवत्प्रतीयमानानां सर्वेषां वाक्यानां मतिकथनद्वारा मुक्तानामपि कर्तृत्वभोक्तृत्वादिकं समर्थ्य पारमार्थिकं भेदं व्यवस्थापयतीति भावः। 'यत्र तु' इति वाक्येऽपि तदित्यानुगुण्येन यत्रेत्यस्य यदित्यर्थः। तथा च सर्वमात्मैवाभूदिति यत् तत् केन मानेनेत्याक्षेपः। कं पश्येदित्यादि तु तर्कमुद्रया प्रवृत्तं विपर्ययपर्यवसानेन कर्तृत्वभोक्तृत्वादिकं व्यवस्थापयत्येव। यद्वा 'यत्र तु सर्वमात्मैवाभूत्' इत्यस्य आत्मप्रेरणामन्तरेण किमपि नाभूदित्यर्थः। केन कं स्वातन्त्र्येण पश्येदित्यर्थः इत्यादिकमूह्यम् ॥ २४३ ॥

एवं च श्रुतिसूत्रादौ न क्वाप्यैक्यं विविक्षति।
सौत्रयुक्तिशरव्रातघातभीरु पदे पदे ॥ २४४ ॥

ऐक्यं कर्तृ। **विविक्षति**= प्रवेष्टुं इच्छति। शक्तितात्पर्यविषयो भवति। प्रामाणिकाः न क्वापि सूत्रार्थनयैक्यं अङ्गीकुर्वति। तत्र हेतुः **सौत्रेति**। अतः साधूक्तमभियुक्तैः "भेदपराण्येव खलु ब्रह्मसूत्राणि" इति ग्रन्थप्रणेतृभिः ॥ २४४ ॥

तद्गुणत्वात्तु तत्त्वोक्तिरित्यन्यत्र प्रलम्बिनाम्।
तत्त्वमस्यादिवाक्यानां गौणीं गतिमसूत्रयत् ॥ २४५ ॥

ॐ तद्गुणसारत्वात्तु तद्व्यपदेशः प्राज्ञवत् ॐ इति सूत्रस्यायमर्थः। परमात्मगुणसदृशानन्दादिगुणस्वरूपत्वादेव न त्वभेदात्। जीवस्य पराभेद-व्यपदेशः। अतः तत्त्वमसि इत्यादिश्रुतिभ्यो नाभेदोऽर्थः ग्राह्यः। प्राज्ञस्य ब्रह्मणो यथा जगदभेदव्यपदेशः 'सर्वं खल्विदं ब्रह्म' इत्यादिश्रुतिष्विव इति। यथोक्तमनुव्याख्याने चेतनत्वादिसादृश्यं यद्यभेद इतीष्यते। अङ्गीकृतं तदस्माभिर्न

स्वरूपैकता क्वचित् इति । विशेषणविभक्तिमात्रस्य गौणत्वम् । न तु पुनः परेणेव प्रातिपदिकद्वयस्य लक्षणावृत्तिरिति तर्कताण्डवोक्तिरत्रानुसन्धेया ॥ २४५ ॥

इदं पराब्रमन्त्राणामुपसंहारकौशलम् ॥ २४६ ॥

उपसंहारः तदभितार्थात्प्रच्यावनेन सिद्धान्तार्थपरत्वेन समर्थनम् । अश्वत्थाम्ना प्रयुक्तस्य अर्जुनेनेवेति हृदयम् ॥ २४६ ॥

तद्गतद्गश्रुतिशतं साक्षीकृत्य स सूत्रकृत् ।
जीवेशभेदसद्रत्नं सूत्रे सूत्रेऽप्यसूत्रयत् ॥ २४७ ॥

तद्गतद्गेति । तत्तदधिकरणविषयवाक्येत्यर्थः । 'पृथगित्यत्र पूर्णता' इत्युक्तमप्यनुसन्धेयम् । एतेन बहुत्वनिमित्तकं प्राबल्यं द्योतितम् ॥ २४७ ॥

इदं च स्वास्त्रमन्त्राणामभ्यासेन पुनः पुनः ।
शक्तेरुत्तेजनं तस्मात्तस्याग्रे कस्य शूरता ॥ २४८ ॥

तस्मात् अभ्यासरूपलिङ्गेन निर्णीततात्पर्यकत्वात् ॥ २४८ ॥

मुक्तोपसृप्यताद्युक्त्या यस्माद्धेदं स(मौ)युक्तिकम् ।
चक्रे तेन निराचक्रे मिथ्यात्वाख्यशराहतिम् ॥ २४९ ॥

मुक्तोपसृप्येति । मिथ्यात्वेति । मौक्तस्य मिथ्यात्वायोगादेवेति भावः ॥ ॥२४९ ॥

मोक्षार्थब्रह्ममीमांसामारभ्य स पदे पदे ।
यतो निरणयद्भेदमतस्तत्त्वं महद्धि तत् ॥ २५० ॥

मोक्षार्थमिति । तेन परैरुच्यमानं क्वचित् पूर्वपक्षसूत्रत्वं पराचष्टे । **अतः** प्रतिसूत्रं निर्णयात् तत् विष्णोः सर्वोत्तमत्वं महत् तत्त्वं महातात्पर्यविषयः ॥ २५० ॥

सूचनात्खलु तत्सूत्रं तादृशैस्सूत्रसञ्चयैः ।
इत्थमाघोषितो योऽर्थस्तत्तत्त्वं तत्त्ववादिनाम् ॥ २५१ ॥

आघोषितः तात्पर्यविषयत्तया निर्णीतः ॥ २५१ ॥

गुणैर्लिङ्गाभिधैर्यस्मात्प्रतिसूत्रं विपक्षिणः ।
प्रत्याक्षिपत्स भगवांस्तद्ब्रह्म गुणबृंहितम् ॥ २५२ ॥

लिङ्गाभिधैः समन्वये हेतुकृतैः । **गुणैः** परोवरीयस्त्वादिभिः । इदमुपलक्षणम् । अत्तृत्वाधिकरणे सुधोक्तरीत्या, समन्वितानामनन्तगुणानां भगवत्स्वरूपलक्षणोक्त्या चेति ध्येयम् । **गुणबृंहितम्** ब्रह्मशब्दनिर्वचन-लब्धानन्दगुणपरिपूर्णम् ॥ २५२ ॥

किञ्च शाणशितैर्बाणैः प्रत्यर्थिमुखमुद्रणम् ।
कुर्वन्नामंस्त बाणाग्रन्यूनतां स रणाग्रणीः ॥ २५३ ॥

प्रत्यर्थिमुखमुद्रणम् नाणुरतच्छ्रुतेरिति चेन्न इतराधिकारात् इत्यादिषु प्रतिपक्षप्रतिक्षेपम् । **न्यूनतां** पूर्वपक्षसूत्रतया परोक्तां अतत्वावेदकताम् ॥ २५३ ॥

अतस्सदाप्यबाध्यत्वं गुणानां व्यासशासनात् ।
साध्यं स्वयमसिद्धेन कस्साधयति पण्डितः ॥ २५४ ॥

शासनात् सूत्रैर्निर्णयात् । **कः साधयेत्** प्रतिवाद्यसिद्धेरिति भावः । तदुक्तं 'असतः साधकत्वं तु न सिद्धं प्रतिवादिनः' इति ॥ २५४ ॥

यस्मादारोपितो हेतुस्साध्यमारोपयेत्परम् ।
यक्षानुरूपो बलिरित्युक्तं वाक्यमनुस्मर ॥ २५५ ॥

आरोपयेत् त्वद्रीत्याऽपि स्वसमानसत्ताकं साध्यमेव साधयेत् । तदुक्तमनुव्याख्याने 'तस्माद्व्यवहृतिः सर्वा सत्येत्येव व्यवस्थिता' इति ।

साध्यसाधनयोर्मिथ्यात्वे बाधासिद्धी दुष्परिहरे इति निष्कर्षः। अत्र विस्तरः सुधायां कथकवादे ॥ २५५ ॥

शब्दानां मुख्यवृत्तिं च शब्दैः सिद्धान्तयन् जगौ।
न चेद्धेतोरनैकान्त्यं तद्ब्रह्मणि न लक्षणा ॥ २५६ ॥

न चेत् अमुख्यवृत्याश्रयणं चेत्। **अनैकान्त्यं इति**। साध्यधर्मस्य पक्षादन्यत्र सिद्ध्यापत्त्या तत्र विपक्षे वर्तमानस्य हेतोरनैकान्त्यस्य आपातादिति भावः। तदुक्तं जन्माधिकरणसुधायां 'लक्षणादिना वृत्तौ वाच्यार्थगुणालाभात्। वाच्ये तद्गुणप्रसङ्गाच्च' इति। पक्षे साध्याभावनिश्चयेन बाधोऽपि स्यादित्यपि बोध्यम् ॥ ॥२५६ ॥

मुख्यान्वयि न चेत्कस्मात्समन्वयमसूत्रयत्।
ब्रह्मसंबन्धतश्शक्रे प्राणनाम कुतो वदेत्।
वेदैश्च सर्वैर्वेद्योऽहमेवेत्याह कुतः प्रभुः ॥ २५७ ॥

'समिति ह्युपसर्गेण परमुख्यार्थतोच्यते' इति भगवत्पादवचनमनुरुध्याह **मुख्येति**। **कुत इति** हीनशक्त्या कथञ्चित्प्राणशब्दसंभवादित्याशयः। **एवेति**। तेन परममुख्यवृत्तेरेव अवधारणादिति भावः ॥ २५७ ॥

तत्तन्नामोक्तधर्माणां यदि ब्रह्मणि नान्वयः।
रूपमात्रस्यैकनाम्ना सिद्धेश्शास्त्रमनर्थकम् ॥ २५८ ॥

स्वरूपमात्रस्य लक्षणं असंभवि। सर्वशब्दावाच्ये लक्षणाऽयोगादिति भगवत्पादोक्तदोषे सत्येव दोषान्तरमाह **अनर्थकमिति**। समर्थितमानर्थक्यं 'सत्यज्ञानादिकेऽप्येवं न व्यावृत्या प्रयोजनम्' इत्यनुव्याख्यानन्यायसुधायाम् ॥ ॥२५८ ॥

द्युभ्वाद्यायतनत्वाद्या धर्मास्सर्वत्र वर्णिताः।
निर्विशेषं क्व मीमांसा क्वेयं सल्लिङ्गशब्दभूः ॥ २५९ ॥

किं च निर्विशेषं च मीमांस्यं चेति व्याहतमित्याह **क्व केयमिति**। तदुक्तं सुमध्वविजये विगीतं न विचार्यं स्यान्न भाव्यं न फलप्रदम्। शून्यं ब्रह्माधमद्वैतं विधिधीगोचरो न यत्' इति ॥ २५९ ॥

अतोऽनन्तगुणं ब्रह्मेत्येव सूत्रकृतो मतम्।
मुक्त्यर्थं कथिता धर्मा मिथ्येत्यपि न शोभते ॥ २६० ॥

उपसंहरति **अत इति** ॥ २६० ॥

अतस्सूत्राक्षरं मूलं न ते शास्त्रस्य दृश्यते।
तन्मन्ये प्रक्रियामूलं त्वत्पूर्वार्जितदुष्क्रियाम् ॥ २६१ ॥

दुष्क्रियां मणिमज्जन्मनि समर्जितां परतत्त्वप्रद्वेषरूपाम्। तदुक्तं 'दुष्कृती निष्क्रियार्थम्। चेन्न भूचक्रमेत्य' इत्यादि वायुस्तुतौ ॥ २६१ ॥

तत्त्वस्यावेदकं किञ्चित्किञ्चित्तत्त्वस्य वेदकम्।
इति वेदेषु यद् द्वैधं न तत्सूत्रकृतो मतम् ॥ २६२ ॥

तत्त्वस्य अवेदकमिति विग्रहः। अतत्त्वावेदकमिति यावत्। किञ्चित्तत्त्वस्य वेदकं इति मुखतः। तन्मते तत्त्वस्य अवेद्यत्वात्। अन्यथा तस्य इतरावेद्यत्वरूपस्वप्रकाशत्वहानेः। दृश्यत्वहेतोस्तत्र व्यभिचारापत्तेश्च। तदुक्तं सुमध्वविजये 'यं तत्त्वावेदकं वेद वेदान्तं, वेददूषकः। तत्त्वस्यावर्णनीयत्वात्स तत्त्वावेदकः कथमि'ति। एवं मणिमञ्जर्यामपि 'अतत्त्वावेदकाः प्रायो वेदाः केचिन्निरर्थकाः। इति वेदान्तवादः स्यात् कथं वादस्तदन्तकः' इति। अङ्गीकृतं च महावाक्यानां अबोधकत्वमेवाद्वैतिभिः। 'ज्ञानं च तस्मिन् परात्मभावनिवृत्तिरेव' (बृ. शां. भा.) इत्यादिना। विस्तृतं चैतत् 'भेदपराण्येव खलु ब्रह्मसूत्राणि' इति ग्रन्थे। (पु. ७६) ॥ २६२ ॥

एकस्यामानता स्याच्चेत्कुतस्सूत्रकृतो वद।
श्रुतीनामविरोधाय द्वितीयाध्यायविस्तरः ॥ २६३ ॥

अविरोधायेति। अन्यतरश्रुतेः अतत्त्वावेदकत्वोक्त्यैव विरोधशमन-संभवात्। 'गृष्ट्योर्मिथो विरोधे तु' इत्यादिना गुणसौरभोक्तरीत्यैवेति भावः ॥ ॥२६३ ॥

जीवेशभेददार्ढ्योक्तेरहमज्ञ इतीरितम्।
अज्ञप्रत्यक्षमप्यज्ञं त्वामेव कुरुते परम् ॥ २६४ ॥

भेददार्ढ्योक्तेः भेदकधर्माणां पारमार्थिकत्वोक्तेः। निर्दोषश्रुतिसाक्षिसिद्धानां मिथ्यात्वायोगात्। 'अहमित्येव यो वेद्यः स जीव इति कीर्तितः' इति श्रुत्या अहंपदाश्रयस्य जीवत्वसिद्धेश्च। **त्वामेव** अखिलसंवेत्तुरज्ञानसंबन्धं साधयितुं उपक्रान्तमेव। एवकारेण 'स्वभावज्ञानवादस्य निर्दोषत्वान्न तद् भवेत्' इत्युक्तानुरोधेन जीवाश्रितं जीवावरकमज्ञानं अङ्गीकुर्वतां तत्त्ववादिनां व्यवच्छेदः। **अज्ञं** नञः विरोधः अर्थः। विपरीतज्ञानिनम्। **करोति** स्थापयति ॥ २६४ ॥

गुरूक्तमन्यथीकुर्वंच्छिष्यो ्ूष्यो विपश्चिताम्।
नानाशास्त्रार्थनिपुणैर्यदुक्तं तत्तथैव हि ॥ २६५ ॥

गुरुक्तं बादरायणेन प्रतिसूत्रं निर्णीतम्। 'यो हि यच्छास्त्रे प्रवर्तते तस्य तत्प्रभवो गुरुरिति प्रसिद्धमेव' इति सुधोक्तेः सूत्रार्थभाषणे प्रवर्तमानस्य मायिनः बादरायणो गुरुरिति सिध्यत्येवेति भावः। **अन्यथीकुर्वन्** सूत्रजातस्य विरुद्धभाषी ॥ ॥२६५ ॥

प्रियं किल श्रोत्रनेत्रनासाकेशाननादिकम्।
शिरःपदं हि केशादिकण्ठान्ताङ्गस्य वाचकम् ॥ २६६ ॥

इदानीं, निर्दोषपूर्णगुणविग्रह आत्मतन्त्रो निश्चेतनात्मकशरीरगुणैश्च हीनः। आनन्दमात्रकरपादमुखोदरादिः सर्वत्र च स्वगतभेदविवर्जितात्मा। इति भगवत्पादोक्तप्रमेयजातं उपनिषद्रूढं दर्शयति प्रियमित्यादिभिः त्रयोदशभिः श्लोकैः। तत्र आनन्दमात्रकरपादमुखोदरादिः इत्येतदर्थं समर्थयितुं शिरआदिपञ्चभिः पदैः यथा यावदङ्गोपाङ्गसंग्रहो भवति तथा तत्पदार्थान् विशदयति

शिरःपदमिति। अनेन कन्धरः शिरोधरः कण्ठः इत्येषां पर्यायशब्दत्वात् कण्ठादुपरितनः तेन धार्यमाणः सर्वोऽपि भागः श्रोत्रादिकः शिरःशब्दवाच्य इत्युक्तं भवति । प्रियं उपकारजं श्रवणोत्थं वा ॥ २६६ ॥

मोदप्रमोदौ दोर्द्वन्द्वं पार्श्वद्वन्द्वं किल प्रभोः ।
दक्षिणोत्तरहस्तौ हि मध्यपक्षौ विदुर्बुधाः ॥ २६७ ॥

मोदः अप्रकृष्टविषयोत्थः दर्शनोत्थो वा । **प्रमोदः** प्रकृष्टविषयोत्थः भोगोत्थो वा ॥ २६७ ॥

आनन्दः किल मध्योरस्स्थलनाभ्युदरादिकम् ।
आत्मशब्दोदितं रूपमेतावद्धि विनिश्चितम् ॥ २६८ ॥

आनन्दः स्वरूपभूतः। तत्तत्प्रवर्तकतया च तत्र व्यपदेशः। इति टीकोक्तरीत्याऽर्थो ध्येयः ॥ २६८ ॥

बृहत्सुखं किलाऽस्यांघ्रिजंघोरूकटिपूर्वकम् ।
मुदः प्रमुद इत्युक्ता मुदत्रोक्ता समाख्यया ।
इयदेव हि मध्यस्य पुच्छं च स्थितिकारणम् ॥ २६९ ॥

ब्रह्म पुच्छं इत्यत्र ब्रह्मशब्दार्थः **बृहत्सुखमिति**। अत्र सुखमित्यर्थलाभः समाख्याबलादित्याह **मुद इति**। अत्र मुन्नामकसुखविशेषस्य समाख्यया लाभप्रकारं अनुपदमेव यत्रानन्दाश्च इति श्लोकेन व्यनक्ति (२७२) । अनेन निर्दोषपूर्णसुख इति भगवत्पादोक्तिर्विवृता । 'पुच्छं प्रतिष्ठा' इत्यत्र प्रतिष्ठाशब्दार्थं स्पष्टयति मध्यस्य **स्थितिकारणमिति**। तच्चांघ्रिजंघादिकमिति ॥ २६९ ॥

प्रियमोदप्रमोदानन्दात्मोर्ध्वाङ्गस्य पादपि ।
सजातीयो यतोऽवश्यं ततो ब्रह्म बृहत्सुखम् ॥ २७० ॥

न केवलं समाख्याबलात् पादाभिधायिब्रह्मशब्दस्य बृहत्सुखमर्थः किं नाम तथाभूतेन रागजातीयत्वाच्चेत्याह **प्रियेति**। पात् वादः ॥ २७० ॥

प्रियमोदप्रमोदानन्दादिसर्वसुखं हि तत्।
प्राचुर्यार्थमयड्वाच्यं सर्वं पूर्णं च तत्किल ॥ २७१ ॥

पूर्वोक्ताः सर्वावयवभूताः सुखविशेषाः मयट्प्रत्ययबलात्प्रत्येकं पूर्णा एवेत्याह **प्राचुर्येति**। एतेन 'आनन्दमात्रकरपादमुखोदरादिः सर्वत्र' इत्यत्र सर्वत्र अवयवेषु इति तथा कार्त्स्न्यार्थकेनापि मात्रशब्देन प्रत्यवयवं चानन्दस्य पूर्णता इति च ज्ञापितं भवति ॥ २७१ ॥

यत्रानन्दाश्च मोदाश्च मुदः प्रमुद आसते।
कामस्य यत्राप्ताः कामास्तत्र माममृतं कृधि ॥ २७२ ॥

इति पञ्चविधानन्दं मुक्तौ वक्ति यतश्श्रुतिः।
अतोऽत्रापि ब्रह्मपदं मुन्नाम सुखसूचकम् ॥ २७३ ॥

पूर्वोदितसमाख्यां विशदयति **यत्रेति**। **यत्र मुक्तौ**। कामस्येत्यत्र काम्यते इति व्युत्पत्त्या प्रियमुच्यते। अयमाशयः। समाख्यावाक्ये पञ्च सुखविशेषा निरूपिताः। तत्र मुदितरे पादेतरशिरआद्यवयवरूपतयोक्ताः। अतः मुद्रूपसुखविशेष एव पादरूपः परिशेषात्पर्यवस्यति इति ॥ तदाह **सूचकमिति** ॥ २७३ ॥

प्रतिबिम्बसमाकारं बिम्बं किं नावलम्बते।
अतस्समासमोक्त्या च मुच्च मुञ्चति नाच्युतम् ॥ २७४ ॥

बिम्बं कर्तृ। तदधीनत्वे सति तत्सदृशत्वं खलु प्रतिबिम्बत्वम्। मुक्तानां प्रतिबिम्बानां आनन्दरूपता यत्रानन्दाश्चेति श्रुतावुक्ता। तेन हि बिम्बस्य ब्रह्मणः आनन्दरूपता सुतरां सिद्धा इत्याह **बिम्बेति**। **समोक्त्या** समाख्यया। मुक्तपरमात्मनोरुभयोरपि समया, उभयेषामपि आनन्दरूपतां प्रतिपादयन्त्या यत्रानन्दाश्च इति श्रुत्या इत्यप्यर्थः ॥ २७४ ॥

पादादिकेशपर्यन्तमेवमानन्दरूपताम् ।
श्रुतिस्तु स्पष्टमाचष्ट सूत्रकारोऽप्यसूत्रयत् ॥ २७५ ॥

निरुपचरितशिरआद्यवयववाचकशब्दप्रयोगात् परमात्मनः साकारतासिद्धि-र्निश्चत्यूहेत्याह **पादादीति** ॥ २७५ ॥

मुख्यार्थस्य परित्यागे पुच्छं ब्रह्मेति गच्छति ।
सा निर्णिनाय पुरुषविध एवेति तद्वपुः ।
कोशात्मदेहसादृश्यस्योक्तेः कोशाच्च भिन्नताम् ॥ २७६ ॥

प्रयोगस्य उपचारस्त्वया नैव वक्तुं शक्यः। तथा सति ब्रह्मणः पुच्छत्वरूपावयवत्वाप्राप्त्या अवयविनः अब्रह्मत्वाक्षेपः त्वदभिलषितो न सिध्येदिति भावेनाह **मुख्येति** ॥ **सा** 'स वा एष पुरुषविध एव' इति प्रत्येकं श्रुतिः । निर्णिनाय एवकारेण । 'पुरुषविध एव' इति सावधारणकोशसादृश्योक्तिः सादृश्यस्य भेदव्याप्तत्वेन कोशभेदमानन्दमयादीनां स्थापयन्ती पञ्चानामपि कोशरूपतां च त्वदभिलषितामुन्मूलयतीत्याह **कोशेति** ॥ २७६ ॥

आशासानस्य ते कोशान्पंचस्थान्यां च वञ्चक ।
शिर आदिपदं मुख्यं मुख्यायोगे हि लक्षणा ॥ २७७ ॥

सेयं परस्य उभयतः पाशारज्जुरित्याह **आशासनस्येति**। पदानां मुख्यप्रयोगाङ्गीकारे साकारतासिद्धिः । नो चेत् उक्तरीत्या अधिकरणसिद्धान्तोच्छेद इति ॥ २७७ ॥

यतश्च सैव पुरुषविध एवेति तद्वपुः ।
विनिर्णयति तेनास्य तनुरासीदबाधिता ॥ २७८ ॥

बाधाभावाभिधायिना एवकारेण आकारस्य पारमार्थिकत्वं च सिद्धमित्याह **यत इति** ॥ २७८ ॥

अतः पूर्णानन्दमात्रं सुखाद्याकारसुन्दरम् ।
नारायणं परं ब्रह्म प्रियमेवेति च श्रुतिः ॥ २७९ ॥

अवधारयन्ती प्रकृतिप्राकृतांशविवर्जितम् ।
केवलानुभवानन्दरूपाकारमनोहरम् ॥ २८० ॥

साक्षादाह श्रुतो यस्य प्रीतिरस्ति मनीषिणः ।
स निराकारतां तस्य कथं ब्रूयान्महात्मनः ॥ २८१ ॥

किं च 'प्रियमेव शिरः' इति चेतनासाधारणप्रियादिगुणरूपावधारणेन आनन्दमयस्य कोशात्मकाचेतनरूपतां निराकृत्य अप्राकृतमनोहराकारतां सुदृढं स्थापयन्ती श्रुतिः तव दुरभिलषितं निराकारवादं निःशेषं निराचष्ट इत्याह **पूर्णेत्यादिभिस्त्रिभिः** ॥ २७९ ॥ २८० ॥ २८१ ॥

अतो व्यासमतस्थं स्वं मन्यमानस्ततोऽन्यथा ।
यो वर्णयति किं नास्य प्रक्रिया विक्रिया किल ॥ २८२ ॥

विक्रिया वाङ्मनसविसंवादः ॥ २८२ ॥

व्याख्यारब्धा न तद्भोक्तुमारब्धं स्वस्य दुष्कृतम् ।
को व्याख्याता निजं मूलमादावेव निकृन्तति ॥ २८३ ॥

व्याख्या न आरब्धा किंतु स्वस्य दुष्कृतं भोक्तुमारब्धं इत्यन्वयः । भोगश्च साधुजनबहिष्कृतत्वम् । तदुक्तं 'उपैक्ष्यतासौ द्विजनायकैस्तदा' इति ॥ २८३ ॥

इत्थं निर्णायके सूत्रे स्पष्टं भेदस्य साधनात् ।
श्रुतिस्मृतिपुराणादौ निर्णेये यत्क्वचित्क्वचित् ॥ २८४ ॥

भेदो नास्तीति वचनं तद्विरोधं निषेधति ।
निर्णायकानुसारेण निर्णयस्य गतिं विदुः ॥ २८५ ॥

टीकानुसारतो ह्यर्थो मूलस्योन्नीयते बुधैः ।
मूलकर्तृकृता टीका धार्यैव शिरसाखिलैः ॥ २८६ ॥

व्याख्यानव्याख्येययोरेकार्थता सुप्रसिद्धा । विरोधे व्याख्यानतो विशेषप्रतिपत्तिः । तत्रापि मूलकृतैव चेद्व्याख्यानं सुतरां तदनुसरणम् । सूत्रं च निर्णेतव्यानां पुराणादीनां निर्णयात्मकत्वेन व्याख्यानरूपम् । पुराणेतिहासप्रणेत्रैव व्यासेन प्रणीतं च । अतस्तस्य ततो बलवत्त्वं सर्वथा । एवं सति विरुद्धवत्प्रतीयमानानि पुराणादिवाक्यानि सूत्रानुसारेणैव योजनीयानीति स्थितिः । निर्णायकेषु सूत्रेषु प्रतिपदं जीवब्रह्मणोर्भेद चेत् एव निर्णीत इति समर्थितम् । अतः यत्र क्वापि पुराणादिषु यदि अभेदपराणीव वचांसि प्रतीयेरन् तानि सर्वाणि 'विरोधे गुणे त्वन्यार्थकल्पना' इति न्यायेन सूत्रानुकूल्येनैव योजनीयानि । तत्र अभेदपरतया प्रतीयमानानां स्वदृश्याभेदादिपरताप्रदर्शनेन गतिर्वाच्येति पूर्वमुक्तम् । भेदो नास्तीति वचने भेदः कीदृशो ग्राह्य इत्यतः तावत् उपलक्षणतया आह **विरोधमिति** ॥ ॥२८४ ॥ २८५ ॥ २८६ ॥

भेदशब्दो हि विद्वद्भिर्मिथो भेदे प्रयुज्यते ।
कृमे विरोधे धीभेदे नाशेऽन्योन्यविमिश्रणे ।
असंयुक्ततयान्योन्यस्थितिश्चापि भिदोच्यते ॥ २८७ ॥

भिन्ना सेना मित्रभेदः क्षीरनीरविभेदनम् ।
भिन्ननीरत्ववाङ्माघे भिदुरांभस्त्ववागपि ॥ २८८ ॥

विमिश्रतामाह यस्मात्तस्माद्भेदो विमिश्रणम् ।
द्वैधं च भेदोपायश्च पृथग्धीः केत्युदीरितम् ॥ २८९ ॥

छिन्नभिन्नमिति प्राहुर्नष्टं घटपटादिकम् ।
भ्रमो भिदा भिनत्त्यर्थानन्यथीकुरुते यतः ॥ २९० ॥

यथासन्दर्भं तादृशगतिप्रदर्शनोपयुक्ततया भेदशब्दस्य अनेकार्थान् प्रसिद्धप्रयोगैरभिनीय दर्शयति **भेदेति। मिथो भेदः** अन्योन्याभावः यथा 'जीवेशयोर्भिदा चैव जीवभेदः परस्परं' इत्यत्र प्रसिद्धः। विरोधे प्रयोगः भागवते 'कथमेकात्मनां भेदः' इति। एकमतीनां यदूनां कथं विरोध इति तदर्थः। एवं मित्रभेद इति पञ्चतन्त्रे। **असंयुक्ततया अन्योन्यं स्थितिः** स्थानभेदः। तस्य निदर्शनं **भिन्ना सेनेति। विमिश्रतायां** प्रयोगे निदर्शनानि क्षीरनीरविभेदनं भिन्नांभस्त्वं भिन्ननीरत्वं इति त्रीणि। 'द्वैधे बहूनां वचनं' इत्यादिको बुद्धिभेदे प्रयोगः। 'पृथग् धीः' इति भ्रमे। तस्यैव पदस्य निरुक्तिदर्शनं भ्रमो भिदेत्यादिकम्। पृथक् अर्थमतिक्रम्य विद्यमाना धीरित्यर्थः। नाशार्थे भिन्नं घटादिकमिति ॥ २८७ ॥ २८८ ॥ २८९ ॥ २९० ॥

त्रयाणामेकभावानां यो न पश्यति वै भिदाम्।
इति तस्योक्तिरव्यक्ता तद्व्यक्तोक्तीर्विचारय ॥ २९१ ॥

यदर्थं भेदशब्दोऽभेदकार्येषु व्युत्पादितः तदिदानीं भागवते चतुर्थस्कन्धे अष्टमाध्याये ब्रह्मविष्णुशिवेषु भेदनिषेधकत्वेन प्रतीयमानश्लोके गतिप्रदर्शनेन निदर्शयति ॥ **त्रयाणामिति ॥** तदध्वरे प्रादुर्भूतस्य हरेर्दक्षं प्रति वचनमिदम्। 'सर्वभूतात्मनां ब्रह्मन् स शान्तिमधिगच्छति' इत्युत्तरार्धः। अयं खलु श्लोकः पौर्वापर्यपर्यालोचनायां ब्रह्मस्थस्य रुद्रस्थस्य हरेश्चेति त्रयाणां विष्णुरूपाणां स्वगतभेदराहित्यं फलरूपतात्पर्यनिर्णायकलिङ्गेन संस्थापयति। ब्रह्मशब्दशिव-शब्दयोर्हरौ समन्वयं स्वातन्त्र्योक्त्या विशदयति। अत्र भिदाशब्दः अन्तर्यामिरूपविवक्षायां स्वरूपभेदपरः। अन्यथा विरोधादिपूर्वोक्तार्थान्तरपरः इति स्थितिः। अद्वैतिनस्तु चतुर्मुखस्य रुद्रस्य विष्णोश्चेति त्रयाणां देवानां भेदनिषेधपूर्वकं ऐक्यं कथयतीति व्याकुर्वते। तेषां व्याख्यानस्य पूर्वोत्तरविरुद्धतया अयुक्ततां प्रदर्शयितुं उपक्रमते **इतीत्यादिना।** तस्य व्यासस्य ॥ २९१ ॥

वितर्कस्समभूत्तेषां त्रिष्वधीशेषु को महान् ॥ २९२ ॥

तत्र तावत् भागवत एव विष्णोरेव ब्रह्मरुद्रापेक्षया श्रेष्ठत्वप्रतिपादकान् निरवकाशकथासंदर्भान् दर्शयति **वितर्क इत्यादिना ॥** तेषां सरस्वत्यास्तटे सत्रमास्थितानामृषीणाम् ॥ २९२ ॥

तच्छ्रुत्वा मुनयस्सर्वे विस्मिता मुक्तसंशयाः ।
भूयांसं श्रद्दधुर्विष्णुं यतश्शान्तिर्यतो भयम् ॥ २९३ ॥

तत् भृगुणा परीक्षापूर्वकम् कृतस्य विष्णोः सर्वोत्तमत्वनिर्णयस्य वचनम् ॥ ॥२९३ ॥

शापप्रसादयोरीशा ब्रह्मविष्णुशिवादयः ।
सद्यः शापप्रसादोऽङ्ग शिवो ब्रह्मा न चाच्युतः ॥ २९४ ॥

शापेति अत्र त्रयाणां स्वभावभेदकथनेन स्वरूपभेदोक्तिः ॥ २९४ ॥

मन्ये त्वां देवदेवानां त्रयाणां पुरुषर्षभम् ।
यद्बाधसे गुहाध्वान्तं प्रदीपप्रभया यथा ॥ २९५ ॥

मन्ये त्वामिति (भा.द.उ.अ.) मुचकुन्दस्य कृष्णं प्रति वचनम् । त्रयाणामिति निर्धारणे षष्ठी ॥ २९५ ॥

देवासुरमनुष्येषु ये भजन्त्यशिवं शिवम् ।
प्रायस्ते धनिनो ब्रह्मन्न तु लक्ष्मीपतिं हरिम् ॥ २९६ ॥

देवासुरेति श्लोकः (भा.द.उ. ९४ अ.श्लो.१) गुणसौरभे विवृतः ॥ २९६ ॥

अत्रापि भृगुरुद्रोक्तिरत्युच्चं हरिमाह हि ।
पूर्वाव्यवहितोक्त्या च सर्वेशो विष्णुरीर्यते ॥ २९७ ॥

अत्रापि अस्मिन्नेवाध्याये । भृगो रुद्रस्य च प्रत्येकं विष्णोः स्तुतिरूपा उक्तिः । तत्र भृगोः स्तुतिः— "यन्मायया गहनयोपहतात्मबोधा ब्रह्मादयस्तनुभृतस्तमसि स्वपन्तः ॥ नात्माश्रितं तव विदन्त्यधुनापि तत्त्वं सोऽयं प्रसीदतु भवान् प्रणतात्मबन्धुः ॥" इति ॥ अनेन 'न ते विष्णो जायमानो न जातो देव महिम्नः परमं तमाप' इति श्रुत्युक्तं विष्णोः सर्वोत्तमत्वं वर्णितम् । एवं रुद्रस्य स्तुतिः— "तव वरद वरांघ्रा वाशिषा चानभिध्ये ह्यपि मुनिभिरसक्तैरादरेणार्हणीये । यदि रचितधियं मां

विद्धि लोकापविद्धं जगति न गणयेयं त्वत्परानुग्रहेण" इति। अनेन विष्णोरनुग्रहमात्रेण रुद्रस्य कृतार्थत्वं गम्यते ॥ अनयोः स्तुत्योः पूर्वया अव्यवहितया उक्त्या, 'तमुपागतमालक्ष्य सर्वे सुरगणादयः' इत्यादिकया (भा.च.अ. ७ श्लो. २२, २३, २४) । व्याख्याता इमे श्लोकाः गुणसौरभे (६९७, ६९८, ६९९) ॥ ॥२९७ ॥

हेतुगर्भैकभावानामिति तन्मध्यगैव वाक् ।
अतोऽपि बुद्धिभेदस्य निषेध इति सिध्यति ॥ २९८ ॥

एकभावानां एकविषयकमतिमताम् । अनेन विशेषणेन, उत्तरत्र निषिध्यमानो भेदः मतिभेद एवेति सिध्यतीत्याह **हेत्विति** ॥ २९८ ॥

मुनिभिश्चर्चितं तत्र तत्र गत्वा विनिश्चितम् ।
भयहृत्त्वेन च प्रोक्तं कथं स्याद्व्यावहारिकम्॥ २९९ ॥

चर्चितं= 'वितर्कः समभूत्तेषां' इत्युक्तेः। विशिष्य प्रत्येकं त्रयाणां परीक्षापूर्वकं निश्चितम्। **भयहृत्वेन** 'यतः शान्तिर्यतोऽभयम्' इति संसारभयं परिहृत्य **शान्तिरूप**मोक्षहेतुज्ञानविषयत्वेन भृगुणा **प्रोक्तम्**। **व्यावहारिकम्** अविद्याकल्पितम् । न ह्याविद्यकंज्ञानं अविद्यानिवृत्तिहेतुरिति भावः ॥२९९ ॥

इदं तु दक्षयज्ञघ्न क्रूरकिङ्करशङ्किना ।
मुनिना तत्प्रियायोक्तमिति स्याद्व्यावहारिकम् ॥ ३०० ॥

कथंचिदुपचारकल्पना त्रयाणामित्यस्यैव श्लोकस्य संभावितेत्याह **इदं तु इति**। इयं संभावनाऽप्यापातत एव। तात्पर्यं तु पूर्वोदाहृतानां विष्णुसर्वोत्तमत्वप्रतिपादकानां श्लोकानां निरुपचरिततया स्वार्थपरत्व एव। मुनेः रुद्रांशस्य शुकस्य अवधूतशिरोमणेरकुतोभयस्य तात्विकप्रमेयोक्तौ क्रूरकिङ्कराणां सकाशात् भयशङ्काया अप्रसक्तेरेवेति मन्तव्यम् ॥ ३०० ॥

विशिष्टैक्यं च तेनास्ति ततोऽन्योर्थस्तवैव हि ।
अमुख्यवृत्तिः किल ते मुख्यार्थे सति सा कथम् ॥ ३०१ ॥

किंच अद्वैतमतरीत्याऽपि अत्र निषिध्यमानो भेदः न तावद्विशिष्टानाम् । विशिष्टभेदस्याङ्गीकारेण तन्निषेधेऽपसिद्धान्तापातात् । नापि चिन्मात्रस्य लक्षणया । विरोधाद्यनेकमुख्यार्थानां वक्ष्यमाणरीत्या संभवेन लक्षणाबीजस्य मुख्यार्थानुपपत्तेरभावात् । चिच्चितोर्भेदस्याप्रसक्तेस्तन्निषेधायोगात् । 'मत्प्रसादात् परां शान्तिं स्थानं प्राप्स्यसि शाश्वतम्' इति हर्यनुग्रहफलत्वेनोक्तस्यैव शान्त्याधिगमस्य 'स शान्तिमधिगच्छति' इत्येवमत्रापि फलतयोक्तत्वेन तस्य निर्विशेषचैतन्यज्ञानफलत्वानुपपत्तेः । अधिगच्छतीत्युक्तप्राप्तेः प्राप्तृप्राप्तव्यरूपभेदस्यैव साधकत्वाच्च । परमते भेदमात्रस्य निषेद्धव्यत्वेन त्रयाणामेव केवलं विशिष्य भेदनिषेधकत्वे शेषभेदविध्यनुज्ञापकत्वेन विरोधाच्च । 'सर्वभूतेषु येनैकं भावमव्ययमीक्षते । अविभक्तं विभक्तेषु तज्ज्ञानं विद्धि सात्विकम्' इति गीतायां भूतानां परस्परं भेदस्य, तदन्तर्यामिण ईश्वरस्यैव चैक्योक्तेः तद्विरोधाच्च इत्यादिकं दूषणमूह्यम् ॥ ३०१ ॥

विभजस्व यथा न्यायं नैव भेदो यथा भवेत् ॥ ३०२ ॥

भागवत एव विरोधार्थे भेदशब्दप्रयोगं दर्शयति **विभजस्वेति** । (भा. अ. ८ श्लो. ५३) दैत्यानां मोहिनीं प्रति वचनम् ॥ ३०२ ॥

यन्निमित्तस्स वै शापो यादृशो द्विजसत्तम ।
कथमेकात्मनां भेद एतत्सर्वं वदस्व मे ॥ ३०३ ॥

परीक्षितः शुकं प्रति प्रश्नः (भा.एका.अ. १ श्लो. ९) **यदिति** ॥ सदा अविरुद्धबुद्धीनां यदूनां कुलसंहारहेतुः अन्योन्यं विरोधः केन निमित्तेनाभूदिति प्रश्नाशयः ॥ ३०३ ॥

इत्यस्मिन्नेव यद्ग्रन्थे तत्र तत्र प्रयुज्यते ।
विरोधे भेदशब्दोऽयं सामादौ लौकिकैरपि ।
अतो यं मुख्य एवार्थो मुख्ये सति न लक्षणा ॥ ३०४ ॥

सामादौ सामदानभेददण्डरूपनीतिचतुष्टये। **अतो** रूढ्यनुमापकस्य प्रयोगबाहुल्यरूपलिङ्गस्य सद्भावात्। **सा** त्वत्कल्पितचिदैक्यसिध्यर्थं कैरपि प्रमाणविद्भिरनङ्गीकृता जहदजहल्लक्षणा ॥ ३०४ ॥

अथवा वागियं तेषामेकार्थविषयाः सदा।
ये भावास्तद्भिदां नेति बुद्धिभेदं निषेधति ॥ ३०५ ॥

तमेव श्लोकं रीत्यन्तरेण योजयति **अथवेति। त्रयाणां** ब्रह्मविष्णुशिवानाम्। संबन्धे षष्ठी। **एकभावानां** एकविषयकबुद्धीनाम्। **भिदां** भिन्नविषयकत्वम् ॥ ॥३०५ ॥

तदैव यत्प्रसज्येत निषेधस्तस्य युज्यते।
शैववैष्णवयोर्वैरं मिषतां तु तयोरपि।
विरोधशङ्का तत्रैव प्रसक्ता सा निषिध्यते ॥ ३०६ ॥

निषेधायापेक्षिता अव्यवहितपूर्वप्रसक्तिरपि प्रकृते बुद्धिभेदस्यैव न स्वरूपभेदस्येत्याह **तदेति** ॥ शैवः नन्दीश्वरः। वैष्णवः भृगुः तयोः। **वैरम्** तदनुमापकं अन्योन्यं शापविसर्जनादिकम्। **मिषतां** पश्यतां जनानाम्। **तयोः** शिवस्य विष्णोश्च। **विरोधशङ्का** भृत्ययोः विरोधेन तत्स्वामिनोरपि विरोधो भवेदिति संभावना ॥ ३०६ ॥

रूपभेदप्रसक्तिस्तु सदा त्रिस्थानवासिनाम्।
अतोऽत्रैव न तत्प्राप्तिर्निषेधोऽयं च तस्य न ॥ ३०७ ॥

त्रिस्थानवासिनां इति हेतुगर्भं विशेषणम्। ब्रह्मविष्णुशिवाः स्वरूपतो भिन्नाः (सत्यलोकवैकुंठकैलासरूप) भिन्नस्थानस्थितत्वात् सम्मतवत् इति प्रयोगो ध्येयः। इयं च स्वरूपभेदप्रसक्तिः सर्वदैवास्तीति न दक्षाध्वरप्रसङ्गे इदानीमेव तन्निषेधस्य न विशेषसङ्गतिरिति भावः ॥ ३०७ ॥

पूज्यपूजकभावेन प्रेम्णस्तत्रैव दर्शनात्।
विरोधस्तु निषेधार्हः कथं भेदो निषिध्यते ॥ ३०८ ॥

किंच शैववैष्णवयोः दक्षाध्वरे कलहः आगन्तुकक्षुद्रकारणनिमित्त एव। न तेन स्वामिनोः शिवविष्ण्वोर्विरोधः शक्यसाधनः। ब्रह्मणः विष्णोश्च विरोधवार्तैव न। अतः भ्रान्त्यैव कल्पित इति युक्तस्तन्निषेधः। स्वरूपभेदस्तु त्रयाणां 'नाहं न च शिवोऽन्ये च तच्छक्त्येकांशभागिनः' इति चतुर्मुखवाक्याद्यनेकप्रमाणप्रमितः। अत्रैव दक्षाध्वरे ब्रह्मणा शिवेन च कृतया विष्णोः पूजया च सर्वैः प्रत्यक्षीकृतः। अतः स नैव निषेधार्हः इत्याह **पूज्येति** ॥ ३०८ ॥

तदैव तत्सभामध्ये त्रिरूपाणां त्रिलिङ्गिनाम्।
स्तोतृस्तव्यतया नम्यनन्तृभावेन च स्थितेः ॥ ३०९ ॥

सा च पूजा स्तुतिनतिरूपानेकविधेत्याह **तदेति** ॥ ३०९ ॥

तमुपागतमालक्ष्य सर्वे सुरगणादयः।
प्रणेमुस्सहसोत्थाय ब्रह्मेन्द्रत्र्यक्षनायकः ॥ ३१० ॥

तत्तेजसा हतरुचस्सन्नजिह्वास्ससाध्वसाः।
मूर्ध्न्युद्धृताञ्जलिपुटा उपतस्थुरधोक्षजम् ॥ ३११ ॥

अप्यर्वाग्वृत्तयो यस्य महित्वे स्वभुवादयः।
यथामति गृणन्ति स्म कृतानुग्रहविग्रहम् ॥ ३१२ ॥

तामेव निदर्शयति **तमित्यादिभिः** त्रिभिः ॥ व्याख्याता इमे श्लोकाः गुणसौरभे (६९७, ६९८, ६९९) ॥ ३१० ॥ ३११ ॥ ३१२ ॥

इति पूर्वोक्तविस्पष्टवाक्यादस्पष्टनिर्णयः।
न हि तात्कालिकाज्ञानी त्रिकालज्ञानवान्मुनिः ॥ ३१३ ॥

मुनिः शुकः ॥ **अस्पष्टनिर्णयः।** भिदाशब्दस्य 'यो न पश्यति वै भिदां' इत्यत्रत्यस्य स्वरूपभेदपरत्वं विनिवार्य विरोधपरत्वेन निर्णयः ॥ ३१३ ॥

महिम्न्यर्वाग्वृत्तयश्चेत्कथं तेऽधिकवृत्तिना।
हरिणैक्यं प्राप्नुवन्तीत्यादिवाक्यं विचार्यताम् ॥ ३१४ ॥

इति एतदर्थपरम्। **आदिवाक्यं** 'अप्यर्वाग्वृत्तयः' इत्यादिरूपम् ॥ ३१४ ॥

यन्मायया गहनयेत्युक्तं मध्ये भृगोर्वचः।
आश्रयाश्रयिभावाद्यैस्स्वरूपैक्यं निषेधति ॥ ३१५ ॥

मध्ये 'अप्यर्वाग्वृत्तय' इति श्लोकस्य 'त्रयाणामेकभावानां' इति श्लोकस्य च मध्ये ॥ **वचः** यन्मायया गहनयाऽपहृतात्मबोधा ब्रह्मादयस्तनुभृतस्तमसि स्वपन्तः। नात्माश्रितं तव विदन्त्यधुनाऽपि तत्त्वं सोऽयं प्रसीदतु भवान् प्रणतात्मबन्धुः' इति स्तुतिरूपम्। **आद्यै**रित्यनेन तैः साकल्येनाज्ञेयत्वं प्रणतत्वं, तद्बन्धुत्वं इत्यादिकं ग्राह्यम् ॥ ३१५ ॥

त्रयाणामेकभावानां यो न पश्यति वै भिदाम्।
इत्यन्तिमं वचस्तच्च कथं हन्त्यादिमध्यमौ ॥ ३१६ ॥

आदिमध्यमौ अनेकाभ्यां निरवकाशाभ्यां ताभ्यां स्थापितं स्वरूपभेदम्। **हन्ति** बाधते। न हि दुर्बलं प्रबलसाधनस्येष्टे इति भावः। अतः अन्तिमस्यैव विरोधाभावः अर्थ आश्रयणीयः ॥ ३१६ ॥

त्रयाणामेकभावानां यो न पश्यति वै भिदाम्।
आदिमध्यान्तपद्यानां स शान्तिमधिगच्छति ॥ ३१७ ॥

मुमुक्षुणा खलु 'पूर्वोत्तराविरुद्धः प्रमाणान्तराविरुद्धश्च शास्त्रार्थः' इति शास्त्रमर्यादाऽवश्यं माननीया इत्येतदर्थपरतयाऽपि त्रयाणामिति श्लोकं योजयति **त्रयाणामिति।** आदिमध्यान्तपद्यानामिति शेषोक्तिः। **एकभावानां** अन्योन्यमविरुद्धाशयानाम्। **सर्वभूतात्मनां सर्वस्मिन्** 'सर्वं समाप्नोषि ततोऽसि

सर्वः' इति स्मृत्यनुसारेण सर्वव्यापके विष्णौ **भूतः** प्रतिपादकतया विद्यमानः आत्मा स्वरूपं येषां ते सर्वभूतात्मानः तेषाम्। **भिदां** विरुद्धार्थकल्पनेन अन्यतरस्या-प्रामाण्यम् **यः न पश्यति** किन्तु 'वेदवेदानुसारेषु विरोधेऽन्यार्थकल्पना' इति न्यायमनुरुध्य भिदां इत्यस्य विरोधार्थकत्वं आश्रित्य एकवाक्यतयाऽर्थमङ्गीकरोति **सः** अधिकारी यथार्थज्ञानी **शान्तिं मोक्षं** अधिगच्छति। अनेवंभूतस्य मिथ्याज्ञानिनस्तम एव परायणमिति भावः ॥ ३१७ ॥

यदि स्वरूपभेदस्य निन्दैवेयं भवेत्तदा।
व्यर्थोच्छिष्टाहुतेराज्ञा सर्वाशर्वाहुतिर्यतः।
निर्मूल एव कलहो निर्मूला शान्तिरप्यभूत् ॥ ३१८ ॥

विष्णोः सर्वेभ्य उत्तमत्वे ज्ञापकमुक्त्वा, ब्रह्मणो रुद्रादुत्तमत्वेऽपि पूर्वप्रवृत्तां कथां ज्ञापिकामाह **यदीति**॥ अत्र आगताय ब्रह्मणे रुद्रः उत्थाय चक्रे शिरसाऽभिवन्दनम्' इति, तथा ब्रह्मणा तदनुग्रहाय 'एष ते रुद्रभागोऽस्तु यदुच्छिष्टोऽध्वरस्य वै' इति उच्छिष्टाहुतेराज्ञा कृतेति च कथा श्रूयते। स्वरूपैक्ये तदेतदसङ्गतमेव स्यात्। न हि क्वापि स्वात्मने एव प्रणामः स्वात्मन्येव चानुग्रहः क्रियमाणो दृष्टचरः। अतो विरोधार्थक एवायं भिदाशब्दः इति विपर्यये पर्यवसातव्यम्॥ ३१८ ॥

पारमार्थ्येन भेदोऽयं यदि नेति मतं तव।
अपारमार्थ्येन तदा नेत्यार्यस्य मतं भवेत्।
अतस्सुस्थिर एवायं भेदोऽभूत्पदकल्पने ॥ ३१९ ॥

अथ मन्येत। अस्तु भेदः। स चापारमार्थिको व्यावहारिक एव। पारमार्थिक एव च निषिध्यत इति। तत्र प्रष्टव्यम्। स किं प्रत्यक्षादाकलितोऽन्यो वा यो निषिध्यते। आद्ये कथमङ्गीकृतस्य निराकरणम्। अन्यश्चेन्निषिध्यतां न नो हानिरित्याह **पारमार्थ्येनेति** न हि प्रत्यक्षादिप्रमितादन्यः पारमार्थिको भेदो नामास्तीति भावः। तदुक्तं भगवत्पादैः। 'प्रत्यक्षादिसिद्धत्वे च भेदस्य तद्विरोधादेवा-

प्रामाण्यमभेदागमस्ये'ति । किं च अविद्यमानस्य पारमार्थ्येन इति पदस्य कल्पनं किं प्रमाणबलात्क्रियते उत एवमेव वा । नाद्यः । तदभावादेव । त्वया प्रमाणमात्रस्य मिथ्यात्वाङ्गीकाराच्च । न द्वितीयः । एवं तर्हि अपारमार्थ्येन इत्यप्यध्याहारसंभवेन तवैवानिष्टमापद्यत इत्याह **अपारमार्थ्येनेति**। सुस्थिरः । द्वौ नञाविति न्यायादिति भावः ॥ ३१९ ॥

कथमार्यो न चरमो वाक्यप्रामाण्यरक्षणात् ।
अनार्यश्च कथं नाद्यो वाक्यप्रामाण्यशिक्षणात् ॥ ३२० ॥

'वेदवेदानुसारेषु विरोधेऽन्यार्थकल्पना' इति न्यायस्य सम्माननात्तत्त्ववादी आर्यः तदवधीरणान्मायी अनार्य इत्याह **कथमिति**। तदुक्तं चन्द्रिकायां अन्तरधिकरणे। श्रुतौ श्रद्धालुना श्रुत्योर्विषयभेदेन तात्त्विकविषयत्वस्यैव वक्तव्यत्वाच्च इति ॥ ३२० ॥

न चेदपारमार्थ्येन तत्त्वमस्यादिवागपि ।
वक्त्यैक्यं पारमार्थ्येन त्वं त्वमेवासि तच्च तत् ॥ ३२१ ॥

इत्याहेति भवेच्छुत्या मिथ्यार्थस्तत्र कथ्यते ।
मुख्ये बाधेऽप्यमुख्यार्थः कथ्यते सावकाशया ॥ ३२२ ॥

न चेत् 'यत्रानवसरोऽन्यत्र पदं तत्र प्रतिष्ठितम् । वाक्यं वेति सतां नीतिः सावकाशे न तद्भवेत्' इति शब्दाध्याहारनीतिं न्यक्कृत्य त्वया निरङ्कुशोऽध्याहार आस्थीयते चेत् । **अपारमार्थ्येनेति** । इति पदेनाध्याहृतेन इति शेषः । अपारमार्थ्येन इत्यावर्तते । वाक् अपारमार्थ्येन ऐक्यं वक्ति **इत्याहेति** । भवेत् इति योजना । तथा सति फलितमर्थं भेदावधारणमाह **त्वं त्वमेवेति** । बाधेऽपि इत्यत्रापिपदेन प्रकृते मुख्यार्थबाधो नास्त्येवेति गर्हां सूचयति। आत्मा तत्त्वमसीत्यत्र अतदिति पदच्छेदाश्रयणात्, प्रकृते च भिदाशब्दस्य विरोधरूपमुख्यार्थस्यैव स्वीकाराच्चेति भावः ॥ ३२१ ॥ ३२२ ॥

सोऽनुप्रविष्टो भगवांश्चेष्टारूपेण तं गणम् ।
भिन्नं संयोजयामास सुप्तं कर्म प्रबोधयन् ॥ ३२३ ॥

इत्यसंयुक्तताभेदो ग्रन्थेऽस्मिन्नेव कथ्यते ।
असंयुज्यस्थितिं तेषामियं वाक्तन्निषेधति ।
सदा संयुज्यवसतामङ्गहृत्पद्मधामसु ॥ ३२४ ॥

भिदाशब्दस्य सावकाशतां संभवदनेकार्थतोक्त्या द्रढयति **स इति । भिन्नं** असंयुक्तम् । **अस्मिन्नेव ग्रन्थे** तृ. स्कं. षष्ठे अध्याये । **इयं वाक्** । त्रयाणामित्यादि वाक् । अंगानि हृत्पद्म च इति धामसु । एकं पदम् । 'सयुजा सखायौ' इति श्रुतेः । हृत्पद्मेत्युक्त्या शिवेन ब्रह्मणा च तदधिष्ठितस्य विष्णोः ध्येयत्वमुक्तं भवति । तदुक्तमत्रैव 'अधोक्षजो मे मनसा विधीयते' इति शिवेन, 'यन्मे हृदौत्कंठ्यवता धृतो हरिः' इति ब्रह्मणा च विष्णोः ध्यानम् ॥ ३२४ ॥

उक्ताविरोधसिद्ध्यर्थमर्थोऽयं च निगद्यते ॥ ३२५ ॥

चशब्दो न केवलं भिदाशब्दस्य सावकाशतादृढीकरणार्थः किन्तु अविरोधसिध्यर्थं च कथितः इति भावं समुच्चिनोति ॥ नित्यं ध्यात्रोः शिवब्रह्मणोर्ध्येयेन हरिणा कथं विरोध इति ॥ ३२५ ॥

देवानुद्दीपयन्विष्णुर्दैवैरूपैः किलाविशत् ।
असुरानासुरैरूपैर्नागान्नगाकृतिः किल ॥ ३२६ ॥

अन्तस्सर्वत्र तद्रूपरूपो विष्णुश्च तिष्ठति ।
तद्ब्रह्मस्थब्रह्मरूपाच्छिवस्थशिवरूपतः ।
पृथक्स्थितस्य विष्णोर्वाग्भेदमेषा निषेधति ॥ ३२७ ॥

देवानिति । इदं पद्यं, भागवते अष्टमस्कन्धे सप्तमाध्याये 'तथाऽसुरानाविशदासुरेण रूपेण तेषां बलवीर्यमीरयन् । उद्दीपयन् देवगणांश्च विष्णुर्दैवेन नागेन्द्रमथापरेण' इति पद्यस्यार्थसंग्रहपरम् । अत्र 'तत्र तत्र स्थितो

विष्णुस्तत्तच्छक्तीः प्रबोधयन्' इति सर्वगतत्वनये अनुव्याख्यानोक्तं एकस्यैव विष्णोर्बहुरूपग्रहणेन देवासुरनागशक्तिप्रबोधकत्वं निरूप्यते । न तावता विष्णोः स्वरूपभेदप्रसक्तिरस्ति । एवं 'ब्रह्मणि ब्रह्मरूपोऽसौ शिवरूपी शिवे स्थितः' इत्युक्तदिशा शिवे ब्रह्मणि च स्थितयोरन्तर्यामिरूपयोस्तथा बहिःस्थितस्य विष्णुरूपस्य च भेदनिषेधः 'त्रयाणामेकभावानां' इति श्लोकेन क्रियते । तदुक्तं गीतायां 'सर्वभूतेषु येनैकं भावमव्ययमीक्षते । अविभक्तं विभक्तेषु तज्ज्ञानं विद्धि सात्विकमि'ति अहमात्मा गुडाकेश सर्वभूताशयस्थितः इति च । तथा च भिदाशब्दस्य स्वरूपभेदपरत्वेऽपि न काऽप्यनुपपत्तिरिति योजनान्तरमाह **अन्तरिति** ॥ ३२६ ॥ ३२७ ॥

संयुज्यैव स्थितिं प्रोक्ता स्थिरीकर्तुमिदं वचः ।
हृदिस्थरूपप्रेमित्वादवैरं वा तयोर्हरौ ॥ ३२८ ॥

इदं वचः अन्तर्यामिरूपोक्तिः ॥ ३२८ ॥

अन्तर्यामिविवक्षायां भेदो नाशो भ्रमोऽपि वा ।
मिश्रणं वा क्रमादेषु त्रितयं वाङ्निषेधति ॥ ३२९ ॥

अस्यां विवक्षायां विष्णोर्महिमातिशयलाभोऽपि भवतीत्याह **अन्तर्यामीति** । **एषु** त्रिषु रूपेषु । **त्रितयं** नाशं भ्रमं मिश्रणं चेत्येवंरूपम् ॥ ३२९ ॥

अभेदघटनायोक्ता त्रयाणामप्यनाश्यता ।
नश्यद्देहेऽप्यनाशाय तद्देहे भ्रमशून्यता ।
अविद्याद्यैरमिश्रत्वं तदभ्रान्त्यै निगद्यते ॥ ३३० ॥

निषेधप्रकारमुपपादयति **अभेदेति** । मूलरूपस्य चतुर्विधनाशाभावः 'यः स्वतन्त्रः परो विष्णुर्जन्ममृत्यादिवर्जितः' इति तत्त्वनिर्णयोदाहृतब्रह्माण्डादि-प्रमाणैस्तावत्प्रमितः । तत्र यदि अन्तर्यामिरूपयोर्द्वयोरन्यतरस्यापि वा नाशः स्यात् तर्हि रूपत्रयस्याभेदो न स्यात् । नाशानाशरूपविरुद्धधर्माक्रान्तत्वेन भेदस्यैव प्राप्तेः । निषिद्धश्च भेदोऽनेनैव पद्येन । अतोऽन्तर्यामिरूपयोरपि नाशाभावः

सिध्यति। चेतनस्य स्वरूपतो नित्यस्य नाशो नाम स्वभिन्ने प्राकृतदेहे भ्रममूलकस्य ममेत्यभिमानस्य नाश एव। अतो नाशाभावादेव तन्निमित्तभ्रमाभावः तेन च तन्निमित्तभूताज्ञानमिश्रणाभावश्च सिध्यत इत्याह **अभेदेति**। यथोक्तं भागवते 'यन्निबन्धोऽभिमानोऽयं यद्वधात्प्राणिनां वधः। तथा न यस्य कैवल्यादभिमानोऽखिलात्मनः'। इति। कैवल्यात् देहाभावादेव। अत्र निषिध्यमानं मिश्रणं हेयोपादेयरहितमित्युक्तरीत्या उपादेयानां गुणानां हेयैरविद्यादिदोषैर्मिश्रणमेव प्रमाणानुगुण्यादित्याह **अविद्येति**॥ ३३०॥

अन्तर्यामिविवक्षायां मुख्या स्यादेकभावना।
भिन्नभिन्नमनस्कत्वान्न चेन्नातोऽपि तस्य वाक्॥ ३३१॥

अस्यां विवक्षायां एकभावानामित्यस्य मुख्यार्थ एव ज्ञापक इत्याह **अन्तर्यामीति**। अत्र भावोऽन्योन्यसुखदुःखाद्यनुसन्धानप्रयोजकं अन्तःकरणम्। तदैक्ये मूर्तित्रयस्य स्वरूपैक्यं सुलभमेवेति भावः। अन्तःकरणैक्यं च भिन्नान्तःकरणाभावादेवेति भावः॥ ३३१॥

रूढलक्षणयाऽन्यत्र बुद्धेरैक्यं च भिन्नता।
विषयस्यैक्यभेदाभ्यामुक्ते मुख्यं तु तद्धरौ॥ ३३२॥

अन्यत्र स्वरूपभेदवत्सु लोके ब्राह्मणादिषु। भिन्नता इत्यनन्तरं इति द्वे इति शेषः। उक्ते इत्यनेनान्वयः। प्रथमाद्विवचनम्। विषयैक्यभेदाभ्यामिति क्रमेणान्वयः। विषयैक्ये बुद्ध्यैक्यं, इदानीं ब्राह्मणा एकभावा इति। विषयभेदे बुद्धिभेदः पूर्वं ब्राह्मणाभिन्नभावा इति च प्रयोगात्। उभयत्र भावशब्दस्य विषये रूढलक्षणैव। हरौ तु **तत्** एकभावत्वं **मुख्यं तु** मुख्यमेव न चान्तर्यामिविवक्षायां विष्णोरेकत्वेन त्रयाणामित्युक्तत्रित्वानुपपत्तिः। 'द्वित्वं चैकस्य युज्यते' इति अनुव्याख्यानोक्तदिशा विशेषबलेनोपपत्तेः॥ ३३२॥

शब्दो नेयो ह्यनेकार्थे निर्णीतोऽर्थः क्व नीयते।
पुत्रो न पुत्रीति वाक्यं निर्णीतार्थानुसारि हि॥ ३३३॥

अपि च शब्दार्थयोः अर्थस्यैव प्राधान्यम्। अतः प्रमाणनिर्णीतार्थानुसारेण सावकाशाः शब्दा एव योजनीयाः। न तु वैपरीत्यमित्याह **शब्द इति**। अन्यथा वाक्यस्य योग्यताविरहेणाप्रामाण्यापत्तिः। एकार्थकोऽपि शब्दो वृत्त्यन्तराश्रयणेन भवत्यर्थान्तरपरः। अर्थस्तु नैवमिति भावः। तत्रानुरूपं लौकिकनिदर्शनमाह **पुत्र इति**। गर्भस्थः शिशुः पुत्रः पुत्री वेति पृष्टः कश्चन शाकुनशास्त्रमजानानः स्वाज्ञानमाच्छादयन् ब्रूते पुत्रो न पुत्री इति। इदं च वाक्यं नञः पूर्वेण उत्तरेण वा शब्देन योजनायां अर्थद्वयपरतया व्याख्यानार्हम्। यदि पुत्रो जायेत, न पुत्री इत्यन्वयेन अथ पुत्री तर्हि न पुत्र इत्यन्वयेन व्याख्यानसंभवात्। नैवं पुत्रस्य पुत्र्या वाऽन्यथाभवनं शक्यसंभावनम्। प्रकृते च ब्रह्मविष्णुशिवानां स्वरूपभेदः परःसहस्रैः प्रमाणैरवसितः। अतः संभवदनेकार्थो भिदाशब्द एव तदानुगुण्येन व्याख्यातव्य इति भावः। यथोक्तं गुणसौरभे तत्तत्पदार्थसामर्थ्यानुपमर्देन शब्दतः। अर्थो बोध्यो न शब्दस्य सत्त्वादर्थोपमर्दनमिति। (श्लो. ८५८) अत्र निदर्शनान्तराणि तत्रोक्तान्यनुसन्धेयानि ॥ ३३३ ॥

अतो निर्विषराशिस्थो विषबिन्दुश्च निर्विषम्।
ग्रन्थेऽस्मिन्नेव यद्ब्रह्मी त्रयाणां भेदवाक्स्फुटा ॥ ३३४ ॥

विषबिन्दुः विपरीतलक्षणया अमृतबिन्दुः। शास्त्रोक्तस्य विषबिन्दुत्वानुपपत्तेः। अतः 'धर्मो भवत्यधर्मोऽपि' इत्यत्र अधर्मवत्प्रतीयमानोऽपि इतिवत् अत्रापि विषबिन्दुवत्प्रतीयमानोऽपि इति व्याख्येयम् ॥ ३३४ ॥

शृणु देवि प्रवक्ष्यामि तामसानि यथाक्रमात्।
येषां श्रवणमात्रेण पातित्यं ज्ञानिनामपि ॥ ३३५ ॥

मात्स्यं कौर्मं तथा लैंगं शैवं स्कान्दं तथैव च।
आग्नेयं तु षडेतानि तामसानि निबोध मे ॥ ३३६ ॥

वैष्णवं नारदीयं तु तथा भागवतं शुभम्।
गारुडं च तथा पाद्मं वाराहं शुभदर्शने ॥ ३३७ ॥

सात्विकानि पुराणानि विज्ञेयानि शुभानि वै ॥ ३३८ ॥

ब्रह्माण्डं ब्रह्मवैवर्तं मार्कण्डेयं तथैव च।
भविष्यद्वामनं ब्राह्मं राजसानि निबोध मे ॥ ३३९ ॥

सात्विका मोक्षदाः प्रोक्ता राजसाः स्वर्गदाः शुभाः।
तथैव तामसा देवि निरयप्राप्तिहेतवः ॥ ३४० ॥

पाद्मे वैष्णवादीनां पुराणानां सात्विकत्वादिनोक्तं विभागमाह **शृण्वित्यादिभिः** ॥ ३३५ — ३४० ॥

तथैव स्मृतयः प्रोक्ता ऋषिभिस्त्रिगुणान्विताः।
सात्विका राजसाश्चैव तामसाश्शुभदर्शने ॥ ३४१ ॥

वासिष्ठं चैव हारीतं व्यासं पाराशरं तथा।
भारद्वाजं काश्यपं च सात्विका मुक्तिदाश्शुभाः ॥ ३४२ ॥

वामनं याज्ञवल्क्यं च आत्रेयं दाक्ष्यमेव च।
कात्यायनं वैष्णवं च राजसाः स्वर्गदाश्शुभाः ॥ ३४३ ॥

गौतमं बार्हस्पत्यं च सांवर्तं च यमस्मृतम्।
शाङ्खं चौशनसं देवि तामसा निरयप्रदाः ॥ ३४४ ॥

किमत्र बहुनोक्तेन पुराणेषु स्मृतिष्वपि।
तामसा निरयायैव वर्जयेत्तान्विचक्षणः ॥ ३४५ ॥

तत्रैवोक्तं तादृशं स्मृतिविभागमाह **तथैवेत्यादिभिः** ॥ ३४१ — ३४५ ॥

शास्त्राण्यपि च सर्वाणि त्रिविधानि महायते ॥ ३४६ ॥

यानि सत्त्वपरं विष्णुं वदन्ति परमेश्वरम्।
तानि सर्वाणि शास्त्राणि सात्त्विकानि मतानि वै ॥ ३४७ ॥

प्रजापतिं कृशानुं च तथा देवीं सरस्वतीम्।
परत्वेन वदच्छास्त्रं राजसं परिचक्षते ॥ ३४८ ॥

यच्छास्त्रं लिङ्गपारम्यं परंदेवमुमापतिम्।
तमःप्रवर्तकं वक्ति तत्तामसमुदाहृतम् ॥ ३४९ ॥

सत्वनिष्ठा हि पुरुषा विष्णुमेव यजन्ति ते।
ब्रह्माणं राजसास्सर्वे तमोनिष्ठास्तु शूलिनम्॥ ३५० ॥

एवं गारुडे त्रैविध्यमुक्तं शास्त्राणामाह **शास्त्राणीति** ॥ ३४६ — ३५० ॥

इति पाद्मे गारुडे च त्रिदेवपदसेविनाम्।
विरुद्धं त्रिप्रकारत्वं तद्ग्रन्थस्य त्रिरूपता।
कथं त्रिदेवतैक्यं स्यात्समत्वं वा कथं वद ॥ ३५१ ॥

एवमुक्तरीत्या देवतात्रयप्रतिपादकानां ग्रन्थानां तदध्येतॄणां तत्तत्प्राप्यफलानां च सात्त्विकत्वादिना विभागोक्तिः देवतानां स्वरूपैक्ये साम्ये वा नैव संजाघटीतीत्याह **इतीति** ॥ ३५१ ॥

कृष्णरामादिभक्तेषु तद्ग्रन्थेष्वपि नेदृशः।
विभागो दृश्यते तस्माद्ब्रह्मेशौ न हरिस्स्वयम् ॥ ३५२ ॥

विमता पुराणोक्तिः तारतम्यवत्स्वरूपकदेवताविषयिणी विरुद्धसंज्ञकत्वात् व्यतिरेकेण रामकृष्णादिमहिमोक्तिवत् इति प्रयोगो ध्येय इत्याह **कृष्णेति** ॥ ३५२ ॥

पञ्चसात्विकसाचिव्यात्स्पष्टगारुडवाग्बलात् ।
पाद्मस्य ह्युत्तरः काण्डस्स्वयं सिद्धान्त एव सन् ।
संज्ञाशक्त्या च पूर्वांशं पूर्वपक्षीकरोति हि ॥ ३५३ ॥

नन्वेवं विष्णूत्कर्षप्रतिपादकत्वेन भवदभिमते पाद्मे कथं पूर्वकाण्डे अन्यथोक्तिरित्यतः पूर्वपक्षवचनदशायामेव तत्रैव उत्तरकाण्डे सिद्धान्तप्रतिपादनपरे विष्णुसर्वोत्तमत्वस्यैवोक्तेरिति समाधातुं उत्तरकाण्डस्य सिद्धान्तत्वे युक्तित्रयमाह **पञ्चेति स्पष्टेति संज्ञेति च** । तद्विरुद्धत्वात् संज्ञाशक्तेश्च पूर्वकाण्डः पूर्वपक्ष एवेत्याह **पूर्वांशमिति** ॥ ३५३ ॥

ऊर्ध्वं गच्छन्ति सत्वस्था मध्ये तिष्ठन्ति राजसाः ।
जघन्यगुणवृत्तिस्था अधोगच्छन्ति तामसाः ॥ ३५४ ॥

गीतोक्तं अधिकारित्रैविध्यं तद्गतीनां च त्रैविध्यमाह **ऊर्ध्वमिति** ॥ ३५४ ॥

इति गीतोक्तिमार्गेण त्रयाणामधिकारिणाम् ।
गतित्रयं दातुमेव चक्रे व्यासात्मको हरिः ।
त्रिविधानि पुराणानि बुद्धो बौद्धागमं तथा ॥ ३५५ ॥

व्यासस्य त्रिविधग्रन्थनिर्माणे निमित्तमाह **इतीति** । तथा च अयोग्यजनमोहनार्थं राजसतामसग्रन्थनिर्माणमित्युक्तं भवति । मोहनं च तत्वाङ्कुरसंरक्षणार्थम् । बौद्धागमं यथा तथा गतित्रयं दातुमेव इत्युक्त्या तस्यापि सतां तत्त्वज्ञानार्थता उक्ता भवति । यथोक्तं 'दितिसुतमोहन विमलविबोधन परगुणबुद्ध हे भव मम शरणमि'ति ॥ ३५५ ॥

हेयाहेयविभागश्च सात्विकेष्वेव दर्शितः ।
योग्यानां बुद्धिशुद्ध्यर्थं यतस्ते सात्विकप्रियाः ॥ ३५६ ॥

मोहकग्रन्थेषु विपरीतोक्त्या तेन सात्विकानां कुतो न मोहः इत्यतः पुराणकृतैव तेषामग्राह्यत्वस्य सात्विकशास्त्रेषु सुदृढतया समर्थितत्वादित्याह **हेयेति** ॥ ३५६ ॥

राजसे तामसे चैव विवेकोऽयं न दर्शितः।
अयोग्यानामबोधार्थं ततस्तत्रैव ते रताः ॥ ३५७ ॥

एवं तर्हि तत एव कुतो अयोग्यानामपि मोहानिवृत्तिरित्यत आह **राजसे चेति** ॥ ३५७ ॥

एवं पुराणकर्त्रैव स्वकृतग्रन्थराशिषु।
ग्राह्यग्राह्यविभागोक्तेर्न सन्देहो विवेकिनाम् ॥ ३५८ ॥

तस्माच्छैवब्राह्मणपक्षपुराणवचनाश्रयात्।
न तत्वप्रच्युतिः कार्या कार्याकार्यविवेकिना॥ ३५९ ॥

अतो मोहकत्वात् सद्भिः सच्छास्त्राभ्यास एव नित्यं कार्यः। दुःशास्त्राणि च यत्नतः परित्याज्यानि इति स्थितमित्याह **एवमिति** ॥ ३५८ ॥ ३५९ ॥

द्वितीयाभिनिवेशेन भयं स्यादिति यद्वचः।
तच्चात्मदेहगेहादिद्वयशब्देन भण्यते ॥ ३६० ॥

तत्राग्रहाद्भयं ते स्यात्ततो भक्त्या भजेश्वरम्।
इत्याह नो चेद्वाक्यस्य पूर्वोत्तरविरुद्धता ॥ ३६१ ॥

भागवते (ए. स्कं. द्वि. २७) 'भयं द्वितीयाभिनिवेशतः स्यात् ईशादपेतस्य विपर्यया स्मृतिः। यन्माययातो बुध आभजेत्रं भक्त्यैकयेशं गुरुदेवतात्मा' इति श्लोकं अद्वैतिनः ब्रह्मातिरिक्तद्वितीयवस्तुमिथ्यात्वपरत्वेन वर्णयन्ति। तेन च जीवब्रह्मणोरभेदः सिध्यतीति मन्वते। तन्निराकृत्य तस्य भेदपरतां निर्धारयति **द्वितीयेत्यादिभिः**। भण्यते इत्युक्त्या तात्पर्योक्तं 'आत्मनो देहगेहादि द्वयशब्देन भण्यते' इति हरिवंशवचनं संगृह्णाति। तच्च वचः इत्याह इत्यन्वयः। अभिनिवेशशब्दस्यार्थः **आग्रह इति**। 'अविद्यमानं जीवस्य प्रतिभाति तदीयवत्' इति तात्पर्योक्तेः। **भयं** संसारभयम्। 'बुधः भक्त्या ईशं आभजेत्' इति उपास्योपासकभावोक्त्या जीवपरयोर्भेदः स्फुटः। **नो चेत्** उक्तमर्थमनङ्गीकृत्य,

द्वितीयशब्दस्य निर्विशेषब्रह्मातिरिक्तप्रपञ्चमात्रमर्थमङ्गीकृत्य तत्र अभिनिवेशातः सत्यत्वभावनया भयं स्यादित्यप्रामाणिकार्थः वर्ण्यते चेत् ॥ ३६१ ॥

आत्मतोऽन्यद् द्वितीयं चेद् भयं तत्राग्रहाद्यदि ।
तर्हीशभक्तिभजनरूपे मुख्ये द्वितीयके ।
कथमन्ते विधिश्च स्याद्यत्पूर्वार्धे निषिध्यते ॥ ३६२ ॥

गुरुदेवतयोरात्मा चित्तं यस्येति विग्रहे ।
पदं तदपि वक्तीशभजकस्य गुणान्तरम् ॥ ३६३ ॥

विरुद्धतामेवोपपादयितुं अत्रैव श्लोके अनेकद्वितीयवस्तुविधानं दर्शयति **तर्हीति** । कर्ता बुधः । क्रिया आसम्यक् भजनम् । ईशः कर्म । एकया भक्त्या इति ईशभजने इत्थं भावः । गुरुदेवतात्मा इत्यनेन 'यथा देवे तथा गुरौ' इति प्रमाणोक्ता गुरुदेवतयोः योग्यताऽनुसारिणी भक्तिः । एतत्सर्वं द्वितीयं साक्षाद्भेद-साधकत्वान्मुख्यमित्याह **मुख्ये इति** । तदुक्तं अनुव्याख्याने 'कर्तृकर्मणोरुत्सर्गतो भिदा' इति । अङ्गीकृतश्चायं नियमः स्वकर्मकसविद्रूपत्वमनङ्गीकुर्वता मायिना ॥ ॥३६२ ॥ ३६३ ॥

न चेत्प्रागुक्तभजनं विरुद्धार्थः कथं वद ।
लिङर्थस्सोऽपि बलवान्विशेषणपदार्थतः ॥ ३६४ ॥

बलवान् 'न विधौ परःशब्दार्थ' इति शाबरवचनात् ॥ ३६४ ॥

अतो ग्रान्थिकमुद्राज्ञो नापातार्थेन तुष्यति ॥ ३६५ ॥

ग्रान्थिक मुद्रा प्रमाणविरोधाभावरूपयोग्यताघटितागमलक्षणम् ॥ ३६५ ॥

पूर्वोत्तराविरुद्धार्थं वदेन्मीमांसया बुधः ।
न चेदाकाशशब्देन परं ब्रह्म कथं जगुः ॥ ३६६ ॥

पूर्वेति । तदुक्तं वार्तिके 'पौर्वापर्यपरामृष्टः शब्दोऽन्यां कुरुते मतिम्' इति । **जगुः** मीमांसका इति शेषः ॥ ३६६ ॥

ग्रन्थेऽस्मिन्देहगेहादि भयहेतुतयोच्यते ।
स्थले स्थले तत्समोक्त्या तस्यैव स्याद्
द्वितीयता ॥ ३६७ ॥

स्थले स्थले 'हित्वाऽऽत्मपातं गृहमन्धकूपम्' । 'हित्वा गृहं संसृतिचक्रवालम्' 'किमु व्यवहितापत्यदारागारधनादयः' इत्यादिषु । **द्वितीयता** भयजनकताऽवच्छेदकं रूपम् ॥ ३६७ ॥

सद्धर्मं साधुभिस्सङ्गं तत्पूरुषनिषेवणम् ।
यो ह्यपेक्षितमाचष्टे निराचष्टे कथं हि तत् ॥ ३६८ ॥

सद्धर्मं 'धर्मस्यापवर्ग्यस्य' 'तच्छ्रद्धया भगवद्धर्मचर्यया' इत्यादिना, एवं **सत्सङ्गं** 'तुलयाम लवेनापि न स्वर्गं नापुनर्भवम् । भगवत्सङ्गिसङ्गस्य' 'सङ्गस्तेष्वथ ते प्रार्थ्यः' इत्यादिना, **तत्पूरुषनिषेवणं** 'महत्सेवां द्वारमाहुर्विमुक्तेः' इत्यादिना **अपेक्षितं** पुरुषार्थहेतुम् । **तत्** भयनिवृत्तिहेतुतया स्वयमेव तात्पर्यतो विहितं एतत्सर्वं द्वितीयं वस्तु । **निराचष्टे** भयहेतुतया ब्रूयात् ॥ ३६८ ॥

अपि चाभिनिवेशस्य भयदत्वे स एव हि ।
त्याज्यस्स्यात्सोऽपि बाध्यो न द्वितीयं केन
बाध्यते ॥ ३६९ ॥

स एव अभिनिवेश एव न तु द्वितीयमित्येवकारार्थः । अन्यथा चोरापराधेन माण्डव्यस्य शूलारोपणन्यायः । **बाध्यो न** यत्र भयदत्वं तत्र त्याज्यत्वमित्येव व्याप्तेः । कण्टकादिषु तथैव दर्शनात् । न तु बाध्यत्वमिति । तत्रैव व्यभिचारात् । द्वितीयबाध्यत्वम् तु कफोणिगुडायितमिति भावः ॥ ३६९ ॥

अतोऽद्वितीयभावस्य कथमाशात्र कथ्यताम्।
गृहात्प्रव्रजिते भिक्षौ किं गेहं भस्मसाद् भवेत् ॥ ३७० ॥

प्रव्रजिते यद्भयहेतुः तत् त्याज्यमिति अनुसन्धाय इति पूरणीयम्। **भस्मसाद् भवेदिति**। दूरे बाधितं इति हृदयम्। अन्यथा भस्मीभावस्य सत्यत्वेनैव व्याप्तेः बाधाभावे निदर्शनत्वानुपपत्तेः। ज्ञाननाश्यत्वं मिथ्यात्वं इत्यभिप्रायेण वा उक्तिः ॥ ॥३७० ॥

द्वयोऽयं देहगेहादिस्स्वभावेनैव देहिनाम्।
अविद्यमानोभिमानाद्भाति स्वीयतया किल ॥ ३७१ ॥

भागवते तत्रैवोत्तरश्लोकार्थं (श्लो. ३८) विविनक्ति **द्वय इति**। अविद्यमानोऽप्यवभाति हि द्वयो ध्यातुर्धिया स्वप्नमनोरथो यथा। तत्कर्मसङ्कल्पविकल्पकं मनो बुधो निदध्यादभयं ततः स्यात्' अस्यार्थः हरिवंशासमाख्योक्त्या तात्पर्यं निर्णीतः। 'आत्मनो देहगेहादि द्वयशब्देन भण्यते। अविद्यमानं जीवस्य प्रतिभाति तदीयवत्। जाग्रद्वत्तु यथा स्वप्नः प्रतिभाति मनोरथः। विद्यमानवदेवैवम् देहादीशवशे स्थितम्। विभाति स्ववशत्वेन सैषा संसृतिरुच्यते। तस्मात्तद्विषयं त्यक्त्वा मनो विष्णौ निवेशयेत् इति ॥ ३७१ ॥

सर्वथा विद्यमानत्वे शशशृङ्गायितो भवेत्।
पारमार्थ्येन तादृक्त्वं तव मे तूक्तवर्त्मना ॥ ३७२ ॥

पारमार्थ्येन अविद्यमान इति तु अयुक्तम्। प्रमितस्य पारमार्थ्यनिषेधायोगात्। स्वव्याहतं च एवं व्याख्यानं यथोक्तं भामत्याम्। 'प्रमाणानि खलु स्वगोचरे प्रवर्तमानानि तत्वमित्येव प्रवर्तन्ते इति ॥ **उक्तवर्त्मना** अकारवाच्यविष्णोर्वशत्वेन विद्यमानः इत्युक्तमार्गेण ॥ ३७२ ॥

ईशात्सर्वेश्वराद्विष्णोरपेतस्य ततः प्रभोः।
ब्रह्मणस्तु द्वितीयेऽपि ब्रह्मण्यभिनिवेशतः ॥ ३७३ ॥

निर्गुणाख्येऽभिमानेन भयं भवति यन्नृणाम् ।
विपर्ययः स्मृतिश्च स्यान्मुकुन्दब्रह्ममोचनात् ॥ ३७४ ॥

इदानीं 'भयं द्वितीयाभिनिवेशतः' इति पद्यं अद्वैतशैवमतयोर्निरासकत्वेन प्रवृत्तिकर्मनिरासपरत्वेन च व्याख्याति **ईशादित्यादिभिर्नवभिः** ॥ ईशब्दवाच्याया लक्ष्म्या **ईशात्** अत एव सर्वेश्वराद्विष्णोरपेतस्य, तस्मिन् परब्रह्मत्वबुद्धिशून्यस्य, प्रत्युत ततः प्रभोर्ब्रह्मणः सकाशात्, **द्वितीयेऽपि** प्रमाणबाह्यतया गर्हिते दुराग्रहमात्रकल्पिते निर्गुणे **ब्रह्मणि अभिनिवेशतः** परब्रह्मत्वदुराग्रहवतः **विपर्ययः** मिथ्याज्ञानं तन्निमित्तकं भयं अन्धंतमः स्यात् । तत्र हेतुः **मुकुन्दस्य** मोक्षप्रदस्य **ब्रह्मणः** मोचनात् अपलापादिति ॥ ३७३ ॥ ३७४ ॥

सगुणस्य द्वितीयं हि निर्गुणं स्यान्न चापरम् ।
निरर्थोऽसि निरर्थाख्यं भेदकं यदि मुञ्चसि ॥ ३७५ ॥

निर्गुणमित्यत्र निरुपसर्गस्याभावः अर्थः । तथा च **सगुणस्य द्वितीयं** भिन्नम् । सजातीयेत्यर्थस्य परेणैव अनादरणात् भिन्नमित्येवार्थस्तेन वाच्यः । **निर्गुणमेव** गुणरहितमेव स्यात् । न च **अपरं** गुणपूर्णम् । स्वस्य स्वस्मादेव भिन्नत्वासंभवात् । न वा अपरं त्रिगुणभरितं प्रकृत्यात्मकम् । अन्यथा निरुपसर्गस्य अर्थं भेदं **मुञ्चसि** । **यदि** । तर्हिनिरर्थोसि शब्दार्थानभिज्ञः **असि** भवेः ॥ ३७५ ॥

द्वितीयकोटिस्थेशात्ते द्वितीयं स्यात्तदेव हि ॥ ३७६ ॥

ते तव मते, 'ब्रह्म सत्यं जगन्मिथ्या' इत्येवंरूपे, द्वितीयकोटिस्थेशात् जगदन्तर्भूतात् ईशात् सगुणात् द्वितीयम् **तदेव** निर्गुणमेव **हि** उक्तनिरुपसर्गसामर्थ्यात् स्यात् ॥ ३७६ ॥

अतो भक्त्या तमेवेशं भजेद्यस्तु गुरुर्भुवि ।
देवता च भवेत्तादृशाचार्ये यत्नवान्बुधः ॥ ३७७ ॥

अतः निर्गुणे अभिनिवेशस्य तमआख्यभयहेतुत्वात् **तमेव** मुकुन्दमेव **ईशं** परब्रह्मत्वेन 'परंब्रह्म परंधाम पवित्रं परमं भवान्' इति गीतोक्तवर्त्मना भजेत् । तदर्थं गुरुः मध्वः स चासौ देवता वायुः । तयोरभेदात् । तच्छास्त्राध्ययने **आत्मा** यत्नः यस्य स तादृशः भवेत् । आत्मा यत्ने धृतौ देहे इत्यभिधानम् ॥ ३७७ ॥

इति वाक्यार्थमालोच्य त्यजान्यद्भजनः प्रभुम् ॥ ३७८ ॥

अन्यत् नैर्गुण्यभावनाम् ॥ ३७८ ॥

अविद्यमानो ह्यत्यन्ता सन्नपि द्वयशब्दितः ।
द्वितीयो निर्गुणाख्यात्मा ध्यातुर्नैर्गुण्यवादिनः ।
दुर्धिया भाति तत्वं तु तन्न किन्त्वच्युताभिदः ॥ ३७९ ॥

'अविद्यमान' इति श्लोकमुक्तार्थे योजयति । **अविद्यमानः** अत्यन्तासन् । स्वकीयत्वेन इत्यध्याहारः अस्यां योजनायां नापेक्षितः । द्वयशब्दार्थस्य निर्गुणस्य सर्वथाऽप्रामाणिकत्वादेव । **द्वयः** निर्गुणः आत्मा । **ध्यातुः** सर्वमपि ध्यानरूपमुपासनं अविद्यमानविषयकमेवेति वासनावतः मायिनः **धिया** उक्तदुर्धिया **भाति** मुखतः **तत्वं तु तन्न** । 'भावाभावविवर्जितं समरसं' इति वदद्भिस्तैरेव निर्गुणस्य प्रामाणिकत्वरूपतत्त्वताऽनङ्गीकारात् । **किन्तु अच्युताभिधः** 'अच्युतो यो गुणैर्नित्यमेवाखिलै'रित्युक्तः गुणपरिपूर्ण एव **तत्त्वं** स्वतन्त्रतत्त्वम् ॥ ३७९ ॥

अस्मात्पद्यद्वयात्पूर्वपद्ये स्पष्टोदितः किल ।
उपर्युपरि चक्राङ्कोऽधोऽधो नारायणश्च यः ॥ ३८० ॥

पूर्वपक्षे 'मन्ये कुतश्चिद्भयमच्युतस्ये'ति पद्ये, **उपर्युपरि** अव्यवहितोपरितने 'शृण्वन् सुभद्राणि रथाङ्गपाणेः' इति श्लोके रथाङ्गपाणिरिति **चक्राङ्कः** **अधोऽधः** अव्यवहिताधोभागस्थे 'नारायणायेति समर्पये तत्' इति श्लोके **नारायणश्च यः** स एव तत्त्वमिति पूर्वेणान्वयः ॥ ३८० ॥

दैवत्वे नासदीशादेर्वा द्वयस्याग्रहाच्च भीः।
गुरुत्वेन तु तत्सेवाऽसूचिपूर्वविशेषणात् ॥ ३८१ ॥

शैवादिमतमपाकरोति **दैवत्वेनेति**। सर्वोत्तमत्वेन इत्यर्थः। असन् अविद्यमानश्चासौ ईशादिश्च तस्य द्वयस्य रुद्रादेः। आग्रहात् परदेवतात्वाभिमानात्। 'साम्याधिक्ये तदन्येषामित्युक्तपरतत्वप्रद्वेषात् **भीः** अधमा गतिः। गुरुदेवतात्मा इति विशेषणेन इतरदेवतासु गुरुत्वदेवत्वबुद्धिः योग्यतानुसारिणी आवश्यकीत्याह गुरुत्वेनेति। 'परिवारतया ग्राह्या अपि हेयाः प्रधानतः' इत्युक्तेः। एतदाह **गुरुत्वेनेति**। यद्वा मीमांसकाभिमतकाम्यकर्मनिराकरणमनेन क्रियते। तथा हि। **अविद्यमानः** शास्त्रतात्पर्यविषयतया अविद्यमानः रोचनार्थं फलश्रुतिरिति वचनात् 'ज्योतिष्टोमेन स्वर्गकामो यजेते'त्यादिशास्त्रतात्पर्याविषय इत्यर्थः। 'न ह्यल्पफलभाग्वेदो वासुदेवैकसंश्रयः' इति भागवततात्पर्योक्तेः। **द्वयः** 'नारायणायेति समर्पयेत्तत्' 'शृण्वन् सुभद्राणि रथाङ्गपाणेः' इत्यत्रैव पूर्वत्र उत्तरत्र चोक्तान्निवृत्तिकर्मणो भिन्नः प्रवृत्तिकर्मसमूहः। **ध्यातुः** 'इदमद्य मया लब्धं इमं प्राप्स्ये मनोरथम्' इति विषयविचारमग्नस्य **धिया** कामकलुषितया **अवभाति** शास्त्रतात्पर्यविषयतया प्रतीयते। कामिनः कृपणालुब्धाः पुष्पेषु फलबुद्धयः इति तात्पर्यवचनात्। तस्मात् बुधः कर्मसंकल्पविकल्पकं मनो निरुंध्यात् बहिर्मुखं यथा न भवति तथा निगृह्णीयात्। सिद्धविशेषे इष्टे इष्टसाधने च हरौ स्थापयेच्च। ततः अभयं स्यात्। 'निवृत्तं सेवमानस्तु ब्रह्माभ्येति सनातनम्' इत्युक्तं निर्वाणं भवेत् इति ॥ ३८१ ॥

त्वमेवाहमिति प्रोक्तेप्यैक्याशा नैव शक्यते।
त्वमेवाहमिति प्राहुरतिस्निग्धं यतो जनाः ॥ ३८२ ॥

अहं पृथक्पृथक्त्वं किं त्वमेवाहमिति प्रभुः।
स्वमन्त्रिणमतिप्रेम्णा किं न वक्ति प्रियंवदः ॥ ३८३ ॥

तस्मादेतादृशे वाक्ये प्रतीतार्थे तु बाधिते।
प्रेमग्राह्यमबाधे तु स्वरूपैक्यमिति स्थितिः ॥ ३८४ ॥

अहं भवान्न चान्यस्त्वं त्वमेवाहं विचक्ष्व भोः ।
न नौ पश्यन्ति कवयश्छिद्रं जानुमनागपि ॥ ३८५ ॥

बोध्यस्य मरणसमये बोधकस्तस्मै तत्त्वं उपदिशति **अहं भवान्न चान्यस्त्वं इत्यादिना**। अयं श्लोकः **अग्रे (३७५)** समग्र उदाहृतः। स श्लोकस्तात्पर्ये व्याख्यातः। जीवसत्ताप्रदत्वाच्च सदृशत्वाच्च केशवः। कथ्यते तदभेदेन न तु जीवस्वरूपतः इति ॥ तत्र प्रतीतं स्वरूपैक्यं भेदानुभवबाधितम्। अतः अतिप्रेमनिमित्तकोऽयं औपचारिको व्यपदेशः। रूढोपचारत्वात्र प्रयोजनापेक्षा इत्याह **त्वमित्यादिभिः** ॥ ३८२ ॥ ३८३ ॥ ३८४ ॥ ३८५ ॥

इति भागवते प्रोक्ता ततो हंसस्य वागपि ।
लोकानुसारिणी बोध्यहंसे प्रेमैव शंसति ।
बोध्यबोधकयोरज्ञसुज्ञयोरैक्यवादिनी ॥ ३८६ ॥

इति भागवते (च. स्कं. अ. २८ श्लो. ६९) प्रोक्ता सुज्ञस्य हंसस्य परमात्मनः बोधकस्य, अज्ञं हंसं बोध्यं जीवं प्रति वाक्, यथा लोके नृपः प्रियममात्यं प्रति 'ममात्मा भद्रसेनः' इति उपचारेण वक्ति तदनुसारिणी तात्पर्यतः प्रेमैव शंसति। न तु स्वरूपैक्यम्। आत्मनो जीवस्य धर्मिणः अज्ञत्वेन बोध्यत्वेन च प्रत्यक्षेण, तथा प्रतियोगिनः परस्य सर्वज्ञत्वेन बोधकत्वेन च निर्णीतत्वेन ऐक्यप्रतीतेः जीवे साक्ष्यनुभवबाधेनानुत्थानादेवेति भावः ॥ ३८६ ॥

अथवा बिम्बभूतस्य स्वस्य स्वप्रतिबिम्बतः ।
जीवाद्व्यक्त्यविनाभावं न त्वैक्यं वक्ति बाधितम् ॥ ३८७ ॥

स्वस्य परस्य। **अविनाभावं** सयुजौ इति श्रुत्युक्तां व्याप्तिम्। व्याप्तौ ऐक्यव्यपदेशः 'सर्वं समाप्नोषि ततोऽसि सर्वः' इति गीतायां समर्थितः ॥ ३८७ ॥

विशिष्टैक्यानभिमतेर्मुख्यार्थस्तु तवापि न ।
अमुख्यार्थानुसारेण कुतो लोकव्यतिक्रमः ॥ ३८८ ॥

तुशब्देन परस्य प्रातिपदिकार्थस्य मम तु विभक्तिमात्रस्य अमुख्यार्थता इति विशेषं सूचयति। एवं परेणाश्रितायाः जहदजहल्लक्षणायाः सर्वथाऽप्रामाणिकत्वं च ॥ ३८८ ॥

बर्हिष्मन्नेतदाख्यानं पारोक्ष्येण प्रकीर्तितम्।
यत्परोक्षप्रियो देवो भगवान् विश्वभावनः।
इति पौरंजनोपाख्यानोपसंहारवागियम् ॥ ३८९ ॥

बर्हिष्मन्निति नारदस्य वचनम्। **पारोक्ष्येण** सात्विकानां यथार्थज्ञानं इतरेषां विपरीतं यथा भवेत्तथा संमुग्धप्रकारेण। **देव** इत्यनेन 'परोक्षप्रिया इव हि देवाः' इति श्रुतिप्रमाणं द्योत्यते। **विश्वभावनः** विश्वस्य सुरासुरप्रपञ्चस्य भावनः तत्तद्योग्यताऽनुरोधेन भावयिता ॥ ३८९ ॥

अतः परोक्षतस्तत्वमत्र सर्वत्र कीर्तितम्।
इतोऽप्यापातदृश्योऽर्थो नात्र नम्यो मनीषिणा ॥ ३९० ॥

'इतोऽपि' इत्यत्रापिपदेन लोके रूढोपचारेण तादृशप्रयोगं समुच्चिनोति ॥ ॥३९० ॥

अहं भवान्न चेत्येकं वाक्यं वाऽत्र विभिद्यते।
तेन हंसान्तराभेदं हंसराट्स्वस्य निह्नुते ॥ ३९१ ॥

मुख्यवृत्त्याऽपि श्लोकं अनुरूपविभागाश्रयणेन भेदपरतया योजयति **अहमिति**॥ 'अहं भवान्' इति सामानाधिकरण्येन तादात्म्यं प्रसज्य नयानिषेधेऽन्योन्याभावार्थः स्फुटः। **हंसराट्** परमात्मा। **निह्नुते** निराकरोति ॥ ॥३९१ ॥

अन्यस्त्वमित्यन्यदेव वाक्यं तेनात्मभिन्नताम्।
तस्य ब्रवीति हंसोऽसौ त्वमेवाहं विचक्ष्व भोः ॥ ३९२ ॥

इति वाक्यान्तरेणासौ त्वमेव त्वय्यहं मतिम् ।
कुरु नान्यैरिति ब्रूते स्पष्टं तर्ह्यावयोर्भिदा ॥ ३९३ ॥

कुतो न दृश्यते सर्वैरिति शङ्कान्तरे सति ।
तस्मादुत्तरवाक्येन तां शंकां प्रतिषेधति ॥ ३९४ ॥

क्षीरान्तर्नीरमिव यदावां मिश्रौ सदा मिथः ।
न नौ पश्यन्ति तच्छिद्रं मध्ये तेनावयोर्भिदा ॥ ३९५ ॥

न स्पष्टं दृश्यते सा वै दृश्यते च विवेकिभिः ।
इति वा गूढतत्वोक्तेर्हृदयं बुध्यतां बुधैः ॥ ३९६ ॥

अन्यस्त्वं इति पुनरपि भेदोक्तिः अभ्यासेन तात्पर्यज्ञापिका एतद्विपरीता ऐक्यबुद्धिः अनर्थकरत्वात् कुत्रापि न कार्येत्याह **त्वमेवेति** । त्वय्येव अहं मतिं कुरु न तु ब्रह्मणि न वा जीवान्तरे। ननु ईश्वरो न जीवाद् भिन्नः। जीवाद् भेदेनानुपलभ्यमानत्वात् इति चेन्न सामान्यव्याप्तौ नानावृक्षरसेषु मधुभावमापन्नेषु व्यभिचारः। चेतनत्वे सति इति विशेषणेऽपि समुद्रसङ्गतनदीदेवतासु व्यभिचारः। तासां क्षीरनीरवच्चिद्योगात् पञ्चद्रौपदीवदेकदेहवत्वन्यायप्राप्त्या स्वपरस्वरूपज्ञानमत्यन्तविविक्ततया नास्तीति व्यभिचारकथनं नानुपपन्नं (वि.त.श्री. ५६८)। तदेतदभिप्रेत्याह **क्षीरान्तर्नीरमिवेति** । **न स्पष्टं दृश्यते इति** च । 'विमूढा नानुपश्यन्ति पश्यन्ति ज्ञानचक्षुषः' इति गीतोक्तिमनुरुध्याह **दृश्यते चेति**। तथा च बलवत्सजातीयप्रतिबन्धः स्वाभिव्यञ्जकयोगसामर्थ्यादिराहित्यं इत्यादिनिमित्तादेवानुपलम्भ इति हृदयम् ॥ ३९१ ॥ ३९२ ॥ ३९३ ॥ ३९४ ॥ ३९५ ॥ ३९६ ॥

व्याप्यव्यापकभावं च व्यतिरिक्तत्वमात्मनः ।
अन्योन्याश्रिततां नो चेद्बोध्यबोधकतां तथा ॥ ३९७ ॥

व्यभिचारेण नष्टां च स्मृतिमव्यभिचारतः ।
अविनाभावपर्यायात्कथं लब्धां च सोऽवदत् ॥ ३९८ ॥

सव्यापकतयाऽत्मानं व्यतिरिक्ततयाऽत्मनि ।
विद्वान्स्वप्न इवामृश्य साक्षिणं विरराम ह ॥ ३९९ ॥

परे ब्रह्मणि चात्मानं परंब्रह्म तथात्मनि ।
वीक्षमाणोऽविहायेक्षामस्मादुपरराम ह ॥ ४०० ॥

एवं समानसो हंसो हंसेन प्रतिबोधितः ।
स्वस्थस्तद्व्यभिचारेण नष्टामाप पुनस्स्मृतिम् ॥ ४०१ ॥

अत्रैव पुरंजनाख्याने सुस्पष्टं भेदपरान् त्रीन् श्लोकान् अग्रे (३९९, ४००, ४०१) उदाहरिष्यन् तदर्थं विविनक्ति **व्याप्येति** ॥ अत्र परमात्मनः, **व्यापकतया, आत्मानं** इति कर्मतया, **व्यतिरिक्ततया** इति भिन्नतया **आत्मनि** इति अधिकरणतया, '**परे**' '**परं**' इति च उत्कृष्टतया निर्देशात् सतात्पर्यं भेदः समर्थितो ध्येयः । 'स्वप्न इव' इत्यत्रोक्तं स्वप्नसाम्यं, 'अनित्यत्वविकारित्वपारतन्त्र्यादिरूपतः । स्वप्नादिसाम्यं जगतो न तु बोधनिवर्त्यता' इति तत्त्वनिर्णयोदाहृतप्रमाणानुसारेण ध्येयम् । '**अविहायेक्षां**' इति संसारोपरमानन्तरमपि ज्ञानस्यानुवृत्तिकथनेन, सर्वथा ज्ञाननाश एव पुरुषार्थ इति मायिमतं निरस्तं ज्ञेयम् । मग्नस्य हि परेऽज्ञाने किं न दुःखतरं भवेत्' इति ज्ञाननाशस्य अपुरुषार्थत्वेन निन्दनात् । अत एव 'विहायेक्षां' इति पदच्छेदेऽपि ईक्षाशब्दः वृत्तिज्ञानपर एव व्याख्येयः । अत्रैव 'नष्टां स्मृतिमवाप ह' इति पुनः परमात्माख्यहंसोपदेशेन ज्ञानप्राप्तेरेव शंसनात् । स्वस्थः इति स्वरूपेणावस्थितिरूपमोक्षोक्त्या 'अस्मादुपरराम' इत्यत्र अस्मादित्यस्य संसारादित्यर्थाश्रयणमेवोचितं न तु ज्ञानमात्रादिति । तथा सति प्रागुक्तदोषापातात् । वीक्षाशब्दस्य स्त्रीलिङ्गत्वेन अस्मादिति परामर्शानुपपत्तेश्चेति दिक् ॥ ३९७ ॥ ॥३९८ ॥ ३९९ ॥ ४०० ॥ ४०१ ॥

इति तत्रैव तेनोक्तवचनानि विचारय ।
न चारय मतिं नीचस्योच्चभावे कदाचन ॥ ४०२ ॥

तत्रैव पौरञ्जनोपाख्याने एव । तेन नारदेन । कदाचन मुक्तौ संसारे वा ॥ ॥४०२ ॥

यथोल्मुकाद्विष्फुलिङ्गाद्धूमाद्वापि स्वसंभवात् ।
अप्यात्मत्वेनाभिमताद्दाहकोग्निः पृथङ्मतः ॥ ४०३ ॥

भूतेन्द्रियान्तःकरणात्प्रधानाज्जीवसंज्ञितात् ।
आत्मा तथा पृथग्द्रष्टा भगवान्ब्रह्मसंज्ञितः ॥ ४०४ ॥

यथेत्यादिश्लोकद्वयं (भा.तृ. ३९ अ. श्लो. ३९-४०) कपिलाख्याने विद्यमानं तत्र पूर्वश्लोके— 'यथा पुत्राच्च वित्ताच्चे'त्यत्र देहात्मनोः स्फुटतरविवेकः समर्थितः । अत्र ब्रह्मणः प्रकृतिप्राकृताभ्यां जीवाच्च भेदः सोपपत्तिकं समर्थ्यते । 'अप्यात्मत्वेनाभिमतात्' इति विमतिः सूचिता । उत्तानदृशां अभिन्नत्वेन प्रतीयमानादित्यर्थः । विमतं ब्रह्म, तद्विरुद्धधर्माधिकरणत्वात् यथाऽग्निः उल्मुकात् । न चासिद्धिः । ब्रह्मणो द्रष्टृत्वात् भूतेन्द्रियादेश्चातथात्वात् । नापि दृष्टान्तः साधनविकलः । अग्नेर्दाहकत्वात् । उल्मुकस्य दाह्यत्वात् । एवं ब्रह्म प्रधानभिन्नं तत एव तद्वदेव । **जीवसंज्ञितात्** 'अहमित्येव यो वेद्यः स जीव इति संज्ञितः । स दुःखी स सुखी चैव स पात्रं बन्धमोक्षयोः' इति श्रुत्या साक्षिप्रत्यक्षेण च बन्धदुःखाधिकरणात् । **आत्मा** अन्तर्यामी । 'यो विज्ञाने तिष्ठन्..... एष ते आत्माऽन्तर्यामी' इति श्रुतेः । **द्रष्टा** सर्वज्ञः । 'न हि द्रष्टुर्दृष्टेः विपरिलोपो विद्यते' इति श्रुतेः । **ब्रह्मसंज्ञितः**– 'अथ कस्मादुच्यते ब्रह्मेति बृहन्तो ह्यस्मिन्गुणाः' इति श्रुतेः गुणपूर्णः । जीवस्त्वनेवंविधः प्रमितः । तथाच प्रयोगः जीवब्रह्मणी, पृथक्, उक्तरूपविरुद्धधर्माधिकरणत्वात् अग्न्युल्मुकवत् इति । एवं स्वसंभवादित्युक्तं जन्यजनकभावरूपविरुद्धधर्माधिकरणत्वं प्रयोगत्रयेऽपि हेतुरनुसन्धेयः ॥ न चानुमानानां अप्रयोजकता । प्रकृतिप्राकृतानां परमात्माधीनत्वस्य ईशावास्यमिदं सर्वं यत्किञ्च जगत्यां जगत्' इत्यादिश्रुतिप्रमितत्वात् । एवं जीवस्येशाधीनत्वस्य भिन्नोऽचिन्त्यः परमो जीवसङ्घात्' इति सोपपत्तिकश्रुतिनिर्णीतत्वात् । न च भेदस्यापारमार्थिकत्वम् । 'पृथगात्मानं प्रेरितारं च मत्वा जुष्टस्ततस्तेनामृतत्वमेति ।' इति तज्ज्ञानस्य मोक्षहेतुत्वोक्तेः ॥ ४०३ ॥ ४०४ ॥

तृतीयस्कन्धगैषा वाग्जडाज्जीवात्पृथक्कृतम् ।
अद्वितीयश्रुतेरर्थं तृतीयं ब्रह्म शंसति ॥ ४०५ ॥

-अनेनैव भागवतश्लोकेन 'एकमेवाद्वितीयं ब्रह्म' इति श्रुतेर्मायावादिकल्पितः ऐक्यपरः अर्थोऽप्यपहसित इत्याह **तृतीयेति** ॥ **जडात्** विजातीयात् । **जीवात्** सजातीयात् । मायावादिनो हि अत्र वाक्ये एवकारेण सजातीयभेदः निषिध्यते, अद्वितीयशब्देन च विजातीयभेदः इत्याहुः । इह च भागवते जीवजडाच्च भेदः सुदृढतया समर्थितः । तत्कथमिवाद्वितीयश्रुतिः भेदं निषेद्धुं शक्नुयादिति भावः । का तर्हि अद्वितीयश्रुतेरेतच्छ्लोकानुगुणोऽर्थ इत्यत आह **तृतीयमिति** । अनेन अद्वितीयपदं न प्रसज्यप्रतिषेधार्थकं किन्तु न द्वितीयं किन्तु तृतीयं इति पर्युदासार्थकमेव व्याख्येयं इति भावः ॥ ४०५ ॥

तस्माद्भेदमभेदोक्तेरर्थं चाहेति मे मतिः ॥ ४०६ ॥

तस्मादिति एवमर्थान्तरस्यापि संभ्वादिति भावः । **अभेदोक्तेः** अभेदपरतयाऽद्वैतिभिरभिमतोक्तेः । भेदमर्थं चेति योजना । चशब्देन, प्रसज्यप्रतिषेधार्थकत्वाश्रयणेऽपि 'अद्वितीयपदस्य सजातीयवस्त्वन्तरनिषेधपरत्वात्' इति वादावल्युक्तमर्थं समुच्चिनोति ॥ ४०६ ॥

अप्यात्मत्वेनाभिमतादित्यज्ञान्यभिमानजाम् ।
अश्रद्धेयामैक्यबुद्धिं गर्हार्थोऽपिरगर्हयत् ॥ ४०७ ॥

परपक्षं प्रतिक्षिप्य स्वपक्षस्थापनोद्यता ।
यदियं वाक्तश्चैषा केषां तोषाय नेष्यते ॥ ४०८ ॥

एवं तर्हि 'अहं ब्रह्मास्मी'ति श्रुतेरैक्यपरतया अद्वैतिभिर्व्याख्याने किं निमित्तमित्यतस्तेषामविवेक एव निमित्तमित्याह **अपीति** । तदुक्तं तत्त्वनिर्णये 'अहं ब्रह्मास्मीत्यादि तु अन्तर्याम्यपेक्षये'त्यादि । तट्टीकायां च तदेवं मुख्यामुख्यत्वाभ्यां पिण्डविषयं शब्दं अविवेकिनो बाह्येषु जीवादिष्वेव प्रयुञ्जते यथा दहतिशब्दं काष्ठे । प्राज्ञास्तु अमुख्यमंशमनादृत्य मुख्यार्थे हरौ प्रयुञ्जते' इति । 'सङ्घातात्र

विविच्यते' इति सप्तमस्कन्धतात्पर्योक्तमात्रानुसन्धेयम्। तदेतदभिप्रेत्याह **अगर्हयदिति** ॥ ४०७ ॥ ४०८ ॥

भगवत्त्वेन नैर्गुण्यमखण्डार्थं च संज्ञया।
निराचष्ट ब्रह्मनिष्ठां स्पष्टमाचष्ट चान्यताम्।
अनुवादित्वशङ्काया गर्भस्रावोऽभवत्ततः ॥ ४०९ ॥

परपक्षप्रतिक्षेपप्रकारमेवाह **भगवत्त्वेनेति संज्ञया** ब्रह्मसंज्ञितः इत्यत्रोक्तेन गुणपूर्णत्वरूपपरममुख्यार्थवाचकेन संज्ञाशब्देन **अखण्डार्थं** सर्ववैदिकशब्दानां लक्षणया निर्विशेषचिन्मात्रपरताम्। न हि गङ्गापदलक्ष्यं तीरं गङ्गापदसंज्ञितमिति कोऽप्यनुन्मत्तो निर्दिशतीति भावः। **ब्रह्मनिष्ठां** ब्रह्मधर्मिकाम्। **अन्यतां** जीवादिप्रतियोगिकं अन्योन्याभावलक्षणं स्वरूपभेदम्। पृथगित्युक्तपृथक्त्वस्य अन्योन्याभावस्वरूपभेदापरपर्यायत्वस्य अदृश्यत्वनयाऽनुव्याख्याने समर्थितत्वादिति भावः। **स्पष्टं** उल्मुकादिदृष्टान्तप्रदर्शनेन अविनाभावसमर्थनेनेति भावः। **अनुवादित्वेति**। 'न च जीवेश्वरभेदः सिद्ध इत्यनुवादकत्वं भेदवाक्यानाम्। आगमं विना ईश्वरस्यैवासिद्धेः' इति तत्त्वनिर्णयोक्तेरिति भावः ॥ ४०९ ॥

तत्त्वसंख्यानकार्याय योऽवतीर्णो महीतले।
सोऽम्बां प्रत्याह नातत्त्वं तत्सर्वं परमार्थसत् ॥ ४१० ॥

स्पष्टदृष्टान्तदृष्टत्वादम्बासम्बोधनत्वतः।
तत्त्वदृक्कपिलोक्तित्वात्सेयं नैव पदाच्चलेत् ॥ ४११ ॥

कपिलोक्तेः आप्तोक्ततासाधनेन निरवकाशतामाह द्वाभ्यां **तत्त्वेत्यादिना**। तत्त्वदृगित्युक्त्या वक्त्रानुकूल्यं अम्बां प्रतीत्युक्त्या श्रोत्रानुकूल्यं तत्त्वसंख्यानकार्यायावतीर्ण इत्युक्त्या प्रसङ्गानुकूल्यं चोक्तानि ध्येयानि। नैव पदाच्चलेदिति निरवकाशतामाह ॥ ४११ ॥

अस्पष्टहंसवाक्तस्मादस्माद्विस्पष्टवाक्यतः ।
अविनाभावमेवाह तत्सर्वमतिमङ्गलम् ॥ ४१२ ॥

अस्पष्टहंसवाक् 'त्रयाणामेकभावानां यो न पश्यति वै भिदां' इति वाक् । भिदाशब्दस्य अनेकार्थकत्वेन अस्पष्टत्वम् । **वाक्यतः** लोपनिमित्ता पञ्चमी । वाक्यमनुसृत्य । **अविनाभावं** स्थानैक्यं मत्यैक्यं वा । एवशब्देन स्वरूपाभेदं व्यवच्छिनत्ति । **तत्** तस्मात् । **सर्वं** भागवतवाक्यम् । **अतिमङ्गलं** परममङ्गलस्य विष्णोः महिम्न एव प्रतिपादकम् ॥ ४१२ ॥

मतिभेदोपि भेदे स्यान्नैकदैकस्य धीर्द्विधा ॥ ४१३ ॥

'द्वासुपर्णेति'श्रुतिः सर्वथा निरवकाशतया स्वरूपभेदमेव वक्तीति समर्थनायोपोद्घातं रचयति **मतीति** । नेयं श्रुतिर्मतिभेदपरतया सावकाशयितुमर्हा । अत्र मतिभेदार्थकपदाश्रवणात् । प्रत्युत सखायाविति मत्यैक्यस्यैव बोधनात् । तुष्यत्विति न्यायेन द्वावित्यस्य मतिभेदावन्तावित्यर्थाश्रयणेऽपि स कालभेदेन विद्यमानः स्वरूपैक्यसाधकोऽभिप्रेयते उत युगपत् । नाद्यः । कालभेदेन विवदमानानां ब्राह्मणानां स्वरूपैक्यादर्शनात् । न द्वितीयो विरोधादित्याह **भेदे स्यात् इति** । स्वरूपभेदे सत्येव स्यात् इति भावः । विमतौ स्वरूपभेदवतो युगपदेव भिन्नमतिमत्वात् । विपक्षे हेतूच्छित्तिमाह **नैकदेति** । यदि स्वरूपभेदो न स्यात् एकत्वमेव स्यात् इति यावत् तर्हि **एकदा युगपदेव द्विधा धीर्न** स्यात् मतिभेदो न स्यादिति तर्कः उक्तो ध्येयः ॥ ४१३ ॥

युगपन्मतिभेदो वा युगपत्स्थानभिन्नता ।
वैलक्षण्यं च युगपद्भिन्नयोरेव नान्यथा ॥ ४१४ ॥

उक्तां व्याप्तिं युगपत् स्थानभेदे, युगपत् विरुद्धलक्षणयोगित्वरूपवैलक्षण्ये चातिदिशति **स्थानेति** वैलक्षण्यमिति च ॥ ४१४ ॥

तद्भेदश्रुतिसुन्दर्यास्स्वार्थस्सूत्रायते गले ।
उक्तार्थेषु विनीतापि यद्भेदं नैव मुञ्चति ॥ ४१५ ॥

तत् उक्तव्याप्तित्रयबलात्। **स्वार्थः** स्वरूपभेदः। **उक्तार्थेषु** मतिभेद-स्थानभेद-वैलक्षण्यरूपेषु। **यत्** यस्मात्। **भेदं** स्वरूपभेदम्। **गले सूत्रायते** मङ्गलसूत्रवत् अप्रच्युतः दृढनिबद्ध एवावतिष्ठते ॥ ४१५ ॥

सखायौ सयुजौ चेति पददार्ढ्याच्चलेच्च न ॥ ४१६ ॥

दार्ढ्यात् सखायाविति पदस्य मत्यैक्यवाचित्वात् सगुणावित्यस्य स्थानैक्याभिधायित्वात्। **न चलेत्** तद्विरुद्धार्थकल्पनस्यावकाशमेव न दद्यात् ॥ ॥४१६ ॥

अन्योऽयमन्य इत्युक्ते द्वाविमाविति चोदिते।
भिन्नाविमाविति प्रोक्ते किमन्योऽर्थोऽपि मान्यते ॥ ४१७ ॥

अर्थान्तराश्रयणे सुस्पष्टपदान्तरविरोधमाह **अन्य इति** ॥ ४१७ ॥

बद्धत्वापूर्णतात्तृत्वपूर्वैर्जीवप्रकाशकैः।
नित्यमुक्तत्वपूर्णत्वानत्तृत्वाद्यैः परप्रियैः ॥ ४१८ ॥

विरुद्धधर्मसद्रत्नैश्चूडारत्नायितैः सदा।
अलङ्कृता भेदवाक्तु नैव स्वार्थं विमुञ्चति।
एकास्यो वा दशास्यो वा तां न भीषयितुं क्षमः ॥ ४१९ ॥

उपपत्तिविरोधाच्च न स्वरूपैक्यमर्थः संभवतीत्याह **बद्धत्वेति**। देहजनितकर्मफलस्य पिप्पलस्य अत्तृत्वेन **बद्धत्वम्**। कर्मफलसापेक्षत्त्वेन **अपूर्णत्वम्**। अस्वादुन एव स्वादुत्वेन अदनात् पराधीनतया **अत्तृत्वं** इत्येवं जीवप्रकाशकैः। अतादृशत्वात् परमात्मनः नित्यमुक्तत्वादयः धर्माः तैः। एकास्यः शिशुपालो रुक्मिणीमिव दशास्यो रावणः सीतामिवेति ध्वनिः। दशजिह्वः व्याहतभाषी मायावादी प्रकृते ॥ ४१९ ॥

ऐक्यश्रुतिस्तु मत्यैक्ये स्थानैक्ये स्वार्थमुज्झति।
एकीभूताविमावित्यत्रैक्यं न हि तयोर्द्वयोः ॥ ४२० ॥

ऐक्यश्रुतिः 'एकीभवन्ति' इत्यादिका। **उज्झति परित्यजति। लोके निरूढत्वादित्याह एकीभूताविति।** ऐक्यं स्वरूपैक्यम्। तदुक्तं भगवत्पादैः 'ऐक्यवाक् सम्यक् सावकाशा यथेष्टतः' इति ॥ ४२० ॥

अतो भेदश्रुतेरग्रे कस्य स्यात्प्रत्यवस्थितिः।
तस्मात्क्रूरकृपाणी सा रिपुसैन्यभयङ्करी ॥ ४२१ ॥

तस्मात् निरवकाशत्वादिनिमित्तकबलवत्त्वात् ॥ ४२१ ॥

नित्यानामपि नित्यो यश्चेतनानां च चेतनः।
काम्यानर्थानिमान्सर्वाननित्यसुखदाञ्जडान् ॥ ४२२ ॥

एको बहूनां जीवानां विदधाति किलाञ्जसा।
सोऽन्तर्यामि किलैतेषां सर्वे नित्यसुखार्थिनः ॥ ४२३ ॥

आत्मस्थमनुपश्यन्ति नाभेदेन तमीश्वरम्।
केचित्पश्यन्ति केचिच्च न पश्यन्ति किल प्रभुम् ॥ ४२४ ॥

शाश्वतं तु सुखं तेषामुक्तरीत्यैव पश्यताम्।
नाभेदकृतबुद्धीनां नाज्ञानां च भवेत्किल ॥ ४२५ ॥

इत्यशेषं श्रुतिर्नित्यो नित्यानामिति शंसति ॥ ४२६ ॥

इदानीं 'नित्यो नित्यानां चेतनश्चेतनानां एको बहूनां यो विदधाति कामान्। तमात्मस्थं येऽनुपश्यन्ति धीरास्तेषां सुखं शाश्वतं नेतरेषां' इति काठकश्रुतिं अशेषसिद्धान्तप्रमेयसंग्राहिकां व्याकरोति अष्टविंशतिश्लोकैः **नित्येत्यादिभिः** ॥ **नित्यः** नित्यत्वं प्रति स्वातन्त्र्यवान्। स्वयं निरवधिकनित्यत्वाश्रयश्च। 'स्वातन्त्र्यं तद्गतत्वं च शब्दवृत्तेर्हि कारणम्' इत्युक्तेः। एवं चेतन इत्यत्रापि ध्येयम्।

नित्यत्वचेतनत्वादिस्वभावधर्मान्त्रत्यपि नियामकत्वं 'द्रव्यं कर्म च कालश्च' इत्यादिप्रमाणात् आकाशाधिकरणन्यायानुसारेणावगन्तव्यम्। इदं च 'नित्यानित्यजगद्धात्रे' इति ईशावास्यभाष्यटीकायां विवृतम्। अतिशयेन नित्यत्वं च चतुर्विधा नाशराहित्यम्। चेतनत्वे अतिशयश्च स्वपराशेषविषयक-स्वतन्त्रज्ञानरूपत्वम्। **कामान्** = कर्मणि व्युत्पत्त्या चेतनैः काम्यमानान् अशेषान् वैषयिकपदार्थान्। **एकः** 'तस्य एकत्वसंख्याविधानपरत्वात्' इति वादावल्युक्तरीत्या एकत्वसंख्यावान्। असहायः स्वतन्त्रो वा। **बहूनां** अनन्तानां जीवराशीनाम्। **विदधाति** सृजति। अनेन अचेतनसर्वजगत्स्रष्टृत्वमेवोक्तं भवति। सर्वस्य जीवोपभोग्यत्वेन तददृष्टजन्यत्वात्। **आत्मस्थं** 'य आत्मनि तिष्ठन्' 'एष ते अन्तर्याम्यमृतः' इत्यन्तर्यामिनयोक्तदिशा आत्मान्तर्यामिणं **अनुपश्यन्ति** नत्वात्मस्वरूपत्वेन। तेषामेव शाश्वतं सुखं, **नेतरेषां** भेदेन अपश्यतां अभेदेन पश्यतां वा ॥ ४२२ ॥ ४२३ ॥ ४२४ ॥ ४२५ ॥ ४२६ ॥

चेतनस्यैव जन्मादिकर्तृत्वं यल्लटोदितम्।
तटस्थत्वकथा तस्य मठस्थाभूत्कुयोगिनाम्॥ ४२७ ॥

यत् = यस्मात्। **चेतनस्यैव** = य इति परामृष्टस्यैव चेतन इत्यस्य। **ल्टा** = ç विदधातीत्यत्रत्येन कर्त्रर्थकेन प्रत्ययेन। **तटस्थत्वकथा** = जन्मादिकर्तृत्वं अविद्याया एव लक्षणं, ब्रह्म तु तदारोपाधिष्ठानमात्रम्। अतो नेदं ब्रह्मणः स्वरूपलक्षणं किन्तु तटस्थमेवेति मायिनां वादः। **मठस्था** = स्वगोष्ठीनिष्ठप्रलापमात्रम् ॥ ४२७ ॥

ब्रह्मोपादानतावार्ता निर्मूला चाभवत्ततः।
कर्तृत्वाद्येशधर्माणामध्यासोऽपि निराकृतः ॥ ४२८ ॥

ततः विश्वतोमुखस्य सूत्रस्योदाहरणवाक्येऽत्र विदधातीति कर्तृत्वस्यैवोक्तेः चेतनस्य विकारित्वलक्षणोपादानत्वासंभवाच्च। आद्यपदेन नित्यत्वचेतनत्वादयो ग्राह्याः। **निराकृत इति** अध्यस्तधर्मेषु अत्रोक्तमोक्षहेतुसाक्षात्कारविषयत्वा-संभवादिति भावः ॥ ४२८ ॥

महासामर्थ्यमीशस्य प्रभुत्वं च प्रसाधितम्।
स्वातन्त्र्यं तस्य जीवानां पारतन्त्र्यं च साधितम् ॥ ४२९ ॥

हरिः महासामर्थ्यवान् अशेषजगत्स्रष्टृत्वात् प्रभुः शाश्वतसुखप्रदत्वात् व्यतिरेकेण जीववत् इति **प्रसाधितम्।** अखिलजगदुपादानगोचरापरोक्षज्ञानस्य सार्वज्ञस्य कर्तृत्वान्तर्गतत्वयैव सिद्धिरित्याह **सार्वज्ञेति।** नित्यो नित्यानां इति स्वभावनियामकत्वकथनेन एवं चेतनश्चेतनानां इति जीवान्प्रति बिम्बत्वशंसनेन च सिद्धमाह **स्वातन्त्र्यमिति।** तत एव प्रतिबिम्बानां जीवानां पारतन्त्र्यं च सिद्धमित्याह **जीवानामिति** ॥ ४२९ ॥

निर्धारणे तु या षष्ठी सा निर्धारितवस्तुनि।
आधिक्यं वक्त्यतश्चेशे सार्वज्ञं नित्यदेहिता ॥ ४३० ॥

निरवधिकप्रवृत्तिनिमित्ताश्रयत्वरूपमहायोगवृत्तेः नित्यचेतनशब्दयोर्वर्णितत्वेन नित्यत्वचेतनत्वयोः आधिक्यं निरतिशयत्वं च सिद्धमित्याह **आधिक्यमिति।** तदेव विविच्याह **सार्वज्ञमिति।** चेतनत्वे अतिशयः सार्वज्ञं नित्यत्वेऽतिशयश्च नित्यदेहितेति विवेको द्रष्टव्यः ॥ ४३० ॥

अभ्यासेन गुणेष्वस्यास्तात्पर्यं गम्यते श्रुतेः ॥ ४३१ ॥

अभ्यासेनेति स्वातन्त्र्यस्य नित्यः इति स्वभावनियामकत्वेन एक इत्यसहायत्वेनेत्यादिना एवं सार्वज्ञस्य चेतन इति परमचेतनत्वेन विदधातीति जगत्कर्तृत्वेन इत्येवं प्रत्येकं गुणानामसकृदुक्त्येत्यर्थः ॥ ४३१ ॥

अनन्तानन्तजीवेषु स्थितस्याप्येकतोक्तितः।
अनन्तस्वावताराणां स्वस्य चाभेद ईरितः ॥ ४३२ ॥

अनन्तानन्तजीवेषु = चेतनानां, तेषां, नेतरेषां, इत्यादिबहुवचनप्रयोगेण तथा बहूनामिति असङ्कोचेन बहुत्वोक्त्या च सिद्धानन्त्यविशिष्टेषु। **एकतोक्तितः =** चेतनः नित्यः आत्मस्थ इत्याद्येकवचनप्रयोगेण तथा एकः इति कण्ठोक्त्या च।

स्वावताराणां = स्वस्यान्तर्यामिरूपाणां, यद्वा **बहूनां** = साधूनां तत्तत्काले परित्राणाय कामान्विदधातीत्युक्ततदभीष्टदानसिद्धये स्वीकृतानां रामकृष्णाद्यवतार-रूपाणाम्। **अभेदोक्त्या** एक इति तथा यः तं इत्येकवचनेन च। अभेदः स्वगतभेदराहित्यम् ॥ ४३२ ॥

भेदकार्यकरश्शक्तिविशेषः परमात्मनि।
पुच्छस्य पुच्छिनैक्यं तत्कैमुत्येन प्रसाधितम्॥ ४३३ ॥

विशेष इति न च अचिन्त्यशक्त्यैवोपपत्तिः। भेदव्यवहारनिर्वाहाय यथाप्रमाणं विशेषस्याप्यभ्युपगमनीयत्वात् इत्याशयः। **कैमुत्येनेति।** विश्लिष्टानामैक्ये संश्लिष्टस्य पुच्छस्य सुतरां तत्सिद्धेरिति भावः ॥ ४३३ ॥

स्वाभेदेन गुणादीनां चिन्मयत्वं(मबाध्यता) प्रसादितम्।
ध्येयतोक्त्येष्टदैवत्वं सौन्दर्यं सुप्रसन्नता ॥ ४३४ ॥

चिन्मयत्वं इत्यत्र मयटः तादात्म्यमर्थः। गुणानां चित्स्वरूपतोक्त्या अरूपमस्पर्शमित्यादिश्रुतेः प्राकृतगुणनिषेधो गतिरुक्ता भवति। **ध्येयतेति** अनुपश्यन्तीत्यस्य निदिध्यासनसाक्षात्कारोभयकर्तृत्वार्थस्य विवक्षितत्वात् मानसवासनापरिणतस्य वस्तुनो मनसाऽवलोकनस्यैव च ध्यानरूपत्वादिति भावः। एवंविधं आदरनैरन्तर्याभ्यां बहुकालोपचितं ध्यानं, ध्येयस्य दैवस्य इष्टत्वं सौंदर्यं सुप्रसन्नत्वं च विना न सङ्घटीतीति भावः ॥ ४३४ ॥

तदन्तस्थस्य सार्वज्ञशक्तिस्वातन्त्र्यपूर्वकाः।
स्रष्टृत्वकामदातृत्वमुक्तिदत्वादयो गुणाः।
सर्वेश्वरत्वपूर्णत्वनित्यत्वाद्याश्च साधिताः ॥ ४३५ ॥

तदन्तस्थस्येति। अन्तर्यामित्वरूपस्यात्मत्वस्य गुणपूर्तिरूपत्वात् सार्वज्ञादि-गुणानामपि सिद्धिरनेनैव सुलभेत्युक्तं भवति ॥ ४३५ ॥

मोक्षोपयोगिज्ञानत्वं तमित्युक्त्यैषु दर्शितम्।
ततोऽपि तद्गुणांभोधेः पारमार्थ्यं प्रसिद्ध्यति ॥ ४३६ ॥

पारमार्थ्यमिति आविद्यकज्ञानेनाविद्यानिवृत्तिरूपमोक्षस्यासंभवादेवेति भावः ॥ ४३६ ॥

मुक्तानां बहुता मुक्तस्वामित्वं च प्रभोरभूत्।
आत्मस्थभगवद्दृष्टेर्मुक्तावप्यनुवर्तनम् ॥ ४३७ ॥

तेषामिति बहुवचनेन मुक्तानां बहुत्वम्। येऽनुपश्यन्ति तेषामेव नेतरेषामित्युक्त्या 'यस्य प्रसादात्परमार्तिरूपादस्मात्संसारान्मुच्यते नापरेण' इति प्रमाणानुरोधेन मोक्षस्य प्रसादैकसाध्यत्वलाभेन 'मुक्तानां परमा गतिरि'त्युक्तं मुक्तस्वामित्वं च सिद्धमित्याह **मुक्तेति**। अनुपश्यन्तीत्यस्य दर्शनजन्यप्रसादवन्तो भवन्तीत्यर्थकत्वात्। अनुपश्यन्तीति दर्शनस्य मोक्षानन्तरमनुवृत्तिः तस्य सुखरूपता च लब्धेत्याह **आत्मेति** ॥ ४३७ ॥

पञ्चभेदास्तया सिद्धा मुक्तेर्नित्यसुखात्मता।
भेदज्ञानैकसाध्यत्वमुक्तसर्वविशेषणैः ॥ ४३८ ॥

तारतम्येन तद्दृष्टिर्जीवानां त्रिप्रकारता।
आत्मस्थद्रष्टृभिन्नत्वं द्वेधा भवति यद्विदाम् ॥ ४३९ ॥

शाश्वतं सुखमित्युक्त्या लब्धमर्थमाह **नित्येति**। एतेन निर्विशेषात्मभावत्वं एकविंशतिदुःखध्वंसरूपतां इत्यादिना मोक्षस्वरूपं अन्यथा वर्णयतो दुर्वादाः निराकृताः। आत्मस्थं न तु आत्मत्वेन इत्युक्त्या लब्धमर्थमाह **भेदेति। तच्च विज्ञानं** पूर्वोक्तं भेदज्ञानम्। विशेषणैः व्यावर्तकधर्मैः सहितम्। तमिति सकलगुणविशिष्टस्यैव परामर्शादिति भावः। 'अनु' इत्यस्य अनुसृत्येत्यर्थः। योग्यतया अनादिसिद्धयोग्यतातारतम्यलाभः। अनेन ॐ नाविशेषादिति सूत्रार्थ उक्तः। अनेन साधने तारतम्यकथनेन 'साधनस्योत्तमत्वेन साध्यं चोत्तममाप्नुयुरि'ति

प्रमाणानुसारेण मुक्तौ च तारतम्यसिद्धिः निरूपिता। त्रिप्रकारतामुपपादयति **नेतरेषामिति**। तथा हि। इतरेषामित्युक्तं आत्मस्थत्वेन सर्वोत्तमत्वेन तावद् द्रष्टृभिन्नत्वं द्वेधा। ऐक्येव असर्वोत्तमत्वेन च। तथा च तत्त्वज्ञानिनः अन्यथाज्ञानिनः मिश्रबुद्धयश्चेति त्रिप्रकारता। तदनुरोधेण फलस्यापि त्रिप्रकारताऽनेनैवोक्ता ध्येया। तत्त्वज्ञानिनां शाश्वतं सुखम्। ऐक्यज्ञानिनां तु शाश्वतं नसुखम्। नञो विरोधार्थकत्वेन शाश्वतं दुःखम्। मिश्रबुद्धीनां तु न शाश्वतं सुखं, दुःखामिश्रं सुखं वा, किंतु दुःखमिश्रमेवेत्यर्थलाभात्॥ ४३९ ॥

चेतनानां बहुत्वोक्त्या जीवभेदः परस्परम्।
दातुः प्रभोरनेकेभ्यो भेदश्चैकस्य सिद्ध्यति ॥ ४४० ॥

बहुत्वोक्त्येति। बहूनामिति साक्षात् कण्ठतः, नित्यानां, चेतनानां, ये, तेषां, इति बहुवचनप्रयोगेण चेत्यर्थः। **एकस्येति**। एक इत्युक्तस्य यः तमिति च एकवचनान्तशब्देन परामृष्टस्य चेत्यर्थः॥ दातुः प्रभोरिति च भेदकधर्मकथनम्। तेन अनेकेभ्य इत्यनन्तरं प्रतिगृहीतृभ्यः भृत्येभ्यः इति चोपस्कर्तव्यम्॥ ४४० ॥

तेन जीवेशयोर्भेदस्साधितस्सोपपत्तिकः।
मोक्षोपयोगिज्ञानत्वाद्भेदस्यात्यन्तसत्यता ॥ ४४१ ॥

ज्ञानत्वात् = ज्ञानविषयत्वात्॥ ४४१ ॥

काम्यानां च बहुत्वोक्त्या जडभेदः परस्परम्।
तेषामीशकृतत्वोक्त्या जडेश्वरभिदा तथा ॥ ४४२ ॥

काम्यानां मुक्तैरमुक्तैश्च काम्यमानानां गन्धमाल्यादीनाम्॥ ४४२ ॥

सृष्ट्युक्त्या तस्य जगतस्सत्यत्वमपि सिद्ध्यति।
सदैव वर्तमानत्वं लटाविश्वस्य सूचितम् ॥ ४४३ ॥

सत्यत्वमिति। 'सतो हि घटादेरुत्पत्तिर्दृष्टा नासतः शशविषाणादेरि'ति मायिभाष्योक्तरीत्यैवेति भावः। **लटेति** क्रियासातत्यार्थकेनेति भावः। **वर्तमानत्वं**

प्रवाहत इति शेषः । 'न काप्यनीदृशं विश्वं तत्तत्कालानुसारतः' इति भगवत्पादोक्तेः ॥ विधानविधीयमानयोः समकालीनत्वनियमात् 'याथातथ्यतोऽर्थान्व्यदधाच्छाश्वतीभ्यः समाभ्यः' इति समाख्यानाच्च ॥ ४४३ ॥

जीवसंबन्धितोक्त्या च जडजीवभिदा स्फुटा ॥ ४४४ ॥

जीवसंबन्धितेति बहूनामिति षष्ठ्या इत्यादिः ॥ ४४४ ॥

एकजीवकथा जीवाभेदो जीवेश्वराभिदा ।
चिद्रूपतैव जीवानां चित्यकर्तृत्वमित्यपि ॥ ४४५ ॥

जीवानां इति। ब्रह्मणश्चेति योज्यम्। **चिद्रूपता** जहदजहल्लक्षणया प्रातिपदिकार्थत्वम्। **अकर्तृत्वं** अन्तःकरणगतकर्तृत्वादीनां चिति अध्यासः ॥ ॥४४५ ॥

निष्प्रकारैक्यविज्ञानान्मुक्तिर्जगदसत्यता ।
सकृत्सर्वविमोक्षश्चेत्येतत्सर्वं हि दूषितम् ॥ ४४६ ॥

निष्प्रकारेति। तमात्मस्थं इति सविशेषणस्यैव परामर्शादिति भावः। **सकृदिति**। तेषां नेतरेषां इति बद्धमुक्तव्यवस्थोक्तेरिति भावः ॥ ४४६ ॥

एतावन्तमपि ह्यर्थमेकैव श्रुतिराददे ।
सर्वश्रुत्यर्थकुशलौ सूत्रभाष्यकृतौ स्तुमः ॥ ४४७ ॥

तस्मादेकाङ्गवीरोऽयं वेदव्यासभटाग्रणीः ।
तत्तद्वाक्यैश्च तत्सिद्धौ द्विर्बद्धस्य सुबद्धता ॥ ४४८ ॥

अयं पूर्वश्लोकोक्तो भाष्यकारः **एकाङ्गवीरः** सूत्रानुगृहीतेन **एकेनापि** श्रुतिवाक्येन **अङ्गेन वीरः** सिद्धान्तभूतसर्वप्रमेयसमर्थनकार्यस्यान्तगामी। एवं तर्हि किं प्रातिस्विकतया तत्तत्प्रमेयसाधकानां इतरेषां प्रमाणानामनुवादकत्वेनाप्रामाण्यं इत्यत आह **द्विः** इति। उपलक्षणं बहुवारमित्यर्थः। **बद्धस्य** प्रमितस्य **सुबद्धता**

सुदृढतया क्षिप्रनिःशङ्कप्रवृत्तिजनकता। तदुक्तं भगवत्पादैः बहुप्रमाणसंवादश्च दार्ढ्यहितुरेव' इति। एवं सुधायामपि 'यावद्यावदधिकं प्रमीयते तावत्तावन्निःशङ्कां क्षिप्रप्रवृत्तिं प्रसूते इत्यनुभवसिद्धमि'ति। अनेनैव लोकव्यवहारमप्यत्र प्रमाणयति **द्विरिति**। न तु द्वितीयादिबन्धनस्य अकार्यकारितेति भावः ॥ ४४८ ॥

तद्व्यासकृतविस्तारा श्रुतिः सूत्रानुसारिणी।
तानि सर्वाणि भेदादेस्साधकानीति सुस्थितम् ॥ ४४९ ॥

विस्तारः, विभागः अर्थनिर्णयो वा तानि सूत्राणि। तदुक्तं महाभारततात्पर्यनिर्णये सर्वदोषविहीनत्वं गुणैः सर्वैरुदीर्णता। अभेदः सर्वरूपेषु जीवभेदः सदैव हि। विष्णोरुक्तानि सूत्रेषु सर्ववेदेड्यता तथा' इति तस्मात्सूत्रार्थमागृह्य कर्तव्यः सर्वनिर्णयः इति च ॥ ४४९ ॥

किंच सद्युक्तिपरशोरेकीभावो बिभेति ते।
द्वैधीभावमते सोऽपि सहायत्वमुपेयिवान् ॥ ४५० ॥

सद्युक्तिः सूत्रव्युत्पादितयुक्तिसमुदायः स एव **परशुः** तस्मात्। परशोः दारुसंयोगेन दारुद्वैधीभाव एव यथा दृष्टस्तथेति ध्वनिः। अतः साधूक्तमभियुक्तैः 'भेदपराण्येव खलु ब्रह्मसूत्राणि' इति ॥ ४५० ॥

घटेन गगनस्येव यदि देहाद्युपाधिना।
गच्छता तत्रतत्रत्यब्रह्मभागस्य जीवता ॥ ४५१ ॥

संपद्यते ततोऽन्ये तु न जीवा इति मन्यसे।
मतं न मायिनोऽप्येतच्चर्चार्थं परमुच्यते ॥ ४५२ ॥

भेदस्य स्वाभाविकत्वसिद्धये तदौपाधिकत्वं दूषयति घटेनेत्यादिभिः। अत्र त्रयः प्रकाराः संभाविताः। गमनवता घटेन उपाधिना अवच्छिन्नस्तत्प्रदेशस्य आकाशः यथा घटाकाशसंज्ञां लभते तथा गच्छता देहेनावच्छिन्नं तत्तत्प्रदेशस्थं

ब्रह्मैव जीवभावमापद्यते इति । यद्वा तटाकादुद्धृतं घटे स्थितं जलमिव व्याप्तब्रह्म चितः पृथक्कृत्य समुद्धृतश्चिद्भागः एव जीव इति । अथवा स्वरूपोपाधिना अत्यन्त भिन्ना एवाणुभूता जीवा उत्क्रान्तिगत्या गतिमन्त इति च । तत्र आद्यपक्षे जीवस्य नैव गमनादिकम् । किंतु उपाधिभूतदेहस्यैव । द्वितीये घटेन सह तदन्तस्थोदकस्येव देहेन सह जीवस्यापि गमनादिकं भवति । तृतीयस्तु सिद्धान्तसंमत इति विवेकः । तत्र अन्तिमं परिशेषेण निर्धारयितुं आद्यं तावद्दुदूषयिषुः प्रस्तावयति **घटेनेति** । ननु मायिभिः कुत्राप्यनुपन्यस्तोऽयं पक्षो न विकल्पमर्हतीति चेन्न । 'न ममत्वं मुमुक्षूणामनिर्वचनीयवादिनामि'ति वदन् दूषणमात्रदुर्व्यसनी परः स्वसिद्धान्तमप्यपलप्य पक्षमेतं परिगृह्णामीति वक्तुमुत्सहेतापि । अतः संभावितस्याप्यनूद्य दूषणं श्लिष्टमित्याह **मतमिति** ॥ ४५१ ॥ ४५२ ॥

तर्हिदेहाद्युपाधीनां गमनं केन हेतुना ।
ब्रह्मणो निष्क्रियत्वोक्तेस्तदन्यस्य जडत्वतः ॥ ४५३ ॥

अस्मिन् पक्षे देहाद्युपाधेर्गमनं किं ब्रह्मणः क्रियया उत स्वतः । नाद्यः इत्याह **ब्रह्मण** इति । न द्वितीयोऽपीत्याह **जडत्वत इति** ॥ ४५३ ॥

परिस्पन्दक्रिया नैव परे ब्रह्मणि ते मते ।
ततस्तत्क्रियया देहक्रिया नेत्यक्रिया भवेत् ॥ ४५४ ॥

परिस्पन्देति प्रकृतापेक्षया । वस्तुतस्तु क्रियासामान्यनिषेध एवेति मन्तव्यम् । फलितमाह **अक्रियेति** ॥ ४५४ ॥

इतः क्षिपति किं कश्चित्ततः कर्षति किं परः ।
अतस्स्थिरांशजीवत्वे स्थैर्यस्यान्न गतागतम् ॥ ४५५ ॥

चेतनान्तरेण क्षेपणे उत्कर्षणे वा उपाधौ गतिरुपपद्यतामिति तत्राह **किमिति** । आक्षेपे । नास्त्येव तन्मते ब्रह्मव्यतिरिक्तं चेतनान्तरमिति भावः ॥ ४५५ ॥

शून्यगेहस्थघटवद्देहो देही घटाभ्रवत् ।
अतिदूरस्थितस्वर्गगमनं त्वतिदूरतः ॥ ४४६ ॥

वातोऽपि तिर्यक्पवनः को वा तं जडमुन्नयेत् ।
शवभूषणवत्सर्वं जीवजातमभूदहो ॥ ४५७ ॥

किं चैतस्मिन्मते पुण्येन ऊर्ध्वलोकप्राप्तिप्रत्याशा दूरमिहिता । सा न देहस्थ-क्रियया प्रवर्तकाभावादित्याह **शून्येति** । वातस्यापि जडत्वेन देहसमानयोगक्षेमत्वान्न प्रवर्तकत्वमित्याह **वात इति** । नापि जीवस्य क्रियया तस्य निष्क्रियत्वाभ्युपगमात् । **शवभूषणवदिति** शवे प्रवर्तकचेतनाभावात् भूषणस्य च स्वयं निष्क्रियत्वादिति भावः ॥ ४५७ ॥

किं चैकपदविन्यासे प्रागंशे देहनिर्गतेः ।
मृतिस्यादपरांशे तु जनिस्याद्देहसङ्गतेः ॥ ४५८ ॥

देहयोगवियोगौ हि जीवजन्ममृती श्रुते ।
पदे पदे प्रेतकर्म जातकर्म करोति कः ॥ ४५९ ॥

अभ्युपगम्यापि देहे क्रियां चेतने स्थिरत्वोपगमेन प्राप्तं दोषं सप्रमाणमनूद्य अतिप्रसङ्गोक्त्या अपहसति **किं चेति** पदेपदे इति च ॥ ४५८ ॥४५९ ॥

तदंशाज्ञानमूलस्य मनआदेरपि क्षयात् ।
कल्पान्तलय एवायं कल्पादिमजनिश्च सा ॥ ४६० ॥

किं चेयं पादनिक्षेपमात्रेण उपाधिसंबन्धापगमेन जायमाना मृतिः शुद्धब्रह्मभावरूपमोक्षापत्तिरेवेत्यापतति । तदंशस्य जीवस्य मनआदेर्लिङ्गदेहस्यापि क्षयादित्याह **कल्पान्तेति** मुक्तिकालीनेत्यर्थः । तथा च मूत्रपुरीषोत्सर्जनार्थं एकपादविक्षेपेणैव मोक्षप्राप्तेः श्रवणादिसाधनानामकरणीयत्वापत्तिः । **सा** अपरांशस्य संपद्यमाना ॥ ४६० ॥

पूर्वांशे कर्म नष्टं हि नान्यांशेऽपि क्व देहिता ।
कृतहान्यकृतप्राप्त्या मतमेतद्विगर्हितम् ॥ ४६१ ॥

दोषान्तरं चाह **पूर्वेति** । नष्टं हि यस्मात् ततः **कृतहानिः** कृतानां कर्मणां वैयर्थ्यम् । अन्यांशे कर्म न इत्यन्वयः । किं तत इत्यत आह **क्व देहितेति** । पूर्वं तु तस्य देहसंबन्धमभ्युपगम्यैव जनिरुक्तेति भावः । पूर्वकर्माभावेऽपि तस्य देहसंबन्धाभ्युपगमे दोषमाह **अकृतप्राप्त्येति** । तेनानुभूयमानानां फलानां निष्कारणकत्वापत्तिः । विस्तरः 'भेदपराण्येव खलु ब्रह्मसूत्राणि' इति ग्रन्थे (प. ८१ द्वि. भागे) ॥ ४६१ ॥

अन्ते मृतिश्च का वाच्या देहस्यांशान्तरे स्थितेः ।
इन्द्रियोपरतेस्सा चेत्सुप्तिश्च मरणं भवेत् ॥ ४६२ ॥

चिद्रूपसाक्षिसामर्थ्यात्तद्वत्स्याद्धि प्रबुद्धता ॥ ४६३ ॥

किं च अत्र पक्षे मृतिजन्मनी एवानुपपन्ने । तथा हि । मृतिर्नाम किं सर्वथा देहचेतनयोर्वियोग उत सत्यपि संबन्धे इन्द्रियमात्रोपरमो वा । नाद्यः तदभावादित्याह **देहस्येति** । न द्वितीयः । सुप्तेरपि मरणत्वापत्तेः ॥ पुनरुत्थानं तु सुप्तिवदेव स्यादित्याह **सुप्तिरिति तद्वदिति च** ॥ ४६२ ॥ ४६३ ॥

उपादेयमुपादानगत्यैवान्यत्र गच्छति ।
पूर्वांशाज्ञानजो देहः कथं तस्य ह्यचालने ।
चलेदन्यत्र तन्माता गुर्विणी सर्वदा तव ॥ ४६४ ॥

प्रकारान्तरेण देहस्य चलनशून्यतां साधयति **उपादेयमिति** । एवकारेण उपदानगतेर्व्यापकत्वमुक्तं भवति । वह्निमानेव धूमवानितिवत् । देहस्य च निष्क्रियमज्ञानमेवोपादानम् । तथाच प्रयोगः; देहः निष्क्रियो निष्क्रियोपादानकत्वात् घटवदिति । तथा च तव देहस्य जनन्युदरान्निष्क्रमणाभाव एवेत्याह **तदिति** ॥ ॥४६४ ॥

उत्पत्तिस्थितिनाशश्च तत्रतत्रैव देहिनाम् ।
भवेयुर्निष्क्रियासङ्गाद्देहोऽपि स्याद्विनिष्क्रियः ॥ ४६५ ॥

निष्क्रियायाः चितः सङ्गात् ॥ ४६५ ॥

व्याप्तांशस्यैव जीवत्वे गजादौ गजमात्रता ।
अणावणुप्रमाणं चेत्यागतं ह्यतिनिन्दितम् ॥ ४६६ ॥

कायपरिमाणवादिजैनमतप्रवेशापत्तिरूपदोषान्तरमाह व्याप्तेति । तत्तद्देह-व्याप्तेत्यर्थः ॥ ४६६ ॥

योंशो विप्रत्वमापेदे स एवांशः क्षणान्तरे ।
हीनोऽपि स्यादिति प्राप्ता नानायोनिः पदे पदे ॥ ४६७ ॥

स्थिरांशप्रदेशं प्रति विप्रदेहापगमानन्तरं चण्डालदेहोपगमे सतीत्यर्थः ॥ ॥४६७ ॥

उत्क्रान्तिगत्या गतीनामित्याह ब्रह्मसूत्रकृत् ।
अतोऽणुजीवता श्लाघ्या योग्या वाग्मिजनप्रिया ॥ ४६८ ॥

श्रुतिसूत्रविरुद्धं चैतन्मतमित्याह उत्क्रान्तीति ॥ ४६८ ॥

चलदंशो हि जीवस्स्यान्नास्थिरांशः कदाचन ।
चैतन्याचलने कस्य चलनं स्याज्जगत्त्रये ॥ ४६९ ॥

चितः स्वतो निश्चलत्वे जगन्मात्रं निश्चलं स्यादित्याह चैतन्येति ॥ ४६९ ॥

चलच्चेतनहस्तस्थो घटश्चलति नापरः ॥ ४७० ॥

उपपादयति चलदिति ॥ ४७० ॥

परिस्पन्दक्रिया नैव परे ब्रह्मणि ते मते ।
सहस्रोपाधिसंबन्धेऽप्यक्रियस्य क्रिया न हि ॥ ४७१ ॥

किं क्रियानिष्क्रिये व्योम्नि स्यात्कारकशतैरपि ।
स्थिरांशजीववादोतो न स्थिरः प्राज्ञसंसदि ॥ ४७२ ॥

सहस्रोपाधिसंबन्धेऽपि स्वभावधर्मस्य चितो निष्क्रियत्वस्य नैवापाय इति सोपपत्तिकमाह **परिस्पन्देति व्योम्नीति च**। एतेन तटाकादुद्धृतजलस्य घटस्य गमनादिना गमनादिकमिव ब्रह्मचिदुद्धृतचिदंशस्य जीवस्य देहगमनादिना गमनादिकमिति द्वितीयपक्षोऽपि निरस्तः । चेतनस्य सक्रियत्वे खलु तदधीनक्रियाया घटे, तत एव तदन्तःस्थे जले संभवेऽपि त्वत्पक्षे ब्रह्मचितः निष्क्रियत्वेन तदुद्धृतचिदंशभागेऽपि जीवे क्रियाऽसंभवो न तत एव घट इव देहे वा, तदुपाधिसंबन्धनिर्मितेन तदन्तर्गतजल इव औपाधिकजीवे वा उत्क्रान्तिगत्यागतीनां दुर्घटत्वमेवेत्याशयः ॥ ४७२ ॥

अतः श्रौताणुतासिद्धा तवापि च ममापि च ।
देहान्तःकरणान्तस्थस्सोधोऽञ्चत्यूर्ध्वमञ्चति ॥ ४७३ ॥

अतः = जीवे अणुत्वस्य अत एव ब्रह्मभिन्नत्वस्य चाङ्गीकारमन्तरा उक्तदोषाणां दुष्परिहरत्वात् । श्रौता = 'अणुर्ह्येष आत्मा' इत्यादि श्रुतिसिद्धा । **सः** बिम्बभूतस्य ब्रह्मणः स्वतन्त्रक्रियाया अधीना या क्रिया तद्वान् अणुः जीवः ॥ ४७३ ॥

एवं चोभयतः पाशारज्जुर्बध्नाति ते गलम् ॥ ४७४ ॥

उभयतः सार्वभक्तिकः तसिः जीवः स्थिरांशः इति चलदंश इति च उभयपक्षेऽपीत्यर्थः ॥ ४७४ ॥

स्थिरांशस्यैव जीवत्वे भवदैक्यकथा वृथा ।
चलदंशस्य जीवत्वे भवदैक्यकथा वृथा ॥ ४७५ ॥

उपपादयति **स्थिरेति**। कथायाः खलु परप्रत्यायनमेव फलम्। सा च वक्तृश्रोतुर्वा वक्तुर्वा अन्योन्यं प्रति गमन एव संभवति। स्थिरांशजीवपक्षे च उभयोरपि गमनं असंभवि। अतः त्वदैक्यकथा निष्फलैवेत्याह **वृथेति**। चलदंशपक्षेऽपि कथा वृथा प्रमाणविरुद्धत्वादनुपादेयेति योज्यम्। ब्रह्म हि विभुनिष्क्रियं च। तदुद्धृतांशस्तु भवान् परिच्छिन्नः सक्रियश्च। एवमीदृशयोरैक्यं कथं न प्रमाणबाधितमिति भावः ॥ ४७५ ॥

तस्मात्त्वदैक्यवादोऽयं तवैक्यायैव केवलम् ॥ ४७६ ॥

तस्मात् प्रेक्षावतः श्रोतुरसंभवात्। **ऐक्याय** = एकाकित्वाय। केवलमित्यनेन अंशांशिनोरैक्यं व्यवच्छिनत्ति ॥ ४७६ ॥

अणुरेव हि जीवोऽयं कण्ठेऽक्ष्णि हृदि वा स्थितेः।
देहाद्देहान्तरगतेरुद्गतेश्चाप्यवाग्गतेः ॥ ४७७ ॥

प्रवेशाच्च यवव्रीहितिलमाषादिकाङ्कुरे।
अन्नद्वारा च पितरि पितृद्वारा च मातरि ॥ ४७८ ॥

अणूनि जीवचैतन्यान्यन्यानि च तनौ तनौ।
नानाकर्मानुबन्धीनि नानायोनिगतानि च ॥ ४७९ ॥

अतः स्थिरांशपक्षस्य चलदंशपक्षस्य च दुष्टत्वात्, तृतीयः, स्वभावतः अणुत्वभिन्नत्वपक्ष एव, निर्दोषत्वात्समाश्रयणीय इत्याह **अणुरेव हीत्यादिभिश्चतुर्भिः**। अद्वैतभाष्येऽपि 'उत्क्रान्तिगत्यागतीनां' इत्यारभ्य दश सूत्राणि जीवाणुत्वसमर्थनपरतयैव व्याख्यातानि। व्याप्तत्वप्रतिपादकानि श्रुतिवाक्यानि जीवभिन्नपरमात्मपराण्येवेति च ॐ नाणुरतच्छ्रुतेरिति चेन्नेतराधिकारात् इति सूत्रेण समर्थितम्। यातु स्वयमेव प्रमाणं व्याख्यातानां दश सूत्राणां पूर्वपक्षसूत्रत्वोक्तिः सा स्वमतदुराग्रहमूलैव। अत्र विशेषः भे.प.ब्र.सूत्राणि ग्रन्थे (प. ७२२-८२) ॥ ४७७ ॥ ॥४७८ ॥ ४७९ ॥

अन्यच्च ब्रह्मचैतन्यं सदा सर्वत्र तिष्ठति।
स्वच्छमच्छेद्यमच्छिद्रं कूटस्थमचलं ध्रुवम् ॥ ४८० ॥

ब्रह्मणो व्याप्तांशः खण्डशः संछिद्य निष्पन्ना अंशाः जीवा इति पक्षे प्राग्दूषितमपि पुनः सुबहुधा दूषयिष्यन्प्रतिजानीते **अच्छेद्यमच्छिद्रमिति** ॥ ४८० ॥

तदच्छेद्यं कथं छेद्यं भागे भागे त्वविद्यया।
अच्छेद्योयमदाह्योयमित्युक्तेः का गतिर्वद ॥ ४८१ ॥

इत्युक्तेः गीतावचनस्य। का गतिरिति निरवकाशत्वं द्योत्यते ॥ ४८१ ॥

निश्छिद्रस्य कथं छिद्रमसाध्यं साध्यते तया।
अविद्याया न विद्यास्ति यया साध्यं च साध्यते ॥ ४८२ ॥

निश्छिद्रस्य 'तदन्तरस्य सर्वस्य तदु सर्वस्य बाह्यतः' इति सर्वत्र व्याप्ततया प्रमितस्य। **छिद्रं** परिमितत्वम्। **कथं साधयेत्** प्रमाणविरुद्धस्यार्थस्य साधनाशक्यत्वादेवेति भावः। ईश्वरोऽपि खलु प्रमाणदृष्टमेव अणुत्वमहत्त्वादिकं अन्यैर्दुर्घटं स्वस्य अचिन्त्यशक्त्या घटयतीत्येव न तु प्रमाणविरुद्धं किमपि। तदुक्तं सुधायां "नन्वीश्वरशक्तिरपि कथम्। यावत् प्रमाणसिद्धं तावतः सुघटस्य दुर्घटस्य वा घटनायां पटुरिति ब्रूमः" इति। योगिनां योगविद्यायामपि सैव गतिः। विद्याविरोधिन्याः अविद्यायास्तु विद्यासामान्यमेव असंभवि। दूरे योगविद्या। प्रमाणविरुद्धार्थसाधकत्वं तु असंभवित्वादशक्यशङ्कमिति हृदयम् ॥ ४८२ ॥

या स्वांशगततत्खंडानुन्नयेच्चाप्यधो नयेत्।
जनयेन्मारयेन्नानाक्लेशौघं भोजयेत्किल ॥ ४८३ ॥

बहुजीववादे अद्वैतिभिः कल्पिता सर्वाऽपि प्रक्रिया पूर्वोक्तैनैव दूषितेत्याह **येति। स्वेति स्वांशाः** अविद्यायाः अंशाः। **तद्गताः** तदवच्छिन्नाः। **तत्खण्डाः** ब्रह्मणः खण्डाः **तान्** जीवान् इत्यर्थः। 'तदेतत्सर्वं प्रमाणविरुद्धं स्वव्याहतं च। तथा हि। अविद्यायाः व्याप्तशुद्धचिदावरकत्वाभ्युपगमेन स्वयमपि व्याप्तत्वेन तस्याः पुनः

अंशाभ्युपगमः व्याहतः । ब्रह्मणः असङ्गत्वाभ्युपगमेन अविद्यासङ्गेन तदवच्छिन्नत्वं व्याहतम् । ब्रह्मणः अखण्डत्वेन तत्खण्डा जीवा इति च व्याहतम् । जडभूतायाः स्वतः प्रवृत्तिशून्यायाः जीवानां उन्नमनादिक्लेशभोजकत्वं च व्याहतं इति सर्वाऽपि प्रक्रियैषाऽपहसनीयेत्याह **किलेति** ॥ ४८३ ॥

न हि जीर्णपटो ब्रह्म माया मुषिकवेषधृक् ॥ ४८४ ॥

ब्रह्मणः अच्छेद्यत्वं मायाया अच्छेदकत्वं चेत्यत्र क्रमेण व्यतिरेकदृष्टान्तौ जीर्णपटः मुषिका चेत्याह **न हीति** ॥ ४८४ ॥

निष्क्रियं शक्तिशून्यं च कृष्यमाणमविद्यया ।
ते ब्रह्म तद्व्रणं सर्वं केनोपायेन पूरयेत् ॥ ४८५ ॥

ब्रह्मणि सच्छिद्रत्वमेवासंभवीत्युक्तम् । इदानीं कथञ्चित्कृतस्य छिद्रस्य पूरणमपि तेनासंभवीत्याह **निष्क्रियमिति** । तथा हि किं शुद्धमेव ब्रह्म छिद्रं पूरयति उत छिद्रदेशं आगत्य जीवभावं प्राप्यानन्तरम् । नाद्यः इत्याह **शक्तिशून्यमिति** । न द्वितीयः इत्याह **निष्क्रियमिति** । आगमनक्रियाशून्यमित्यर्थः । न हि पटः स्वयं छिद्रप्रदेशमागत्य तं पूरयतीति युज्यत इति भावः ॥ ४८५ ॥

कारागृहं नयन्तीं तां शक्तं चेत्किं न वारयेत् ॥ ४८६ ॥

शक्तिशून्यत्वं तर्कमुखेन स्थापयति **कारागृहमिति** । न च वारयति । अतः शक्तिशून्यं इति विपर्यये पर्यवसातव्यम् ॥ ४८६ ॥

अतस्तत्प्रक्रियां ब्रह्म मत्वा स्वाङ्गस्य विक्रियाम् ।
तद्वक्त्रव्रणशान्त्यर्थं भेदाख्यारण्यकौषधम् ॥ ४८७ ॥

चिच्छक्तिरूपकवचमस्पर्शाय पदे पदे ।
स्वयं दृढीकृत्य जीवान्क्षुधितायै समादिशत् ॥ ४८८ ॥

प्रक्रियां = ब्रह्मैव जीवभावं प्राप्य संसारभागिति कथनरूपाम्। स्वस्य अंगस्य स्वरूपस्य नित्यमुक्तत्वस्य **विक्रियां** अपलापिनीम्। **तस्याः** अविद्यायाः। वक्त्रेण संसर्गेण। संभावितस्य **व्रणस्य** संसारस्य। **शान्त्यर्थं** अत्यन्ताभावार्थम्। **आरण्यकं** उपनिषत्प्रतिपाद्यं **औषधं** = 'द्वा सुपर्णा' 'अन्यमीशमस्य महिमानं' इत्यादि निरवकाशवाक्यप्रतिपाद्यं नित्यविलक्षणत्वाख्यम्। कवचं 'मायां व्युदस्य चिच्छक्त्या' इत्युक्त्या मायासंबन्धव्युदसनपटुम्। **पदे पदे** = नित्यदा। **क्षुधितायै** = आश्रयसापेक्षस्वरूपायै ॥ ४८८ ॥

ब्रह्मखण्डा न जीवास्तद्ब्रह्मणि क्वाप्यखण्डनात्।
अखण्डितं च तद्ब्रह्म निश्छिद्रत्वाद्विनिश्चितम् ॥ ४८९ ॥

निश्छिद्रत्वात् = खण्डानर्हत्वात्। अतो न साध्याविशिष्टता ॥ ४८९ ॥

धर्मखण्डोऽपि ते नास्ति का कथा धर्मिखण्डने।
अखण्डवादी किं न त्वं सखण्डत्वं हि मन्मतम् ॥ ४९० ॥

अखंडवादी = वेदानां धर्मसंसर्गरहितवस्तुप्रतिपादकत्ववादी ॥ ४९० ॥

चित्रशक्तिविशेषश्च यद्यस्ति परमात्मनि।
कथं दुःखार्णवे मंक्तुमुत्सहेत स बुद्धिमान् ॥ ४९१ ॥

दुःखार्णवे इति। तदुक्तं वादावल्यां 'अंशिनः परमेश्वरस्यैव स्वाभाविकाभेदे सकलजनदुःखानुसन्धानापादनात्' इति ॥ ४९१ ॥

ईशशक्त्यैव सर्वत्र शक्तिर्नोचेन्न कुत्रचित्।
नर्ते त्वत्क्रियते किं च नेत्याद्या गर्जति श्रुतिः॥ ४९२ ॥

नेति त्वत् ऋते तव प्रेरणां विना दूरे समीपे वा न किंचित् क्रियते इति। तदुक्तं भगवत्पादैः 'न हि प्रतिबिम्बस्य स्वातन्त्र्येण क्रिया' इति। **मानापातासहिष्णुत्वेन**

त्वदभ्युपगताऽविद्या तु शशविषाणायिता । तस्याः शक्तिरेव नास्ति । दूरे ब्रह्मणि खण्डापादनशक्तिरिति भावः ॥ ४९२ ॥

स किलांबांकगोपालः कुक्षौ महदिदं जगत् ॥ ४९३ ॥

ईश्वरे श्रुतिसिद्धां युगपदणुत्वमहत्त्वादिरूपां विचित्रशक्तिं यशोदाप्रत्यक्षसंवादोक्त्या द्रढयति **स इति** ॥ ४९३ ॥

विचित्रशक्तियुक्तोऽसौ सर्वज्ञः सकलेश्वरः ।
स्वतन्त्रोऽखिलकर्ता च सदाऽणीयान्महान्किल ॥ ४९४ ॥

तच्छक्त्या किं न घटते सोऽपि न स्वात्मघातकः ।
स्वरोमापि क्वचिच्चक्री चक्रेण निचकर्त किम् ॥ ४९५ ॥

चक्रेण स्वरोमनिकर्तनं तु अप्रामाणिकं उपपत्तिविरुद्धं च न ईश्वरशक्त्या घटनार्हं इति भावः ॥ ४९५ ॥

सत्यसङ्कल्पतो विष्णुः कुरुते क्वचिदद्भुतम् ।
क्वचिच्च न करोतीशो नासाध्यं तस्य विद्यते ॥ ४९६ ॥

सत्यसङ्कल्पतः प्रमाणसिद्धघटनासङ्कल्पतः ॥ **क्वचित्** अप्रामाणिकम् ॥ ॥४९६ ॥

यदि ब्रूषे जडं शक्तं जितं सांख्यकुमारकैः ।
जडप्रकृतिकर्तृत्ववादस्याप्यनुपद्रवात् ॥ ४९७ ॥

जितमिति 'ईक्षतेर्नाशब्दमिति' त्वया कृतं तन्निराकरणं व्याहतं स्यादिति भावः ॥ ४९७ ॥

जडस्य न विवेकोऽस्ति च्छिन्द्यात्तर्हि नभोऽपि
तत् ॥ ४९८ ॥

छिन्द्यादिति। इदं चोपलक्षणम्। 'स्यादात्माऽपि हि तादृशः' इति भगवत्पादोक्तातिप्रसङ्गान्तराण्यनुसन्धेयानि ॥ ४९८ ॥

चित्खण्डने समर्थस्य सुकरं जडखण्डनम्।
वृक्षच्छेदिकुठारस्य(पत्रच्छेदेन किं बलं)
पक्वच्छेदेन किं सुखम्॥ ४९९ ॥

'यो हि दुष्करं करोति स सुकरं करोत्येव' इति न्यायमुपेत्याह **चिदिति**॥ ॥४९९ ॥

उक्तश्रुतिप्रमाणाच्च पयोम्बुवदिति स्मृतेः।
मणिमन्त्रौषधादीनां प्रभावेऽपि प्रभोर्वशे ॥ ५०० ॥

स्मृतेरिति। तस्याश्च प्रामाण्यं 'पयोम्बुवच्चेत्तत्रापीत्युक्तं साधयितुं पयः। दधि कुर्वन्तमनिशं सेवेऽहं दधिवामनं' इति श्रीसत्यसन्धोक्तमधुनाऽपि प्रत्यक्षतोऽपि सिद्धम्॥ ५०० ॥

इति व्यासमतं तिक्तो गुडस्ते पित्तदेहिनः ॥ ५०१ ॥

इति व्यासमतं = रचनानुपपत्त्यधिकरणेन जडस्य स्वतःप्रवृत्तिं निराकुर्वतो व्यासस्य मतम्। ते अविद्यायाः कर्तृत्वं वदतः। **पित्तदेहिनः** दुराग्रहदूषितचेतसः। **तिक्तः** अयथार्थज्ञानविषयः। अनेन गृह्यमाणारोपनिदर्शनेन परस्य व्याहतभाषिण उन्मत्ततरत्वं ध्वनयति ॥ ५०१ ॥

निर्विशेषं हि ते ब्रह्म न शक्तं कास्य शक्तता।
यन्नारका सुखाम्भोधावुन्मज्जति निमज्जति॥ ५०२ ॥

निर्विशेषमिति तदुक्तं तत्त्वोद्योते 'न च सत्त्वादयः धर्माः परमार्थतो मायावादिनाऽप्यङ्गीक्रियन्ते' इति। उन्मज्जतीत्यापाततः बहुजीववादे नित्यमेव निमज्जनमेव स्यात्। यथोक्तं तत्त्वनिर्णयटीकायां 'देवदत्ताभिधोपाध्यपगमेऽपि

यज्ञदत्ताद्यभिधानामनन्तोपाधीनां अनपगमेन मुक्त्यभावप्रसङ्गादिति (९२०)॥ ॥५०२॥

चिन्मात्रब्रह्मशक्तिस्ते सिद्धान्तं हन्त कृन्तति।
जडाविद्याशक्तिपक्षः पूर्वपक्षं विविक्षति ॥५०३॥

यद्यज्ञानविशिष्टस्य शक्तत्वं तर्हि तत्क्षिपेत्।
उत्क्षिपेच्च ततो दुःखामयदात्तत्त्वमात्मनः ॥५०४॥

किंच शक्तिः चिन्मात्रस्य उत अविद्याया अथवा विशिष्टस्य। नाद्य इत्याह **चिदिति**। सिद्धान्तं निर्विशेषवादम्। न द्वितीय इत्याह **पूर्वपक्षमिति** त्वया निराकृतं प्रधानवादम्। न तृतीयोऽपीत्याह **क्षिपेदित्यादिना**। असङ्गाभिमतस्य चिन्मात्रस्य अविद्यासङ्गेन विशिष्टभावस्यैव दुर्घटत्वादिति हृदयम्॥५०३॥५०४॥

अतः शक्त्या परीहारः प्रहारोऽभूत्त्रिधाऽपि ते।
प्रागुक्तानुपपत्तिस्तद्विपत्तिरभवद्ध्रुवम् ॥५०५॥

तद्विपत्तिः तस्याः शक्तेः अभावः॥५०५॥

अखण्डिते च यस्मिन्ये सञ्चरन्ति ततस्ततः।
न ते खण्डाः पृथग्द्रव्यं तद्भागास्सुतरां न हि॥५०६॥

परिशेषसिद्धं जीवब्रह्मभेदं व्यवस्थापयति **अखण्डिते चेति**। तदुक्तमनुव्याख्याने अविकारः सदा शुद्धो नित्य आत्मा सदा हरिरि'ति। **न ते खण्डाः** स्वरूपांशाः। भेदेनोपलभ्यमानत्वात्। उभयोः चेतनयोः विकारविकारिभावसंभवेन सुतरामित्युक्तम्॥५०६॥

ब्रह्मणो जीवभावोक्तिरतोऽयुक्ततराविदाम्।
यतः प्रागक्रिया व्याप्ता चिदेका सक्रियास्त्वमी॥५०७॥

अयुक्ततरा 'सर्वज्ञाद्ब्रह्मणोऽन्यत्वं जगतो ह्यनुभूयते' इति अनुव्याख्यानोक्तरीत्याऽनुवादेन। वस्तुतः सर्वदेति विभावनीयम्। **अक्रिया** पराधीनक्रियारहिता। तुनाऽणुत्वसमुच्चयः ॥ ५०७ ॥

अनादितोऽपि जीवास्ते सञ्चरन्ति पृथक्च तत्।
अतो मोक्षेऽपि नैवैक्यं न हि कन्थापरः पुमान् ॥ ५०८ ॥

न हि कन्थेति 'भिन्नानां समुदायस्य नाम ब्रह्मेति तद्भवेदि'त्यनुव्याख्यानोक्तदिशा इति भावः ॥ ५०८ ॥

जीवाणुत्वं श्रुतिप्रोक्तमावयोर्मतमेव हि।
परंब्रह्म परिस्पन्दक्रिया दूरतरं च ते ॥ ५०९ ॥

आवयोरिति। यद्यपि मायी विभुत्वं वदति तथाऽपि तद्भाष्ये 'उत्क्रान्तिगत्यागतीनामि'त्यादिदशभिः सूत्रैः अणुत्वस्यैव सोपपत्तिकं समर्थितत्वेन उत्तरत्र तद्गुणसारत्वादित्यादितिप्रभृतिचतुर्भिः सूत्रैस्तन्निराकरणस्य स्वव्याहतत्वेन निर्मूलत्वेन चैवमुक्तिरिति ध्येयम्। विस्तरस्त्वत्र 'भेदपराण्येव खलु ब्रह्मसूत्राणि' इति ग्रन्थे। **ते इति** निष्क्रियत्वाभ्युपगन्तुः ॥ ५०९ ॥

किमु व्योमकुठारेण च्छित्वा तत्खण्डमन्यतः।
नयेन्मयोग्रा माया वा त्वन्माया वा कदाचन॥ ५१० ॥

माया कर्तृ। व्योम कर्म। किम्वाक्षेपे प्रमाणविरुद्धस्य केनापि अकरणादेवेति भावः ॥ ५१० ॥

हरेरनेकताणुत्वं महत्वं चेति मन्मतम्।
अतो गतागताद्यं च युक्तं शक्त्या मम प्रभोः॥ ५११ ॥

प्रभोरिति हेतुगर्भं विशेषणम्। **शक्त्या** अचिन्त्यया तदधीनविशेषेण च। तदुक्तं अत्तृत्वनयेऽनुव्याख्याने 'स विशेषोऽपि क्रियाशक्त्यात्मना स्थिरः' इत्यादि ॥ ॥५११ ॥

तव त्वनेकताणुत्वे नैव स्तो महदेव तत् ।
शक्तिश्च नास्ति तेनोक्तं समस्तं कस्तदुत्तरेत् ॥ ५१२ ॥

तव निर्विशेषवादिनः । तत् दूषणजातम् ॥ ५१२ ॥

मायावच्छिन्नरूपेषु तेष्वेवं सन्तरत्स्वपि ।
चैतन्यमपरिच्छिन्नं यदन्यद्ब्रह्म तद्धि न ॥ ५१३ ॥

माया स्वभावाज्ञानम् । अन्यत्—नित्यातादृशम् ॥ ५१३ ॥

यत्तद्ब्रह्मपरं व्यासं श्रुत्या स्मृत्या च कीर्त्यते ।
स एव भगवान्विष्णुर्वैष्णवा यमुपासते ॥ ५१४ ॥

स एवेति। यो भागो न विकारी स्यात् स एवास्माकमीश्वरः इत्यनुव्याख्यानोक्तेः ॥ ५१४ ॥

एवकारेण व्यवच्छेद्यं पराभिमतं मायाशबलमित्याह **अन्तरिति। द्वयं** ब्रह्मद्वयम् ॥ ५१५ ॥

अन्तर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थितः ।
इतिश्रुतेर्न चेद्व्याप्तचैतन्यद्वयमापतेत् ॥ ५१५ ॥

जीवाभेदेऽपि यस्याशा ब्रह्म कस्माद्भिनत्यसौ ।
कल्पनागौरवं यत्स्याद्विद्याया लाघवं च यत्॥ ५१६ ॥

आशा आशामात्रं न तु सिद्धिः। **भिनत्ति** 'सदैव गुणवत्त्वेऽस्य भिन्नं स्यान्निर्गुणं सदा। न च मिथ्यागुणत्वं स्यादनिर्वाच्यस्य दूषणादि'त्यनुव्याख्यानोक्तेरिति भावः। **कल्पनागौरवमिति** पराभिमतब्रह्मद्वयस्याप्यप्रामाणिकत्वेन अप्रामाणिकानेककल्पनापत्तेः ॥ ५१६ ॥

जीवान्जग्रास या माया व्याप्ते ब्रह्मणि किं तया।
कविर्मनीषीपरिभूर्यथार्थान्सोसृजत्किल ॥ ५१७ ॥

जग्रास तदाश्रयेति यावत्। तदुक्तं 'स्वभावाज्ञानवादस्य निर्दोषत्वादि'ति। **व्याप्तस्य** त्रिविधव्याप्तिमतः सर्वज्ञस्य। किमित्याक्षेपे। 'अज्ञताऽखिलसंवेत्तुर्घटते न कुतश्चन' इत्युक्तेः। **कविः** सर्वज्ञः। 'याथार्थ्यतोऽर्थान् व्यदधात्' इति श्रुतेरर्थतोऽनुवादः **यथार्थानित्यादि** ॥ ५१७ ॥

अतः सत्यजगत्सृष्टौ मिथ्याऽज्ञानं तव प्रियम्।
कुत्रोपयुज्यते तस्मात्स्वजायां न परेर्पय ॥ ५१८ ॥

अतः असृजदिति सृष्ट्युक्त्यैव जगत्सत्यत्वसिद्धेः। तदुक्तं मायिनैव, 'सतो ह्युत्पत्तिर्विनाशो वा दृष्टो घटादेः नासतः शशविषाणादेरि'ति। **तव प्रियमिति** जगतः अज्ञानकार्यत्वेन मिथ्यात्वसिद्धिमभिलषत इति भावः। किन्तु तन्मिथ्यात्वं कफोणिगुडायितम्। 'अनवस्थितिस्तथा च स्यादन्योन्याश्रयताऽथवा' इति दूषणादिति भावः। स्वजायां जीवाश्रितां परे नारोपय। 'निर्विशेषे स्वयं भाते किमज्ञावृतं भवेदि'ति तन्निराकृतेः ॥ ५१८ ॥

अतो घटमठाकाशाद्युपमा विषमोपमा ॥ ५१९ ॥

अतः उपाधिसंबन्धासंभवात् ॥ ५१९ ॥

घटे घटप्रमाणोऽसौ मठमात्रो मठेऽपि च।
घटे गच्छति नो गच्छेदागच्छति न चाव्रजेत् ॥ ५२० ॥

महाकाशस्य खण्डोऽसौ महाकाशस्वभाववान्।
तस्य तद्रूपताऽप्यस्तु मत्यादीनां हरित्ववत् ॥ ५२१ ॥

जीवास्त्वाकाशमध्यस्थ त्रसरेणुगणोपमाः ।
तस्माद्ब्रह्मैक्यमेतेषां नाभूदस्तिभविष्यति ।
अणूनां गगनेनेव मणीनामिव सूत्रतः ॥ ५२२ ॥

स्वगतभेदविवर्जितस्याव्याकृताकाशस्योपमा ब्रह्मणस्तत्स्वरूपांशानां मत्स्यादीनामेव घटते इत्याह **घटे इत्यादिना** द्वाभ्याम्। तदुक्तं यावान्वा अयमाकाशस्तावानेषः अन्तर्हृदय आकाशः भिन्नांशानां जीवानां ब्रह्मणश्चाधाराधेयभावे दृष्टान्तावाह **अणूनां मणीनामिति** च । 'मयि सर्वमिदं प्रोतं सूत्रे मणिगणा इव' इति स्मृतिः । 'नित्यं सर्वगते ब्रह्मणि आश्रितस्तिष्ठति स्वयं अणुश्च जीवः ।' नित्यं सर्वगतस्थाणुरिति तत्रैव गीतायाम् ॥ ५२२ ॥

अनादिब्रह्म किल ते जीवास्सर्वेऽप्यनादयः ।
तद्भेदस्याप्यनादित्वेऽभेदो भूद्ब्रह्मणः कदा ॥ ५२३ ॥

अनादित्वं च भेदादेः षडस्माकमनादयः ।
इति त्वद्ग्रन्थ एवोक्तमतो युक्तिविचारणे ।
नाखण्डब्रह्मचित्खण्डो जीवराशिरभूदयम् ॥ ५२४ ॥

ते इत्यनेन उत्तरश्लोकोक्तां तत्संमतिं निरूपयति । तथा हि तत्सिद्धान्तोक्तिः 'जीव ईशो विशुद्धा चित् भेदस्तस्यास्तयोर्द्वयोः। अविद्या तच्चितोर्योगः षडस्माकमनादयः' इति ॥ ५२३ ॥ ५२४ ॥

इदानीं तु भिदास्त्येव न भविष्यति सा कदा ।
अज्ञाननाशेऽप्यज्ञानाकार्यानादेरनाशनात् ॥ ५२५ ॥

'न त्वेवाहं जातु नासं न त्वं नेमे जनाधिपाः । न चैव न भविष्यामः सर्वे वयमतः परमि'ति गीतोक्तिमनुरुध्याह **इदानीमिति।** तथा च प्रयोगः भेदः न मिथ्याज्ञानानिवर्त्यत्वात् । न चासिद्धिः अज्ञानाकार्यत्वात् । तत्रापि हेतुः अनादित्वात् इति । न चाप्रयोजकता। अनादेर्निवृत्तौ ब्रह्मणोऽपि निवृत्तिः स्यादिति विपक्षे

बाधकसद्भावात्। न च निवर्तकाभाव उपाधिः। उक्तहेतुना पक्षेऽपि तत्साधनेन साधनानव्यापकत्वात्। **अज्ञाननाशेऽपीति**। अपिना अभ्युपगमवादं आह। अज्ञानस्याप्यनादित्वेन ब्रह्मसमानयोगक्षेमतया निवृत्त्यनुपपत्तिरेव। तदुक्तं वादावल्यां 'अनादिभावरूपस्य विज्ञानविलापनासंभवाच्च ब्रह्मवदि'ति। न चाकस्माद्विनिवृत्तिः ब्रह्मणोऽपि तथाभावापत्तेरिति दिक् ॥ ५२५ ॥

तदनुद्धतखण्डानां तत्रैक्यं च न युक्तिमत्।
घटाकाशे महाकाशस्यैक्यं स्यान्न घनावलेः॥ ५२६ ॥

अनुद्धतखण्डानां = स्वरूपांशाभावानापन्नानाम्। **न युक्तिमत्** = नान्यदन्यात्मतां याति इति युक्तिविरुद्धम्॥ ५२६ ॥

मुक्तास्तु धौतमणिवत्पङ्कार्द्रमणिवत्सृतौ ॥ ५२७ ॥

'मुक्तिर्हित्वाऽन्यथाभावं स्वरूपेण व्यवस्थितिरि'ति भागवतवचनमनुरुध्य मुक्तिस्वरूपं सदृष्टान्तमाह **मुक्ता इति**। तुना तदाऽप्यभेदं व्यावर्तयति ॥ ५२७ ॥

सर्वतोऽप्यपरिच्छिन्नचैतन्यब्रह्मणि स्थिरे।
इतस्ततश्चरच्छिन्नचैतन्यं ह्यन्यदेव हि ॥ ५२८ ॥

सर्वतः देशतः कालतः गुणतश्च। **छिन्नेति** प्रकारत्रयेणापि परिच्छिन्नेत्यर्थः। 'ब्रह्मैव सन् ब्रह्माप्येति' इति श्रुतिस्तु जीवभावमपरित्यज्य ब्रह्मण्येव स्थितिमाहेति भावः॥ ५२८ ॥

मुग्धस्त्रीमूर्धमालावदब्धिस्थजलजन्तुवत्।
व्योमस्थपक्षिश्रेणीवद्भूमिस्थजनजालवत् ॥ ५२९ ॥

मुग्धेत्यादिकं आधाराधेयभावमात्रे दृष्टान्तः। ब्रह्म तु निर्व्यातादृशचिच्चैत्य-नियन्तृ इति विशेषः॥ ५२९ ॥

अथ सर्वा व्यवस्थेयं दृश्यते केवलं जनैः ।
वस्तुतो नास्ति तत्सर्वं मृषेति यदि मन्यसे ॥ ५३० ॥

अथेति एकजीववादमाशंक्य प्रत्याचष्टे । **केवलं** भ्रान्त्या । एक जीवः अमुक इति अनिश्चयात् । जनैरित्युक्तं **सर्वं** बहूनां सद्भावः तेषां गमनागमनादिकम् ॥ ॥५३० ॥

देहादिकं मृषा तेऽस्तु नानादेहस्थचेतनाः ।
मृषा चेद्गमनं न स्याद्रज्जुसर्पो न सर्पति ॥ ५३१ ॥

अस्तु इत्यभ्युपगमः । **मृषा** अचेतनवत् स्वरूपेणैव कल्पिताः । आरोपितस्य गमनाद्यभावे दृष्टान्तः **रज्जुसर्प** इति ॥ ५३१ ॥

अस्ति तत्रापि चैतन्यभ्रमस्स्थाणुषु पुंभ्रमे ।
चरेयुर्भ्रमकाले वा व्यावहारिकताऽपि ते ॥ ५३२ ॥

चैतन्यारोपाङ्गीकारेऽपि नोक्तदोषनिस्तार इत्याह **स्थाणुषु पुंभ्रमे** इति ॥ ॥५३२ ॥

वृथा भूद्बाधतः पूर्वमप्येषां गत्यदर्शनात् ।
सत्येन ब्रह्मणा तेषामैक्यं न स्यान्मृषात्मनाम् ॥ ५३३ ॥

बाधतः पूर्वं अपि भ्रान्तिदशायामपि । **एषां** रज्जुसर्प-स्थाणुपुरुषादीनाम् । किंच त्वया 'परेऽव्यये सर्व एकीभवन्ती'त्यादिश्रुत्यर्थतया बहूनां ब्रह्मैक्यमभिप्रेयते । बहूनामेवाभावे तेषां वाक्यानां त्वन्मतेऽप्रामाण्यं प्रसज्यत इत्याह **सत्येनेति** ॥ ५३३ ॥

अथ सन्त्येव चैतन्यभागास्ते सर्वदेहगाः ॥
तेषां ब्रह्मविभेदस्तु मृषेति यदि मन्यसे ॥ ५३४ ॥

बहुजीववादमुपक्षिप्य दूषयति। **अथेति। सन्त्येवेति।** तेन गमनागमनाद्युपपत्तिः। तर्हि एकीभवन्तीति श्रुतिविरोध इत्यत आह **भेदस्तु मृषेति** ॥ ॥५३४ ॥

सर्वत्र निष्क्रियं ब्रह्म निश्छिद्रं वर्तते किल ॥ ५३५ ॥

नानादेहगतान्ये तान्यनन्तान्यत्यणूनि च।
चैतन्यान्यादितस्सन्ति सञ्चरन्ति पृथक्पृथक्॥ ५३६ ॥

अन्यतोऽनुद्धतांशानामनादिपरिवर्तिनाम्।
अणूनां सक्रियाणां च बहूनां क्लेशभोगिनाम्॥ ५३७ ॥

सदा सर्वत्र पूर्णेन निश्छिद्रस्थिरमूर्तिना।
एकेन निर्विकारेण क्लेशानां दूरवर्तिना ॥ ६३८ ॥

भेदो मृषेति यद्वाक्यं यच्छास्त्रं तत्कृते कृतम्।
बधिरास्तत्र शिष्यास्स्युरुन्मत्ता वा न बुद्धिमान्॥ ५३९ ॥

एवमप्युक्तसर्वदोषानिस्तार एवेत्याह **सर्वत्रेति।** अनादीनां तत एव ब्रह्मवत्सत्यानां भेदकधर्माणां अङ्गीकारः भेदस्य त्वनङ्गीकारः व्याहतः। तत्प्रतिपादकं शास्त्रं प्रेक्षावद्भिस्तिरस्कारमेवार्हतीत्याह पञ्चभिः। तत्र जीवगता धर्माः अणुत्वं सक्रियत्वं बहुत्वं क्लेशभोगित्वं इत्यादयः। ब्रह्मगतास्तु सदा सर्वत्र पूर्णत्वं निश्छिद्रत्वं एकत्वं स्थिरमूर्तित्वं निर्विकारत्वं क्लेशातिदूरत्वं इत्यादयः। न च धर्माणामपि मिथ्यात्वम्। अनादित्वेन स्वभावत्वात्। स्वभावहानौ स्वरूपहानिप्रसङ्गात्। तदुक्तं 'निर्दोषश्रुतिसाक्षिभ्यां प्रमिते ब्रह्मजीवयोः। सर्वशक्त्यल्पशक्तित्वे मिथ्येति च न युज्यते' इति ॥ ५३५ ॥ ५३६ ॥ ५३७ ॥ ॥५३८ ॥ ५३९ ॥

मृषा भेदं घटव्योम प्रचलेत्तत्र तत्र किम्।
जलेन जलपङ्केन लिप्यते किं दिने दिने ॥ ५४० ॥

अस्तु वा भेदो मृषा तथाऽपि जीवेषु चलनादिकं क्लेशलेपादिकं च नैवोपपद्यते इति सदृष्टान्तमाह **मृषेति** ॥ ५४० ॥

किंतु स्वभावभिन्नानां रेणूनां गगनादिना ।
तत्र तत्र क्रिया नास्ति विक्रिया च ततस्ततः ॥ ५४१ ॥

निष्क्रियब्रह्मभागाश्चेत्सक्रियत्वं न कर्हिचित् ।
निष्क्रियाकाशभागास्ते सक्रियाः केन वा कृताः ॥ ५४२ ॥

अतः गगनादिना रेणूणामिव स्वभावभेदाङ्गीकार एव एकत्र क्रियाऽभावः अपरत्र तत्सद्भाव इत्यादिविरुद्धधर्मोपपत्तिरित्याह **किं त्विति** ॥ ५४१ ॥ ५४२ ॥

तज्जीवेश्वरभेदो वा मूकता वा गतिस्तव ।
स्फोटो यन्नाक्रियेणैक्ये ताल्वोष्ठपुटसंपुटे ॥ ५४३ ॥

भेदमिथ्यात्वे परस्परविरुद्धयोरिति न्यायेन अभेदोन्मज्जनापत्त्या निष्क्रियेण ब्रह्मणैक्यमापन्नस्य जीवस्यापि निष्क्रियत्वे ताल्वोष्ठपुटविदारणरूपमुखव्यादानाभावेन मूकीभावापत्तिरिति भावेनाह **तदिति** ॥ ५४३ ॥

व्यावहारिकतोक्तिस्ते स्पर्धते पदमञ्जरीम् ।
बाधश्चेदस्ति तर्ह्यर्थ नास्तितैवेति किं तया ।
बाधश्चेन्नास्ति ते शास्त्र नास्तितैवेति किं तया ॥ ५४४ ॥

व्यावहारिकेति व्यावहारिकं बाध्यमिति चानर्थान्तरम् । तदुक्तं मायिभिः 'बाध्यविषये च व्यावहारिकमित्यस्याद्वैतिपरिभाषामात्रसिद्धत्वात्' इति । सत्यं च अबाध्यम् । तथा च व्यावहारिकसत्यमित्यस्य अबाध्यं बाध्यं चेत्यर्थकत्वापत्त्या व्याहतिरेव । शास्त्रस्य बाध्यत्वे वन्ध्यासुतवचस इवासाधकत्वम् । अबाध्यत्वे सदद्वैतभङ्गः इत्याह **बाधश्चेदिति**। तदुक्तं भगवत्पादैः 'मिथ्यात्वं यदि दुःखादेस्तद्वाक्यस्याग्रतो भवेदि'त्यादि ॥ ५४४ ॥

सर्वानुभवसिद्धस्य मर्यादारक्षकस्य च ।
जीवेश्वरादिभेदस्य मृषा त्वं केन हेतुना ॥ ५४५ ॥

मर्यादेति। तदुक्तं वादावल्यां 'यदि भेददर्शनं न स्यात्तर्हि सकलव्यवहारविधुरः परः प्रसज्येतेति ॥ ५४५ ॥

यथानुभवमेवार्थस्सदा सर्वत्र तिष्ठतु ।
जीवोजीवोस्तु सर्वत्र जडमस्तु जडं सदा ॥ ५४६ ॥

ईशस्सर्वत्र चेशोस्तु यथापूर्वमिति श्रुतिम् ।
उपेक्ष्य लोकसंहारः क्रियते केन हेतुना ॥ ५४७ ॥

न ह्यनादिभवेप्यस्य व्यत्ययोऽर्थस्य कस्यचित् ।
इदानीं न कुतो भाविकाले व्यत्यास इष्यते ॥ ५४८ ॥

यथाऽनुभवमिति । 'बल्येवानुभवस्त त्र' इति ब्रह्मतर्कवचनतः अनुभवस्य बलवत्त्वेनान्यतो बाधायोगादिति भावः । 'जगत् वाहः सत्योऽयं पञ्चभेदसमन्वितः । न क्वाप्यनीदृशं विश्वं तत्तत्कालानुसारतः' इत्युक्तेः । याथातथ्यतोऽर्थान्व्यदधाच्छाश्वतीभ्यः समाभ्यः इति श्रुतेश्च । श्रुतिं 'धाता यथापूर्वमकल्पयदि'ति श्रुतिम् । संहारः मिथ्यात्वापादनम् । कुत इति। तदुक्तं न्यायामृते भाविबाधकशङ्कानिरासभङ्गे 'अहेतुकार्यशङ्केव स्वक्रियादिविरोधतः । भाविबाधकशङ्का न युक्ताऽध्यक्षे श्रुताविव' इति ॥ ५४६ ॥ ५४७ ॥ ५४८ ॥

निर्दुःखस्वसुखप्राप्त्या मुक्तिश्चैक्यं विना भवेत् ॥ ५४९ ॥

नन्वेवं 'परेऽव्यये सर्व एकीभवन्ती'ति श्रुत्या मुक्तावेकीभावोक्तेः का गतिरिति चेत् च्विप्रत्ययेन स्वरूपैक्यस्य बाधितत्वेन निर्दुःखत्वस्वयोग्यसुखरूपत्वादिना सादृश्यैक्यमेवेत्याह निर्दुःखेति ॥ ५४९ ॥

वेदस्तु सर्वं ब्रह्मेति सर्वस्याप्येकतां स्फुटम् ।
वक्ति तत्र तु जीवैक्यमात्रे केन भरस्तव ॥ ५५० ॥

ननु 'सर्वं खल्विदं ब्रह्म' 'आत्मैवेदं सर्वम्' इत्यादिश्रुतिः स्वरूपैक्यं वक्ति । अतः अनुभवसिद्धोऽपि भेदो बाध्यतामित्यत आह **वेद इति**। यद्येवं तर्हि वेदे श्रद्धालुना सर्वशब्दार्थजडेनाप्यैक्यमङ्गीकार्यं न तु चिन्मात्रैक्यं विशेषहेत्वभावादित्याह **केनेति** ॥ ५५० ॥

दृष्टस्तु जडभेदोऽस्तु मृषा च व्यावहारिकः ॥ ५५१ ॥

विशेषहेतुमाशङ्कते **दृष्ट** इति । जडभेदोऽनुभवसिद्धो न बाधार्ह इति चेद्धन्त तर्हि अनुभवसिद्धे जीवभेदेऽपि धीमतां दृष्टिः । स व्यावहारिको मृषा चेत् जडभेदोऽपि तथैवास्तु इत्याह **जडेति** ॥ ५५१ ॥

यदि तद्व्यतिरेकेणासत्त्वमर्थो जडे तव ।
चेतनेऽप्यस्तु नित्यत्वान्न चेन्नित्यजडेऽपि न ॥ ५५२ ॥

ननु सर्वं ब्रह्मेति श्रुतिर्न जडैक्यं वक्ति । किंतु ब्रह्मव्यतिरेकेण जडस्यासत्त्वम् । जीवस्य तु स्वरूपैक्यं अतो नोक्तदोष इति चेन्निर्मूलैषा सकृच्छ्रुतसर्वशब्दार्थे द्विधा कल्पना वाक्यभेदापत्तेरित्याह **चेतनेऽपीति**। ननु चेतनस्य नित्यत्वान्नासत्त्वकल्पनमिति चेदेवं तर्हि अविद्याया अपि तव ब्रह्मवदनादित्वात्तत एव च नित्यत्वावश्यंभावात्तस्यापि जीववद्ब्रह्मणा स्वरूपैक्यमेवास्तु न तु पुनः तद्व्यतिरेकेणासत्त्वमित्याह **नित्यजड** इति। तदुक्तं श्रीभगवत्पादैः 'स्यादविद्यात्वमात्मन' इति। इदं चाभ्युपेत्योक्तम्। अनित्यस्यापि जडस्य पराभिमतस्य ब्रह्मव्यतिरेकेण त्रैकालिकासत्त्वस्य अनुपपत्तेरेवेति ध्येयम्। तदुक्तं 'स्वकाले ह्यस्तितां गृह्णन् साक्षात्कारस्त्रिकालगम्। प्रतिषेधं निरुन्धानो गृह्णात्येवाह्यबाध्यतामि'ति ॥ ५५२ ॥

ईशत्वसर्वकर्तृत्वसर्वज्ञत्वादयो गुणाः ।
अलभ्यास्तपसाप्यन्यैस्सर्वप्राणिमनोहराः ।
जीवैक्ये खलु सर्वेषामेषां नाशो भविष्यति ।। ५५३ ।।

किंच जीवैक्यपक्षे बहुविप्लवापाताज्जडैक्यपक्ष एव त्वयाऽङ्गीकारार्ह इत्याह **ईशेति । मनोहरा इति ।** तदुक्तं भागवते प्रथमस्कन्धे 'एते चान्ये च भगवन् नित्या यत्र महागुणाः प्रार्थ्या महत्त्वमिच्छद्भिर्न च यान्ति स्म कर्हिचिदि'ति । जडैक्ये तु चित्त्वनाशः सन्नपि 'यत्राल्पीयांस्ये दोषाः सपक्ष' इति न्यायेन सह्य इति भावः ।। ५५३ ।।

दुर्घटं घटयन्ती ते माया चित्त्वं जडे दिशेत् ।
तेन चित्त्वादिनाशस्स्यान्न जडैक्येऽपि ते मते ।
तच्चेदैक्यं सुखग्राह्यमिदं कस्मान्न गृह्यते ।। ५५४ ।।

किंच दुर्घटं घटयन्ती तवाविद्या चित्त्वमपि जडे घटयेदेवेति न तस्यापि नाशभयमिति सोपहासमाह **दुर्घटमिति। सुखेति** अनुभवविरोधमवधीर्य अविद्याप्रभावेणेत्यर्थः । **इदं** जडैक्यम् ।। ५५४ ।।

अनर्घरत्नचोरस्तु रक्ष्यो मृद्भाण्डतस्करः ।
शिक्ष्यः किल कृपालुस्तु दीनेषु कुरुते दयाम् ।। ५५५ ।।

अनर्घ्यरत्नानां ईशगुणानां चोरः अपलापपर्यवसितः जीवाभेदः । मृद्भाण्डं चित्त्वम् । तस्य तस्करः अपलापः शिक्ष्यः अग्राह्यः । किलापहासे । कृपालुः अविद्या । दीनेषु जडैक्यपक्षे एव । **दयां कुरुते** चित्त्वं घटयेत् ।। ५५५ ।।

जडस्यानन्दमयता जडं जन्मादिकारणम् ।
जडादज्ञाननाशस्ते दुर्घटं घटयेज्जडम् ।। ५५६ ।।

अविद्या दुर्घटत्वस्य तदाभिमतभूषणत्वविवरणव्याजेन बहुधा मायिमतप्रमेयाणां प्रमाणविरुद्धतां व्युत्पादयति **जडस्येत्यादिना । आनन्दमयता =** सूत्रकृन्निर्णीतब्रह्मत्वं पूर्वपक्षीकृत्य सिद्धान्तीकृता कोशरूपता । जडं अज्ञानं

जन्मादिकारणं न तु ब्रह्मेति ब्रह्मस्वरूपलक्षणस्य तटस्थतोक्तिः। चितः अज्ञानस्फोरकत्वमुपेत्य जडात् चरमवृत्तिज्ञानादेव अज्ञाननाशः ॥ ५५६ ॥

ज्ञानत्वरूपं चित्त्वं च वक्ष्यामोनुपदं जडे।
दुष्करं तस्करत्वं तदस्मिन्ब्रह्म यशस्करे ॥ ५५७ ॥

अनुपदं (५६३ श्लो.) ज्ञानरूपमनस्तत्वेनेत्यत्र। ज्ञानकार्यस्याज्ञाननिवृत्त्यादेः जडेन वृत्तिज्ञानेनैव करणाभ्युपगमादस्यैव चित्त्वं अतथाभूतस्यात्मनो ज्ञानरूपत्वाभावः। यथोक्तं वादावल्यां जडत्वहेतुभङ्गे 'आत्मनो ज्ञानस्वरूपता न निर्वाह्यतामारोहतीत्यादि'ना। **दुष्करं** विपरीतलक्षणया सुकरमिति भावः। **तस्करत्वं** प्रकाशतस्करत्वं एवं यशस्करत्वमित्यत्रापि विपरीतलक्षणया तद्गुणापलापेन अपयशस्करत्वमिति हृदयम्। तदुक्तं भगवत्पादैः 'याथातथ्यमविज्ञाय शास्त्राणां शास्त्रदस्यवः' इत्यादि। एवं घटादीनां द्रष्टृत्वं आत्मनश्च जडत्वं - इत्यादि विरुद्धं सर्वमपि स्यात् इति ॥ ५५७ ॥

मायाशक्त्या जडस्यापि सार्वज्ञादिप्रदानतः।
ऐक्ये तु न जडात्मैक्यं तस्करस्याद्धि कस्यचित् ॥ ५५८ ॥

नन्वेवमपि जडैक्याङ्गीकारे ब्रह्मणः सार्वज्ञादिहानापत्तिरित्यतो मा भैषीः त्वदाराध्यदेवताऽविद्यास्वशक्त्या जडेऽपि ब्रह्मणि सार्वज्ञादिकं घटयिष्यति इति सोपहासमाह **मायेति। न तस्करः स्यादिति।** अप्रमाणं सर्वं घटयेदेवेति भावः ॥ ॥५५८ ॥

अथवा जडतामीशे दत्वा माया स्वशक्तितः।
जडैक्यमेव घटयेदिदं तेऽतिप्रियं मतम्।
यत्र त्वस्येति वाक्योक्तमुक्तेरत्युपयोगतः ॥ ५५९ ॥

जडैक्यं कथं ममातिप्रियमित्यत आह **यत्रेति।** यत्रत्वस्येति श्रुत्यर्थतया त्वया मुक्तौ ज्ञानसाधननिषेधेन मुक्तानां पर्यवसितजडत्वोपपादकत्वेन

त्वदभिमतमुक्तिस्वरूपोपोद्बलनादिति भावः ॥ ५५९ ॥

नात्मानं न परांश्चापि तव मुक्तस्तदेक्षते ।
जडमुक्तस्तु सर्वत्र जडैक्ये नित्यमुक्तता ॥ ५६० ॥

न केवलमेतावत् किंतु जडैक्ये सर्वदा ज्ञानाभावेन नित्यमुक्तत्वरूपातिशयोऽपीत्याह **नेति**। तदा मुक्तिदशायामेव । **सर्वत्र** नित्यदा स्वरूपविषयकज्ञानशून्यः ॥ ५६० ॥

फले त्वतिशयाद्वाक्यं जडैक्यपरमेव तत् ।
सुखात्मता जडेऽपि स्यान्मानसं हि सुखं नृणाम् ॥ ५६१ ॥

जडेऽपीति। 'विषयसंबन्धेनापि आत्मस्वरूपानन्द एवाभिव्यज्यते' इति विवरणोक्तेः । न च सुखरूपत्वेऽपि सुखविषयकतत्त्वं जडस्य नास्तीति वाच्यम् । निर्विशेषत्ववादिना चितोऽपि तदनङ्गीकारादेवेति भावः ॥ ५६१ ॥

मोक्षश्च तार्किकाचार्यमोक्षवद्वा भविष्यति ॥ ५६२ ॥

प्रसङ्गेन तार्किकाभिमतां सुखदुःखोभयध्वंसलक्षणां जडैक्यपर्यवसायिनीं मुक्तिमपि दृष्टान्तमुखेन धिक्करोति **मोक्षश्चेति** ॥ ५६२ ॥

ज्ञानरूपमनस्तत्त्वेनैक्ये ज्ञानत्वमप्यलम् ।
स्यादेव यत्समस्तस्य ज्ञानं मानसमावयोः ।
न ते किञ्चिदनिष्टं स्यादस्माकं महती क्षतिः ॥ ५६३ ॥

मनस्तत्त्वेन जडेन । मानसं 'धीर्भीः सर्वं मन एवे'ति श्रुतेः । **अस्माकं** दूषणानां भूषणत्वममन्यमानानां यथानुभूतगुणदोषस्वरूपतत्त्वविदाम् । **महती क्षतिः** जीवजडैक्ये ब्रह्मणोङ्गीक्रियमाणे प्रमितभेदापलापेन अपसिद्धान्तः ॥ ५६३ ॥

तथापि चित्त्वमात्रस्य त्यागाद्धीतो जडैकताम् ।
श्रुतामपि जहासि त्वं यर्हि तर्हि तवैकताम् ॥ ५६४ ॥

महागुणापहर्त्रीं त्वं त्यज भक्त्या भजाच्युतम् ।
न चेत्प्रभुर्महाचोरं त्वामन्धेतमसि क्षिपेत् ॥ ५६५ ॥

तथाऽपि श्रुतपरित्यागाख्यदूषणस्य स्वसिद्धान्ताभिमतं भूषणत्वं परित्यज्यापि । **तवैकतां** = त्वदुपलक्षितजीवैकतां त्यज । अन्यथा त्वां सूत्रनिर्णीतानां श्रुतिमहातात्पर्यविषयाणां अनन्तगुणानामपहर्तारम् । **महाचोरं** 'अचूचुरद्वेदसमूहवाहं ततो महातस्करमेनमाहुः' इत्युक्तदिशेति भावः । अन्धेतमसि क्षिपेत् । अन्धन्तमोऽप्यलङ्कारो नित्यदुःखं शिरोमणिरि'ति भगवत्पादोक्तेः ॥ ॥५६४ ॥ ५६५ ॥

दृश्यमानमिदं सर्वं ब्रह्मेत्यैक्यानुशासनात् ।
जडस्य ब्रह्मणैक्येऽपि का ते हानिर्निगद्यताम् ॥ ५६६ ॥

किं च पराभावबोधकमिदं पदं 'अन्तवन्त इमे देहाः' इत्यत्रेव दृश्यमानजडपरमेवाश्रयितुं युक्तं न तु प्रत्यगात्माभिधायकमित्याह **दृश्यभावमिति** । **ते** = अनुपपत्तीनां मायोपोद्बलकत्वेन अलङ्कारतामङ्गीकुर्वाणस्य ॥ ५६६ ॥

स्वावेद्यत्वं स्वभातत्वं जडैक्ये शोभतेतराम् ।
सार्वज्ञादिगुणानां च मिथ्यात्वं शोभतेतमाम् ॥ ५६७ ॥

आत्मन इव निर्विकल्पकस्वव्यवहारे घटादिजडस्य संविदन्तरापेक्षा शून्यत्वस्य स्वप्रकाशत्वस्य श्लिष्टत्वात् इत्याह **शोभतेतरामिति** ॥ सार्वज्ञादिगुणानां जडे मिथ्यात्वं तु सर्वसंमतमित्याह **शोभतेतमामिति** ॥ ५६७ ॥

रागादिदोषशून्यत्वमपि युक्ततरं भवेत् ।
सुखत्वमनुभूतित्वं मनोवत्स्यान्निराकुलम् ।
जडोपादानताऽप्यस्य पञ्चम्योक्तातिशोभते ॥ ५६८ ॥

सृष्टिस्त्वदृष्टतोस्त्वेषा भाट्टानामिव ते मते ।
मिथ्याभूतं च कर्तृत्वं कस्य न स्यादुदीर्यताम् ॥ ५६९ ॥

एवमनुपपत्त्यन्तरापातेन त्वन्मतं भूषिततरं स्यादित्याह त्रिभिः रागादीत्यादिना ॥ निराकुलमिति मनोदृष्टान्तेन, जडत्वेन हेतुना सुसाधत्वादिति भावः । **पञ्चम्येति** 'यतो वेमानि' इत्यत्रत्यया ॥ ५६९ ॥

चित्त्वादिधर्मशून्यैस्तु चेतनैर्घटसन्निभैः ।
अप्यैक्यं युक्तमेवास्येत्यस्तु सर्वं समञ्जसम् ॥ ५७० ॥

घटसन्निभैः, तत्रापि जडत्वादिधर्माणां त्यागेन पदार्थत्वरूपेणेत्यर्थः ॥ **समञ्जसं** विपरीतलक्षणया सर्वानुपपत्तिभाजनम् ॥ ५७० ॥

यद्येवमपि तत्रार्थस्तद्भिनाऽसत्त्वमेव ते ।
चेतनेऽप्यस्त्वसावर्थो द्विधा क्लृप्तिस्तु ते मुधा ॥ ५७१ ॥

द्विधा जीवस्यैक्यं जडस्य मिथ्यात्वं इत्येवंरूपेण ॥ ५७१ ॥

गजो मिथ्या यथा तद्वन्मिथ्या किल पलायनम् ।
बन्धो मिथ्याविमोक्षश्च मिथ्या किल भवन्मते ॥ ५७२ ॥

मोक्षश्च मिथ्येति । अन्यथा सदद्वैतभङ्गात् ॥ ५७२ ॥ ५७३ ॥

अतः किं चेतनैरेतैः कर्तृता भोक्तृतोज्झितैः ।
सर्वत्रैक्यश्रुतीनां स्यादेवं चेदेकवाक्यता ॥ ५७३ ॥

साम्येऽपि श्रुतियुक्तीनां हान्यभावेऽपि केवलम् ।
यदि स्वमतरक्षायै विवक्षेयमपेक्ष्यते ॥ ५७४ ॥

श्रुतियुक्तीनां विरोधस्येति शेषः ॥ **स्वमतेति** सकलप्रमाणविरुद्ध-स्वव्याहतमतरक्षायै इत्यर्थः 'सर्वं समाप्नोषि ततोऽसि सर्वः' इति गीताशाङ्करभाष्ये भेदमाश्रित्य सर्वव्यापकमित्यर्थोक्तेरिति ध्येयम् ॥ ५७४ ॥

सर्वस्य तदधीनत्वमर्थं सा वक्ति न द्विधा ॥ ५७५ ॥

तदधीनत्वमिति 'स्वातन्त्र्ये च विशिष्टत्वे स्थानमत्यैक्ययोरपि । सादृश्ये चैक्यवाक्सम्यक् सावकाशा यथेष्टतः' इति भगवत्पादीयवचनात् ॥ ५७५ ॥

अतो वाक्यबलादैक्यमाशास्यं न क्वचित्त्वया ॥ ५७६ ॥

ऐक्यं अनुभवविरुद्धं जीवैक्यम् । तदुक्तं भगवत्पादैः 'न चानुभवविरोधे आगमप्रामाण्यानुभवस्यैवाप्रामाण्यप्राप्तेः' इति । **क्वचिदिति** त्वद्भाष्यकारेणापि विरोधभिया तत्रतत्र 'सर्वकामः सर्वगन्धः' 'त एतस्यैव सर्वे रूपमभवन्' 'कामोऽस्मि भरतर्षभ' 'नमोऽस्तु सर्वत एव सर्व' इत्यादौ सामानाधिकरण्यस्य भाक्तत्वमुपेत्य नियामकत्वव्यापकत्वादिभेदपरार्थस्यैवाश्रयणात् अत्र पुनः स्वरूपैक्योक्तौ स्वव्याघातापत्तेरिति भावः । विस्तरस्त्वत्र 'भेदपराण्येव खलु ब्रह्मसूत्राणि' इति ग्रन्थे (प. ९५-१०२) द्रष्टव्यः ॥ ५७६ ॥

विरुद्धापातलब्धेऽर्थे तवैवायं दुराग्रहः ।
अभिमान्युपदेशेन व्यासस्त्वर्थान्तरं जगौ ॥ ५७७ ॥

जगौ अभिमानिव्यपदेशस्तु विशेषानुगतिभ्यामिति नये । **अर्थान्तरं** अभिमानिदेवतारूपम् ॥ ५७७ ॥

श्रुतिश्चतुर्मुखैक्यं च मन्यते न परात्मनः ।
जीवैक्यं किमु तेनैव मोचिताऽनेकसङ्कटा ॥ ५७८ ॥

मोचितानेकसंकटा इति बहुव्रीहिः श्रुतिरित्यनेन अन्वयः । मत्स्यरूपेण इति शेषः । तदुक्तं भागवते 'प्रलयपयसि धातुः सुप्तशक्तेर्मुखेभ्यः श्रुतिगणमपनीतं प्रत्युपादत्त हत्वा । दितिजमि'ति ॥ ५७८ ॥

हरिश्च स्वगुणान्दिव्यान्न मुञ्चति न तान्दिशेत् ।
तपसाराधितोऽपीषत्कर्तृज्ञातृत्वदो ह्यसौ ॥ ५७९ ॥

हरिरिति 'न कर्तृत्वं न कर्माणि लोकस्य सृजति प्रभुरि'ति गीतोक्तेः। स्वातन्त्र्येणेति शेषः ॥ तपसेति 'एवं पुरा धारणयाऽऽत्मयोनिः नष्टां स्मृतिं प्रत्यवरुह्य तुष्यन्। तथा ससर्जेदमि'ति भागवतोक्तेः ॥ ५७९ ॥

तस्मान्नात्मैक्यमन्येषां केषामपि सदित्सति।
यः पौण्ड्रकवधं चक्रे यश्चेदिपमखण्डयत् ॥ ५८० ॥

न दित्सति इच्छाया अप्यभावे कुतो दानम्। न हि कोऽपि प्रेक्षावान् स्वैश्वर्यं स्वयमेव घातयति। **वधं** 'अथ च दैत्यहतिस्तमसि स्थिरा नियतसंस्थितिरेव नान्यथा' इत्युक्तरूपम् ॥ ५८० ॥

सोहंभावात्किमन्योऽस्ति द्रोहः पौण्ड्रकराक्षसे।
स चेच्छास्त्रस्य तत्त्वार्थः कुतस्तं शिक्षयेत्प्रभुः ॥ ५८१ ॥

सोऽहमिति। वासुदेवोऽहमवतीर्णो जगत्पतिः' इति तेन कृष्णं प्रति दूतमुखेन सन्देशप्रेषणात् ॥ ५८१ ॥

सत्यं प्रियं वचो वाच्यं वाच्यं नासत्यमप्रियम्।
यदच्युतोऽहमित्युच्चैरुच्चरन्पौण्ड्रकश्च्युतः ॥ ५८२ ॥

च्युतः तमसि पातितः ॥ ५८२ ॥

यया भियैकवाक्यस्थं जडैक्यं त्यज्यते त्वया।
तयैव त्यज जीवैक्यं विरम्य व्यापृतिर्न चेत् ॥ ५८३ ॥

भिया अनुभवविरोधात् ॥ ५८३ ॥

धौतवाससि दत्तोऽन्नरसो रजकमन्दिरे।
एकीकर्तुं प्रयत्नेन ताडितोऽपि पुनः पुनः ॥ ५८४ ॥

'न हि भिन्नमभिन्नतां याति' न्यायस्यात्यबाध्यतां लौकिकदृष्टान्तोक्त्या द्रढयति **धौतेति**। तथा स्थानैक्यमेवार्थः ॥ ५८४ ॥

एकीभूत इति प्रोक्तोऽप्येकतामेति किं पटे।
वाक्यं तद्बाधितार्थत्वात्सोपचारं प्रकल्प्यते ॥ ५८५ ॥

ग्रामेऽस्मिन्नेक एव त्वमित्युक्तेश्चापि किं भवान्।
अतोऽन्यस्यान्यवस्तुत्वं वाक्यैर्यत्नशतैरपि।
कर्तुं न शक्यं किं वाचा काचो नीलमणिर्भवेत्॥ ५८६ ॥

विशिष्टैक्यस्य उदाहरणमाह **ग्राम इति**। सादृश्यैक्येऽपि तदाह **काच** इति ॥ ५८६ ॥

भ्रमराद्भ्रमरोऽन्यस्स्याद्दीपाद्दीपान्तरं भवेत्।
तयोरैक्यं न तत्रापि द्वितायास्स्पष्टमीक्षणात्॥ ५८७ ॥

"कीटः पेशस्कृतारुद्धः कुड्ये यान्तमनुस्मरन्। संरंभभययोगेन विन्दते तत्सरूपताम्"इत्यत्रापि समानरूपताप्राप्तिरेवोक्ता न त्वेवैक्यमित्याह **भ्रमरादिति**। ईशसृष्टौ तेजोविनिमयदृष्टान्तोक्तिरपि दीपे दीपान्तरेषु च अभिमानिदेवतैक्यविवक्षयैवेत्याह **दीपादिति**। जडदीपयोरैक्यमपहसनीयमित्याह **द्विताया इति** ॥ ५८७ ॥

अयोऽपि स्वर्णतायोग्यं स्वर्णं स्यान्न तु मृत्तिका।
तत्किं स्वर्णान्तराभिन्नं विक्रियायां क्रयोऽधिकः॥ ५८८ ॥

जीवस्यापि योग्यतावतः सत एव मुक्तौ परमात्मना सादृश्यैक्यं न सर्वस्य। तत्रापि नित्यमुक्तिस्वभावात्परमात्मनोऽत्यन्तभेद एवेत्यत्र दृष्टान्तमाह **अयोऽपीति** ॥ ॥५८८ ॥

क्षीरान्तस्स्थितनीरस्याप्यन्तर्भेदोऽग्निनेक्ष्यते ।
अदनानदनाभ्यां हि यथा जीवेशयोर्हृदि ॥ ५८९ ॥

अग्निना पाकेन। ईक्ष्यते जलस्य नाशः, क्षीरस्य तु घनीभाव इति विरुद्धधर्माभ्यामनुमीयते। यद्वा वसिष्ठादियोगिभिः प्रत्यक्षेणैव ईक्ष्यते। एवं हंसपक्षिणा। अदनानदनाभ्यां = एकः तयोः खादति पिप्पलान्नं अन्यो निरन्नोऽपि बलेन भूयानि'ति स्मृत्युक्तरूपाभ्याम्। अत्रापीक्ष्यत इत्यस्य पूर्ववदर्थद्वयम्। यद्वा आगमेनेश्वरं प्रतियोगिनं जानतः तद्विरुद्धस्वभावमात्मानं प्रत्यक्षीकुर्वतः साक्षिणाऽपि ईक्ष्यते। तदुक्तं 'भुञ्जानं वा गुणान्वितम्। विमूढा नानुपश्यन्ति पश्यन्ति ज्ञानचक्षुष' इति ॥ ५८९ ॥

एवं भिन्नस्वभावानां जीवानां ब्रह्मणीश्वरे ।
अपरिच्छिन्नचिद्रूपे परिच्छिन्नाणुरूपिणाम् ॥ ५९० ॥

अनादितोऽप्यनन्तानामनन्तक्लेशभोगिनाम् ।
ऐक्यं वाक्यशतेनापि वक्तुं शक्यं न कुत्रचित् ॥ ५९१ ॥

वाक्यशतेनेति प्रत्यक्षविरुद्धार्थे वाक्यानां योग्यताऽभावे नाप्रामाण्यापत्तेः। अङ्गीकृता चेयं व्यवस्था मायिनाऽपि तत्त्वमसिवाक्ये प्रत्यक्षाविरोधाय लक्षणामाश्रयता। उक्तं च तेनैव 'प्रत्यक्षेण विरोधोऽयमुभयोरुपलभ्यते' इति। ऐक्यं तयोर्लक्षितयोर्न वाच्ययोरिति च। एवं गीताशाङ्करभाष्ये १८ अध्याये 'न हि अग्निरनुष्णः अग्निर्न प्रकाशते इति ब्रुवच्छ्रुतिशतमपि प्रामाण्यमश्नुते' इति ॥ ५९० ॥ ॥५९१ ॥

मुख्यार्थबाधे वाक्यानामन्योऽर्थः कथ्यते बुधैः ।
यजमानः प्रस्तरः किमग्निर्माणवकोऽपि वा ॥ ५९२ ॥

किं योषिदग्निरादित्यो यूपोऽन्धो मणिमीक्षते ।
मृदब्रवीत्किमु(ग्रा)ग्ला वा प्लवते
किमपाङ्कवाक् ॥ ५९३ ॥

एता सा बाधितार्थानां यथाऽन्योऽर्थो मतस्तव।
तथापि बाधितार्थैक्यवाक्येऽप्यन्योर्थ ईर्यताम्॥ ५९४॥

वाक्यानां वेदे वेदानुसारिणाम्। तदुक्तं तत्त्वोद्योते 'वेदवेदानुसारेषु विरोधेऽन्यार्थकल्पना' इति। **निदर्शयति।** यजमानः यजमानकार्यकारी। **अग्निः** अग्निसदृशः। **योषिदग्निरिति** 'नन्वग्निः प्रमदा नाम घृतकुम्भसमः पुमान्। सुतामपि रहो जह्यात्' इति भागवतोक्तेः योषित् आग्निसदृशीत्यर्थः। **आदित्यः** आदित्यसदृशः। **अन्धः** प्राग्गुरूपदेशात् ज्ञानहीनः **मणिं** प्रधानं परमात्मानम्। **मृत्** तदभिमानिदेवता। इत्येवं अविरुद्धोऽर्थो ज्ञेयः। **अन्यार्थः** सादृश्यैक्यादिरूपः॥ ॥५९२॥५९३॥५९४॥

दृष्टार्थबाधो वाचा स्यात्तस्यास्स्वार्थे दृढे सति।
बाधाभावे दृढोऽर्थस्स्यादित्यन्योन्याश्रयो न चेत्॥ ५९५॥

'न हि प्रत्यक्षसिद्धमन्येन केनापि बाध्यं दृष्टं' इति तत्त्वोद्योतोक्तिं विवृणोति **दृष्टेति।** न च वैपरीत्यं शंक्यम्। प्रत्यक्षस्य स्वभावतः प्रबलत्वात्। 'न हि पञ्चाननः हरिणशावकाभावमपेक्ष्य वनमवगाहते इत्युक्तेः॥ ५९५॥

गङ्गायां घोष इत्युक्तिः किं बाधं बाधते स्वयम्।
बाधेन बाधिता(वा)र्था स्यादन्यार्थेति
विचार्यताम्॥ ५९६॥

नो चेत् 'गङ्गायां घोष' इत्यत्र सर्वसंप्रतिपन्नं लक्षणाश्रयणं न स्यादित्याह **गङ्गायामिति**॥ ५९६॥

यद्यापातप्रतीतोऽर्थो बाधितोऽपि भवेद्गिराम्।
तर्ह्याकाशादिशब्देन ब्रह्ममीमांस्यते कुतः॥ ५९७॥

अन्यथा सर्वाऽपि मीमांसोन्मूलिता स्यादित्याह **यदीति** आकाशाद्यधिकरणस्य चित्राज्याद्यधिकरणस्य च प्रवृत्तिर्न स्यात्॥ ५९७॥

श्रुतबाधितसंत्यागे भाष्यं दुर्भाष्यमेव ते।
श्रुतबाधितसंवादे भाष्यं दुर्भाष्यमेव ते ॥ ५९८ ॥

एकादशभिः श्लोकैः उभयतः पाशारज्जुभिः परं बध्नाति **श्रुतेत्यादिना**। **श्रुतं** आपाततः ऐक्यमिथ्यात्वादिकं तच्च तद् बाधितं च सकलप्रमाणैः। तादृशस्यार्थस्य संत्यागे सर्वसिद्धान्तहान्यापत्त्या भाष्यं दुर्भाष्यमेव। तादृशस्यार्थस्य संवादे स्वीकारे मीमांसाया एव नैरर्थक्येन भाष्यं पुनर्दुर्भाष्यमेव ॥ ५९८ ॥

यदीश्वरोऽसमर्थस्स्यात्कथं सर्वं जगद् भवेत्।
यदीश्वरस्समर्थस्स्यात्कथं सर्वं जगद् भवेत् ॥ ५९९ ॥

कथं तस्मादिति पूरणीयम्। असमर्थस्य स्रष्टृत्वायोगात् अन्यस्य च कर्तुरभावात् तदभावे च कार्यजगदुत्पत्त्यनुपपत्तेः। द्वितीययोजनिकायां समर्थः जगदिति सामानाधिकरण्यम्। निर्विकारस्य समर्थस्य सतः स्वेच्छया जगदात्मना भवनासंभवात्। 'सच्च त्यच्चाभवत्' इति तु अन्तर्यामिबहुरूपभवनार्थकमेवेति हृदयम् ॥ ५९९ ॥

यदीश्वरो महेशस्स्यादनीशत्वं कथं भजेत्।
यदीश्वरोऽप्यनीशस्स्यादनीशत्वं कथं भजेः ॥ ६०० ॥

अनीशत्वं नीचजीवैक्यम्। **कथं भजेरिति**। अनीशभजनेन प्रयोजनाभावात् ॥ ६०० ॥

यदि सत्या हरेर्धर्माः कथमैक्यं न बाधितम्।
यद्यसत्यहरेर्धर्माः कथमैक्यं न बाधितम् ॥ ६०१ ॥

सत्या इति। सत्यविरुद्धधर्माधिकरणयोरैक्यायोगात्। **असत्या इति** ऐक्यस्यापि धर्मत्वाविशेषेण बाधावश्यंभावात् ॥ ६०१ ॥

अभेदान्नैक्यबाधश्चेत्कथं धर्मस्य बाधनम्।
अभिन्नधर्मबाधश्चेत्कथं धर्मस्य बाधनम् ॥ ६०२ ॥

ऐक्यवदेव धर्मत्वाविशेषात् सार्वज्ञादीनां बाधाभावः तत एव ब्रह्मस्वरूपत्वं चाङ्गीकर्तव्यम्। अन्यथा अद्वैतहान्यापत्तेः। ऐक्यस्य ब्रह्मस्वरूपत्वं च 'एकधाऽनुद्रष्टव्यमि'ति श्रुत्यर्थतया परेणोररीकृतम्। **एवमपि** ऐक्यवदेव ब्रह्माभिन्नत्वेऽपि सार्वज्ञादिधर्माणां बाधाङ्गीकारेऽतिप्रसङ्गमाह **अभिन्नेति। धर्मस्य** एवेत्युपस्कर्तव्यम्। किन्तु धर्मिणो ब्रह्मणोऽपि बाधः स्यात् इत्याशयः ॥ ६०२ ॥

अभेदान्न गुणाश्चेत्स्युः कथमैक्यं भवेत्तव।
अभेदेऽपि गुणाश्चेत्स्युः कथमैक्यं भवेत्तव ॥ ६०३ ॥

जीवब्रह्मैक्यवदेव स्वरूपयोः सापेक्षत्वनिरपेक्षत्वे क्वचित्प्रतीतत्वाप्रतीतत्वे अस्येदमिति संबन्धितयाऽवभासोऽपर्यायशब्दवाच्यत्वं इत्यादिवैचित्र्यं द्रष्टव्यं' इति वादावल्युक्तं समाधिमभिधास्यन्नाक्षिपति **अभेदादिति। गुणाश्चेन्न स्युरिति।** 'ब्रह्मण आनन्द' इत्यादिधर्मधर्मिभावसंबन्धावभासापर्यायशब्दवाच्यत्वादयो न स्युरिति भावः। परिहरति **कथमिति।** ब्रह्मण ऐक्यमिति संबन्धावभासादीनां ऐक्येऽपि सत्त्वात्तत्रापि त्वदुक्तानुपपत्तयः प्रसरन्त्येवेति भावः। कस्तर्हि परिहार इत्यतः मन्मते विशेषाङ्गीकारेण स सुलभ इत्याह **अभेदेपि।** मन्मत इति शेषः। त्वन्मते तु उक्तानुपपत्तयो वज्रलेपायिता इत्याह **तवेति।** निर्विशेषवादिन इत्याशयः ॥ ६०३ ॥

श्रुत्युक्तं यदि तत्त्वं स्यादद्वैतस्य न तत्त्वता।
श्रुत्युक्तं यद्यतत्त्वं स्यादद्वैतस्य न तत्त्वता ॥ ६०४ ॥

किञ्च श्रुत्युक्तं तत्त्वं न वा। आद्ये आह **अद्वैतस्येति।** द्वा सुपर्णेत्यादि निरवकाशसुबहुश्रुतिबाधितत्वादिति भावः। द्वितीय आह **अद्वैतेति।** प्रमाणविषयो हि तत्त्वम्। औपनिषदस्य ब्रह्मणस्तदैक्यस्य च प्रमाणान्तरेण न तावत्सिद्धिः संभाविनी। अतः श्रुत्यैव तत्सिद्धिरेष्टव्या। तदुक्तमपि चेदतत्त्वं इति उच्येत तर्हि निष्प्रमाणकत्वादद्वैतस्य अतत्त्वतैवेति भावः ॥ ६०४ ॥

यदि ज्ञानं हरेस्सत्स्यान्न ज्ञाता ज्ञानवानसौ ।
यदि ज्ञानं हरेर्न स्यान्न ज्ञाता ज्ञानवानसौ ॥ ६०५ ॥

परमतेऽज्ञानासंभवमाह **यदीति** । समानाश्रयविषयकयोर्ज्ञानाज्ञानयोर्विरोधात् ब्रह्मणश्च सर्वज्ञत्वात् सर्वस्यापि तेन ज्ञातत्वेन कुत्रापि विषये तस्याज्ञानं न घटते इति भावः । तदुक्तं 'अज्ञताऽखिलसंवेत्तुर्घटते न कुतश्चने'ति । अथैतद्दोषपरिजिहीर्षया ब्रह्मणो ज्ञानं नाङ्गीक्रियते तर्हि तस्यासाधकत्वापत्त्या अज्ञानसिद्धिः न स्यात् । तन्मते साक्षिणो ब्रह्मण एव अज्ञानसाधकत्वात् । तथा हि तद्वचनं 'आश्रयत्वविषयत्व भागिनी निर्विशेषचितिरेव केवला' इत्यादि । ज्ञानं ज्ञानविषयः अज्ञानं तद्वान् नेत्यर्थः ॥ ६०५ ॥

यदि ज्ञानेऽपि चाज्ञानं न संसारो हरेरयम् ।
यदि ज्ञानेन चाज्ञानं न संसारो हरेरयम् ॥ ६०६ ॥

अथ सर्वज्ञस्याप्यज्ञानं सर्वज्ञत्वाविरोध्येव किञ्चिदङ्गीक्रियते चेत् काममङ्गीक्रियतां तथा सति तस्य पारिभाषिकत्वापत्त्या हरेः संसारानापादकत्वादित्याह **यदीति। अयं** वास्तवाज्ञानकार्यो दुःखाद्यनुभवरूपः । अज्ञानस्य ज्ञानविरोधित्वपक्षे आह **यदीति।** सर्वज्ञे हरौ तथाविधस्य संसारकारणस्याज्ञानस्यासंभवादेव न संसार इति भावः ॥ ६०६ ॥

यदीश्वरो जगद्व्यापी कथमैक्यं न बाधितम् ।
यदीश्वरो न तद्व्यापी कथमैक्यं न बाधितम् ॥ ६०७ ॥

आद्ययोजनिकायां ऐक्यमित्यनन्तरं अणुभिः जीवैरित्युपस्कर्तव्यम् । विरुद्धधर्माधिकरणत्वेन भेदस्यैव प्रमितत्वादैक्यं बाधितमेवेति भावः । द्वितीययोजनिकायां, न जगद्व्यापी किन्तु वैकुण्ठैकदेशभाग एव स्थितो यदीत्यर्थः । ऐक्यमित्यनन्तरं भिन्नदेशस्थितैर्जीवैरिति शेषः । न च वैकुण्ठ एव स्थितैर्मुक्तैस्तर्हि ऐक्यमस्त्विति वाच्यम् । तत्रापि भुवनैकपतेर्भवनस्य भिन्नभागदेश एव सत्त्वादिति भावः ॥ ६०७ ॥

ऋजुमार्गे गतोऽप्यन्धो घट्टकुट्यां निषीदति ।
वक्रमार्गे गतोऽप्यन्धो घट्टकुट्यां निषीदति ॥ ६०८ ॥

गतेऽपि पृष्ठतोगत्वा कपोले ताडयेद्बली ।
आगतस्यापि मन्दस्य कपोले ताडयेद्बली ।
पक्षद्वयेऽप्येकदोषप्रसञ्जनमपीदृषम् ॥ ६०९ ॥

मायाया अनुपपत्तिरलङ्कार इति स्वीकृत्य स्वमतस्य दुष्टतां स्वयमेव ब्रुवाणस्य मायिनः सर्वत्राप्येवं उभयतः पाशारज्जवो दुष्परिहरा इत्येतल्लौकिकदृष्टान्तोक्तिपुरस्सरमाह **ऋज्विति** ॥ ६०८ ॥ ६०९ ॥

अल्पोल्पवित्तेऽप्यात्मानं वित्तेशं किं न मन्यते ।
सर्वज्ञब्रह्मताल्पज्ञेष्वप्येवं हि कुवादिनाम् ॥ ६१० ॥

गीतोक्ताया आसुर्याः संपदो मायी प्रथमं निदर्शनमित्याह **अल्प इति** । **वित्तेशं** 'आढ्योऽभिजनवानस्मि कोऽन्योस्ति सदृशो मये'त्युक्तप्रकारेणेति भावः ॥ **ब्रह्मतेति** । 'ईश्वरोऽहं' इत्युक्तदिशेति भावः ॥ ६१० ॥

अहंकारो हि लोकानां विकारो दुस्त्यजो महान् ।
अधमादधमो जीवो ह्यधिकादधिकः किल ॥ ६११ ॥

अहङ्कार इति 'अविद्यमानात्मगुणाभिमानं मोहादहङ्कारमुशंति सन्तः' इत्युक्तलक्षणः ॥ किलेत्यनेन मायावादिनैव जीवस्याधमादधमत्वं ब्रह्मणश्चाधिकादधिकत्वं कण्ठोक्त्यैव अङ्गीकारप्रसिद्धिं द्योतयति । तदुक्तं मायिभाष्यकारेण 'कथमेकत्वमनयोर्घटते विपरीतयोः' इति खद्योतभान्वोरिव राजभृत्ययोः कूपाम्बुराश्योः परमाणुमेर्वोरि'ति च ॥ ६११ ॥

सत्सु स्वदारेषु खलः परदारानपेक्षते ।

तमोजुषामिति। तदुक्तं भाग.ए.तात्पर्ये 'तत्पराणां पातकानां फलमन्धन्तमः स्मृतम्। अधोऽधो दुःखमतुलं विष्णुदाराभिमर्शिनामि'ति ॥ ६१२ ॥

देवे गुरौ च यस्याहंभावो देवद्विडेवसः।
रमोमाकान्ततोत्कण्ठा दशकण्ठस्य केवलम् ॥ ६१३ ॥

देवद्विडेवसः इति। जीवाभेदस्य नवद्वेषेषु परिगणितत्वादिति भावः। श्रीलक्ष्मीपतित्वं विष्णोः स्वरूपलक्षणम्। तस्य आत्मन्यनुसन्धानं तदैक्य-चिन्तनमेव। एवं उमाकान्तेत्यत्रापि ॥ ६१३ ॥

अनित्यदेहगेहादौ नित्यताविभ्रमो नृणाम्।
दुःखिनः स्वस्य निर्दुःखब्रह्मभावभ्रमोपमः ॥ ६१४ ॥

ननु देहः अनित्यः 'नाहं निर्दुःखः' इति विशेषदर्शनसद्भावेऽपि कथं भ्रमस्यानुवृत्तिरिति चेन्न। सोपाधिकोऽयं भ्रमः। उपाधिश्च ईश्वरस्य इच्छाविशेषाभावः। तदुक्तं 'मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते' इति। 'येषां स एव भगवान् दययेदनन्तः सर्वात्मनाऽऽश्रितपादो यदि निर्व्यलीकम्। ते वै विदन्त्यतितरन्ति च देवमायामि'ति च। तदाह **अनित्येति** ॥ ६१४ ॥

बिभेति कुमतिस्सद्यश्शास्तुर्न समयान्तरे।
राजाऽहमिति न ब्रूते ब्रूते देवोऽहमित्यहो ॥ ६१५ ॥

राजेति। राजा हि सद्यः शासकः। तदुक्तं भगवत्पादैः 'घातयन्ति हि राजानो राजाऽहमिति ब्रुवन्तमि'ति। देवस्तु अनादियोग्यताकालकर्मादिकमखिलमपेक्ष्यैव तदुक्तं 'फलप्रदो वासुदेवोऽखिलस्ये'ति ॥ ६१५ ॥

दुष्टोऽहं कुरुते तुष्टः क्लिष्टः क्लेशहरं भजेत्।
शिवेहं भावधीर्भोगे रोगे मृत्युञ्जयार्चकः ॥ ६१६ ॥

शिव इति। तथा हि मायिभाष्यकारोक्तिः 'हरिरहमस्मि हरोऽहं विधिरहमेवास्मि कारणं तेषामि'ति। तस्यैव भगन्दररोगपीडितत्वदशायां मृत्युञ्जयार्चकत्वं प्रसिद्धम् ॥ ६१६ ॥

वाचान्यज्जल्पति स्वल्पः कर्मणान्यत्करोति च।
योऽच्युतोऽहमिति ब्रूते स्नातुं गङ्गां स गच्छति ॥ ६१७ ॥

अच्युतोऽहमिति। भागत्यागलक्षणयेति भावः। विष्णुः निरवयवः पादरहितः। उदकादिकं विश्वं मिथ्यैव इति साधयतः पुनर्विष्णुपादोदके स्नानं नाटयतः कथं न वञ्चकाग्रणीत्वमिति भावः ॥ ६१७ ॥

काणस्य चक्षुरेकत्र साम्येऽप्यन्यत्र नापतेत्।
यज्वप्रस्तरतोक्त्यध्वा दृष्टो नात्मैक्यवाक्पथः ॥ ६१८ ॥

काणस्येति। व्यतिरेकनिदर्शनमिदम्। काणस्य एकस्यापि वा चक्षुषः साम्यमस्ति। मायिनस्तु एकस्मिन्नेव मीमांसामार्गेऽपि दृष्टिवैषम्यमेवेत्याह **यजमानेति।** विरुद्धधर्माधिकरणत्वसाम्येऽपि एकत्र सादृश्यैक्यं व्याचक्षाणोऽपरत्र तत्त्वमसीत्यादौ तदेवापलपति। अतस्तामसबुद्धिरयमिति हृदयम्। तदुक्तं 'सर्वार्थान्विपरीतांश्च बुद्धिः सा पार्थ तामसी' इति ॥ ६१८ ॥

सतीरतिक्रम्य कामी पतिः स्यादसतीरतिः।
यथैक्यश्रुतिमादत्ते भेदाद्यर्थश्रुतीस्त्यजन् ॥ ६१९ ॥

सतीः निरवकाशभेदश्रुतीः। **अतिक्रम्य** अतत्त्वावेदकत्वोक्त्या अपलप्य। **असतीः** आपाततः ऐक्यपरतया प्रतीयमानाः। **आदत्ते** स्वानुकूलबुद्ध्या स्वीकरोति। वस्तुतस्तु ता अपि भेदपरत्वेन तत्प्रतिकूला एव। कामीत्यनेनेदं ध्वनयति। यथा भीमः मुखतः स्त्रीवेषदर्शनेन काममोहितं विनिहत्य सत्या द्रौपद्या मानमरक्षत् तथा श्रीमदाचार्यः जीवैक्यकामिनो मायिनो निराकृत्य सर्वासां श्रुतीनां तत्त्वावेदकतां समर्थ्य मानरक्षणमकरोदिति ॥ ६१९ ॥

शब्दसाम्येऽपि नार्थैक्यं यत्र चित्रचरित्रता ।.
वृत्त्यंशवद्धि जीवोंशो मत्स्याद्यंशास्तु मूलवत् ॥ ६२० ॥

अंश इति शब्दव्यवहारसाम्येऽपि स्वभाववैचित्र्यानुसारेण क्वचिदंशाना-मत्यन्ताभेदः कुत्रचिद्भेदाभेदौ क्वचिच्च अत्यन्ताभेद इति प्रमेयं समर्थयितुं तदुपयुक्तं सामान्यन्यायं तावद्व्युत्पादयति **शब्देति** ॥ हरिशब्दसाम्येऽपि विष्णोः भेकेन यथा न ऐक्यं तथेति भावः । उक्तन्यायं प्रकृतेऽतिदिशति **वृत्तीति** । अनेन जीवः, ईशेन स्वरूपैक्यवान् तदंश इति व्यवहारविषयत्वात् मत्स्यादिवत्' इति पराभिमतमनुमानं दूषितं भवति । अयमाशयः । राज्ञो वृत्त्यंशो भृत्येऽस्तीति व्यवहारस्तावदस्ति । न तावता राजभृत्ययोरैक्यप्रत्याशा । भृत्यांशस्य राजांशभिन्नत्वतदधीनत्वमात्रेण अंशव्यवहारोपपत्तेः । तथा चानुमानस्य भृत्यवृत्त्यंशे व्यभिचार इति ॥ तथा च हेतावंशपदेन स्वरूपांशविवक्षायामसिद्धिः । भिन्नांशविवक्षायां दृष्टान्तस्य साधनविकलता ॥ ६२० ॥

स्वरूपांशोऽस्ति भिन्नांशोऽप्यस्ति शब्दविशेषणात् ।
एतेऽखिल स्वांशकला जीवाः सर्वे कलाः किल ॥ ६२१ ॥

स्वरूपांशो भिन्नांश इति विभागे भागवतं प्रमाणयति **एते इति** । तत्र 'सप्रजापतय' इति ब्रह्मादीनां कलात्वरूपभिन्नांशत्वमभिधाय 'एते स्वांशकलाः पुंसः कृष्णस्तु भगवान्स्वयमि'ति मत्स्यादीनामेव कृष्णाख्यमूलरूपस्य स्वरूपांश-त्वोक्तेः ॥ ६२१ ॥

अल्पेऽपि महतस्स्वांशो नाल्पस्सर्वत्र सद्गुणैः ।
लेशोऽपि यद्धृषीकेशकेशो लोकेशशासनः ॥ ६२२ ॥

ईशे रामानुजाद्यभिमतं स्वगतभेदं प्रत्याह **अल्प इति** । अवयवोऽपीत्यर्थः । **सर्वत्र** स्वगतावयवादिषु । नाल्पः स्यात् न अपूर्णः स्यात् । 'पूर्णमदः पूर्णमिदं' 'नेह नानास्ति किंचन' इत्यादि श्रुतेः । **लेशोऽपि** अवयवोऽपि । **केशः** कृष्णकेशो

यादवकृष्णः। 'उद्बबर्हात्मनः केशमि'त्याद्युक्तेः। **लोकेशशासनः** मूलरूपवदेव पूर्णशक्तिः ॥ ६२२ ॥

भिन्नांशे तु तदीयत्वं भिन्नाभिन्नेऽर्धसाम्यता।
अभिन्ने सर्वसाम्यं स्याद्यथा मत्स्यादिषु प्रभोः ॥ ६२३ ॥

जीवास्तु ब्रह्मभिन्नांशास्सार्वज्ञादेरभावतः।
मत्स्यादयस्स्वरूपांशास्सार्वज्ञादेः प्रभावतः ॥ ६२४ ॥

तदीयत्वं तदधीनत्वे सति तत्सदृशत्वं सूर्यकादिवत्। तथा हि सूत्रे 'अत एव चोपमा सूर्यकादिवत्' इति। 'पादोऽस्य सर्वा भूतानि' इत्यत्रापि पादशब्दो भिन्नांशपर एव। परमात्मनि प्रपञ्चे च सुविरुद्धधर्माणां प्रमितत्वात्। तथोक्तं श्रीभगवत्पादैः भाग इत्येकदेशपरिमितं चतुर्भागबल इतिवद् भिन्नं चेति। अर्धसाम्यता अनुपदं विव्रियते भिन्नाभिन्ना इत्यादिना। **सर्वसाम्यं** सार्वज्ञादिगुणैर्निर्दोषत्वेन च। तदुक्तं 'निर्दोषं हि समं ब्रह्म' इति ॥ ६२३ ॥ ६२४ ॥

भिन्नाऽभिन्नाः पटाद्यंशास्ते जडेष्वेव नाजडे।
एकसत्त्वेऽन्यनाशस्य तद्धेतोस्सदसत्त्वतः ॥ ६२५ ॥

तन्तुः पटेनार्धसमो भेदाभेदस्ततस्तयोः।
अतस्त्रैविध्यमंशेषु दुर्वारमिति मे मतिः ॥ ६२६ ॥

व्यतिषङ्गविशेषविशिष्टानां तन्तूनां पटस्य चाभेदस्तावत् प्रत्यक्षेणैव सिद्धः 'तन्तुभ्योऽन्यः पटः साक्षात् कस्य दृष्टिपथं गत' इत्युक्तेः। भेदे हेतुमाह **एकसत्त्वेऽप्यनाशस्येति**। एकतन्तुनाशेऽपि पटस्यांशिनोऽनाशात्। **सदसत्वतः** जडेषु सत्त्वात्, अजडे असत्त्वात् इति क्रमेण संबन्धः ॥ ६२५ ॥ ६२६ ॥

न चेद्वैचित्र्यमेतेषु निर्निमित्तमिदं भवेत्।
मत्तोऽप्यकारणं कार्यं न वदेत्किमु शास्त्रकृत् ॥ ६२७ ॥

न चेत् भेदः अभेदः भेदाभेदौ एतत् त्रितयं न चेत् । इदं तदीयत्वं, सर्वसाम्यं, अर्धसाम्यता च । मत्तोऽपीति तेनापि तृप्त्यर्थं भोजनस्य करणादिति भावः ॥ ॥६२७ ॥

अदः पूर्णमिदं पूर्णं पूर्णात्पूर्णमुदच्यते ।
(विष्णूः) इत्युद्रिक्तांशता रामस्योक्ता सा का
विचार्यताम् ॥ ६२८ ॥

उद्रिक्तत्वं स्वरूपत्वमनुद्रेकस्ततोऽपरः ।
अतोंशयोर्द्वितैवोक्ता स्पष्टं नामसहस्रके ॥ ६२९ ॥

विष्णोः उद्रिक्तांशता अभिन्नांशता रामस्य वासुदेवनामसाहस्रके उक्ता । एवं 'पूर्णमदः पूर्णमिदं' इति श्रुत्या च उक्ता ॥ ६२८ ॥ ६२९ ॥

बलज्ञानसुखाद्यैश्च मत्स्याद्यंशा हरेस्समाः ।
जीवांशास्त्वतथाभूताः कथं नांशे द्विरूपता ॥ ६३० ॥

अतथाभूताः तदुक्तं तत्वोद्योते 'नित्यातादृशचिच्चेत्ययन्ते'ति ॥ ६३० ॥ ॥६३१ ॥

बलज्ञानसुखोद्रेकादुद्रिक्तांशास्तु ते हरेः ।
स्वल्पज्ञानबलो जीवस्त्वनुद्रिक्तांश उच्यते ॥ ६३१ ॥

अतोऽतिभिन्न एवायं जीवाख्यांशो भवेद्ध्रुवम् ।
विरुद्धधर्माक्रान्तत्वे भेदं को न वदेद्बुधः ॥ ६३२ ॥

अतिभिन्न एवेति तदुक्तं म.भा.ता.निर्णये 'अर्थाच्छ्रुतेश्च गुणतो निजरूपतश्च नित्यान्य एव कथमस्मि स इत्यपि स्यादि'ति ॥ ६३२ ॥

ममांशस्यैव जीवस्येत्युक्त्वा भागवते हरिः।
सखायौ सयुजौ चेति स्पष्टमाह पुनर्भिदाम्।
तस्माद्भिन्नांशवादोऽयं कस्य मोदाय नेष्यते ॥ ६३३ ॥

शुद्धिसौरभे सविस्तरं व्याख्यातं 'एकस्यैव ममांशस्य जीवस्यैवं महामते। बन्धोऽस्या विद्ययाऽनादिर्विद्यया च तथेतरः' इति भागवतपद्यं उक्तार्थे संवादयति **ममेति** ॥ ६३३ ॥

न चेदंशं कथं नानाव्यपदेशात्स सूत्रकृत्।
असूत्रयदिमं जीवं तत्संबन्धात्तदंशता।
(सर्वस्य जीवजातस्य) सर्वेजीवा यतस्तस्य
यत्पुत्रोऽप्यंश उच्यते ॥ ६३४ ॥

मत्स्याद्यास्तु स्वरूपांशा बलज्ञानसुखादिभिः।
यन्मूलरूपसदृशास्सर्वे सर्वत्र सर्वदा ॥ ६३५ ॥

यद्यन्येऽपि स्वरूपांशाः किं न स्युर्मत्स्यकूर्मवत्।
बलज्ञानसुखाद्यैश्च सदा विष्णूपमास्तदा ॥ ६३६ ॥

उक्तमर्थं विपक्षे सूत्रविरोधोक्त्या संस्थापयति **न चेदिति**। जीवः अंशः विभिन्नांशः नानाव्यपदेशात् यथोक्तं भाष्ये 'पुत्रभ्रातृसखित्वेन स्वामित्वेन यतो हरिः। बहुधा गीयते वेदैर्जीवोंशास्तस्य' इति। स्वांशश्चाथो विभिन्नांश इति द्वेधांश इष्यते। अंशिनो यत्तु सामर्थ्यं यः स्वरूपं यथा स्थितिः। तदेव नाणुमात्रोऽपि भेदः स्वांशांशिनोः क्वचित्। विभिन्नांशोऽल्पशक्तिः स्यात् किञ्चित्सादृश्यमात्रयुक्। इति च॥ विभिन्नांशस्यापि यो यत्र क्वचिदभेदव्यपदेशः स सूत्रकृतैव तद्गुणसारत्वादिति सादृश्याद्यभेदसंश्रयादिति व्याख्यातः॥ ६३४ ॥ ६३५ ॥ ॥६३६ ॥

निर्विशेषं हि ते ब्रह्म कुतोंशेषु विचित्रता ॥ ६३७ ॥

स्वरूपांशानां मिथो वैचित्र्याङ्गीकारे परस्यापसिद्धान्तपराहतिश्चेत्याह **निर्विशेषेति** ॥ ६३७ ॥

अंशवैचित्र्यतस्सिद्धा भिदैकत्रा भिदापरे ।
न हीन्द्रस्य स्वरूपांशा वालिपार्थादयो समाः ॥ ६३८ ॥

अतो विष्णुसमज्ञानबलादीनामभावतः ।
न जीवस्तत्स्वरूपांशो यथा जडमिदं जगत् ॥ ६३९ ॥

जीवाः न स्वरूपांशाः बलादिना असमत्वादित्यत्र व्यतिरेकदृष्टान्तमाह **इन्द्रस्येति** ॥ ६३८ ॥ ६३९ ॥

अत्यन्ताभेदवादाख्यः शास्त्रस्यांशो गतस्तव॥ ६४० ॥

शास्त्रस्य अंशः जीवो ब्रह्मैव नापरः इत्येवंरूपः । **गतः** दूषितः ॥ ६४० ॥

यदि मोक्षे भिदा नास्ति गता तेंऽशांशिता तयोः ।
यदि मोक्षे भिदाप्यस्ति भेदो भूत्परमार्थसन्॥ ६४१ ॥

तदधीनत्वरूपांशत्वस्य जीवेषु मोक्षेऽप्यनुवर्तनात् भेदस्य पारमार्थिकत्वमपि सिद्धमित्याह **यदीति** । तदुक्तमनुव्याख्याने 'तदधीनत्वमेतेषां नैव हीयते । मुक्तावपि स एवैकः स्वतन्त्रः पूर्णसद्गुणः' इति ॥ ६४१ ॥

भेदाभेदाविनाभूता सर्वत्रांशांशिता तव ।
निर्विशेषब्रह्मवादे यत्सा तत्सहचारिणी ॥ ६४२ ॥

वियुक्ततन्तुवद्देहैर्वियुक्तानां पुनर्भवे ।
अंशांशित्वे योग्यता ते तद्व्यक्तिस्त्वपुनर्भवे ॥ ६४३ ॥

अतस्त्वद्गेहकलहादभूदत्यन्तसङ्कटम् ।
जाया वा कुपिता गच्छेत्त्वं वा प्रव्रजितो भवेः ॥ ६४४ ॥

तदेवं जीवेश्वरयोः स्वाभाविकाभेदं औपाधिकभेदमङ्गीकुर्वाणस्य भास्करस्य अंशांशिताऽभ्युपगमो व्याहत इत्याह **भेदाभेदेति**। औपाधिकभेदस्वाभाविकाभेदेत्यर्थः। तन्तूनां प्राग्वियुक्तानां पटभावापत्तावपि नांशांशिता अपगच्छति किन्तु अभिव्यज्यत एव। एवं उपाध्यपगमेऽपि मुक्तावनुवर्तमानांशांशिता भेदेन वा विशेषेण वा निर्वाह्या। निर्विशेषत्ववादिनो विशेषो नेष्टः। अतः मुक्तौ अत्यन्ताभेदाभ्युपगमे तव जायेव दयिता अंशांशिता व्याकुप्यति। तां चेत्सन्धित्ससि, त्वं अत्यन्ताभेदाख्यात् त्वद्गृहायितसिद्धान्तात्प्रव्रजितो भवेः। इत्येवं उभयथाऽपि अत्यन्तसङ्कटमिति भावः ॥ ६४२ ॥ ६४३ ॥ ६४४ ॥

तस्मादंशांशिभावेन जीवाभेदप्रसाधनम्।
अप्रसाधनमेवेत्थं कुर्याद्धेतुरयं मम ॥ ६४५ ॥

जीवोऽभिन्नः अंशत्वादिति त्वदुक्तं अनुमानम्। जीवो भिन्नः तदधीनत्वरूपतदंशत्वात् इति मदनुमानं त्वदनुमानस्य विरोधव्युत्पादनेन **अप्रसाधनं कुर्यात्** अलंकारविरुद्धदूषणग्रस्तं बाधितं कुर्यादित्यर्थः ॥ ६४५ ॥

बहुजीवमते जीवा देहे देहे पृथक्पृथक्।
योनिभेदात्कर्मभेदाद्गतिभेदाच्च संसृतौ ॥ ६४६ ॥

आमोक्षं तद्विभागस्य न व्यत्यासोऽस्ति ते मते।
अतो मिथस्तदैक्यस्य नाधुनावसरस्तव ॥ ६४७ ॥

बहुजीववादिनः, 'विमतानि शरीराणि देवदत्तस्यैव भोगायतनानि शरीरत्वात् संप्रतिपन्नवत्' इति युक्तिमुपन्यस्य जीवानां परस्परं अभेदं सिषाधयिषन्ति। न च तच्छक्यम्। तथा हि। संसारदशायां किं अभेदः साध्यते उत मोक्षे। नाद्य इत्याह **देह इति**। तदुक्तं वादावल्यां 'प्रत्यक्षबाधितं, परस्परसुखदुःखाद्यनुसन्धानप्रसङ्गपराहतं, विमतानि कलत्राणि देवदत्तस्यैव भोगायतनानि कलत्रत्वात् संप्रतिपन्नवत् इत्याभाससमानयोगक्षेमतयाऽपहास्यं चे'ति ॥ ६४६ ॥ ६४७ ॥

मुक्तौ तु ब्रह्मणैक्यं स्यान्मिथस्त्वैक्यं कदा वद।
अंशेनैक्येऽपि तन्तूनामंशानामेकताऽस्ति किम् ॥ ६४८ ॥

नापि मुक्तावित्याह **मुक्ताविति**। तत्रापि अनपगतजीवभावानां, तन्तूनां पटेनेव, अंशिनैक्यमभिमतं उत जीवभावापगमेन। नाद्यः दृष्टान्ते तथाभावादर्शनादित्याह **तन्तूनामिति** ॥ ६४८ ॥

ब्रह्मैक्ये जीवभावस्यैवाभावात्किं मिथोऽभिदा ॥ ६४९ ॥

द्वितीये आह **जीवेति** ॥ ६४९ ॥

तत्र तत्र हि ते तेंऽशास्वस्वाज्ञानक्षये सति।
ब्रह्मत्वं यान्ति सर्वेऽपि न त्वंशान्तरभूमिषु ॥ ६५० ॥

अतोंऽशानां समस्तानां मिथस्त्वैक्यं कदा वद।
विचार्यमाणे यन्नासीन्न भवे नापुनर्भवे ॥ ६५१ ॥

ननु मिथो मुक्तौ जीवैक्यं नाम व्यावहारिकस्य अज्ञानकार्यस्य जीवभावस्य निराकरणेन ब्रह्मत्वप्राप्तिरेवेति चेत् कोऽयं जीवभावो यो मुक्तौ निराक्रियते। स किं प्रत्यक्षाद्याकलितोऽन्यो वा। आद्ये कथमङ्गीकृतस्य निराकरणम्। अन्यश्चेन्निषिध्यतां न नो हानिः। अस्तु वा कथंचित्कतिपयजीवानां मुक्तानां त्वदुक्तरीत्या परस्परैक्यम्। तथाऽपि संसारिणां बहूनां सर्वदा विद्यमानत्वेन न समस्तानां जीवानां त्वदभिमतपरस्परैक्यसिद्धिप्रत्याशेत्याह **समस्तानामिति** ॥ ६५० ॥ ६५१ ॥

अन्योन्यं सुखदुःखादेर्भोक्तृत्वं योगिनोंशवत्।
हस्तपादाद्यंशवच्च वाक्यं नोचेद्वृथैव तत् ॥ ६५२ ॥

किं च स्वरूपैक्ये अन्योन्यसुखदुःखाद्यनुसन्धानमवर्जनीयम्। उपाधिकृतभेदाभावस्याप्रयोजकत्वात्। योगिनः अंशेषु हस्तपादाद्यवच्छिन्नांशेषु च तथाभावदर्शनात्। न च अनुसन्धानं जीवेष्वस्ति। तदाभावे च तव स्वरूपैक्यकथाप्रलापमात्रमित्याह **अन्योन्यमिति** ॥ ६५२ ॥

यद्यन्योन्यमभिन्नांशै जीवास्सर्वेऽपि सर्वदा।
तर्हि स्याज्जातिभेदस्यैवाभावात्सर्वसङ्करः ॥ ६५३ ॥

सर्वसाङ्कर्यं चैवं स्यादित्याह **यदीति** ॥ ६५३ ॥

स्नुषा च भार्या भार्या च माता गौश्च शुनीबुधः।
मत्त एवेति तच्छास्त्रं स्यादुन्मत्तस्य जल्पितम्॥ ६५४ ॥

उपपादयति त्रिभिः **स्नुषेत्यादिना** ॥ ६५४ ॥ ६५५ ॥ ६५६ ॥

गम्यागम्यविभागश्च स्वरूपैक्ये कथं वद ॥ ६५५ ॥

शास्याशास्यविभागश्च वध्यघातकता तथा।
स्पृश्यास्पृश्यविभागादिसर्वैक्येनैव शोभते ॥ ६५६ ॥

देहान्तःकरणादीनां भेदाभेदो यदीष्यते।
सुप्तौ सर्वलयात्तर्हि प्रबुद्धोऽन्यो भवेत्तव ॥ ६५७ ॥

अतः पूर्वानुसन्धानं तस्य न स्याद्धि किञ्चन।
स्याच्चेत्सर्वत्र सर्वस्याप्यनुसन्धानमापतेत् ॥ ६५८ ॥

देहाद्युपाधिभेदाश्रयणेऽपि न साङ्कर्यनिस्तारः। सुप्तौ तल्लयेन सुप्तोत्थितानां पूर्वतनभर्तृभार्याभावापगमात्। अविद्याया लयाभावेऽपि तस्या अनुसन्धानाप्रयोजकत्वेन प्रबुद्धानां पूर्वतनानुसन्धानं दुर्घटमेव। अतः अनुसन्धानघटनाय स्वरूपैक्यमेव तत्प्रयोजकमुररीकरणीयम्। एवं च आगतः स एव दुरात्मा सर्वसाङ्कर्यापत्तिदोष इत्याह **स्यादिति** ॥ ६५७ ॥ ६५८ ॥

पूर्वजन्मनि चण्डालोऽप्यन्यस्मिन्विप्रतामियात्।
अतो जातिविभेदोऽपि स्वरूपैक्येन भेदकृत्॥ ६५९ ॥

देहमात्रविभेदोऽयमकिञ्चित्कर एव हि।
देहभेदस्य वैफल्ये कर्मभेदेन किं फलम्।
देहो हि कर्मणां मूलं छिन्नमूलतरुर्ह्ययम् ॥ ६६० ॥

देहेति। हीत्यनेन सौभर्यादियोगिषु तथाभावस्य अनुभवसिद्धिमाह। **देहभेदस्य** = देहरूपोपाधिकृतजीवभेदस्य। **वैफल्ये** = अन्योन्यसुखाद्यनुसाङ्कर्यपरिहारासामर्थ्ये। उपाधेर्भेदकारकत्वस्यैवाभावेन औपाधिकभेदस्याप्रामाणिकत्वादेव सामर्थ्यविधुरत्वादेवेति भावः। छिन्नेत्यापाततः अप्रामाणिकेत्यर्थः ॥ ६६० ॥

शिष्यपापं गुरोश्च स्यात्तत्पुण्यं च गुरोर्भवेत्।
अपि संबन्धमात्रेण स्वरूपैक्ये कथं न तत् ॥ ६६१ ॥

शिष्येति इदं पुनरत्र वैषम्यम्। न शिष्यपुण्यपापे एव गुरोः। किन्तु तद्भिन्ने एव यथाशास्त्रम्। तथा हि सूत्रं ॐ स्वामिनः फलश्रुतेरित्यात्रेयः इति स्वरूपैक्ये तु ते एव इति ॥ ६६१ ॥

स्वरूपैक्यं हि बलवद्बाह्यभेदो हि दुर्बलः।
ज्वलज्ज्वलनमध्यस्थतृणतूलविभेदवत् ॥ ६६२ ॥

दुर्बलः मिथ्यात्वात् बलशून्यः। विरोधे अकिञ्चित्करत्वमात्रे दृष्टान्तः ॥ ॥६६२ ॥

न चेदधिष्ठानदृशा जीवो ज्ञानी कथं वद ॥ ६६३ ॥

वृत्तिप्रतिफलितज्ञातृचैतन्येन घटाधिष्ठानचैतन्यस्यैकीभावे हि ज्ञातो मया घटः इति ज्ञातृचैतन्यस्यानुसन्धानं भवति इति हि परप्रक्रिया। यथाऽऽह 'एकाऽप्यर्थमनोविशेषकवशाद्वैतं प्रपन्नाहरत्यज्ञानं प्रकटीकरोति विषयान् ज्ञातं मयेदं त्विति' इति। तेन ज्ञायते अनुसन्धाने ऐक्यमेव प्रयोजकमित्येषा व्यवस्था परप्रक्रिययैव सिद्धेत्याह **न चेदिति** ॥ ६६३ ॥

तस्मात्पूर्वोक्तमार्गेण जीवचैतन्यमेव तत्।
भिन्नभिन्नमनन्तं च भोगभेदाय चेष्यते ॥ ६६४ ॥

फलितमाह **तस्मादिति** ॥ ६६४ ॥

भोक्तृजीवविभेदेन भोगभेदो न चान्यथा।
न चेद् ग्रहग्रस्तदेहभवो भोगः कथं द्वयोः ॥ ६६५ ॥

न चान्यथेति। संश्लिष्टोपाधिमत्त्वमात्रेणापीति भावः। **कथमिति।** व्यवस्थयैवेति शेषः। अनावेशदशायां देहाभिमानिनः। आवेशे पिशाचस्यैव इत्येवमिति भावः॥ यथोक्तं वादावल्यां 'किमुपाधि संश्लेषमात्रं प्रयोजकं उत स्वरूपैक्ये सति। नाद्यः मातृसुखादेर्गर्भस्थेनानुसन्धानप्रसङ्गात् न द्वितीयः। स्वरूपैक्यमात्रस्य प्रयोजकत्वे संभवति विशेषणप्रक्षेपे प्रमाणाभावादि'ति॥ ॥६६५ ॥

यद्यप्यस्ति पिशाचस्य देहोऽन्यस्स तु निष्फलः।
तस्मिन्देहे तदक्षेण तच्चित्ते न हि तत्सुखम् ॥ ६६६ ॥

अन्यदेहेऽन्यकरणैरन्यचित्तस्थितं सुखम्।
पिशाचो ह्यनुसन्धत्ते साक्षिणा स्वेन नापरः ॥ ६६७ ॥

पिशाचापगमे तज्जं सुखं जीवोत्ति नेतरः।
तद्द्रष्टृसाक्षिणोर्भेदात्सिद्धभोगविचित्रता ॥ ६६८ ॥

अतस्सर्वशरीरेषु भिद्यन्ते भोगसाक्षिणः।
साक्षी चैतन्यमेवेति जीवभेदस्तनौ तनौ ॥ ६६९ ॥

स्वदेहेन भोगाक्षमः पिशाचः। अतः अन्यदेहस्थचक्षुरादिभिः अन्यमनसि जातं सुखं स्वीयतयाऽनुसन्धत्ते। अतः अनुसन्धानभावाभावयोः साक्षिस्वरूपभेद एव

प्रयोजकः न त्वेव देहान्तरकरणाद्युपाधिभेद इति निष्कर्षः इत्याह **यदीति** ॥ ६६६ ॥ ॥६६७ ॥ ६६८ ॥ ६६९ ॥

भिन्नभिन्नस्वभावानां वाक्यमात्रेण नाभिदा ।
किं सिंहो देवदत्तः स्यादग्निर्माणवकोऽपि वा ॥ ६७० ॥

हन्त्येको हन्यते चान्यो हसत्येकः प्ररोदिति ।
दरिद्राति च निद्राति धनी जागर्ति चापरः ॥ ६७१ ॥

'दृष्टस्य वस्तुनो बलवद्दृष्टिं विना नान्यद्बाधकं इति भगवत्पादोक्तिमनुरुध्याह **भिन्नेति** ॥ ६७० ॥ ६७१ ॥

सर्वं ब्रह्मेति वाक्याद्धि किं स्याद्घटपटाभिदा ॥ ६७२ ॥

प्रमाणविरोधे सति यथा तदानुगुण्यं स्यात् तथा वाक्यमेव सावकाशयितव्यम् । अन्यथा वाक्यस्य योग्यताविरहात्तदप्रामाण्यमेव स्यादित्याह **सर्वमिति** । प्रत्यक्षसिद्धमर्थं श्रुतिरपि न बाधितुमलमित्याह **घटेति** । उक्तं हि मायिनाऽपि गीताभाष्ये 'अग्निरनुष्णः अग्निः न प्रकाशते इति ब्रुवत् श्रुतिशतमपि प्रामाण्यं न अश्नुते' इति ॥ ६७२ ॥

गुरुरेव गुरुर्लोके शिष्यश्शिष्यस्स किं गुरुः ।
यदि तस्याऽपि गुरुता साऽपि शिष्यान्तरं प्रति ॥ ६७३ ॥

शब्दैक्यमात्रं न अर्थैक्यं प्रयोजयतीत्याह **गुरुरिति** ॥ ६७३ ॥

महिषी महिषी किं स्यादजः किं स्यात्सपद्मजः ।
बलिर्बलिर्द्विडिन्द्रः किं स्वर्गतो निर्गतोऽपि वा ॥ ६७४ ॥

महिषी राज्ञी **महिषी** पशुविशेषः । **स्वर्गतः** स्वर्गलोके विद्यमानः । **निर्गतः** स्वर्गलोकाद् । कालभेदेन तथाभावेऽपि न बलीन्द्रयोरैक्यं संबोभवीति ॥ ६७४ ॥

अस्ति सर्वोऽपि संपत्तौ विपत्तौ तु न कश्चन।
अन्योन्यैक्यकथा सख्येः दुःख्यन्यो
न स्वयं किल ॥ ६७५ ॥

'तन्मित्रमापदि सुखे च समक्रियं यत्' इति नीतिबाह्योऽयमैक्यवादीत्याह **अस्तीति**। सर्वेषामात्मनां स्वरूपैक्यं वाचा ब्रुवाणः ब्रह्मण आनन्दरूपतां आशास्ते दरिद्राणां दुःखादिकं तु स्वस्मिन् न अभ्युपगच्छति। अतः वञ्चकस्य मैत्रीव वाङ्मनसविसंवादशीलस्य मायावादिन ऐक्यवार्ता छद्ममात्रमिति भावः ॥ ६७५ ॥

शिरस्यर्धे जरेत्यद्धा परदं धनकृद्वदेत्।
देही देहान्तरे नात्ति देहव्यूही किलात्ति तत् ॥ ६७६ ॥

उपाधिविश्लेषः स्वरूपैक्यं चेत्येतत् देहव्यूहवतः सौभर्यादियोगिनः चैत्रमैत्रादीनां च मायिमते समम्। अथापि योगिनः अनेकदेहगतसुखाद्यनुसन्धानं भवति न तु चैत्रमैत्रादीनामित्येषा मायि प्रक्रिया, 'अर्धे शिरसि जरा' इति परदंधनवाक्यमनुकरोतीत्याह **शिरसीति** ॥ ६७६ ॥

खल एव खलो लोके नासुरा वैरिवैरिणः।
एको जीवस्स निद्राति तस्य स्वप्नः किलाखिलम्
॥ ६७७ ॥

एकजीववादमथ दुदूषयिषुः प्रस्तापयति **खल एवेति**। एकजीववादः इत्थम्। यथोक्तं तत्त्वनिर्णयटीकायाम्। एक एव ब्रह्मप्रतिबिम्बो जीवः। अन्ये जीवा जडवत् स्वरूपेणैव कल्पिताः। यथा स्वप्ने यथा वा चित्रभित्तौ। तत्र परमार्थतो यो जीवः तस्य तत्त्वज्ञानोदये तत्कल्पितोऽयं सर्वो ब्रह्माभ्यन्तररूपः प्रपञ्चो निवर्तते। प्रतीतिमात्रशरीरत्वात्। अन्यस्य प्रत्येतुरभावात्। ईश्वरभेदस्यापि तेनैव कल्पितत्वात् इति। अस्य खलस्य एकजीवस्य सदृशः अन्यः खलो नास्तीत्याह **खल एवेति**। उपपादयति **असुराः इति**। वैरिणामेव वैरिणः ॥ न तु निर्निमित्तम्। अयं तु ततोऽपि खल इत्याह **एक इति**। निर्निमित्तं सर्वेषां जीवानां स्वाज्ञानपरिकल्पितत्वेन मिथ्यात्वमापाद्य अशेषपुरुषार्थविघातकः। तथा च 'तेऽमी

मानुषराक्षसाः परहितं स्वार्थाय निघ्नन्ति ये। ये तु घ्नन्ति निरर्थकं परहितं ते केन जानीमहे' इति दुर्नीतिविषय इति भावः। तदुक्तं भगवत्पादैः "ता आसुराः स्वयं नष्टा जगतः क्षयकारिणः" इति ॥ ६७७ ॥

अहर्निशेति च प्रायो न विदुर्मोहिदेहिनः।
कालः किलायं सर्वोऽपि स्वप्रस्सुप्तस्य
कस्यचित् ॥ ६७८ ॥

मोहिदेहिनः कामलम्पटाः। **प्रायो न विदुः** यदाकदाचित् तेऽपि विदुः इति भावः। अयं तु एकजीवो नित्यनिद्रितो अहर्निशेति विवेकभ्रष्टः अतिलम्पटः ॥ ॥६७८ ॥

करस्थदण्डपिण्डाभ्यां शवबुद्धिं जहौ शिवा।
चरन्तस्संसरन्तश्च शवा जीवाः किलाखिलाः ॥ ६७९ ॥

कश्चित्पुरुषः शिवां प्रलोभयितुं एकस्मिन् करे पिण्डं अपरस्मिन् समीपागतां ताडयितुं दण्डं च गृहीत्वा निश्चेष्टः शववत् पतितः। शिवा तु तं दृष्ट्वा दण्डपिण्डाभ्यां तस्य सजीवत्वमनुमाय पलायामास। तस्याः पशुतोऽपि निकृष्टोऽयमेकजीवः। अनादितोऽपि सर्वेषां शरीराणां हिताहितप्राप्तिपरिहारानुकूलां चेष्टां पश्यन्नपि तेषां निरात्मकत्वं मन्यमानस्य अस्य पशुबुद्धिरपहसनीयेत्याह **किलेति** ॥ ६७९ ॥

हसति स्वैरिणी स्वैरमपरां स्वैरिणीमहो।
किं न निर्जीवदेहात्मवादी चार्वाकहासकृत् ॥ ६८० ॥

प्रत्यक्षैकप्रमाणवादित्वात् चार्वाकः देहातिरिक्तं जीवं न मन्यते इति सह्यम्। युक्त्यागमानां प्रामाण्यमङ्गीकुर्वाणोऽपि मायावादी तत्सिद्धं सर्वशरीरस्थं जीवस्वरूपमपलपतीति ततोऽपि नास्तिकः॥ सत्यप्येवं चार्वाकमतनिराकरणं नाटयति। अहो स्वैरिणीवत् अस्य वञ्चकप्रवृत्तिरित्याह **हसतीति** ॥ ६८० ॥

एकाशाखण्डने लोका दोषमाघोषयन्त्यहो ।
शुकाद्याः किल सर्वेऽपि न मोक्ष्यन्ते मुमुक्षवः ॥ ६८१ ॥

सर्वेषां ज्ञानिनां जीवभावापलापिनः तेषां मोक्षाशाछेदनमप्यस्य महादोष इत्याह **एकेति** ॥ ६८१ ॥

यजनाध्ययनादीनि मननश्रवणानि च ।
दानस्नानादिकं सर्वं दशा स्वाप्नी किलाफला ॥ ६८२ ॥

एवं सर्वैः क्रियमाणसाधनानां निष्फलत्वकथनेन विधिनिषेध-शास्त्रापलापपापमप्यस्यापततीत्याह **यजनेति** ॥ ६८२ ॥

ब्रह्मापि निर्ममे सम्यक्तपसोद्बुद्धशुद्धदृक् ।
अस्राक्षीन्निद्रितस्त्र्यक्षसहस्राक्षादिकान्किल ॥ ६८३ ॥

ब्रह्मापीति । यथोक्तं भागवते 'एवं पुरा धारणयाऽत्मयोनिः नष्टां स्मृतिं प्रत्यवरुह्य तुष्यन् । तथा ससर्जेदममोघदृष्टिर्यथाऽप्ययात्प्राग्व्यवसायबुद्धिरि'ति ॥ ॥६८३ ॥

अनदिकालतो यस्य निद्रा स किल कल्पकः ।
अनिद्रा वेदवेदान्तकर्तारः किल कल्पिताः ॥ ६८४ ॥

अज्ञानी कल्पकः ज्ञानिनस्तु कल्पिता इति च प्रक्रिया तिरस्क्रियामेवार्हतीत्याह **अनादीति** ॥ ६८४ ॥

हृता यैरार्यमर्यादा वृथा तेषां कथाऽपि नः ।
अचेतनो गुरुर्वक्ति निद्रितः शृणुते किल ॥ ६८५ ॥

किं चायमेकजीवो न गुरुः । उपदेश्याभावात् । न शिष्य उपदेशकाभावात् । गुरोरचेतनत्वेन उपदेशकत्वायोगात् । निद्रितस्य शिष्यस्य श्रवणायोगाच्च ॥ ॥६८५ ॥

स्वशिष्याज्ञानजगुरोर्विद्याऽपि तदविद्यया ।
स भेदज्ञो यमैक्यज्ञोऽनंक्षत्येष स मोक्ष्यते ॥ ६८६ ॥

अपि च गुरुः तज्ज्ञानं च शिष्याज्ञानकल्पितम् । न चैवंविधेन उपदेशः संभवति । किं च गुरुः ऐक्यरूपतत्त्वज्ञानवानिति वाच्यम् । शिष्यश्च तदज्ञानवान् उपदेशात् प्राक् भेदज्ञानी इति च । यदा उपदेशेन यदैव शिष्यः प्रबुध्यते तदा गुरोः स्वरूपनाशः प्राप्नोति । न हि कोऽपि स्वरूपस्यैव नाशहेतौ उपदेशे प्रवर्तते इत्याह **अभेदेति । अयं गुरुः । स** शिष्यः । **एष** गुरुः ॥ ६८६ ॥

योचीक्लृपज्जगत्सर्वं शास्त्रस्तुतिसमन्वितम् ।
स जीवः किल शिष्योऽभूत्कल्प्यः
कोऽपि गुरुः किल ॥ ६८७ ॥

स्वयं शास्त्रादिकल्पकस्य शिष्यत्वमेव असंभवीत्याह **य इति** ॥ ६८७ ॥

यद्यैक्यमा प्रमा वक्तुस्तर्हि स्वाप्नोऽपि न भ्रमः ।
गौरवादप्रसिद्ध्यादेर्न स्वप्नस्य द्विरूपता ॥ ६८८ ॥

वक्तुः कल्पितस्य गुरोः **ऐक्यमा** ऐक्यज्ञानम् । भ्रमः प्रमा वा । नाद्यः भेदसिद्धेः । द्वितीय आह **यदीति** । स्वाप्नमपि तज्ज्ञानं प्रमा चेत् स्वाप्नोऽर्थः सर्वोऽपि भ्रमः इति पक्षो गतः । अथैतन्मात्रस्य प्रमात्वं तर्हि द्विरूपता । गौरवं अप्रसिद्धिः अपसिद्धान्तश्च । इदं च परमत एव । स्वमते स्वाप्नस्यापि ज्ञानस्य प्रमात्वमेवेति ज्ञातव्यम् ॥ ६८८ ॥

स्वप्नो न चेन्न जीवैक्यं तत्रैव द्रष्टुरेकता ॥ ६८९ ॥

अथ एतज्ज्ञानस्य प्रमात्वरक्षणार्थं दशाया जाग्रत्त्वमङ्गीक्रियते तर्हि बहुजीववाद एवापन्नः । कुत इति तत्राह **तत्रैवेति** ॥ ६८९ ॥

जाग्रद्दशैव स्वप्नस्य साम्याद्यदि च तादृशी ।
सर्वसाम्ये स एव स्यात्किञ्चित्साम्येन किञ्चन ॥ ६९० ॥

अथ जाग्रद्दशाद्रष्टुरेकत्ववती स्वप्नसाम्यात् स्वप्नवत् इति साध्यते इति चेत् किं हेतौ सर्वसाम्यं वा किञ्चित्साम्यं वा विवक्षितम् । आद्ये आह **सर्वेति । स एव** स्वप्न एव । द्वितीय आह **न किञ्चनेति** । सिध्यतीति शेषः । न हि स्त्रीत्वसाम्येन मातुर्वन्ध्यात्वं साधनार्हमिति भावः ॥ ६९० ॥

दशात्वसाम्ये तेनैव स्वप्नोऽप्येतादृशो भवेत् ।
साध्येन साम्यं नासिद्धेर्व्याप्येन समताऽपि न ॥ ६९१ ॥

यदि दशात्वं हेतुः तर्हि तेनैव हेतुना स्वप्नस्य जाग्रद्दृष्टान्तेन अनेकद्रष्टृमत्त्वमपि सुसाधमित्याह **एतादृशीति** । द्रष्टुरेकत्वेन तद्व्याप्यधर्मेण वा स्वप्नदशासाम्यस्य हेतुत्वे प्रतिवाद्यसिद्धिः इत्याह **असिद्धेरिति** ॥ ६९१ ॥

बाह्याक्षोपरमश्चात्र न चेत्किं नानुमीयते ।
जाग्रत्त्वात्स न चेदेकजीवताप्यत एव न ॥ ६९२ ॥

यदि सोऽपि तदा श्रोत्राभावान्न श्रोतृतास्य हि ।
श्रोता न चेन्न प्रबोद्धा ततश्शास्त्रमनर्थकम् ॥ ६९३ ॥

'जाग्रदवस्थाबाह्याक्षोपरमवती स्वप्नसाम्यादि'ति आभाससमानयोगक्षेमश्चेत्याह **बाह्येति** । न च साऽप्यङ्गीकाराधिकारिणी । तथा सति शिष्यस्यैकजीवस्य श्रोत्राभावापत्त्या श्रोतृताऽनुपपत्तेः । ततश्च 'यदा जीवः प्रबुध्यते' इति श्रुत्युक्तप्रबोधस्याभावेन शास्त्रमनर्थकं स्यादित्याह **यदीति** ॥ ६९२ ॥ ६९३ ॥

किं च स्वप्नस्य सर्वस्य न द्रष्टैको गृहे गृहे ।
तद्वत्तद्द्रष्टृबाहुल्यस्यैवाप्तेः क्व च ते मतम् ॥ ६९४ ॥

आभासान्तरमाह **किं चेति**। विमतः स्वप्नः; द्रष्टृबाहुल्यवान् गृहे गृहे भिन्नभिन्नपुरुषद्रष्टृकस्वप्नवत् इति ॥ ६९४ ॥

न सन्तीमे यदि स्वप्ना निदर्शनमदर्शनम् ।
प्राप्नोति तेऽनुमानस्य नादृष्टो दृष्टखण्डने ॥ ६९५ ॥

यद्येतेषामपि द्रष्टा स एवेति मतं तव ।
न तन्मम मतं तेन स्वदर्शननिदर्शनम् ॥ ६९६ ॥

अथ मतं गृहे गृहे दृश्यमानाः स्वप्नाः एकजीवस्वाप्नस्वप्नाः एव उपचरिता एव अनुपचरितस्तु **एकजीवस्यैवेति**। तन्न। तथा सति वियताऽस्वप्नः एकजीववान् स्वप्नत्वात् संप्रतिपन्नवत् इति त्वदनुमानस्य आभासत्वापत्तेः। तथा हि किं उपचरितस्वप्नत्वं हेतुः उत अनुपचरितम्। नाद्यः असिद्धेः। न द्वितीयः दृष्टान्तस्य साध्यवैकल्यापत्तेः। न च सामान्यं हेतुः तदभावादेव। न हि जलनभोनलिनयोः नलिनत्वसामान्यमस्ति। एवं प्रबुद्धबहुपुरुषसमकालीनः स्वप्नत्वात् इत्यप्याभाससाम्यं द्रष्टव्यम् ॥ ६९६ ॥

सन्ध्ये सृष्टिरिति प्रोक्तेस्स्वाप्नव्याघ्रगजादयः ।
सर्वे सत्याश्चेतनाश्च तत्स्वप्नोऽनल्पजीववान् ॥ ६९७ ॥

अतस्तत्रैकजीवत्वं प्रतिवादी न मन्यते ।
तत्सपक्षो विपक्षोऽस्य साधनं चाप्यसाधनम् ॥ ६९८ ॥

श्रुतिबाधितं तवानुमानमित्याह **सन्ध्य इति**। ईश्वरकर्तृकसर्जनकर्मत्वोक्तेस्तेषां सत्यत्वमेव। उक्तं च मायिभाष्यकृतैव गौडपादकारिकायां 'सत एव घटादेरुत्पत्तिर्विनाशो वा दृष्टः नासतः शशविषाणादेरि'ति ॥ ६९७ ॥

तथा च दृष्टान्तः साध्यविकल इत्याह **अत एवेति**। विरुद्धश्च हेतुरित्याह **विपक्षः इति**। **असाधनं** विपक्षमात्रवृत्तीत्यर्थः ॥ ६९८ ॥

तस्यैवायं यदि स्वप्नः कस्य जागरणं वद ।
तच्च तस्यैव चेदेते विरुद्धे कथमेकदा ॥ ६९९ ॥

तस्यैव एकजीवस्यैव । **अयं** गृहे गृहे अनुभूयमानः । **जागरणं** गृहे एकस्य स्वप्नकाले पार्श्वस्थानां बहूनां इति शेषः । न च तदपि एकजीवस्यैव । युगपत् स्वाप्नस्वप्नस्य स्वाप्नजागरणस्य चानुपपत्तेरित्याह **विरुद्धे इति** ॥ ६९९ ॥

स्वाप्नजागरितावस्था स्वाप्नस्वप्नविरोधिनी ।
अस्वाप्नौ तौ च नैकत्रेत्यविवादं हि वादिनाम् ॥ ७०० ॥

न च विरोधोऽसिद्ध इत्याह **अस्वाप्नाविति** । विमते स्वाप्नजागरणे युगपद्विरुद्धे स्वाप्नजागरणत्वात् अस्वाप्नस्वाप्नजागरणवत् इति प्रयोगोऽभिप्रेतः ॥ ७०० ॥

यदि जाग्रदवस्थादि तस्य नान्यस्य कस्यचित् ।
स्वयमेव स्वोपदेष्टेत्यायादायासभूस्तव ॥ ७०१ ॥

तस्य एकजीवस्य । **न अन्यस्य** गुर्वभिमतस्य । दूषयति **स्वयमेवेति** । **आयासभूः** आत्माश्रयः ॥ ७०१ ॥

अतस्स्वप्नेन चेज्जीवो नैकजीवमतं तव ।
स्वप्नेषु सन्ति चेज्जीवा नैकजीवमतं तव ॥ ७०२ ॥

स्वप्ने गृहे गृहे दृश्यमाने । **जीवः** द्रष्टा **न चेत्** त्वद्रीत्या तस्यापि निर्जीवत्वाभ्युपगमे । यद्वा स्वप्नोत्थितस्य स्वप्नावस्थापरामर्शवतः प्रमितस्य स्वप्नद्रष्टुर्जीवस्यानभ्युपगमे । **तव** त्वदभिमतस्य स्वप्नद्रष्टुरेकजीवस्यापि समानयोगक्षेमतया निर्जीवत्वेनाभावापत्तेः **तव** त्वदभिमतं एकजीवमतं **गतं** स्वरीत्यैव अपास्तम् ॥ ७०२ ॥

यदि देहेषु जीवाः स्युर्नैकजीवमतं तव ।
यदि देहेषु ते न स्युर्नैकजीवमतं तव ॥ ७०३ ॥

ते जीवाः । **न स्युरिति** । एकजीवाभिमतदेहं पक्षीकृत्य तदितरसर्वजीवदेहदृष्टान्तेन देहत्वहेतुना निर्जीवत्वसाधनसौलभ्यादिति भावः ॥ ७०३ ॥

देहेषु घटवैशेष्ये नैकजीवमतं तव ।
देहेषु तदवैशेष्ये किं नाहं कुरुते घटः ॥ ७०४ ॥

वैशेष्ये जीवसाहित्यलक्षणे । चेष्टावत्त्वलिङ्गेन सिद्धे इत्यर्थः । न च अप्रयोजकता । घटस्याप्यन्यथा अहं करोमि इति सङ्कल्पः तत्पूर्वकचेष्टादिकं च स्यादिति बाधकसद्भावात् । तदुक्तमनुव्याख्याने 'परस्य सत्यतां जानन्नपि यः स्वात्मतस्करः । परो नास्तीति वदति किमित्युन्मत्तवद्वदेत् ॥ पराभावेऽपि वाग् व्यर्था यदि नैवोच्यते तदा । कशावेत्रादिकं तस्य तस्करस्योत्तरं वदेदि'ति ॥ ७०४ ॥

देहेन सह सर्वेषु देहेष्वेको न गच्छति ।
देहं विसृज्य गच्छेच्चेन्मृतस्य स्यात्पुनर्भवः ॥ ७०५ ॥

किं च अनादिकालतः सुप्तस्य अशनाद्यभावान्मृत्युरेव स्यात् । दूरे प्रबोधः । यदि अन्यदेहान्प्रविश्य भोगान् भुंक्ते अतो न मरणं इति ब्रूयाः तत्र पृच्छामः ॥ स्वदेहं विहाय अन्यदेहान् प्रविशति उताविहायेति । द्वितीयस्तु असंभावित इत्याह **देहेन सहेति** । आद्ये आह **मृतस्येति** । पूर्वदेहपरित्यागेनेति भावः । **पुनर्भवः** देहान्तरप्रवेशात् ॥ ७०५ ॥

देहं प्रविश्य भोगश्चेत्प्रागुक्तं दूषणं स्मर ।
अप्रविश्यैव भुंक्ते चेदेकदेहेऽप्यसौ कुतः ॥ ७०६ ॥

अथ देहं सर्वथाऽप्रविश्यैव भोगः तर्हि भोगे देहस्य अकिञ्चित्करत्वापत्त्या सर्वथा देह एव तस्य माऽस्तु इत्याह **एकेति** ॥ ७०६ ॥

यद्येकस्याखिला भोगाः कलहः किं निबन्धनः ।
यद्यनेकेऽपि भोक्तारः कलहः किं निबन्धनः ॥ ७०७ ॥

कलहः इति । एकमेवार्थं कामयमानेषु विरुद्धमतिषु अनेकेषु एकत्रसंस्थितेषु कलहः भवति । यथोक्तं भागवते 'वासो बहूनां कलहः' इति । एकस्यैव सद्भावे कुतो विरुद्धमतिः कुतस्तरां तन्निमित्तकः कलह इति भावः । **कलह इति ।** त्वयैव तत्त्ववादिनां अस्माकं पक्षस्यैवाभ्युगतत्वादिति भावः ॥ ७०७ ॥

यद्यशुद्धं च शुद्धं च भुंक्ते सर्वत्र सर्वदा ।
प्रायश्चित्तविधिस्तस्य व्यर्थः कुञ्जरशौचवत् ॥ ७०८ ॥

कुञ्जरोऽपि स्नानानन्तरं धूलीप्रक्षेपेण देहं मलिनयति । अयं तु एकेन देहेन प्रायाश्चित्तचरणसमय एव अन्यैर्देहैरशुद्धं आचरतीति ततोऽप्ययमविवेकीति हृदयम् ॥ ७०८ ॥

अतो नात्रानुमामानमक्षं रुक्षं दिधक्षति ।
सुखदुःखादिकाध्यक्षान्बहून्साक्षाद्यदीक्षते ॥ ७०९ ॥

'न चैकजीवाज्ञानपरिकल्पितं समस्तमि'त्यत्र किंचिन्मानमि'ति तत्त्वनिर्णयोक्तिमनुरुध्योपसंहरति **अत इति ।** **अक्षं** साक्षिप्रत्यक्षम् । **रुक्षं** निरवकाशम् । बहून् विभिन्नभोगानुसन्धानवतो जीवान् । ईक्षते स्वात्मानं अन्यगतानुसन्धानरहितं तद्भिन्नत्वे न प्रत्यक्षीकुरुते इति भावो बोध्यः । अन्यजीवेक्षणस्यायोगिसाक्षिष्वनुपपत्तेः ॥ ७०९ ॥

यद्येकवचनान्तोक्त्या जीवैक्यं न स्याद्भवेत्तदा ।
अनादिमायया सुप्त इत्युक्त्या सुप्त एव सः ॥ ७१० ॥

'अनादिमायया सुप्तो यदा जीवः प्रबुध्यते' इति श्रुतिरस्तु प्रमाणं इति चेन्न । अत्र जीवानामेकत्वप्रतिपादकपदाभावात् । जीवः इति चैकवचनं नीतिपरो राजा इत्यत्रैव समुदायैकत्वपरम् । एक एवेत्यवधारणाभावात् । अविद्यमानपदाध्याहारेऽतिप्रसङ्गमाह **सुप्त इति ।** एवकारेण स्वप्रदर्शनं व्यावर्तयति ॥ ७१० ॥

धर्मं चरेति वचनाद्धर्मैक्यं किं न वर्ण्यते।
अजामजोश्रुतेऽजोन्यो जहातीति वचः स्मर ॥ ७११ ॥

जात्यैकवचनश्रौतप्रयोगं निदर्शयति **धर्ममिति**। बद्धजीवात् मुक्तजीवस्य अन्यत्वबोधकश्रुतिमाह **अजामिति**। अजो ह्येको जुषमाणोऽनुशेते। जहात्येनां भुक्तयोगामजोऽन्यः इति पूर्वार्धेन बद्धमुक्त्वा उत्तरार्धेन बन्धमनुभूय मुक्तजीवं संसारिणोऽन्यत्वेन अन्य इत्यभ्यासेनात्र स्पष्टमुक्तेः। जीवस्यैकमात्रत्वे नेयं बद्धमुक्तव्यवस्था युज्यते इति भावः ॥ ७११ ॥

अन्तर्बहिस्त्रिलोकीं यः पश्यत्सर्वत्र चक्षुषा।
तं सर्वसाक्षिणं सुप्तं कथमाह श्रुतिर्बलात् ॥ ७१२ ॥

किं चात्र सुप्त इत्यस्य आवृत इत्येवार्थः। ननु निद्रावश इति। मायाशब्दस्य 'महामायेद्यविद्येति नियतिर्मोहिनीति च। प्रकृतिर्वासनेत्येवं तवेच्छाऽनन्त कथ्यते' इति प्रमाणाद्विष्णोरिच्छैवार्थः। तथा चानादित ईश्वरेच्छारूपावरणेन आवृत इत्येवार्थः। न तु निद्रावश इति अन्यथा तस्येन्द्रियोपरमेण त्रिलोकीदर्शनानुपपत्तेरित्याह **अन्तरिति** ॥ ७१२ ॥

जीवैक्ये युगपद्भ्रान्तिप्रमिती कस्य का मृतिः।
किं जन्मतस्य निद्रायां न स्याज्जगदिदं महत् ॥ ७१३ ॥

ननु सुप्तशब्देनाज्ञानशबलजाग्रदवस्थैव लक्ष्यते अतो नोक्तदोष इत्यत आह **जीवैक्य इति**। संसरद्भिर्जीवैरैक्ये इत्यर्थः। संसरन्तः खलु केचिद्भ्रान्ताः केचित्तदैव प्रमातारो दृष्टाः। तदैक्येऽस्यैक जीवस्य युगपद्भ्रान्तिप्रमे प्रसज्येयातम्। युगपज्जन्ममरणानि चापद्येरन्। अनादितः जागरितत्वासंभवः। संसारिणोऽवस्थात्रयस्य नियतत्वात्। यदा कदाचिन्निद्राङ्गीकारे जगद्विलयप्रसङ्ग इत्याह **निद्रायामिति** ॥ ७१३ ॥

स्वप्ने कथञ्चिद्घटते तत्स्वप्नोऽयं भवेद्ध्रुवम्।
निद्रा च निद्रैवास्य स्यात्किं न स्याद्दूषणं तदा ॥ ७१४ ॥

स्वप्ने इति स्वाप्नानां, युगपद् भ्रान्तिप्रमाश्रयणानां जन्ममरणवतां बहूनां जीवानां दृश्यमानानां विद्यमानत्वेनेत्युपस्कर्तव्यम्। **घटते** पूर्वोक्तम्। **निद्रा** श्रुत्युक्तसुप्तपदाभिहिता। **निद्रैव** न तु त्वद्विवक्षितजागरितावस्था। तथा च प्रागुक्तदोषापरिहार इत्याह **किमिति** ॥ ७१४ ॥

जगद्भङ्गभिया निद्रां सुभद्रां कुर्वतस्सदा।
स्वप्नो जगच्चेत्कस्य स्यान्निषेधविधिशासनम्॥ ७१५ ॥

भियेत्यपहासः। सुभद्रां अनादितः विच्छेदहीनाम्। कस्येत्याक्षेपः निद्रितस्य त्वदप्रसक्तेः ॥ ७१५ ॥

यदा नो परमश्चक्षुरादेर्न स्वप्नवज्जगत्।
यदा चोपरमः कस्य करणं कारणं वद ॥ ७१६ ॥

बाह्येन्द्रियोपरमाभावे स्वप्नस्य तदानींतनजगतश्चानुपपत्तिं स्मारयति **यदेति**। अनादित इन्द्रियाणामुपरमे तेषां कारणत्वाभावेन वैफल्यमेवेत्याह **कस्येति** ॥ ॥७१६ ॥

किं चैकजीवस्वप्नोऽयं साक्षात्स्वप्नो भवेद्यदि।
स्वाप्नवैकुण्ठयात्रा च स्याद्धि स्वप्नेन किं भवेत्॥ ७१७ ॥

प्रबोधे गुरुशास्त्रादेर्निवृत्त्येतः फलान्तरम्।
कदापि न भवेत्तस्य भवस्तस्माद्ध्रुवो भवेत्॥ ७१८ ॥

सुप्तस्य कल्पकस्य जीवस्य गुरोः स्वकल्पितत्वं जानतः तत्सकाशाच्छ्रवणं एवं स्वकल्पितं शिष्यं प्रति व्याख्यानं वा न संभवतीत्युक्तम्। अभ्युपेत्याह **तदेति**। स्वाप्नसाधनेन स्वाप्नमेव फलं न तु वास्तवमिति भावः। प्रबोधानन्तरं तु न गुरुः न

शिष्यः न वा शास्त्रं इति वास्तवसाधनानुपपत्तिरेव । तथा च तस्य न मुक्तेः प्रत्याशेति सिध्यतीत्याह **भव इति** । **ध्रुवः** शाश्वतः ॥ ७१७ ॥ ७१८ ॥

जाग्रद्दशैव सा स्वप्नकथा यद्युपचारतः ।
देहे देहे तदा व्याप्तब्रह्मचैतन्यमस्ति ते ॥ ७१९ ॥

देहोपादानमज्ञानं चास्ति देह्युचितक्रियाः ।
सन्ति निर्जीवता तेषां देहानां केन हेतुना ॥ ७२० ॥

किं च तिष्ठन्तु जीवान्तराणि । व्याप्तस्य ब्रह्मचैतन्यस्य देहे देहेऽनुप्रवेशस्तावदस्ति । तत एव देहान्तराणां सजीवत्वमेवास्तु तेनैव सन्तु च देह्युचितक्रियाः । निर्जीवत्वं कुतः । अन्यथा स्वदेहस्यापि निर्जीवत्वापत्तिः । तत्रापि ब्रह्मचैतन्यसन्निधानमेव स जीवत्वहेतुः । तदतिरिक्तजीवाभावादित्याह **जाग्रदिति** ॥ ॥७१९ ॥ ७२० ॥

यद्यस्य माया सृष्टिस्सा द्रष्टा को स्यात्तदा वद ।
स्वयं चेन्नास्य माया भून्नापरोस्त्येकजीविनः॥ ७२१ ॥

एकजीववादः खलु विवरणकाराभिमतः । यद्यपि स मायासृष्टिं नाभिप्रैति । तथाऽपि संभावितत्वाच्चर्चार्थं स्वयमाशङ्क्य निषेधति **यदीति** । मायिकपदार्थानां द्रष्टा किं मायावी एकजीवः उत तदपरः । नाद्य इत्याह **स्वयमिति** । 'न च माया विना माया दृश्यते' इति वचनात् । न द्वितीय इत्याह **नापर इति** ॥ ७२१ ॥

रूपमात्रं तदापि स्यात्कथं शास्त्रनिरूपणम् ।
मायाकृत्रिमविप्रेषु वाग्वृत्तिर्न हि मायया ॥ ७२२ ॥

सर्वथा शास्त्रश्रवणादिकमसंभावितमेवेत्याह **रूपेति** ॥ ७२२ ॥

अथ स्वयं ब्रह्मणोंऽशः स्वांशाः सर्वेऽन्यदेहिनः ।
इति चेदेकजीवत्वं किं स योगप्रभाववान् ।
परिच्छिन्नैकदेहस्थः कथं देहान्तरं विशेत् ॥ ७२३ ॥

देहान्तरेषु स्वांशाः सन्ति तेषु प्रविश्य स्वयं भुंक्ते इति पक्षान्तरमुत्थाप्य दूषयति **अथेति**। देहव्यूहनिर्माणे सौभर्यादिवन्नास्य योगप्रभावोऽस्तीत्याह **किमिति**। अज्ञाननिद्रितस्य अस्य अपरोक्षज्ञानस्य तत्कार्यस्य योगप्रभावादिकस्य चासंभवादेवेति भावः ॥ ७२३ ॥

देहे देहे पृथग्भोगान्भुञ्जन्तो नादितो यदि ।
सन्त्यनन्ताश्चेतनांशा बहुजीवत्वमेव तत् ॥ ७२४ ॥

जीवाद्वा ब्रह्मणो वास्तु(नुम्)लुम्लिटोः
किं विशेषणम् ॥ ७२५ ॥

एते जीवा एकजीवस्यांशाः सन्तु ब्रह्मणो वा। सर्वथा बहुजीवभाव एव पर्यवसित इत्याह **देहे इति** ॥ ७२४ ॥ ७२५ ॥ ७२६ ॥

गेहे गेहे स्थिता दीपा दीपान्मूलाग्नितोऽपि वा ।
भवन्तु बहुदीपत्वे न विशेषोऽस्ति कश्चन ॥ ७२६ ॥

निर्जीवदेहसञ्चारे स्वदेहोऽप्यस्तु तादृशः ।
सर्वभ्रान्तिर्ब्रह्मणोऽस्तु संसरेन्मुच्यतां च तत् ७२७ ॥

ब्रह्मणोऽस्त्विति। न चेष्टापत्तिः 'विद्यामयो यः स तु नित्यमुक्तः' इति भागवतविरोधात् ॥ ७२७ ॥

अज्ञानकार्यब्रह्मेशसर्वकर्तृत्वहन्तृते ।
युक्ते नेति तयोः कार्यत्वेनेत्यादावुदीरितम् ॥ ७२८ ॥

पुनरज्ञानकार्यस्य जीवस्यास्य निगद्यते ।
सर्वस्य कर्तृता तेन जीवो जागर्ति चेत्तव ॥ ७२९ ॥

निद्रातिहृद्रुजा शास्त्रं मिथो यद्धि व्यरुध्यत ।
जीवेऽतिव्यापकं चेदं कथं स्याद्ब्रह्मलक्षणम् ॥ ७३० ॥

किं च तत्त्वप्रदीपनाख्ये मायिग्रन्थे, ब्रह्मणः रुद्रस्य चाज्ञानकार्यत्वेन तयोः कर्तृत्वं संहर्तृत्वं च नोपपद्येते इति व्याख्यातम् । इदानीं अज्ञानकार्यस्य एकजीवस्य तदुभयाङ्गीकारे पूर्वोत्तरविरोधः तत एव दोषेण शास्त्रस्यैव निद्रासदृशं अप्रामाण्यं ब्रह्मणो जगज्जन्मादिकारणत्वलक्षणस्य एकजीवेऽतिव्याप्तिश्चेत्याह त्रिभिः **अज्ञानेत्यादिना** ॥ ७२८ ॥ ७२९ ॥ ७३० ॥

किञ्चासौ चक्षुराद्यक्षैः कल्पयेन्न तु साक्षिणा ।
अन्तरेव स्वतन्त्रेण सन्निकृष्टानि तानि च ॥ ७३१ ॥

ज्ञापकानि ततो भ्रान्तेः पुरा सर्वमभूज्जगत् ।
अण्डस्यान्तर्बहिस्सर्वजीवोऽणुः कल्पयेत्कथम् ॥ ७३२ ॥

अक्षैः बाह्येन्द्रियैः । अन्तरेव स्वतन्त्रेणेति हेतुगर्भं विशेषणम् । **तानि** बाह्येन्द्रियाणि । ज्ञापकानि इत्यनेनान्वयः । **ततः** सन्निकर्षस्य पूर्वं जगतो विद्यमानत्व एवोपपत्तेः ॥ तथा च भ्रान्तेः पूर्वमेव विद्यमानस्य न तत्कल्पितत्वमिति भावः । दोषान्तरं चाह **अण्डस्येति** । **सर्वं** पुरुषसूक्तोक्तपादचतुष्टयात्मकम् ॥ ७३१ ॥ ॥७३२ ॥

बहवः पुरुषा ब्रह्मन्नुताहो एक एव तु ।
नैतदिच्छन्ति पुरुषमेकं कुरुकुलोद्वह ॥ ७३३ ॥

इति भारतकर्तैव यज्जीवबहुतैकते ।
प्राक्प्रस्ताव्योत्तरार्धेन नेच्छन्तीत्येकजीवताम् ।
प्रत्यक्षिपत्ततोऽप्येष पक्षो न स हि सूत्रकृत् ॥ ७३४ ॥

'को ह्यत्र पुरुषश्रेष्ठः तं भवान् वक्तुमर्हति' इति पूर्वार्धशेषः जनमेजयस्य एकजीववादानुवादेन पूर्वपक्षः । 'बहूनां पुरुषाणां च यथैका योनिरुच्यते । तथा तं पुरुषं श्रेष्ठं आख्यास्यामि गुणाधिकम्' इति उत्तरार्धशेषः वैशंपायनेन बहुजीववादसमर्थनेन परिहारः । **न पक्षः** सूत्रकृत्संमतः इति शेषः । **सः** भारतकृत् ॥ ॥७३३ ॥ ७३४ ॥

निर्जीवसेनासंहारमुज्जिहासुः किलार्जुनः ।
अक्षोहिणीनां तद्युद्धं मृतानां मरणं किल ।
एकजीवकथा तस्माद्वृथैवेति मतिर्मम ॥ ७३५ ॥

गीताविरुद्धश्चायं दुर्वाद इत्यपहसति **निर्जीवेति** । उज्जिहासुः परित्यक्तुमिच्छुः । **मृतानामिति** एकजीवस्य निद्रितस्य सेनाप्रविष्टत्वाभावादिति भावः ॥ ७३५ ॥

बहुजीवत्वपक्षेऽपि निर्मूला तेष्वभिन्नता ॥ ७३६ ॥

उक्तं विरोधं बहुजीवपक्षेऽप्यतिदिशति **बह्विति** । **तेषु** स्वपरसैन्यगतभटेषु तदुपलक्षितसर्वजीवेषु च । **निर्मूलेति** । विरुद्धा एव खलु युध्यन्ते । विरोधश्च भेदनियतः । न हि स्वयं स्वेनैव विरुध्यते युध्यते वेति भावः ॥ ७३६ ॥

भेदत्वाद्यदि भेदस्य मिथ्यात्वं चन्द्रभेदवत् ।
तर्हि भेदो न मिथ्येति भेदत्वेनैव हेतुना ।
ब्रह्ममोक्षविभेदाख्यदृष्टान्तेनैव साध्यते ॥ ७३७ ॥

भेदो मिथ्या भेदत्वात् चन्द्रभेदवदिति परानुमानं दूषयति **भेदेति** । किञ्च भेदत्वहेतोरविद्यानिवृत्तिरूपमोक्षात्मभेदे व्यभिचारश्च इति वादावल्यां सूचितां

प्रकरणसमतामाह **ब्रह्मेति**। एतेन 'भेदः सत्यः ब्रह्ममोक्षविभेदवदि'ति प्रयोगोऽभिप्रेतः ॥ ७३७ ॥

अविद्याया निवृत्तौ हि प्रकारः पञ्चमस्तव ।
अतोऽर्वागेव मिथ्यात्वं तस्मिन्यक्षे बलिः पृथक् ॥ ७३८ ॥

न च दृष्टान्तः साध्यविकलः। अविद्यानिवृत्त्युत्तरकालीनस्य भेदस्य अविद्याकार्यत्वरूपमिथ्यात्वासंभवात्। अत एव 'न सन्नासन्न सदसन्नानिर्वाच्यश्च तत्क्षयः' इति वाक्यं व्याचक्षाणेन परेण 'यक्षानुरूपो बलिरित्याचार्याः प्रत्यपीपदन्नि'ति मोक्षस्य पञ्चमप्रकारतोररीकृता इत्याह **अविद्येति** ॥ ७३८ ॥

अतोऽविवादो दृष्टान्तो मिथ्यात्वाभावसाधने ।
श्रुतिस्सत्यं भिदेत्याद्या कुर्वती शपथं हि नः ॥ ७३९ ॥

सत्यं भिदेत्यभ्यासेन सतात्पर्यं भेदप्रतिपादकश्रुतिबाधः परानुमानस्येत्याह **श्रुतिरिति** ॥ ७३९ ॥

शून्यब्रह्मविभेदो वा दृष्टान्तस्तत्र कथ्यते ।
तद्भेदस्यापि मिथ्यात्वे ब्रह्मशून्यं भवेत्तव ॥ ७४० ॥

विप्रतिपत्तिशङ्काऽनर्हं दृष्टान्तान्तरं सत्यत्वसाधकानुमानस्याह **शून्येति** ॥ ॥७४० ॥

सत्यो भेदस्साध्यवान्न मिथ्या चेद्धेतुमान्नमे ।
रज्जुसर्पोनयत्सर्पस्तद्भेदं भीषयेद्धि कः ॥ ७४१ ॥

किञ्च परानुमाने दृष्टान्तीकृतश्चन्द्रभेदः सत्यो मिथ्या वा। नाद्यः साध्यविकलत्वात्। न द्वितीयः। साधनविकलत्वात्। अवधूयैव सत्यत्वादिविशेषं भेदत्वसामान्यमेव हेतुः अतो न कोऽपि दोष इति चेन्न। रज्जुसर्पयोः सर्पत्वमिव तत्सामान्यस्यैवाभावादित्याह **रज्ज्विति** ॥ ७४१ ॥

यतस्सपक्षपक्षी ते भेदमिथ्यात्वसाधने ।
छिन्नपक्षद्वयोऽप्यासीत्तत्सर्पेत्स कुत्रचित् ॥ ७४२ ॥

साहित्यमुद्रयाऽनुमानस्याभासतामाह **छिन्नेति** । विकल्पितपक्षद्वयासहिष्णुः । **सपक्षः** दृष्टान्तः । **न उत्सर्पेत्** व्याप्तिग्रहनिरूपको न स्यात् ॥ ७४२ ॥

चन्द्रभेदोऽपि को वाऽसौ यो दृष्टान्तस्त्वयेरितः ।
आरोपितानारोपितयोर्भेदश्चेत्स हि मन्मते ।
सत्य एवेति साध्यस्य वैकल्यं स्यान्निदर्शने ॥ ७४३ ॥

विशिष्य दृष्टान्तं पूर्वोक्तेनैव वर्त्मना दूषयति **चन्द्रेति** । **सः** अनारोपितधर्मिक आरोपितप्रतियोगिको भेदः ॥ ७४३ ॥

नायमारोपितश्चन्द्र इति सच्चन्द्रधर्मिकः ।
आरोपितात्तु यो भेदस्स सत्यस्सर्ववादिनाम् ॥ ७४४ ॥

भेदस्यैतस्य सत्यत्वं अबाधितप्रतीत्या अभिनीय दर्शयति **नेति** ॥ ७४४ ॥

सतस्तादात्म्ययोग्यत्वाद्भ्रान्ताद्भ्रान्तैक्यशङ्कया ।
तन्निषेधस्य चौचित्याद्भेदधीस्सा ह्यबाधिता ॥ ७४५ ॥

भेदनिषेधप्रतीतेरबाधितत्वं सद्धर्मिकभेदस्थले भेदप्रसक्तिसमर्थनेन समर्थयति **सत इति** ॥ ७४५ ॥ ७४६ ॥

स च स्वरूपतोऽस्त्येव परं नास्तीतरात्मना ।
अतस्तत्र सदाऽन्यस्माद्भेदावसर एव हि ॥ ७४६ ॥

यद्यारोपितचन्द्राणामेव भेदः परस्परम् ।
तदा साधनवैकल्यं दृष्टान्ते प्रतिवादिनः ॥ ७४७ ॥

आरोपितचन्द्रस्य आरोपितचन्द्रान्तराद्भेदनिषेधस्तु निःस्वरूपस्य तस्य तादात्म्यप्रसक्तेरेवाभावेन अनवसरपराहत इत्याह **यदीति** ॥ ७४७ ॥

अन्योन्याभावभेदोऽयं न ह्यसत्येषु मन्मते ॥ ७४८ ॥

यदा धर्म्येव नैवास्ति तदा तस्यैव नास्तिता।
तत्राऽन्योन्यात्मताऽभावो ह्यप्रसक्तनिषेधनम्॥ ७४९ ॥

अन्योन्याभावरूपभेद इति निर्देशः वक्ष्यमाणदूषणस्य स्फुटीकरणार्थम्। पृथक्त्वं अन्योन्याभावः स्वरूपं इत्येषामैक्यस्य अतत्वनये अनुव्याख्याने व्युत्पादिततत्वात् ॥ ७४८ ॥ ७४९ ॥

तदेव नास्ति चेत्कस्य तादात्म्यं तत्र शङ्क्यते।
शशशृङ्गं स्वतो नास्ति न तु नास्तीतरात्मना ॥ ७५० ॥

धर्मिण एव असत्त्वे तस्यान्यात्मताया अप्रसक्तेस्तन्निषेधो नेत्येतदभिनीय दर्शयति **शशश्रृङ्गमिति** ॥ ७५० ॥

अतस्तत्रान्यवस्तुभ्यो भेदावसर एव न।
यतो धर्मिस्वरूपोऽयमन्योन्याभाव ईर्यते ॥ ७५१ ॥

अन्योन्याभावः स्वरूपभेद इत्यनर्थान्तरमित्याह **यत इति** ॥ ७५१ ॥

घटोयमेव न पटः पटोऽसौ न घटस्त्विति।
सामानाधिकरण्यस्य वस्त्वैक्ये ह्यनुशासनात्॥ ७५२ ॥

अतो नासति सोऽभावो भावाभावबहिष्कृतः॥ ७५३ ॥

अभावेषु हि सर्वेषु यो धर्मी विद्यमानता।
तस्य सर्वस्य नियता नाभावोऽसति धर्मिणि॥ ७५४ ॥

नाभूदत्र घटो नष्टो घटो नायं घटः पटः ।
शशशृङ्गं सर्वदेशकालेनेति हि धीर्नृणाम् ॥ ७५५ ॥

पश्चात्सत्त्वं प्रागभावे नियतं प्रतियोगिनः ।
अतोऽसौ प्रागभावोऽभूत्प्रध्वंसप्रतियोगिनः ।
पूर्वसत्यं च नियतमुत्तराभावताऽस्य तत् ॥ ७५६ ॥

सद्द्वयामभाव इति हि ततः प्राहुर्विपश्चितः ।
नाशेन जन्मना तस्माज्जगत्सत्यत्वमुच्यते ॥ ७५७ ॥

सतस्सदन्तराद्भेदे प्रतियोगिनि सत्यता ।
अविद्यमानाद्भेदे तु प्रतियोगी परं न सन् ॥ ७५८ ॥

नायमारोपितश्चन्द्रो नेदं रजतमित्यपि ।
यतः प्रतीतिर्लोकानां धर्मी तत्रापि सम्भवेत् ॥ ७५९ ॥

भेदस्य धर्मिसत्त्वं नियतम् । प्रतियोगी तु क्वचिदसन्नपि । तत्र दृष्टान्तावाह **नायमिति** ॥ ७५८ ॥ ७५९ ॥

त्रिकालनास्तिता धर्मिकालत्रितयमेव हि ॥ ७६० ॥

धर्मिणः सत्त्वं सर्वाभावसाधारणम् । अत्यन्ताभावेऽपि त्रिकालसर्वदेशावेव धर्मिणौ । तौ च सन्ताविवेत्याह **त्रिकालेति** उपलक्षणं सर्वदेशेत्यपि ग्राह्यम् ॥ ॥७६०॥

शशशृङ्गस्य नास्तित्वं तद्गरूपादिनास्तिता ।
त्रिकालनास्तितैवेति धर्मी कालोऽखिलस्य सन् ॥ ७६१ ॥

अखिलस्य असद्धर्मिकाभावमात्रस्य ॥ ७६१ ॥

असतः शशशृङ्गादेर्धर्मित्वं तूपचारतः ॥ ७६२ ॥

शशशृङ्गे रूपं नास्तीति प्रयोगस्तु उपचरितः। तत्रापि सर्वदेशेषु कालेषु नास्तीत्येवाशय इत्याह **असत इति** ॥ ७६२ ॥

प्रतियोगित्वपूर्वास्तु धर्मिसत्तानपेक्षिणः।
भावधर्मास्सन्ति तत्रात्यभावस्य गतिस्त्वियम्॥ ७६३ ॥

निषेधप्रतियोगित्वमात्रं सर्वस्य चासतः।
देशः कालश्चाखिलोऽपि धर्मी तस्य निषेधने ॥ ७६४ ॥

शशशृङ्गं न कुत्रापि न कदापीति हि प्रमा।
तद्दैर्घ्यं च न कुत्रापि न कदापीति हि प्रमा ॥ ७६५ ॥

अत्र धर्मित्वं सत्त्वरूपत्वमेवाभिप्रेतम्। अत्यन्ताभावप्रतियोगित्वादयस्तु न केवलं धर्मिसत्तानिरपेक्षाः। प्रत्युत तदसत्त्वमेवापेक्षन्ते। अतः शशशृङ्गे रूपं दैर्घ्यं नास्तीत्यादिनिषेधे देशकालावेव धर्मिणौ इत्याह **निषेधेति** द्वाभ्याम्॥ ७६३ ॥ ७६४ ॥ ७६५ ॥

अत्यन्ताभावमात्रे तु प्रतियोगिन्यसत्यता।
नियता कथमत्यन्ताभावस्सोऽपि सतो यदि।
कालत्रयेऽप्यभावं हि तच्छब्दार्थं विदुर्बुधाः ॥ ७६६ ॥

मात्रशब्दः कार्त्स्न्यार्थः। नियतेत्यनेन क्वचिदत्यन्ताभावः प्रामाणिकप्रतियोगिकोऽपि भवतीति स्वयूथ्यानां केषाञ्चिद्वादः प्रौढिवाद एवेत्यभिप्रैति। हीत्यनेन 'प्राक् प्रध्वंससदात्वेन त्रिविधोऽभाव इष्यते' इति तत्त्वसङ्ख्यानं प्रमाणयति ॥ ७६६ ॥

योऽत्यन्ताभावमेवाह घटस्य स हि सर्वदा।
जलाहरणयोग्यस्याभावाच्छुष्यद्गलो भवेत्।
न चेदत्यन्तशब्दोऽयं शोषयेद्बहुजल्पतः ॥ ७६७ ॥

अत्यन्तशब्द एवाभावस्योक्तरूपत्वं निर्धारयतीति साहित्यमुद्रयाऽऽह **य इति**। अन्यथा निरर्थकं अत्यन्तेत्युच्चारणं कण्ठशोषमात्रायेत्याह **जल्पतः इति**॥ ॥७६७॥

प्रागभावादयोऽप्यत्यन्ताभावाः स्युर्न चेत्तव।
धर्मी तस्याप्युक्तरीत्या सन्नेवेति विनिश्चितः ॥७६८॥

अन्यथा अभावस्य त्रैविध्येनोक्तो विभागोऽनुपपन्नः स्यादित्याह **प्रागभावेति** प्राक्कालावच्छिन्नः उत्तरकालावच्छिन्नः अत्यन्ताभाव इति प्राक्प्रध्वंसाभावयोरपि सदाऽभाव एवान्तर्भावसंभवादिति भावः। न च धर्मिणः सत्त्वासत्त्वाभ्यां तयोरत्यन्ताभावात्पार्थक्यम्। अत्यन्ताभावेऽपि धर्मिणः सत्त्वस्य विनिश्चितत्वादित्याह **धर्मीति**॥ ७६८॥

एवं च धर्मिणस्सत्त्वं सर्वाभावेषु यद्ध्रुवम्।
अन्योन्याभावरूपोऽयं भेदो नारोपितेषु तत्॥ ७६९॥

प्रकृतं यद् दृष्टान्तदूषणं तदुपयोगोक्त्या निगमयति **एवमिति**॥ ७६९॥

वर्तमानः परं धर्मी भावोऽस्याभाव एव वा।
स च भावेषु भावात्मा ह्यभावेषु तदात्मकः ॥७७०॥

वर्तमानः सन्। परं केवलम्। न तु भावः एवेति अभाव एवेति वा नियम्यते। भावा 'भावस्वरूपत्वादि'ति तत्वसङ्ख्यानोक्तेरित्याह **स इति**॥ ७७०॥

पट एव घटो नेति समानाधिकृतत्वतः।
यतः प्रतीयते सर्वैस्ततो धर्मिण्यभिन्नता ॥७७१॥

भेदस्य धर्मिस्वरूपत्वं सामानाधिकरण्यप्रयोगबलेन सिद्धमित्याह **पट इति**। एवं 'घटाभावो घटो न' इत्यपि अन्योन्याभावस्य अभावस्वरूपत्वे उदाहर्तव्यम्॥ ॥७७१॥

भावाभावविरोधश्च प्रतियोग्यनुयोगिनो: ।
घटाभाव: पटवति घटवत्येव न ह्यसौ ॥ ७७२ ॥

'भावाभावविरोधोऽपि न तु सर्वत्र विद्यते । तदभावो हि तद्भावविरोधी न ततोऽपरः' इति अदृश्यत्वादिनयेऽनुव्याख्यानोक्तमनुरुध्याह **भावेति**। चशब्दः एवार्थः प्रतियोग्यनुयोगिनोरित्यनेन संबध्यते । न तदन्यत्र । संसर्गाभावे तन्नियमं दर्शयति **घटाभाव इति**। अन्योन्याभावेऽपि तं दर्शयति **एवमिति** ॥ ७७२ ॥ ॥७७३ ॥

एवं घटस्य भेदोऽयं पटेऽस्ति न घटे परम् ।
अतस्सिद्धो विरोधोऽस्मिन्प्रतियोग्यनुयोगिनो: ॥ ७७३ ॥

उक्तप्रत्यक्षबलतस्सोऽभिन्नस्स्वस्वधर्मिणा ।
अनवस्थाभियान्ते च धर्म्यैक्यं वाच्यमस्य हि ॥ ७७४ ॥

'तत्तद्भेदस्य भेदान्तरभेदेऽनवस्थानं' इति वादावल्युक्तदिशाऽऽह **अनवस्थेति** ॥ ७७४ ॥

उक्तप्रत्यक्षानुसारात्प्रागेव स निगद्यताम् ।
धर्मित्वादीशक्लृप्तत्वात्तत्तच्छक्तिविशेषत: ॥ ७७५ ॥

धर्मधर्मिभावादिभेदव्यवहारः विशेषबलादित्याह तत्तच्छक्तिविशेषतः इति । समर्थितश्चायं विशेषो गुणसौरभे ॥ ७७५ ॥

इह नेति प्रतीतस्तु भिन्नोऽभावस्त्रिरूपवान् ।
आधाराधेयभावो हि तेषां धर्मिषु दृश्यते ।
धर्म्यभेदे तु मानं न तद्भिन्ना: स्वस्वधर्मिभि: ॥ ७७६ ॥

'यत्तदद्रेश्यमगोत्रं' इति श्रुतौ अद्रेश्यमित्यनेन दृश्यप्रतियोगिकान्योन्याभावः, अगोत्रमित्यनेन तु बहुव्रीहिसमाश्रयणे न गोत्रसंसर्गाभावः प्रतीयते । तत्र

अन्योन्याभावः धर्मिस्वरूपमित्युक्तम्। ब्रह्म न दृश्यं इति अन्योन्याभावस्य ब्रह्मसामानाधिकरण्येनैव प्रतीतः। अतो युज्यते समन्वेतव्यस्य दृश्यभेदस्य स्वरूपलक्षणत्वम्। गोत्रभेदस्तु नैतद्वाक्यबोध्यः। तस्य घटादिसाधारण्येन सरूपलक्षणत्वासंभवात्। गोत्रसंसर्गाभावस्य तु 'ब्रह्मणि गोत्रं नास्ति' इति आधाराधेयभावेनैव प्रतीयमानत्वेन न सः धर्मिस्वरूपम्। भूतले घटो न इति प्रतीयमानभाववदित्याह **इहेति**॥ इयांस्तु विशेषः। ब्रह्मणि गोत्रं न इत्यत्र अत्यन्ताभाव एव। भूतले घटो न इत्यत्र यथातथं त्रिविधोऽपि संसर्गाभावः। स च त्रिविधोऽपि उक्तहेतोः धर्मिभिन्न एवेत्याह **तदिति** यथोक्तं सुधायां 'भिन्न एव धर्मिणः प्रागभावादिः। धर्मिनाशेऽप्यविनाशादि'त्यादि ॥ ७७६ ॥

एकाभावे त्वभावोऽन्यो मृतमारणमेव हि ॥ ७७७ ॥

अन्योन्याभाव एवैको वर्तमानेषु वस्तुषु।
न प्रध्वंसः प्रागभावो नात्यन्ताभाव एव वा ॥ ७७८ ॥

तादात्म्यप्रसक्तेरेवाभावेन तन्निषेधात्मा अन्योन्याभावः न शशविषाण-धर्मिकः। तस्य अत्यन्ताभावप्रतियोगित्वादित्युक्तम्। सामान्यतः अभावस्य अभावान्तरासहिष्णुस्वभावत्वादप्येवमित्याह **एकेति** ॥ ७७८ ॥

इह भूमौ घटो नेति यो निषेधः प्रतीयते।
स तत्संसर्गनाशो वा तस्य प्राङ्नास्तितैव वा ॥ ७७९ ॥

स्वसत्तादशायां प्रतियोगिसत्तासहिष्णुत्वस्वभावत्वं अन्योन्याभावस्यैकस्यैव नेतरेषां त्रयाणामित्याह **अन्योन्याभाव इति** ॥ ७७९ ॥

संसर्गो यत्र नैव स्यात्तत्र त्वत्यन्तनास्तिता।
यो घटोऽस्ति कथं नास्ति स एव
व्याहतं (हि) च तत् ॥ ७८० ॥

इहेति अधिकरणनिर्देशपूर्वकं यत्राभावः प्रतीयते तत्र सर्वत्रापीत्यर्थः। संसर्गस्य भूतत्वे नाशः भावित्वे प्रागभावः इति विवेचनीयम् ॥ ७८० ॥

यत्र एतद्घटभूतलसंसर्गः कदाऽपि नास्ति तत्र संसर्गस्यैव अत्यन्ताभावः न तु घटस्येत्याह **संसर्ग इति**। अन्यथा व्याघातादित्याह **य इति**। स एव कथं नास्तीत्यन्वयः। प्रामाणिकस्यात्यन्ताभावासंभवादेवेति भावः। अत्र विस्तरः न्यायामृते अनिर्वाच्यत्वसाधकनिषेधप्रतियोगित्वान्यथाऽनुपपत्तिभङ्गे द्रष्टव्यः। अप्रामाणिकस्यैव अत्यन्ताभावप्रतियोगिकत्वं इत्यत्र तत्र तत्र आकरग्रन्थोक्तानि निरवकाशप्रमाणानि अस्माभिः कृते भगवतो निर्दोषत्वलक्षण इति ग्रन्थे उदाहृतानि अत्र सुधीभिरनुसन्धेयानि ॥ ७८० ॥

संसर्गो नेत्यभावस्तु तत्संबन्धस्य नास्तिता।
काश्यामयं च संसर्गो नेति चास्य निषेधनम् ॥ ७८१ ॥

घटे पटतादात्म्यं नेति अधिकरणनिर्देशेन तादात्म्यनिषेधस्तत्रापि तादात्म्यसंसर्गस्यैव निषेधः न तु पटतादात्म्यस्य। तस्य पटे विद्यमानस्य प्रामाणिकस्य निषेधासंभवात्। काश्यां एतद्भूतलघटसंसर्गो नास्ति इत्यत्रापि संसर्गसंसर्ग एव निषेध्य इत्याह **संसर्ग इति**। **अस्य** संसर्गसंसर्गस्य ॥ ७८१ ॥

घटसंसर्गवत्संसर्गस्य संसर्गनास्तिता।
स चाप्रामाणिकस्तस्य ह्यत्यन्ताभाव एव सः ॥ ७८२ ॥

तस्य अप्रामाणिकत्वेन युज्यते तस्यात्यन्ताभाव इत्याह **घटेति**। **एवेति** काश्यां एतद्भूतलघटसंसर्गसंसर्गस्य कदाप्यभावादिति भावः ॥ ७८२ ॥

प्रामाणिकस्य प्रागूर्ध्वं प्रागभावविनाशने।
वर्तमानत्वसमये त्वन्योन्याभाव एव हि ॥ ७८३ ॥

प्रामाणिकस्य घटस्य। **प्राक्** उत्पत्तेः पूर्वम्। **ऊर्ध्वं** **नाशानन्तरम्।** **प्रागभावविनाशने** प्रागभावः ध्वंसश्च। यथाक्रमं अन्वयः। **एवेति** प्रतियोगिसत्तायाः अन्योन्याभावातिरिक्ताभावान्तरस्यासहिष्णुस्वभावत्वादिति भावः ॥ ७८३ ॥

अभूते प्रागभावोऽस्ति तादात्म्यस्याप्यसौ तदा।
अतस्तदात्मतान्यस्मिन्न भूते नैव शङ्क्यते ॥ ७८४ ॥

घटप्रागभावदशायां तत्तादात्म्यस्यापि प्रागभावः इत्याह **अभूते इति।** अनुत्पन्ने इत्यर्थः। तस्मिन् अभूते इति पदच्छेदः। एकस्य अनुत्पन्नस्य अन्येव अनुत्पन्नेन तादात्म्यं नैव शंक्यते। उभयोरपि तादात्म्यप्रागभावस्यैव सत्त्वादित्यर्थः ॥ ७८४ ॥

ध्वस्ते तु ध्वंस एवास्ति नान्योऽभावस्तु कश्चन।
तादात्म्यस्यापि नाशेन लीनान्यैक्यं च तस्य न ॥ ७८५ ॥

उक्तं प्रकारं ध्वस्तयोरप्यतिदिशति **ध्वस्ते इति।** एवकारेण व्यवच्छेद्यमाह **नेति। कश्चन अभावः** प्रागभावः अत्यन्ताभावः अन्योन्याभावः। **लीनान्यैक्यं** ध्वस्तस्य अन्येन ध्वस्तेनैक्यम् ॥ ७८५ ॥

वर्तमाने तु भेदोऽस्ति तेनान्योन्यमनेकता।
अत्यन्ताभाव एवास्ति तथात्यन्तासतोऽपि हि ॥ ७८६ ॥

तत्तादात्म्यं हि तन्मात्रं तस्याप्यत्यन्तनास्तिता।
तेष्वन्योन्यं भेदकथा तादात्म्यस्याप्यसत्त्वतः ॥ ७८७ ॥

भेदः तादात्म्यविरोधी। **ततो** विरोधिभेदसद्भावात्। अवर्तमानयोः अतीतानागतयोस्तु, तादात्म्यविरोधिनोः तादात्म्यध्वंसतादात्म्यप्रागभावयोः सत्त्वेन न अतीतस्य अतीतेन तादात्म्यव्यवहारः इति विवेकः। शशविषाणनरविषाणयोरिव तत्तादात्म्ययोरत्यन्तासत्त्वेन न तयोस्तादात्म्यव्यवहार इत्याह **अत्यन्ताभाव इति।** हिर्हेतौ। **तस्यापि** तत्तादात्म्यस्यापि। शशविषाणं नरविषाणं नेति भेदव्यवहारस्तु

उपचरित एवेत्याह **कथेति**। वार्तामात्रं ननु भेदस्य सद्भावात्। भेदस्य धर्मिस्वरूपत्वनियमात्। तयोश्च निस्स्वरूपत्वात्॥ ७८६ ॥ ७८७ ॥

तादात्म्याभावधीस्तस्य ह्यत्यन्ताभावतस्तदा।
अतो भेदव्यवहृतिस्तत्र तत्र तथा तथा।
सति तद्भेदसद्भावात्तेषु तद्भिन्नतावचः ॥ ७८८ ॥

तत्र तत्र तथातथा। निःस्वरूपे उपचरितः। सस्वरूपे निःस्वरूपात्तु वास्तवः। तेषु सत्सु। तद्भिन्नता असद्भिन्नता॥ ७८८ ॥

यथा कथञ्चिद्वैसादृश्याद्व्रातेष्वपि भेदवाक्।
धर्म्यभावेन तेष्वन्योऽन्याभावस्यात्यसंभवात्॥ ७८९ ॥

वैसादृष्यात् भिन्नपदैर्व्यवह्रियमाणत्वात्॥ ७८९ ॥

तादात्म्यस्थप्रागभावो नाशोऽत्यन्तनिषेधनम्।
ऐक्यस्य प्रागभावादिर्न भेदस्त्रितयं च तत् ॥ ७९० ॥

अनुत्पन्ने घटे घटतादात्म्यप्रागभावः प्रतीयते। एवं अतीते घटे घटतादात्म्यध्वंसः अत्यन्तासति च तादात्म्यात्यन्ताभावः। **तत् त्रितयं** एतदभावत्रितयम्॥ ७९० ॥

घटे सति पटादीनां तादात्म्यं यन्निषिध्यते।
घटः पटो न भवति पटो न घट इत्यपि।
स एव भेदनामा यमन्योन्याभाव इष्यते ॥ ७९१ ॥

कस्तर्हि अन्योन्याभावाख्यभेदे साक्षिभूतः प्रत्यय इत्यत आह घटः पटो नेत्यादिना॥ ७९१ ॥

नास्ति तादात्म्यमिति तु प्रागभावादिरीर्यते।
अन्योन्याभावभेदस्तद्वर्तमानेषु केवलम् ॥ ७९२ ॥

निगमयति नेति ॥ ७९२ ॥

अतोऽभावोतिदुष्टोयं स्वगोत्रकलहप्रियः ।
धर्मिण्येकस्सदैकाकी प्रतियोगि(नि)षु ते त्रयः ॥ ७९३ ॥

अतिदुष्टत्वमेवोपपादयति **स्वगोत्रेति**। अभावत्वेन स्वसदृशेत्यर्थः। अभावस्य स्वधर्मिणि अभावान्तरासहिष्णुस्वभावत्वादिति भावः। **एकः** अन्योन्याभावः, **धर्मिणि एकाकी** स्वसत्तादशायां अभावान्तरं असहमानः। **ते त्रयः** संसर्गाभावाः **प्रतियोगिनि** एकाकिनः इति विभक्तिविपरिणामेन अनुषङ्गः। प्रागभावः स्वप्रतियोगिनि ध्वंसप्रतियोगित्वं अत्यन्ताभावप्रतियोगित्वं वा न सहते। एवं इतरत्रापि ॥ ७९३ ॥

भावाभावस्वरूपत्वान्नान्योन्याभावता पृथक् ।
इति तत्त्वविवेकं तत्कुर्वन्गुर्वग्रणीर्मम ॥ ७९४ ॥

अन्योन्यं न भवतः इत्यन्योन्याभावौ घटपटौ। तयोर्भावः अन्योन्याभावता, भेद इति भावः। **न पृथक्** भावे विद्यमानो भावस्वरूपः। अभावे च अभावस्वरूपः। अतः तत्त्वविभागावसरे न पृथग्गणनीयः। असति तु नास्त्येव येन पृथग्गणना स्यादिति भावः ॥ ७९४ ॥

अन्योन्याभावाभिधानं तत्त्वं न पृथगुक्तवान् ।
भावाभावेषुताद्रूप्याद्भेदस्यासत्यवर्तनात् ॥ ७९५ ॥

तस्मात्साधनवैकल्यमस्मिन्पक्षे दृढं विदाम् ॥ ७९६ ॥

तस्मात् भेदस्य धर्मिस्वरूपत्वात्। आरोपितचन्द्रस्य च निःस्वरूपत्वेन तत्र धर्मिस्वरूपसापेक्षभेदस्यैवासत्त्वेन तत एव तत्र भेदत्वहेतोरभावेन प्रागुक्तं साधनवैकल्यं दुष्परिहरमिति भावः ॥ ७९६ ॥

किं चारोपितरूप्येषु रूप्यत्वं कस्य संमतम्।
अत आरोपितो भेदो न भेदस्सर्ववादिनाम् ॥ ७९७ ॥

प्रागुक्तं भेदे विकल्पदूषणं स्मारयति **किं चेति**। आरोपितानारोपितरूप्ययो रूप्यत्वसामान्यमिव आरोपितानारोपितभेदयोर्भेदत्वसामान्यमप्रामाणिकमेव। तदुक्तं वादावल्यां 'न हि जलनभोनलिनयोर्नलिनत्वसामान्यमस्ती'ति ॥ ७९७ ॥

अनारोपितभेदस्तु सत्य एवाखिलस्ततः।
साध्यसाधनवैकल्यशल्यमुद्ध्रियते कथम् ॥ ७९८ ॥

अनारोपितचन्द्रधर्मिको भेदो हेतूक्रियते स च सत्य इति न साधनवैकल्यमिति चेत् एवं तर्हि तत्र मिथ्यात्वं नास्तीति साध्यवैकल्यम्। तथा चैकं सन्धित्सतः अपरं च्यवते इति न्याय इत्याह **साध्येति** ॥ ७९८ ॥

अतस्तवैष दृष्टान्तो नाम्ना दृष्टान्त एव हि।
यतो द्वेधाऽपि दृष्टोऽन्तस्सर्वैरस्य मनीषिभिः॥ ७९९ ॥

मिथ्याभेदपक्षीकारे प्रतिवादिन आश्रयासिद्धिः। सत्यस्य पक्षत्वे बाधः। मिथ्याभूतस्य हेतोः असिद्धिः। सत्यस्य विरुद्धता। मुक्तामुक्तयोर्भेदेऽनैकान्त्यम्। अप्रमाणगम्यत्वमुपाधिः। अभेदो मिथ्या अभेदत्वात् देहात्माभेदवत् इत्याभाससाम्यं इत्यादि सकलसाधनदोषाणां सद्भावादिति भावः। **अतः** मिथ्यात्वानुमानस्य दुष्टत्वात्। 'न वयं अभेदं साधयामः। किं तु भेदं व्यासेधाम इति त्वदुपक्रमो दुराशामात्रम्॥ **नाम्ना** अन्तशब्दस्य त्वदभिलषितार्थनाश इत्यर्थमाश्रित्य ॥ ७९९ ॥

आत्मत्वात्परमात्मेव यद्यात्मा यं मते तव।
नारीत्वात्तर्हि भार्यैव ते माता स्यात्तथैव हि।
अतस्त्वं मातृगमनीत्युपेक्ष्यः प्रतिवादिनाम् ॥ ८०० ॥

पशुत्वाद्गौश्शुनीते स्याद्वस्तुत्वादन्नमेव हि ।
अशुद्धं स्याद्घटोऽपि स्यात्पटो द्रव्यत्वतस्तव ॥ ८०१ ॥

विमतः आत्मानः परमात्मनः परमार्थतो न भिद्यन्ते आत्मत्वात् परमात्मवदित्यनुमानं अनेकाभाससाम्योक्त्याऽपहसति **नारीत्वादित्यादिना** ॥ ॥८०० ॥ ८०१ ॥

आभासोपमहेतूनां तन्मुख्येयमुदाहृतिः ।
अतोनुमानतोऽप्यैक्यं न सिद्ध्येत्प्रतिवादिनाम् ॥ ८०२ ॥

मुख्येति । व्यवहारतोऽपि न भिद्यन्ते इत्यपि सुसाधत्वात् ॥ ८०२ ॥

यतोऽनुमानतोऽप्यक्षागमान्वेव सा भवेत् ॥ ८०३ ॥

सकलप्रमाणविरुद्धार्थे प्रवर्तमानानां त्वदनुमानमिति तच्छब्दवाच्यत्वमेव दुर्घटमित्याह **यत इति** ॥ ८०३ ॥

मानानामेव मिथ्यात्वादैक्ये मानं न ते मते ।
ममत्वैदंपर्यमात्रे मिथ्यात्वात्तानि तत्र न ॥ ८०४ ॥

मानानामेवेति 'नेह नानास्ति किंचन' इति प्रपञ्चान्तर्गतमानानां 'न वेदा न वर्णाश्रमाचारधर्मा' इति मिथ्यात्वोपगमात् । न हि वन्ध्यासुतवचसा किमपि सिध्यमिति भावः । मया त्वभेदवाक्यानां सत्यत्वं प्रामाण्यं चाङ्गीकृत्य स्वरूपैक्ये तात्पर्यमात्रं निषिध्यते अविरुद्धार्थान्तरे तात्पर्यं व्यवस्थाप्यते इति न कोऽपि दोष इत्याह **ममेति** । तत्र न स्वरूपैक्ये न प्रमाणानि । सादृश्याद्यैक्ये तु प्रमाणान्येव ॥ ॥८०४ ॥

विमतौ जीवपरमौ विरुद्धगुणवत्त्वतः ।
अभिन्नौ नैव तु हि न दहनाविव सर्वदा ।
सर्वानुभवसिद्धे यमनुमा भेदसाधिका ॥ ८०५ ॥

अत्यन्तभेदलाभाय नञ्द्वयम्। भेदस्य पारमार्थिकत्वसिद्धये **सर्वेदेति**। अनुभवसिद्धेति अनुकूलतर्कसूचनम् ॥ ८०५ ॥

नाहं सर्वज्ञ इत्यादि साक्षिप्रत्यक्षमस्ति हि।
जीवेशभेदसर्वेषां वेदस्तूक्तः पदे पदे ॥ ८०६ ॥

भेदप्रत्यक्षताप्रयोजकस्य धर्मिभूताहंपदार्थप्रत्यक्षस्य साक्षिणा, प्रतियोगिभूतसर्वज्ञप्रतीतेश्चागमेन सिद्धत्वादिति भावः। **पदे पदे** 'सन्ति च भेदे सर्वागमाः' इति भगवत्पादैः समर्थनादित्याशयः ॥ ८०६ ॥

अतस्त्रिमार्गगामित्वाद्भेदो गङ्गेव सेश्वरैः।
धार्येयं शिरसा सर्वैः पुनाति च जगत्त्रयम् ॥ ८०७ ॥

अतः प्रमाणत्रयसिद्धत्वात्। **गङ्गेव** त्रिपथगेव। **धार्या** मुमुक्षुभिः स्वीकार्या। अनन्यप्रोक्ते गतिरत्र नास्ति, प्रोक्तान्येनैव सुज्ञानाय प्रेष्ठ' इति श्रुतेः। **पुनाति चेति**। ब्रह्मधर्मिकभेदस्य तत्स्वरूपत्वात्। यथोक्तं 'स च भेदो धर्मिणः स्वरूपमेव' इति वादावल्याम्। भेददृष्टेश्च तत्पूजारूपत्वात्। तथा हि भगवते ऋषभवाक्यं 'विविक्तदृष्टिस्तदुतार्हणं मे' इति ॥ ८०७ ॥

देवानां किल मानुष्यं नाज्ञानेनैव केवलम्।
किन्तु शापेन तन्मूलपापाद्यैर्वा भवेद्भुवि ॥ ८०८ ॥

विप्राणामन्त्यजत्वं च महापापफलं किल।
अन्त्यजानां च विष्ठायां क्रिमितापापतः किल ॥ ८०९ ॥

ब्रह्मैव अज्ञानसंबन्धाद्धीनयोनीः प्राप्य संसरतीति परप्रक्रियां दूषयितुं सामान्यत उच्चस्य सतो नीचत्वप्राप्तौ कारणं शापो वा पापं वेति दृष्टान्तैर्निर्धारयति **देवानामिति**। मांडव्यशापाद्यमस्येव। एवकारव्यवच्छेद्यमाह **किं त्विति** ॥ ८०८ ॥ ॥८०९ ॥

तस्मादुच्चस्य नीचत्वप्राप्तिः पापेन केवलम्।
अज्ञानमात्रतस्सा चेत्स्मृत्यादीनामपार्थता ॥ ८१० ॥

अज्ञानमात्रतः न तु पापादिना। **स्मृत्यादीनां** 'चण्डालाः कोटिजन्मसु' इत्यादीनाम्। **अपार्थता** विपरीतबोधकत्वम् ॥ ८१० ॥

एवं सति श्वचण्डालपशुपक्ष्यादियोनिषु।
अनादिकालतो भूत्वा सदा सर्वत्र संसरेत् ॥ ८११ ॥

ते ब्रह्म बहुदुष्कर्मविण्मयार्णवमज्जितम्।
परब्रह्म तवैव स्यात्तदेवत्वं न संशयः ॥ ८१२ ॥

ब्रह्म तु सर्वोच्चं, चण्डालादियोनयश्चातिनीचाः। अतः त्वदभिमतब्रह्मणो बहुदुष्कर्मलेपः प्राप्तः। एवंरूपेण ब्रह्मणा मायिन ऐक्यमनुमन्यामहे इत्याह **तवैव स्यादिति**। यथोक्तं सुधायां जन्माधिकरणे 'तर्हि गुणशब्दोदित-सकलशुभराहित्यलक्षणमसुरत्वमेव स्यात्। . . . । तेनैक्यं च मायावादिनामनुमन्यामहे' इति ॥ ८१२ ॥

अस्मद्ब्रह्म हयग्रीवमत्स्यकूर्मादिविग्रहे।
अपि चित्सुखसंपूर्णं सहस्रार्कसमप्रभम् ॥ ८१३ ॥

अनन्तवेदवेदाङ्गपुराणस्मृतिपारगम्।
चतुर्मुखाद्यैराराध्यं तेषां विद्योपदेष्टृ च ॥ ८१४ ॥

विग्रहेऽपि। मत्स्याद्यवताररूपेष्वपि। **संपूर्णं** 'पूर्णमदः पूर्णमिदं' इति श्रुतेः। तमिममखिलहेतुं जिह्ममीनं नतोऽस्मि इति स्मृतेश्च। **अनन्तेति** 'अकथयच्च ब्रह्मसत्यव्रताय' इति स्मृतेः। **चतुर्मुखेति** 'अजेशसुरादिभिर्विमृग्यात्' जिनं जितं तेऽखिलयज्ञभावन' इति वराहस्तुत्युक्तेः॥ **'विद्योपदेष्टृ चेति'** 'वाचो बभूवुरुशतीः श्वसतोऽस्य नस्तः' ब्रह्मरुद्रादिदेवेषु मनुष्यपशुपक्षिषु। ज्ञानं संस्थाप्य' इत्यादिवचनात् ॥ ८१४ ॥

यन्मन्त्रोऽपि च मर्त्यानां विद्यासिद्ध्यै नियुज्यते ।
यद्भक्त्या मुच्यते जन्तुर्यस्य मातापिता न च॥ ८१५ ॥

यन्मन्त्रः हयग्रीवादिः ॥ ८१५ ॥

यत्कृपावीक्षणात्सद्यो मुक्तो निष्पापतामियात् ।
अवद्यगन्धविधुरं परक्लेशविमोचनम् ॥ ८१६ ॥

वीक्षणात् परमप्रसादात् । **अवद्येति** 'निरनिष्टे निरवद्य' इति श्रुतेः । 'न मां कर्माणि लिम्पन्ति' इति स्मृतेः ॥ ८१६ ॥

अनन्तरूपेष्वप्येवं यस्य शक्तिरनन्तधा ।
ततोऽधिकं परं ब्रह्म किं स्याद्वद विवेकिनाम्॥ ८१७ ॥

शक्तिरिति 'परेति यां प्राहुरजस्रशक्तिरि'त्युक्तेः । **परं ब्रह्मेति** 'परंब्रह्म परंधाम पवित्रं परमं भवान्' 'न त्वत्समोऽस्त्यभ्यधिकः कुतोऽन्यः' इति गीतोक्तेः ॥ ८१७ ॥

ब्रह्मादयोऽपि यद्दासा यद्दास्यं च तपःफलम् ।
तद्भक्तिरूपभावस्स्यात्तद्भावस्तु न कस्यचित्॥ ८१८ ॥

'ब्रह्मभावाय कल्पते' पूता मद्भावमागताः इत्यादेर्गतिमाह **मद्भक्तिरूपेति** । 'भावो भक्तिरि'त्यभिधानात् । यद्वा मयि भावः इत्येवार्थः । तस्मिन् प्रविश्य, तत्समीपे वा स्थितिः । 'ततो मां तत्त्वतो ज्ञात्वा विशते तदनन्तरं' इत्युक्तेः । 'परं ज्योतिरुपसंपद्य' इति च ॥ ८१८ ॥

न यत्र मायेति गिरा मायाया भगवत्पदे ।
सामान्यतो निषेधेन मायालेशोऽपि नेष्यते ॥ ८१९ ॥

माया 'मायामेतां तरन्ति ते' इत्युक्ता जडप्रकृत्यात्मिका । यत्रेत्यस्यार्थः **भगवत्पदे इति** । **सामान्यतः** निरुपपदेन । **अपरे** प्रकृतिजन्माः सत्त्वादयः । 'न वर्तते यत्र रजस्तमस्तयोः सत्त्वं च मिश्रं न च कालविक्रमः' इति विवरणात् । 'श्यामावदाताः

शातपत्रलोचना' इत्युत्तरत्रोक्तो भेदः अविद्यानिवृत्युत्तरकालीनत्वात्पारमार्थिक एव सिद्धः ॥ ८२० ॥

सत्येकस्मिन्नपि घटे घटो नास्तीति धीर्न हि ।
अतस्सामान्यतोऽभावे प्रतियोगी न शेषभाक् ॥ ८२० ॥

माया नेति निषेधोऽयं सामान्याभाव एव हि ।
मुख्यस्य बाधने हि स्यादमुख्योऽर्थो न चान्यथा ।
निर्माय भगवल्लोके मुख्या निर्मायतोचिता ॥ ८२१ ॥

सामान्यतो मुख्यमायानिषेधोऽयं यत्किञ्चित्प्रतियोगिलेशमपि विरुणद्धीत्याह **मायेति** । मुख्यस्य प्रकृतिबन्धस्य । तस्यैव प्रकृतत्वात् । न तु भगवदिच्छात्मकस्य । तस्य सत्त्वादिगुणोपादानताऽभावात् । **निर्माय भगवदिति** । 'मायां व्युदस्य चिच्छक्त्या कैवल्ये स्थित आत्मनि' तस्य नित्यनिर्मायतोक्तेः ॥ ॥८२१ ॥

न यत्र सत्त्वमित्यादिनोक्तमायाफलात्यये ।
कैमुत्यायोदितो मायाभावोऽयं मुख्य एव हि ॥ ८२२ ॥

उत्तरत्र प्रकृतिकार्यगुणानामभावस्य कैमुत्येन 'किमुतापरे' इत्युक्तेः पूर्वत्रोक्तमाया तत्कारणजडप्रकृतिरेवेत्याह **नेति** । **मायाफलात्यये** प्रकृतिजन्यगुणाभावे ॥ ८२२ ॥

न चेत्तत्कार्यकामादीन्कैमुत्येन कथं क्षिपेत् ।
किमुतापर इत्यत्र यतो हेतोरसिद्धता ॥ ८२३ ॥

भगवल्लोकः प्रकृतिकार्यबन्धादिदोषरहितः तत्कारणप्रकृत्यभावादिति हेतोः प्रकृतिलेशावशेषोक्तौ असिद्धिः स्यादित्याह **यत इति** ॥ ८२३ ॥

हरेरनुव्रता एव तत्रापि किल चेतनाः ।
सर्वे चतुर्भुजाभिन्ना हरिणा च परस्परम् ॥ ८२४ ॥

अतो भगवतो लोके भेदाकारादिसंपदि ।
जीवानां च मिथो भेदे जीवबाहुल्य एव च ।
सिद्धं मायातिदूरत्वं सत्त्वं च परमार्थतः ॥ ८२५ ॥

हरेरनुव्रता इति जीवपरस्याभेदः, अणुव्रताः सर्वे इति बहुवचनेव सर्वपदेन च जीवानां परस्परं भेदः, विमानावलिभिरित्यनेन जडानां अन्योन्यं जीवैस्तदधिष्ठातृभिश्च भेदः वैकुण्ठस्य भगवतो निर्मायत्वोक्त्या जडेशभेदः इत्येवं पञ्चभेदसिद्धिरवगन्तव्या । **परमार्थत इति ।** अविद्यानिवृत्त्युत्तरकालीनत्वात् ॥ ॥८२५ ॥

तस्मात्परममोक्षत्वं वैकुण्ठादिपुरत्रये ।
अव्यावहारिकं भेदं प्राह भागवते शुकः ॥ ८२६ ॥

परममोक्षत्वमिति । अङ्गीकृतश्च परममोक्षेऽपि सुखादिभोगः तन्निमित्तभेदश्च अद्वैतिभिः । 'सर्वान् कामान् समश्नुते' इत्यादिश्रुतिभ्यो मोक्षे सुखं संवेद्यमिति (बृ. शां. भा. ३९ । २८) । अत्र विस्तरः 'भेदपराण्येव खलु ब्रह्मसूत्राणि' (प. १७९) इत्यत्र अवगन्तव्यः ॥ ८२६ ॥

अतो जीवेशभेदाद्यमभेद्यं सर्ववादिनाम् ।
माया यं नास्पृशत्तं तु कोऽन्यो मायावशस्स्पृशेत् ॥ ८२७ ॥

नास्पृशत् । अमायिकलोकेऽपि सत्त्वात् । **अन्यः** मायावादी । **मायावशाः** 'माययाऽपहृतज्ञाना आसुरं भावमाश्रिताः' इति गीतोक्तेः । अत्र वैकुण्ठलोके प्रकृतेरभावोक्तिः बन्धकत्वेनैव न तु स्वरूपेणेति सर्वत्र विशेषोऽनुसन्धेयः । एतच्छ्लोक(भाग.)व्याख्यानावसरे न्यायसुधायां तथैव व्याख्यानात्(अ. ४-२-१) ॥ ॥८२७ ॥

विमतो जीवपरयोर्भेदोऽयं परमार्थसन्।
अविद्यास्तमये सत्त्वाद्यथात्मेत्यनुमानतः।
सत्यभेदोऽपि संसिद्ध्येद्धेतोरागमिकत्वतः ॥ ८२८ ॥

भेदस्य पारमार्थिकत्वेऽप्यनुमानमाह **विमत इति**। असिद्धिं निराह **आगमिकत्वत इति** ॥ ८२८ ॥

न वै स आत्मात्मवतामिति वाक्यमनुस्मर।
यो दुःखं नैव भुंक्तेऽसौ दुःखी जीवः
कथं भवेत्॥ ८२९ ॥

ब्रह्म चिज्जीवचिन्नैव दुःखाभोक्तृत्वतस्सदा।
घटवत्पटवद्वेति स्मृतिमूलानुमा भवेत् ॥ ८३० ॥

न वा इति भुंक्ते हि दुःखं भगवान् वासुदेवः इति वाक्यशेषः। भुंक्ते इति क्रियासातत्ये लट्। तेन निर्दुःखत्वं भगवतः स्वरूपलक्षणमुक्तं भवति। दुःखित्वं जीवस्य लक्षणं 'स जीव इति कीर्तितः। स दुःखी' इति श्रुतेः। एवं विरुद्धधर्माधिकरणत्वे सिद्धे, अनुमानप्रयोगमाह **ब्रह्मेति**। सदा इति दुःखस्पृष्टेभ्यो मुक्तेभ्योऽपि भेदसिद्धिः। अङ्गीकृतं च विरुद्धधर्माधिकरणत्वहेतोर्भेदसाधकत्वं परेणापि। 'कथमेकत्वमनयोर्घटते विपरीतयोरि'ति तदुक्तेः ॥ ८२९ ॥ ८३० ॥

विमतो नादिजीवेशभेदादिः परमार्थसत्।
अनादित्वाद्यथा ब्रह्मेत्यस्ति शास्त्रानुमा मम ॥ ८३१ ॥

जीवेशभेदादिः पक्षः। अनादित्वविशेषणं तत्र हेतोः परेणापि स्वीकारस्फोरणार्थं आदिपदेन अविद्याचितोर्योगादिकं ग्राह्यम्। यद्यपि 'जीव ईशो विशुद्धा चिद् भेदस्तस्यास्तयोर्द्वयोः। अविद्यातच्चितोर्योगः षडस्माकमनादयः' इति कारिकायां परेण भेदस्तस्यास्तयोर्द्वयोरिति शुद्धचिज्जीवभेदस्य शुद्धचिदीश्वर-

भेदस्य अनादित्वाभ्युपगमः ज्ञायते, तथाऽपि 'तयोर्द्वयोरि'ति भेदेन निर्देशेन जीवेशभेदस्यापि अनादित्वमभ्युपगतप्रायमेवेति ज्ञेयम् ॥ ८३१ ॥

भेदादिषट्कानादित्वं षडस्माकमनादयः ।
इति सञ्जल्पतैवोक्तं त्वयातो न कुतोऽपि भीः ॥ ८३२ ॥

सञ्जल्पतेति वदता पराभिमताविद्यादिरप्रामाणिकत्वं ध्वनयति ॥ ८३२ ॥

पूर्वं पूर्वं विद्यमाने यत्रेदं पूर्वता तु न ।
षोढानादिं विभजतामनादिरयमेव हि ॥ ८३३ ॥

अयमेव परमार्थसत्त्वाविनाभूतमेव । नतु पुनः शशविषाणादिवदादिवर्जितत्वमात्रम् । अन्यथा सहपठितायाः विशुद्धचितोऽपि अनादित्वस्य तथाविधत्वप्राप्तेः ॥ तदिदमुक्तं **विद्यमान इति**। तथा च विद्यमानत्वे सति प्रागभावाप्रतियोगित्वं अनादित्वं हेतुरिति फलितम् ॥ ८३३ ॥

सपक्षपक्षगो हेतुर्यतोऽयं न विपक्षगः ।
षण्णामक्षुण्णतद्भावादन्यानादेश्च निन्हुतेः ॥ ८३४ ॥

न विपक्षगः इति। शशविषाणे विपक्षे विद्यमानत्वविशेषणस्याभावात् । **षण्णां** पक्षसपक्षाणाम् । अन्यानादेः अविद्यमानशशविषाणस्य । **निह्नुतेः** । परेणैव उक्तरीत्या हेतुसत्त्वनिराकरणात् ॥ ८३४ ॥

अनादिः कल्पितश्चेति व्याहतेः प्रथमं गृहम् ।
अतः कर्कशतर्कोऽपि धिक्करोति मतं तव ।
तस्मादुक्तं समस्तं च निरवद्यमिति स्थितम् ॥ ८३५ ॥

व्याहतेरिति। कल्पितः इत्युक्त्या दोषजन्मः सादिरिति सिध्यति । पुनरनादिरित्युक्तौ कथं न व्याहतिरिति भावः। **उक्तसमस्तं** भेदपञ्चकं तस्य पारमार्थिकत्वं च ॥ ८३५ ॥

अनादिमायया सुप्तो यदा जीवः प्रबुध्यते ।
अजमनिद्रमस्वप्नमद्वैतं बुध्यते तदा ॥ ८३६ ॥

अनादितोऽपि सुप्तोऽज्ञो जीवो मायावशोऽवशः ।
अप्रबुद्धश्च पूर्वार्धे सुप्रसिद्धोऽभिधीयते ।
उत्तरार्धे त्वजोऽनिद्रस्स्वप्नशून्यश्च कश्चन ॥ ८३७ ॥

स च जन्मादिदूरत्वात्सदा निद्रोज्झितत्वतः ।
अस्वप्नत्वादमायत्वाद्देवो नारायणो भवेत् ॥ ८३८ ॥

अनादितोऽपि बद्धस्य सदा बन्धोज्झितस्य च ।
भवेद्भेदो यतस्तस्मात्सोऽद्वैतो द्वन्द्ववर्जनात् ॥ ८३९ ॥

'अनादिमायया सुप्तो यदा जीवः प्रबुध्यते । अजमनिद्रमस्वप्नमद्वैतं बुध्यते तदा' इति श्रुत्या भेदं साधयति **अनादितोऽपीति । मायया सुप्तः** प्रकृतिबद्धः । यदा प्रबुध्यते इति बन्धध्वंसस्य कादाचित्कत्वोक्तिः । अजं अनिद्रमस्वप्नमित्यनेन भगवतो नित्यमुक्तत्वं तस्मात् विरुद्धधर्माधिकरणत्वेन भेदस्य सिद्धत्वेन तन्निषेधस्य व्याहतत्वात् द्वैतशब्दस्य द्वैतशब्दोदितद्वन्द्ववर्जित इत्येवार्थः । तथा च श्रुतिः 'अशनायापिपासे शोकमोहौ जरां मृत्युमत्येति' इति ॥ ८३६ ॥ ८३७ ॥ ८३८ ॥ ॥८३९ ॥

यो बोद्धा न स बोध्यो हि कर्तृकर्मविरोधतः ।
अतः पूर्वार्धमध्यस्थो नोत्तरार्धगतोऽपि ते ।
कर्तृकर्मविरोधाख्यसर्पस्ते ह्यप्रतिक्रियः ॥ ८४० ॥

बोध्यब्रह्मैक्यवादास्ते बोद्धृत्वं त्याजयन्ति हि ।
अतो द्वैतपदं चैतन्न जीवैक्यपरं तव ॥ ८४१ ॥

अद्वैतमित्यस्य भेदरहितमित्यर्थस्तु परीत्यैवानुपपन्नः। बुध्यते इति बोधनक्रियायां जीवस्य कर्तृत्वेन 'अजं' इति ब्रह्मणश्च कर्मत्वेनोक्तत्वेन कर्तृकर्मभावस्य तन्मते भेदनियतत्वात्। न हि स्वनखाग्रेण स्वनखाग्रमेव छेद्यमुपलब्धमिति सदृष्टान्तं कर्तृकर्मणोरैक्यस्य परेण खण्डनात् ॥ ८४१ ॥

सदा निद्रा स्वप्नजन्म शून्यास्तत्पदवाच्यताम्।
अर्हन्त्यस्वप्ननाम्नोक्तः किं सुप्तेरुत्थितः पशुः॥ ८४२ ॥

अविद्ययान्धो जीवः पूर्वार्धोक्तः इत्यविवादम्। तत्प्रतियोगितया अनिद्रपदेनोक्तो विद्यामयोऽस्वप्नो नारायण नित्यमुक्त एव न तु सुप्तोत्थित इत्याह **सदेति**॥ तथा हि भागवतं 'योऽविद्ययान्धः स तु नित्यबद्धः विद्यामयो यः स तु नित्यमुक्तः इति ॥ ८४२ ॥

बोध्यं वस्तुप्रशंसंती श्रुतिरेतत्परैव सा।
नामुख्यार्थे बलान्नेया मुख्यार्थं कः परित्यजेत्॥ ८४३ ॥

उत्तरार्धं खलु बोध्यस्य ब्रह्मणः प्रशंसापरम्। अजं अनिद्रं इति विशेषणाभ्यां तथाऽवगमात्। अतोऽस्वप्नपदेनापि प्रशंसात्मक एवार्थो बोधनीयः। सदा स्वप्नोपलक्षितसंसृतिदूरत्वमेव तथाभूतम्। न तु स्वप्नोत्थितत्वं पशुसाधारण्यादिति उक्तत्वादित्याह **बोध्यमिति**। असति मुख्यार्थग्रहणे बाधके, प्रत्युत तत्परित्यागे एव बाधके च सति मुख्यार्थपरित्यागो दुराग्रहादेवेत्याह **बलादिति**॥ ८४३ ॥

भेदाभावात्स्वरूपेषु सदृशाभावतोऽपि वा।
द्वन्द्वाभावाच्च सोऽद्वैतो बोद्धदैतस्य साधनात्॥ ८४४ ॥

भेदाभावादिति। न विद्यते द्वैतं भेदः यस्मिन्निति व्युत्पत्त्या 'नेह नानाऽस्ति किञ्चन' इति श्रुत्युक्तरीत्या स्वगतगुणरूपक्रियाऽवयवादिप्रतियोगिकभेदराहित्यं अर्थः। **सदृशाभावत इति**। न विद्यते द्वैतं सदृशं यस्येति व्युत्पत्त्या 'न त्वत्समोऽस्त्यभ्यधिकः कुतोऽन्य' इति स्मृत्युक्तं सर्वोत्तमत्वं अर्थः। यद्वा द्वन्द्वशब्दस्य 'निर्द्वन्द्वो नित्यसत्त्वस्थ' इति गीतोक्त शीतोष्णादिपरत्वे 'असङ्गो ह्ययं

पुरुषः' इति श्रुत्युक्तो लेपाभावः अर्थः इत्येवं प्रमाणानुगुणः यथायथं अर्थः स्वीकार्यः । सर्वथा भिन्नद्वितीयवस्तुरहित इत्यर्थस्तु नाङ्गीकारार्हः । पूर्वार्धे एव बोद्धुरत एव भिन्नस्य द्वितीयस्य उक्तेरित्याह **बोद्धिति** ॥ ८४४ ॥

यथाऽधनोयमित्युक्तिस्स्वधनं प्रतिषेधति ।
न याचितधनं स्वस्मिन्गेहे गेहे धनानि वा ॥ ८४५ ॥

तथा द्वैतपदं विष्णौ स्वद्वैतं प्रतिषेधति ।
न त्वन्यतो हरेर्द्वैतं नाप्यन्यत्र स्थितं च तत् ॥ ८४६ ॥

स्वगतभेदराहित्यमर्थं निदर्शनेन द्रढयति **यथेति**। न विद्यते धनं यस्मिन्नित्यनेन अन्यानधीनतया स्ववृत्तिधनमेव निषिध्यते । याचितं परगेहे विद्यमानं वा न तथाभूतम् । एवं अत्रापीति भावः ॥ ८४५ ॥ ८४६ ॥

केवलो निर्गुणस्सोऽयं देवः प्रोक्तो वचोऽन्तरे ।
नित्यमुक्तोऽमृतस्यैष सेतुश्चोक्तस्स्थलेस्थले ॥ ८४७ ॥

समाख्याबलाच्च अजादिशब्दानां उक्त एवार्थ इति समाख्योक्तीर्दर्शयति **केवल** **इति** प्राकृतदेहरहितः इति **अजत्वम्**। 'एको देव' इति स्वप्नार्थकदिवुधातोर्निष्पन्नः देवशब्दः स्वप्रकर्तारं आह 'स्वप्नेन शारीरमभिप्रहत्या सुप्तः सुप्तानभिचाकशीति' इति श्रुतेः । तेन अस्वप्न इत्युक्तं अस्वप्नत्वम् । साक्षीति सर्वज्ञत्वोक्त्या अज्ञानराहित्यलक्षणमनिद्रत्वं इति समाख्यात्वं बोध्यम् ॥ ८४७ ॥

जीवस्तु बद्धो दुःखी च जन्ममृत्युजरावशः ।
पातकी नारकी चैव श्रुत्यैवोक्तः स्थलेस्थले॥ ८४८ ॥

श्रुत्या 'अहमित्येव यो वेद्यः स जीव इति कीर्तितः । स दुःखी स सुखी चैव स पात्रं बन्धमोक्षयो'रित्यादिकया । उपलक्षणं साक्षिप्रत्यक्षेणापीति ज्ञेयम् ॥ ॥८४८ ॥

एवं विरुद्धचैतन्यद्वयं भिन्नं ह्यनादितः ।
तयोर्नैक्यं कदापि स्यान्मुक्तः सारूप्यमेत्यसौ ॥ ८४९ ॥

कदाऽपि मुक्तावपि । **सारूप्यं** 'यथोदकं शुद्धे शुद्धमासिक्तं **तादृगेव** भवति एवं मुनेर्विजानत आत्मा भवति गौतम' इति श्रुतौ तादृगेव न तु तदेव भवतीति निरूपणात् ॥ ८४९ ॥

पुनर्जन्म स्वप्रबन्धदुःखाद्यप्रियवर्जनात् ।
नित्यमुक्तोऽनित्यमुक्त इति तत्रापि चान्तरम् ॥ ८५० ॥

सादृश्यं चैतावदेव न तु अत्यन्तमित्याह **पुनर्जन्मेति** । 'सर्गेऽपि नोपजायन्ते प्रलये न व्यथन्ति च' इति स्मृतेः । बन्धात्यन्ताभाववान् बन्धध्वंसान् इति भेदस्य तत्रापि अनुवृत्तेः । इदमुपलक्षणं अधीनत्वरूपबन्धस्यापि सद्भावादेवेत्यपि ध्येयम् । तदुक्तं 'योऽविद्ययान्धः स तु नित्यबद्ध' इति ॥ ८५० ॥

बन्धान्मुक्तस्ततो जीवो नित्यमुक्तः कथं ह्यसौ ।
अतो बोद्धृत्वशून्यैव बोध्यब्रह्मैक्यवाक्तव ॥ ८५१ ॥

वाक् सर्वा परबोधनार्था । बोद्धुरेव निषेधे वाचो नैरर्थक्यमेवेत्याह **अत इति** ॥ ८५१ ॥

यदि ब्रह्मैक्यबोद्धा त्वं कथमैक्यं भवेत्तव ।
यदि ब्रह्मैक्यबोद्धा न कथमैक्यकथा तव ॥ ८५२ ॥

किञ्च त्वं ब्रह्म जानासि न वा । आद्ये कर्तृकर्मभावेन भेदस्यैव सिद्धिः । द्वितीये कथारूपव्यवहारकारणस्य व्यवहर्तव्यज्ञानस्याभावेन कथाया एवानिष्पत्तिरित्याह **यदि चेति** ॥ ८५२ ॥

किं चैक्यं यदि मिथ्या स्यात्तर्हि भेदश्रुतिस्सती ।
विरुद्धश्रुतिदौर्बल्यात्स्वबोध्यं बोधयेद्बलात् ॥ ८५३ ॥

दौर्बल्यात् अप्रामाण्यात् ॥ **बलात्** व्याप्तिबलात् तदुक्तमनुव्याख्याने (४–१–४) 'एकस्यासत्यतायां हि द्वयोरेव विरुद्धयोः । अन्यस्य सत्यतैव स्यादिति केन निवार्यते' इति ॥ ८५३ ॥

सत्यं चेद्ब्रह्मणो भिन्नमभिन्नं वा निगद्यताम् ।
भेदे तेनैव तेऽद्वैतश्रुतेस्स्याद्व्याहतिस्स्फुटा ॥ ८५४ ॥

ऐक्यमित्यनुवर्तते । सत्यं इति पक्षे **विकल्पयति भेदे इति । तेनैव** ऐक्येनैव । अद्वैतश्रुतिः किमपि ब्रह्मणो भिन्नं न इति प्रतिपादयति । पुनः तस्माद्भिन्नं ऐक्यं अस्तीति प्रतिपादने व्याहतिः स्फुटा ॥ ८५४ ॥

प्रतीयोग्यनुयोगिभ्यां निरूप्यस्यानिरूप्यतः ।
अमतस्य मताच्छास्त्रबोध्यस्य तदबोध्यतः ॥ ८५५ ॥

अथैतद्दोषपरिहाराय ऐक्यं ब्रह्मस्वरूपमित्युपेयते इति चेद्विरुद्धधर्माधिकरणत्वात्तदपि न घटते इत्याह **प्रतियोगीति** । ऐक्यं ब्रह्मणा अभिन्न इत्यत्र ऐक्यं अनुयोगि ब्रह्मप्रतियोगि इत्येवम् । ऐक्यं धर्मिप्रतियोगिनिरूप्यम् । ब्रह्म तु अनिरूप्यम् । ऐक्यं वेदान्तज्ञानात्प्राणमते । ब्रह्म तु स्वप्रकाशतया मतम् । **तदबोध्यतः** अज्ञेयत्वोपगमात् । इदमुपलक्षणम् । अपर्यायशब्दवाच्यत्वं ह्यन्यतरापरिशेषः इत्यादिकं ग्राह्यम् ॥ ८५५ ॥

ऐक्यमैक्यस्य घटते कथं युक्तिविदां मते ।
तवापि न विरुद्धैक्यं लक्षणापेक्षिणः क्वचित् ॥ ८५६ ॥

'ऐक्यं तयोर्लक्षितयोर्न वाच्ययोर्निगद्यतेऽन्योन्यविरुद्धधर्मिणोः' इति तदुक्तेः ॥ ८५६ ॥

विरुद्धांशपरित्यागे न सा जीवेश्वरैकता ।
रुणद्धि शैवश्रुत्युक्ता जीवेश्वरभिदा श्रुतिम् ।
सा चेन्नास्ति तदाभेदश्रुतेः किं प्रतिबन्धकम् ॥ ८५७ ॥

परित्यागे नेति पदच्छेदः। **सा** चिच्चितोरेकता। **सैव** जीवेश्वरैकतैव। किमित्याक्षेपे। यत्प्रतिबन्धकं जीवेश्वरैक्यं न स श्रुत्यर्थः। श्रुत्युक्तं चिदैक्या न तत्प्रतिबन्धकं भिन्नविषयकत्वादिति भावः ॥ ८५७ ॥

अतो जीवेश्वराभेदो ह्यात्मभिन्नो मृषैव ते।
यत्किञ्चिदैक्यस्यैक्ये वा सत्त्वे वा न परस्य भीः ॥ ८५८ ॥

अतः उक्तभेदकार्याणां निर्विशेषब्रह्मवादिना त्वया निर्वाहयितुमशाक्यत्वात् ऐक्यस्य ब्रह्मस्वरूपत्वायोगात् ॥ ८५८ ॥

स्वरूपैक्ये सति घटे पटादिभ्यो न किं भिदा।
स्वरूपैक्ये सति परस्वरूपाद्भिन्नतापि न ॥ ८५९ ॥

स्वस्य स्वस्वरूपेणैक्यं नान्यप्रतियोगिकं भेदं विरुणद्धीत्येतन्निदर्शनेन अन्वयव्यतिरेकाभ्यां द्रढयति **स्वरूपेति** ॥ ८५९ ॥

ताभ्यां व्यावर्तितैक्यस्याप्यैक्यपक्षो न शोभते।
तदेव ह्युपलक्ष्यत्वं न चेच्छुष्कैक्यमापतेत् ॥ ८६० ॥

ताभ्यां जीवेश्वराभ्यां **व्यावर्तितं** उपलक्षितं यद् ऐक्यं तस्य ब्रह्मणैक्यपक्षोऽपि। **न शोभते** पूर्वं दूषितपक्षानतिरेकात् इत्याह **न देवेति** धर्मिप्रतियोगिभावेन व्यावर्त्यत्वमेव। **न चेत्** चिन्मात्रैक्यं चेत्। **शुष्कैक्यं** सर्वाङ्गीकृतं चिच्चितोरैक्यम्। तच्चाविरुद्धमित्युक्तम्। तदुक्तं अनुव्याख्याने 'न व्यावृत्त्या प्रयोजनम्। व्यावृत्तस्याविशेषत्वे' इति ॥ ८६० ॥

एवं च कथमैक्यं स्यादव्यावृत्ते परात्मनि।
व्यावर्त्याव्यावर्त्यताभ्यामेव यत्तौ विरोधिनौ॥ ८६१ ॥

ऐक्यं ऐक्यब्रह्मणोः ऐक्यम्। धर्मिप्रतियोगिसापेक्षत्वनिरपेक्षत्वाभ्यामेव तौ ऐक्येश्वरौ विरुद्धधर्माधिकरणौ ॥ ८६१ ॥

किं चैकं ब्रह्म तद्भावो ह्यैक्यं शब्दविदां मते ।
तयोश्च धर्मधर्मित्वात्कथमैक्यं विरुद्धयोः ॥ ८६२ ॥

तद्भावः एकस्य भावः। भावार्थप्रत्ययो हि धर्मधर्मिभावं आह। स च निर्विशेषैक्यवादे दुर्घट इति भावः ॥ ८६२ ॥

एवं च नैक्यमैक्यस्य तदभावेन तत्त्वता ।
अतत्त्वावेदकं शास्त्रममानं तज्जितं परैः ॥ ८६३ ॥

तदभावे ब्रह्मणैक्याभावे तद्भिन्नत्वे इति यावत्। **तत्** ऐक्यबोधकाभिमतशास्त्रस्यामानत्वात् ॥ ८६३ ॥

विरुद्धैक्ये तु सार्वज्ञपूर्वधर्मा जिजृंभिरे ।
निर्गुणोक्तेस्तदेकत्वगुणे नाताडयन्मुखम् ।
स्वाभेदसंभवाद्भिन्नगुणाभावार्थतां ददुः ॥ ८६४ ॥

जिजृम्भिरे त्वयैव तदनिराकरणात्। निर्गुणं एकं चेति व्याहतम्। एकत्वगुणेनैव गुणवत्त्वात्। तद्वदेव सार्वज्ञादिगुणवत्त्वस्याप्युपपत्तेः तथा च 'एवं धर्मान्पृथक् पश्यंस्तानेवानुविधावती'ति श्रुत्युक्तदिशा धर्माणां सत्त्वं पृथक्त्वाभावः विशेषबलेन धर्मधर्मिभावादिव्यवहारः इत्येव युक्ततममित्याह **स्वाभेदेति** ॥ ॥८६४ ॥

जडं जगच्च सत्यं स्यात्तदैक्यं चैकतैक्यवत् ।
मिथ्याश्रुतेस्तु भेदेनासत्त्वमर्थोऽस्त्वभेदिषु ।
तदभावे तु नैक्यस्याप्यैक्यमित्यतिसङ्कटम् ॥ ८६५ ॥

तदैक्यं च सत्यं स्यादित्यनुवर्तते। अयं भावः। ऐक्यं तावद्विरुद्धधर्माधिकरणं जडं च। तादृशस्यापि सत्यत्वं ब्रह्मणैक्यं चेदुपेयते तर्हि जगतोऽप्यविशेषाश्रयाभावोऽभ्युपगम्यतामिति। एवं च सर्वं खल्विदं ब्रह्मेति श्रुतिः सर्वशब्दस्यासङ्कुचितार्थकत्वेनानुकूलिता स्यात्। 'नेह नानास्ति इति श्रुतिस्तु

भिन्नत्वेनासत्त्वं बोधयतु। न चेदैक्यस्य सत्यत्वं ब्रह्मणैक्यं च न स्यादित्युभयथाऽप्यतिसङ्कटमिति ॥ ८६५ ॥

यदि चेतनसंबन्धाच्चितोरैक्यं च चिद्भवेत्।
तदा जडं जगच्चित्स्यान्न्यायसाम्यान्न चेन्न च ॥ ८६६ ॥

नैष दोषः। ऐक्यस्य चित्संबन्धित्वेन चित्त्वमेव। अतः तस्य सत्यत्वं ब्रह्मणैक्यं चाविरुद्धमिति चेद्धन्त तर्हि न्यायसाम्याज्जगतोऽपि तथाभावाभ्युपगम आपद्यते इत्याह **यदीति** ॥ ८६६ ॥

विरुद्धैक्यं चान्ततस्तत्स्थानैक्ये पर्यवस्यति।
सविशेषब्रह्मवादे नायं दोषो भविष्यति ॥ ८६७ ॥

स्वमते तत्त्वमस्यादिवाक्यस्य गतिमाह **विरुद्धेति। अन्ततः** मुख्यार्थासंभवे अमुख्यवृत्त्या। 'आनन्दं ब्रह्मणः' इत्यादिकस्यापि गतिमाह **सविशेषेति** ॥ ८६७ ॥

भेदहीनेऽपि भेदस्य कार्यं स कुरुते यतः।
सतस्सापेक्षभेदस्याप्यभेदो भेदिता च नः ॥ ८६८ ॥

भेदिता धर्मधर्मिभावेन भेदव्यवहारः ॥ ८६८ ॥

भेदस्य भिन्नतावादी तत्सत्यत्वं वदेद्यदा।
तदा किं दूषणं तस्य सदद्वैतं यतोऽस्य न ॥ ८६९ ॥

निर्विशेषब्रह्मवादे सापेक्षनिरपेक्षयोः।
जीवैक्यब्रह्मणोरैक्ये दोषस्यास्यास्ति नौषधम् ॥ ८७० ॥

भिन्नतावादी भेदिनोर्भिन्नतावादी तार्किकः। **किमिति** अपसिद्धान्ताभावेऽपि अनवस्थादोषः वज्रलेप इति भावः ॥ ८६९ ॥ ८७० ॥

तस्माद्भेदश्रुतेरग्रे नैक्यश्रुतिशतस्य ते।
स्वार्थस्य साधने शक्तिः किमुतान्यस्य बाधने ॥ ८७१ ॥

ते श्रुतिशतस्य तव मते मिथ्याभूतस्य श्रुतिशातस्य वन्ध्यासुतवचस इव साधकबाधकत्वायोगात् ॥ ८७१ ॥

किं चैकमेवाद्वितीयं नेहनानेति च श्रुतिः।
सर्वं ब्रह्मेति वा क्व स्याद्यतिविश्वस्य बाधिका ॥ ८७२ ॥

बाधिका मिथ्यात्वप्रतिपादनपरा ॥ ८७२ ॥

तदाभेदपरैवाभून्नाभेदपरता श्रुतेः।
अबाध्यबाध्ययोर्भेदो यतोऽवश्यमपेक्षितः ॥ ८७३ ॥

अबाध्यबाध्ययोः ब्रह्मविश्वयोः। एवं अभेदप्रतिपादनेऽपि भेदोऽवर्णनीयः। तदुक्तं वादावल्याम्। 'तद्विरुद्धः तद्भिन्नः तदभावो वा नञर्थो वाच्यः। पक्षत्रयेऽपि दुष्परिहरो भेदः। भेदाभावग्राहिणाऽपि प्रतियोगिविलक्षणतया स्वविषयो व्यवस्थाप्यः' इति ॥ ८७३ ॥

जीवभेदे त्वभेदाप्त्या बाध्यत्वाशास्तु वा तव।
अभेदो यस्य नैव स्यात्तद्भेदः केन बाध्यते ॥ ८७४ ॥

किं च तिष्ठतु जीवब्रह्मभेदः। जडभेदबाधनस्य तु काऽपि श्रुतिरीष्टे। त्वया जडब्रह्माभेदबोधकत्वस्य कुत्रापि श्रुतावनङ्गीकारात् इत्याह **जीवेति** ॥ ८७४ ॥

विश्वबाधेऽपि विश्वस्माद्यो भेदो ब्रह्मणि स्थितः।
धर्म्यभिन्नस्य तस्यालं कथं बाधायते श्रुतिः ॥ ८७५ ॥

किञ्च भेदमात्रबाधनं नाद्वैतश्रुतेः संभवति ब्रह्मधर्मिकविश्वप्रतियोगिभेदस्य बाधासंभवादित्याह **विश्वेति**। तत्र हेतुमाह **धर्मिति** ॥ ८७५ ॥

धर्मिनाशेऽपि भेदोऽयमविनाशी मते तव।
तद्बाध्यजगतो भेदोऽप्यबाध्यस्स्यात्सुखेन ते ॥ ८७६ ॥

अन्योऽन्याभावस्य त्वया नित्यत्वाङ्गीकाराच्चैवं इत्याह । **तवेति** ॥ ८७६ ॥

अभावद्वैतवादे तेनान्योन्याभावबाधिका।
श्रुतिरेषा युक्तबाधो युक्तो नायुक्तबाधनम् ॥ ८७७ ॥

अभावधर्मा नाद्वैतं घ्नन्ति इति मण्डनमिश्रमतमनुरुध्याह **ते इति**। तादात्म्याभावस्यैव भेदत्वादिति भावः। किञ्च बाध्यत्वाबाध्यत्वरूप-विरुद्धधर्माधिकरणत्वेन उपपत्तिसिद्धः बाध्याबाध्ययोर्भेदो न बाधार्ह इत्याह **नेति**। अयुक्तं उपपत्तिविरुद्धं च तद्बाधनं चेति विग्रहः ॥ ८७७ ॥

न चेज्जीवोऽपि बाध्यस्स्यादतो भेदो न चाल्यते।
भेदमिथ्यात्वानुमाने ततोऽत्र व्यभिचारिणि ॥ ८७८ ॥

न चेत् उपपत्तिविरुद्धमपि बाधनमङ्गीक्रियते चेत्। जडवज्जीवस्याप्यसत्त्वे मोक्षाभावः स्यादिति खलूपपत्तिविरोधस्तथा सति वाच्यः। स च त्वयैवाकिञ्चित्करः कृत इति भावः ॥ ८७८ ॥

यद्यभेदपरैवेयं श्रुतिस्सर्वा मते तव।
तदा जगदबाध्यं स्यान्मिथ्यात्वाशा गता तव।
अबाध्या भेदमापन्नः कथं बाध्यो भविष्यति॥ ८७९ ॥

यदीति। उक्तं च परेण 'सत्त्वाच्चावरणस्ये'ति सूत्रभाष्ये 'अनन्यदेवकारणात् कार्यमि'त्यवगम्यते। यथा च कारणं ब्रह्म त्रिषु कालेषु सत्त्वं व्यभिचरति एवं कार्यमपि जगत् त्रिषु कालेषु सत्त्वं न व्यभिचरतीति। (भे. प. ब्र. सू. पु. २१८) ॥ ॥८७९ ॥

व्यतिरेकेण चासत्त्वमसत्त्वं चेत्स्मरोदितम्।
सत्त्वमव्यतिरेकेण यदि तर्हि न बाध्यता ॥ ८८० ॥

व्यतिरेकेणेति। केनापिरूपेण कालत्रयेऽप्यसतः जगतो ब्रह्मव्यतिरेकेणाभावः इति विशेषरूपेण निषेधायोगात्। (भे. प. २१९) यथाकथञ्चिज्जगतो बाधेऽपि तत्प्रतियोगिकस्य ब्रह्मधर्मिकस्य भेदस्य धर्मिस्वरूपस्य बाधासंभवादिति दूषणं स्मारयति **स्मरेति** ॥ ८८० ॥

सर्वैक्यं सर्वबाधं वा सेयं श्रौतपदावली।
वदेज्जीवैकता वार्ता नैषु वाक्येषु शोभते ॥ ८८१ ॥

श्रौतपदावली। सामानाधिकरण्येन असङ्कुचितजीवजडात्मकस्य सर्वस्य ब्रह्मैक्यबोधिनी। यद्वा तद्व्यतिरेकेणासत्त्वबोधतात्पर्यकत्वे सर्वस्य बाधबोधिनी। **जीवैकतेति** सर्वशब्दार्थं विभज्य जीवस्याभेदं, जडस्य बाध्यत्वं इति वार्ता। **न शोभते** सकृदुक्तः शब्दः सकृदेवार्थमवगमयतीति न्यायविरोधादिति भावः ॥ ॥८८१ ॥

तत्त्वमस्यादिवाक्ये स्यात्कथा तस्याः कथञ्चन।
नञा छिन्नपदा सान्यैर्न त्वदर्थे पदं क्षिपेत् ॥ ८८२ ॥

कथा वार्तामात्रम्। **कथञ्चन** श्वेतकेतुजीवमात्रैक्यबोधकत्वेन। 'अतत्त्वमसीति नवकृत्वोपदेशः सदृष्टान्तकः' इति तत्त्वनिर्णयोक्तिं हृदि कृत्वाऽऽह **नञेति।** छिन्नपदापदच्छेदे कृते सति। अन्यत्र छिन्नपादेति ध्वनिः ॥ ८८२ ॥

तन्महावाक्यराशेस्ते मिथ्यात्वैक्यपरत्वयोः।
भेदस्य सत्यता विश्वसत्यता वा भवेद्ध्रुवम् ॥ ८८३ ॥

मिथ्यात्वपरत्वे मिथ्यासत्ययोः भेदसत्यत्वम्। ऐक्यपरत्वे ब्रह्मवत्सत्यत्वं इति विवेकः ॥ ८८३ ॥

जीवैक्यमात्रवाक्प्रायः श्रुतौ न श्रूयते क्वचित् ।
सर्वस्यैक्ये मृषात्वे वा नोक्तदोषद्वयौषधम् ॥ ८८४ ॥

मात्रेति जडप्रपञ्चाज्जीवान् पृथक्कृत्य तन्मात्रेत्यर्थः ॥ ८८४ ॥

क्वचिज्जीवैक्यवाक्तत्तद्धर्माणां सत्यतां दिशेत् ।
विशिष्टैक्येन चेन्मिथ्याभूतधर्मभिदां दिशेत्॥ ८८५ ॥

परेणानङ्गीकृतत्वेऽपि संभावितत्वेन विकल्पः । **सत्यतां दिशेत्** 'निर्दोषश्रुतिसाक्षिभ्यां प्रमिते ब्रह्मजीवयोः । सर्वशक्त्यल्पशक्तित्वे मिथ्येति च न युज्यते' इत्युक्तदिशेति भावः । न चैवं विरुद्धधर्माधिकरणत्वयुक्तिविरोधः । अभेदश्रुत्या युक्तेराभासीकरणात् । **न चेदिति** । धर्माणां मिथ्यात्वमुक्त्वा चिन्मात्रैक्यमुच्यते चेदित्यर्थः ॥ ८८५ ॥

अद्वितीयमिति श्रुत्या द्वितीयाद्भिन्नतैव हि ।
सिद्ध्येदनश्व इत्युक्त्या यथाश्वादन्यता गजे ॥ ८८६ ॥

अद्वितीयमिति । तथा च ब्रह्म तृतीयं प्रथमं वा स्यात् । नञः पर्युदासार्थत्वाश्रयणात् । सुडं नपुंसकस्य इति सूत्रे 'नार्षेयं वृणीते न होतारं' इति च श्रुतौ तदर्थस्यैवाश्रयणात् । (न्या. २६९) लोकेऽपि निदर्शनमाह **अनश्व इति** ॥ ॥८८६ ॥

अश्वो नेति ह्यनश्वोऽभूद्गजस्तत्पुरुषाज्ञया ।
बहिरङ्गाद्बहुव्रीहेस्समासः प्रबलो ह्ययम् ॥ ८८७ ॥

बहिरङ्गादिति । श्रौतनञ् द्वितीयपदार्थौ विहाय अन्यब्रह्मपदार्थकात् ॥ ॥८८७ ॥

द्वितीयाद्भिन्नतैव स्याद्द्वितीयं नेति विग्रहे ।
न घटोऽयमिति प्रोक्ते घटभेदो यथा पटे ॥ ८८८ ॥

भिन्नतैव तृतीयत्वादिः तथा चैकवाक्यता। प्रसज्यप्रतिषेधार्थकत्वे तु वाक्यभेदापत्तिः ॥ ८८८ ॥

किञ्चाद्वितीयशब्दोऽयं लयस्थब्रह्मगोचरः।
अतो जगत्प्रागभावध्वंसो नञ्वक्ति नापरम् ॥ ८८९ ॥

द्वितीयध्वंसवद्वा तत्प्रागभाववदेव वा।
ब्रह्म स्यान्नहि मिथ्यात्वलब्धिरे तावता तव ॥ ८९० ॥

नञो दुराग्रहो नास्ति विरुद्धस्यैव बोधने ॥ ८९१ ॥

अस्तु बहुव्रीहिः। तथाऽपि न मिथ्यात्वसिद्धिः। न पूर्वजगद्ध्वंसः उत्तरजगत्प्रागभावः इत्यर्थकत्वस्यैव ग्राह्यत्वात्। अत्यन्ताभावार्थकत्वं तु नैव संभवति। प्रलयेऽपि कालप्रकृत्यादीनां सद्भावेन तन्निषेधायोगात् इत्याह **अत इति** ॥ ८८९ ॥ ८९० ॥ ८९१ ॥

त्रिकालासत्त्वरूपं ते मिथ्यात्वं हि सतः पुरा।
लये लीनस्य नैवाभून्नापि पश्चाद् भविष्यतः ॥ ८९२ ॥

उत्पत्तिविरोधवतो जडतोऽसत्त्वं विरुद्धमित्याह **त्रिकालेति**। उक्तं हि 'न निरोधो न चोत्पत्तिरि'ति गौडपादकारिकाव्याख्याने परेणैव। सतो घटादेः हि उत्पत्तिर्विनाशो वा दृष्टः। नासतः शशविषाणादेरिति ॥ ८९२ ॥

जगच्च सर्वमेतादृगनीदृक्छृङ्गमस्ति ते ॥ ८९३ ॥

एतादृक् प्रागभावप्रध्वंसयोः प्रतियोगि। **अनीदृक्** अत्यन्ताभावप्रतियोगि। अपहसति **ते इति** ॥ ८९३ ॥

यदि तस्यैव मिथ्यात्वमाशास्से पशुता तदा।
त्वत्तो गतेति जीवैक्यवादो भग्नस्तवैव हि ॥ ८९४ ॥

अद्वितीयपदस्य ममशृङ्गात्यन्ताभाव एवार्थोऽस्त्वित्यत आह **यदीति**। शृङ्गवतः पशोः शृङ्गरहितेन त्वया विरुद्धधर्माधिकरणत्वेन भेदप्राप्त्या पशुजीवस्य त्वयैक्यासिद्धिः। सा च तव जीवैक्यवादिनः सिद्धान्त इत्याह **भग्न इति** ॥ ८९४ ॥

अग्रशब्दोक्तकालस्य सत्त्वात्तत्समयेऽपि च।
द्वितीयशून्यं तद्ब्रह्म न तदा नान्यदाऽप्यभूत्॥ ८९५ ॥

कालस्येत्युपलक्षणम्। 'सलिल एको द्रष्टा' इति सलिलस्य 'तदैक्षत नामरूपे व्याकरोदि'ति ईक्षणनामरूपात्मकप्रपञ्चस्य तत्रैव पूर्वोत्तरवाक्यैः सत्त्वावगमादित्यपि द्रष्टव्यम् (न्या. २६६) ॥ ८९५ ॥

स्वासिनैव स्वयं छिन्नः कालस्य कुटिला गतिः।
यत्स्वाभिमतवाक्येन स्वस्यैवाभूत्पराभवः ॥ ८९६ ॥

स्वासिना स्वपक्षसाधकतयोदाहृतवाक्यगतेन अग्रे इति पदेन प्रतिपाद्यकालाख्यद्वितीयवस्तुना। अहो बत अनर्थकरोऽयं कालो मायिन इत्याह **कालस्येति** ॥ ८९६ ॥

नष्टिर्महदवज्ञायामर्थस्य स्यात्पदे पदे।
यदच्युतस्य नीचैक्यवादैः कुप्येत्पदावली ॥ ८९७ ॥

महदवज्ञायां ब्रह्मणो नीचजीवैक्यबोधनेन निन्दायाम्। **पदे पदे** अग्रसलिलाद्वितीयादिपदबोधितस्य **अर्थस्य** कालादिकस्य **नष्टिः** अपलापः। अन्यत्र प्रतिपदं वित्तनाशः ॥ ८९७ ॥

नेह नानेति वाक्यं च नानाभूतं न किञ्चन।
ब्रह्मणीत्याह तेनैक्यं सर्वस्य जगतो भवेत् ॥ ८९८ ॥

अनृतस्य जडस्यास्य सर्वस्यैक्यं तवापि न।
किञ्चनेति पदस्यार्थश्चिन्मात्रं न कथञ्चन ॥ ८९९ ॥

नेहनानेति वाक्यस्य सिद्धान्तार्थं प्रतिपिपादयिषुः तत्परिशुद्धये पराभिमतं अनूद्य दूषयति **नेहेति**। किञ्चनशब्दस्य जगदित्यर्थः पराभिप्रेतः। तत्र नाना नास्तीति ब्रह्मणा जगत ऐक्यमुच्यते उत नास्तीति स्वरूपतो मिथ्यात्वम्। **नाद्यः** तथा सति **सर्वस्य** चेतनाचेतनस्य ऐक्यं बोधितं भवेत् तच्च चिन्मात्रैक्यवादिनस्तवापि नेत्याह **अनृतेति** असङ्कुचितस्य किञ्चनेति पदस्य चिन्मात्रमर्थो नैवेत्याह **कथञ्चनेति**॥ ॥८९८॥८९९॥

अतो नैक्यश्रुतिरियं नापि मिथ्यात्ववादिनी।
नानापदेन चेहेति पदेन च विरोधतः ॥ ९०० ॥

मिथ्यात्वमपि नैतच्छ्रुत्यर्थः संभवतीत्याह **नापीति**। तथात्वे किञ्चन नास्तीत्येतावता पूर्तेऽर्नानापदस्य इहपदस्य च वैयर्थ्यापातादित्याह **नानेति**॥ ॥९००॥

अभिन्नसत्त्वमन्यत्र सत्त्वं वा यत्तयोर्मतम्।
अतस्स्वगतधर्मेषु स्वावतारेषु किञ्चन।
नानाभूतं नेति हरेस्तैरैक्यं वक्ति वागियम् ॥ ९०१ ॥

न केवलं वैयर्थ्यं विरोधश्चेत्याह **अभिन्नेति**। विशिष्टनिषेधः सति विशेष्ये बाधे विशेषणमुपसंक्रामतीति न्यायेन 'न जीर्णमलवद्वासाः स्नातकः स्यात्' इत्यत्रेव नाना नास्तीत्युक्ते अभिन्नसत्त्वस्य इह नास्तीत्युक्तेऽन्यत्र सत्त्वस्य च प्राप्तेरित्याह **मतमिति**। अतः किञ्चनशब्दः प्रकृतधर्मादिपर एव सर्वनामत्वात्। तदुक्तं न्यायामृते वाक्यशेषस्थधर्माख्यविशेषे पर्यवस्यति। किञ्चनेति हि शब्दोऽयमक्ताशब्दो घृते यथेति। **तैरैक्यं** = धर्मैरवतारान्तर्याम्यादिरूपैरैक्यम्॥ ९०१ ॥

घटेन जलमित्युक्तिर्यथा तद्गं जलं क्षिपेत्।
नेहनानेति वाक्तद्वत्स्वगतं भेदमाक्षिपेत् ॥ ९०२ ॥

यद्वाऽत्र नानाशब्दो हि नानात्वार्थः। भावप्रधानत्वात्। 'लोके च नानाशब्दस्य पृथग्भाववाचित्वादिति कैयटोक्तेश्च। तथा चेहपदसमभिव्याहारेण घटेन जलमित्यत्रेव स्वगतभेद एव निषिध्यत इत्याह **घट इति** ॥ १०२ ॥

अतः काचन नानेह नेत्यर्थो वा भवेच्छ्रुतेः ॥ १०३ ॥

नाना भिदा। काचनशब्दस्तु गुणगुण्यवयवावयव्यादिप्रयुक्तानेकनानात्वाभिप्राया ॥ १०३ ॥

अथवा नेहनानेति प्रतिषिध्य भिदां हरौ।
भेदव्यवहृतेरस्ति किञ्चनालंबनं त्विति।
श्रुतिर्विशेषमाचष्ट पदस्वारस्यसंपदा ॥ १०४ ॥

अत्र वाक्यद्वयम्। 'नेहनाना' इति भागः स्वगतभेदं निषेधति। 'किञ्चन अस्ति' इति च भेदव्यवहारनिर्वाहकं विशेषाख्यं पदार्थसामर्थ्यमस्तीति विधत्ते इत्याह **श्रुतिरिति** ॥ १०४ ॥

नेहनानेतिवाक्याच्च यदि नास्त्येव ते जगत्।
असत्यात्पारमार्थ्येन नास्तीति तु पदान्तरम् ॥ १०५ ॥

कुतोऽध्याह्रियते तर्हि भ्रान्त्येति पदमाहर।
एवं सर्वस्य जगतोरक्षयाभैक्षवान्भव ॥ १०६ ॥

किञ्चानेन वाक्येन किं जगतः स्वरूपेण निषेधः। उत पारमार्थिकत्वाकारेण। नाद्यः अपसिद्धान्तादित्याह **असदिति**। न द्वितीयः। अध्याहारदोषात् इत्याह **कुत इति**। उक्तं हि परेणैव 'न हि अक्षरबाह्यो वाक्यार्थ' इति। अध्याहारोऽपि पूर्वोत्तरानुगुण्येनैव भवेत्। तथा च 'भ्रान्त्या' इति पदाध्याहारः एव युक्त इत्याह **तर्हीति**। एवं अन्नादेः सत्त्वेन कपटभिक्षोस्तव भिक्षाऽपि वा लभ्येतेत्याह **एवमिति** वस्तुतस्तु पारमार्थिकं नास्तीत्युक्तौ व्यावहारिकमस्तीति लभ्यते। तच्च व्याहतम्। व्यावहारिकत्वं नाम कालत्रयेऽप्यसत्त्वरूपबाध्यत्वमेवेति त्वयोररीकारेण पुनः

अस्तीत्युक्तौ भिक्षोस्तव कापट्यमाविष्कृतं भवेत्। तेन च शिक्षार्हत्वमेव नत्वेव भिक्षाऽर्हत्वमिति ध्येयम् ॥ १०५ ॥ १०६ ॥

यदेवेह तदेवामुत्रेत्याद्यं वाक्यमीशितुः।
अवतीर्णस्य वैकुण्ठवासिनश्चाभिदां जगौ ॥ १०७ ॥

तद्भेददर्शनस्यानर्थोक्त्या सैव न्यवारयत्।
भेदाभेदनिवृत्त्यर्थं भिदां तस्य परात्मनः ॥ १०८ ॥

स्वमते उपक्रमानुगुण्यं त्रिभिराह **यदेवेति** अत्र पूर्ववाक्ये इहेति भूलोकस्य अमुत्रेति परलोकस्य च सत्त्वमुक्त्वा तद्गतरूपयोरेव भेदनिषेधः। लोकयोरेव निषेधाभिप्राये इदं च अदश्चन इति वाक्यविन्यासः स्यात्। **सैव वाक्** 'मृत्योः स मृत्युमाप्नोति' इति वाक्यशेषः। भिदां न्यवारयत् इत्यन्वयः ॥ १०८ ॥

तत्रापि कारणं वक्तुं नेहनानेति वाक्पुनः।
तद्भेदमाक्षिपच्चेति युक्तं प्रक्रमविक्रमात् ॥ १०९ ॥

कुतो 'भेददर्शनमनर्थकरमित्यतः भेदस्यासत्त्वादेवेति कारणोक्तिपरं नेहनानेति वाक्यं इति सङ्गतिं विशदयति **तत्रापीति** ॥ १०९ ॥

अतो भेदस्य मिथ्यात्वादेव धर्मेषु भेददृक्।
विनिन्दिता यतो नास्तीत्यादौ सैव तमच्छिनत् ॥ ११० ॥

अतो भेदस्यासत्त्वेन तद्दर्शनस्य मिथ्याज्ञानत्वादेव अनर्थकरत्वम्। न तु पुनः यथा 'न नग्नां स्त्रियमीक्षेत' इत्यत्र दर्शनमात्रस्य अनर्थकरत्वं न तु स्त्रियः स्वरूपेण निषेधः, न तथात्र किन्तु स्वगतभेदस्यैव स्वरूपेण निषेधः इत्याह **सेति** नेहनानेति श्रुतिरेव तं भेदम्। एवमेव 'एवं धर्मान् पृथक्पश्यन् तानेवानुविधावती'त्यपि धर्मभेदस्यैव स्वरूपेण निषेधो न तु दर्शनमात्रस्य निन्देति अवतारभेदमिव धर्मभेदमपि निषेधता नेहनानेति श्रुत्यैव ज्ञायते ॥ ११० ॥

ईशानो भूतभव्यस्येत्युपसंहार वा क्व ते ।
अनीशजगदद्वैतं भिनत्तीति मतिर्मम ।
तत्रैव तादृगेवेति यत्फलोक्तिश्च भेदवाक् ॥ १११ ॥

अनीशेति विरुद्धधर्मस्फोरणाय । भिनत्ति बाधते । तादृगेव तत्सदृशमेव । सादृश्यं च भेदव्याप्तमिति मोक्षेऽपि भेदः तत्पारमार्थिकत्वं च सिध्यति । तथा च न क्वापि श्रुतेरभेदोऽर्थः ॥ १११ ॥

किं च नास्तीत्यभावस्य वर्तमानत्वमात्रता ।
कीर्त्यतेऽतस्त्रिकालस्थाभाववार्तापि नात्र ते ॥ ११२ ॥

मिथ्यात्र परता तस्मादस्मिन्वाक्ये न शोभते ॥ ११३ ॥

वार्तेति कालत्रयवृत्त्यभावबोधकपदाभावादेवेति भावः ॥ ११२ ॥ ११३ ॥

यदस्ति तत्कथं नास्ति ततो ब्रह्मणि यच्छ्रुतम् ।
जडं जगदभेदानर्हं च गर्ह्यात्र तत्कथा ॥ ११४ ॥

'यस्मिन्निदं सं च विचैधि सर्वं' इति सर्वस्य जगतो ब्रह्मणि अस्तित्वं श्रूयते । एवं 'यस्मिन्देवा अधिविश्वे निषेदुरि'ति देवानां ब्रह्मण्याश्रितत्वं च । अतो नेहनानेति श्रुतिः तद्विरोधेन ब्रह्मणि जगतो नास्तित्वं कथं ब्रूयात् । अत्र उच्यमानाभावप्रतियोगी स्वगतभेद न तु जगत् तद्भेदो वा इत्याह जडमिति ॥ ११४ ॥

अस्तित्वस्यानृतत्वेन नास्तित्वघटना यदि ।
तर्ह्यन्योन्याश्रयो दोषो हन्यादन्यायवादिनम् ॥ ११५ ॥

अस्तित्वस्यानृतत्वे स्यान्नास्तित्वघटना तव ।
नास्तित्वघटनायां स्यादस्तित्वस्यानृतात्मता ॥ ११६ ॥

ननु पूर्वोत्तरवाक्योक्तं अस्तित्वं अनृतं अतो न तावद्विरोधो नास्तित्वबोधकस्येति चेदन्योन्याश्रयः स्यादित्याह तर्हीति । अन्यायवादिनं मायिनं

तदुदितं मिथ्यात्वबोधकशब्दं वा । हन्यात् दूषयेत् अन्यार्थतया व्यवस्थापयेद्वा । अन्योन्याश्रयमुपपादयति **अस्तित्वस्येति**। न चैवं वैपरीत्यं शङ्क्यम् । पूर्वोत्तरवाक्यानां सुबहुत्वेन निरवकाशत्वेन प्रमाणान्तरसंवादित्वेन च प्रबलत्वात् । न हि पञ्चाननः शशशावकाभावमपेक्ष्य वनमवगाहत इति भावः ॥ ११६ ॥

अतस्सारूपभेदस्य धर्मभेदस्य वा हरौ ।
निषेधाय प्रवृत्तेति प्राञ्चोर्थं चोदयन्ति नः ॥ ११७ ॥

हेत्येतत्पदं नोचेन्नेह स्यादिति मे मतिः ।
नानापदं चान्यथा स्यान्नानानर्थप्रदं तव ॥ ११८ ॥

रूपभेदस्य अवतारादिरूपभेदस्य ॥ ११७ ॥ ११८ ॥

अथाऽपि जगदर्थत्वे यदि तेऽस्ति महान्भरः ।
तर्हि किञ्चन नेहास्ति किन्तु सर्वं च नः प्रभौ ।
सर्वाधारे हरावस्तीत्यर्थोस्त्वतिमनोहरः ॥ ११९ ॥

जगदर्थत्वे किञ्चनशब्दस्येति उपस्कर्तव्यम् । इह पृथिव्यादौ । **सर्वाधारे** 'पृथ्वी त्वया धृता लोका देवि त्वं विष्णुना धृता । इमाः प्रजाः सदायतनाः सत्प्रतिष्ठाः' इत्यादिवचनात् मूलतः आधारे । विशिष्य निषेधः शेषविध्यनुज्ञापक इति न्यायादेवेति भावः ॥ ११९ ॥

ब्रह्माहमस्मीति वाक्ये कथमैक्यभ्रमस्तव ।
सुपांसु(रि)लुगितिसूत्रेण प्रथमा सप्तमी यतः ॥ १२० ॥

ऐक्यभ्रमः सर्वेषां पदानां लक्षणया चिन्मात्रपरत्वाश्रयणेन । मुख्यवृत्त्यैव सकलप्रमाणानुगुणार्थसंभवादित्याह **सुपां सुलुगिति** ॥ १२० ॥

अतो ब्रह्मणि वर्तेऽहमित्यर्थे शास्त्रसंमते ।
सति सर्वविरुद्धैक्ये न क्वचिद्विभ्रमं कुरु ॥ १२१ ॥

ब्रह्मणि इति यथा मनो ब्रह्मेत्यभेदोक्तिः मनःप्रतीकत्वेन ब्रह्मोपासनाविधायिका न तु मनसो ब्रह्मतादात्म्यबोधिका तथाऽत्रापीति (भे.प. १४) ॥ १२१ ॥

किञ्च चिन्मात्रयोरैक्ये कार्यं द्विपदशिक्षणम् ।
खञ्जवद्वा चरेत्स्वार्थे वाक्यं तत्रैकरक्षणे ॥ १२२ ॥

यद्वा केवलं सामानाधिकरण्यं 'तत्त्वमसी' इत्यत्रेव सादृश्यैक्यपरमस्तु । सिंहस्याध्ययनं इत्यत्रेव सिंहसदृशस्येति प्रातिपदिकस्यैव गौणार्थताऽऽश्रयणेऽपि, तवेव पदद्वयस्य चिन्मात्रे गौण्यपेक्षया जघन्यालक्षणावृत्तिर्मास्तु । लोकन्यायोऽप्येवं रक्षितः स्यादित्याह **खञ्जवदिति** ॥ १२२ ॥

अतो ब्रह्माभिसंबन्धाद्ब्रह्मशब्दोऽस्तु जीवगः ।
अहं ब्रह्मनियम्योऽस्मीत्यर्थश्च त्वखिलप्रियः ॥ १२३ ॥

अङ्गीकृत्येदमुदितं वस्तुतस्त्वनुशासने ।
अनुशिष्टार्थकथनात्स्वार्थत्यागो न मे क्वचित् ॥ १२४ ॥

यद्वा सामानाधिकरण्यं स्वातन्त्र्यैक्यपरमस्तु । लक्षणया ब्रह्मनियम्य इत्यर्थो वाऽस्तु । **अनुशिष्टेति** 'सप्तसु प्रथमा', 'सुपां सुलुगि'त्यादिना इति भावः । यद्वा 'ब्रह्मणि जीवाः सर्वेऽपि परब्रह्मणि मुक्तिगाः । प्रकृतिः परमं ब्रह्म परमं महदच्युतः' इति श्रुत्या तथा बृह जाति जीवकमलासनशब्दराशिषु इत्यभिधानाच्च ब्रह्मशब्दोऽत्र जीवपरोऽस्तु । ईश्वरस्तु परमं महद् ब्रह्म भवतु । 'परमं ब्रह्म वेद ब्रह्मैव भवति' इत्यादौ तथैव तत्त्वनिर्णयादौ व्याख्यानादित्यपि ध्येयम् ॥ १२४ ॥

हिरण्यशृङ्गं वरुणं प्रपद्ये स पुनातु माम् ।
इत्यर्थनं च तत्रोक्तं गच्छेद् ब्रह्म स लोकताम् ।
इत्युक्तब्रह्मसालोक्यं मुख्यैक्ये न हि शोभते ॥ १२५ ॥

अत्राघमर्षणमन्त्रे ब्रह्मशब्दस्य जीवपरत्वं परीक्षयाऽवधारयति **हिरण्येत्यादिना**। तथा हि उपक्रमे प्रपद्ये इति शरणागतिः, पुनात्विति शुद्धिप्रार्थनम्। सालोक्यरूपं फलं इत्येतत् **मुख्यैक्ये** परब्रह्मणा स्वरूपैक्ये **न हि शोभते**। अतः तत्रस्थस्य 'ब्रह्माहमस्मी' इति वाक्यस्य स्वरूपैक्यं अर्थो नैव संभवति ॥ ९२५ ॥

अहमेवाहमित्यन्यात्मतामन्ते प्रतिक्षिपन्।
जीवो ज्योतिः पुरार्द्रोहमित्येवोक्त्वा स मज्जति।
यद्वर्हि जाति जीवादावनुशास्ति स पाणिनिः ॥ ९२६ ॥

अहमेवाहं मां जुहोमि स्वाहा इत्युपसंहारवाक् जीवान्यब्रह्मणि 'अहमित्येव यो वेद्यः स जीव इति कीर्तितः। स दुःखी स सुखी चैव स पात्रं बन्धमोक्षयोः' इत्यत्र निरुक्ताहंपदवाच्यत्वं व्यवच्छिनति। पार्थ एव धनुर्धरः इत्यत्रेव विशेष्यसङ्गतत्वात् एवकारस्य। स्वरूपैक्ये मज्जनक्रियायाः जुहोमि इति पापक्षालकहवनस्यानुपपत्तेः। तदेतदाह **अन्त इति**। 'आर्द्रं ज्वलति ज्योतिरहमस्मि' इति **पुरा** पूर्ववाक्ये ॥ ९२६ ॥

आर्द्रं तीर्थांबुनि स्नातं रूपं मेऽघविवर्जितम्।
ज्वलत्यनलवत्तेन ज्योतिरस्मीति चाब्रवीत् ॥ ९२७ ॥

तद्व्याख्याति **आर्द्रमिति** ॥ ९२७ ॥

परंब्रह्म परंज्योतिः परार्द्रो यः कृपार्णवे।
नासावहमिति प्राह योऽसौ स्वस्याघमर्षणः ॥ ९२८ ॥

'परंब्रह्म परंधाम', परंज्योतिरुपसंपद्य, इत्यत्रोक्तः, **कृपाऽर्णवे** अपरिमितकारुण्यगुणे **आर्द्रः** नित्यसंबद्धः तत्स्वरूप इति यावत्। **असौ** नारायणः **न अहं** ब्रह्माहमस्मीत्यत्र अहंपदतात्पर्यविषयो नैव। तत्र हेतुः **स्वस्येति**। न जातु पापिना तत्परिहारकस्यैक्यं सङ्घटीतीति भावः ॥ ९२८ ॥

किञ्चाहमर्थो नात्मा ते ब्रह्माहमिति वाक्ततः।
जडाहंकृत्यैक्यमाह न जीवैक्यं भवन्मते ॥ ९२९ ॥

अनात्मा चिदचित्संवलनात्मकोऽहङ्कारः न जीवः। यथाऽऽह 'अथातः अहङ्कारादेशः अथात आत्माऽऽदेश' इति श्रुतौ पृथगुपदेशात्' इत्यादि। (न्या. १७०) ॥ १२९ ॥

मानसाहंकृतेरारोपाधिष्ठानचितैव हि।
सिद्ध्येल्लक्षणयाऽप्यैक्यं न तु जीवचिता सह ॥ १३० ॥

ननु संवलनात्मकवाचकस्य एकदेशचिति लक्षणाऽऽश्रीयते इति चेत् एवमपि चितैव ब्रह्मैक्यं सिध्येत् न तु जीवेनेत्याह **मानसेति** ॥ १३० ॥

मणिं सूत्रनिरूढं च त्यक्त्वा कः काचमाश्रयेत्।
कथं शक्रस्य पदवीं भिक्षुको रोढुमिच्छति ॥ १३१ ॥

सूत्रनिरूढं पाणिन्यादिसूत्रसंसिद्धम्। **मणिं** ब्रह्माधीनोऽहं इत्येवंरूपं निर्दोषमर्थम्। **कः** कुत्सित एव आश्रयेत् न तु प्रेक्षावान्। **यद्वा सूत्रनिरूढं** सूत्रतात्पर्यविषयं **मणिं** प्रधानम्। 'मणिर्मुखं प्रधानं' चेत्यभिधानात्। विष्णोर्गुणोत्कर्षं परमपुमर्थप्रदम्। **काचं** अधमं अधमगतिहेतुं 'ईश्वरोऽहिं' इत्यर्थम्। 'ततो यान्त्यधमां गतिम्' इति स्मृतेः। अत्र अर्थान्तरं न्यस्यति **कथमिति** इच्छन्वा अधः पततीति भावः। 'अयोग्यमिच्छन् पुरुषः पतत्येव' इति स्मृतेः ॥ १३१ ॥

यतस्तदात्मानमेवावेदित्यवदधारवाक्।
अहंब्रह्मास्मीतिवाक्यं ब्रह्मवाक्यतया स्फुटम् ॥ १३२ ॥

अतस्सा केवलं तस्यै कस्यैव ब्रह्मता वदेत्।
अन्ययोगव्यवच्छेत्त्री हन्यादवधृतिर्न चेत् ॥ १३३ ॥

तत् ब्रह्म, **आत्मानं एव** न त्वन्यं जीवं, **अवेत्** अजानात् ज्ञानप्रकारमाह **अहमिति। अवधृतिः** आत्मानमेव इति विशेष्यसङ्गत एवकारः ॥ १३३ ॥

विशेष्यसङ्गतस्यैवकारस्य बुधमण्डली ।
अन्ययोगव्यवच्छेदमर्थं यत्रत्यपद्यत ॥ १३४ ॥

विशेष्येति विशेष्यताऽवच्छेदकानवच्छिन्ने विशेषणसंबन्धव्युदासार्थत्वस्य पार्थ एव धनुर्धर इत्यादौ दर्शनात् ॥ १३४ ॥

अतो जीवब्रह्मतायां न तां युञ्जीत बुद्धिमान् ।
यत्तेष्वब्रह्मताप्यर्थात्प्राप्ता तद्भेदवागियम् ॥ १३५ ॥

अर्थात् जीवस्य ब्रह्मत्वं विद्यते चेत् सर्वज्ञं ब्रह्म तज्जानीयात् । न तथा ज्ञातवत् । अतस्तत्रास्त्येव । पश्यन् वै तन्न पश्यति । न तु 'तदस्ती'ति श्रुतेः । इति उपपत्तिबलात् ॥ १३५ ॥

ऋषयोनुवदन्त्येतां प्रभोर्वाक्यत्वतः क्वचित् ।
मत्तः परतरं नास्तीत्यादिवाक्यानुवक्तृवत् ॥ १३६ ॥

ब्रह्मवाक्यत्वतः ल्यब्लोपनिमिता पञ्चमी । ब्रह्मवाक्यत्वं अनुसन्धाय । न चानुवादो निष्फलः भेदबुद्धिदार्ढ्यार्थत्वात् । तत्र दृष्टान्तः **मत्त इत्यादि** ॥ १३६ ॥

सोऽहमित्यादिवाक्यस्याप्येवमेव गतिर्भवेत् ।
यो वेत्ति वेदमर्यादां तद्रीत्यै नेदृशं वचः ॥ १३७ ॥

मर्यादां 'पूर्वोत्तराविरुद्धो मानान्तराविरुद्धश्च शास्त्रार्थः' इत्येवंरूपाम् । जहदजहल्लक्षणा अप्रामाणिकी निर्मूला चेति च ॥ १३७ ॥

सर्वं ब्रह्मेति वाक्याच्च किं जडब्रह्मताऽपि ते ।
बाधात्ततस्तु सङ्कोचे जीवादप्यस्तु बाधितात् ॥ १३८ ॥

बाधितात् ब्रह्मैक्यादिति शेषः । नाहं निर्दुःखः इत्यत्रापि साक्षिप्रत्यक्षादिसकलप्रमाणबाधितात् ॥ १३८ ॥

इदं पदार्थो हि जडमनिदं ब्रह्म ते मते ।
अतो जडपरित्यागे पदं तद्धि प्रकुप्यति ॥ १३९ ॥

इदं पदार्थ इति अन्तवन्त इमे देहा इतिवन्निर्देष्टुमर्हः पराक् पदार्थः । अनिदं प्रत्यग्भूतम् । तथा च सर्वं खल्विदं ब्रह्मेति वाक्ये इदं च परीत्यैव परस्य दूषणम् । वस्तुतः सर्वनामशब्दस्य बुद्धिसन्निहितपरामर्शकत्वमेव ॥ १३९ ॥

जडस्य चैक्यं मुख्यं न ततोऽन्यार्थस्तवापि हि ॥ १४० ॥

मुख्यं न । किन्तु आरोपितत्वरूपं अप्रामाणिकम् ॥ १४० ॥

यतस्सर्वं समाप्नोषि तत्सर्वोऽसीति भारते ।
गीतोक्तिस्तद्बलात्सर्वव्यापिदैवार्थ ईर्यताम् ॥ १४१ ॥

तथा च गुणसौरभोक्तरीत्या व्याप्त्यैक्यमेवात्रार्थ उचित इत्याह **सर्वेति** ॥ ॥१४१ ॥

ऐन्द्रं व्याकरणं यस्य मूलरूपं न्यरूरुपत् ।
स पार्थश्शब्दशक्तिज्ञश्शक्तिज्ञो(तः)श्च परात्मनः ॥ १४२ ॥

इन्द्रावतारस्य व्याकरणप्रणेतुः पदपदार्थरूपसंबन्धिद्वयस्वरूपपरिज्ञानवतः शक्तिरूपसंबन्धोपदेशः शिरसा मान्य इत्याह **ऐन्द्रमिति** ॥ १४२ ॥

तज्जलानिति शान्तस्सन्नुपासीतेति पूर्ववाक् ।
उपास्योपासकत्वं हि प्राह तच्च कथं तव ॥ १४३ ॥

जीवहत्येव लक्ष्यत्वे पदयोस्सुविरुद्धता ।
चिन्मात्रस्य तु लक्ष्यत्वे व्यर्थं सर्वपदं तव ॥ १४४ ॥

तस्माज्जायते, तस्मिल्लीयते तेनानिति इति सृष्टिस्थित्यादिकारणत्वेन उपासनाविधायकं तज्जलामिति उत्तरवाक्यम् । एवं **पूर्ववाक्** तदेतद्दृष्टं च श्रुतं

चेत्युपासीत इति उपासनाविधायिका। तन्मध्यपतितं सर्वं खल्विति वाक्यं कथं अभेदं बोधयेदिति भावः। तस्माद् द्वैतवाक्यमध्यस्थमद्वैतवाक्यमुपांशु-याजवाक्यमध्यस्थविष्ण्वादिवाक्यवत् पूर्वोत्तरद्वैतवाक्यानुसारेण ज्ञेयम् (न्या. २६७) ॥ १४४ ॥

यदि सर्वभ्रमाधिष्ठानत्वं सर्वपदोदितम्।
तदा मुख्यार्थसन्त्यागस्सर्वाधिष्ठानतैव च ॥ १४५ ॥

अर्थोऽस्तु लाघवान्मध्ये भ्रमः कस्मान्निवेश्यते।
पूर्वश्रुतावुक्तसूत्ररीत्या वाऽर्थो भविष्यति ॥ १४६ ॥

मुख्यार्थेति त्वदभिमतस्वरूपैक्यरूपेत्यर्थः। सर्वाधिष्ठानतैव अर्थोऽस्तु इति उत्तरश्लोकस्थेनान्वयः। **लाघवादिति**। अन्यथालक्षणायाः भ्रमस्य चेत्यनेकाप्रामाणिककल्पनाऽऽपत्त्या गौरवं स्यादित्याशयः। अस्मत्पक्षे तु पूर्वोक्तरीत्या सुपांसु लुगित्यादिसूत्रानुसारेण मुख्य एवार्थ इति न किञ्चित्कल्प्यमिति भावः ॥ १४५ ॥ १४६ ॥

सप्तसु प्रथमा यस्मात्क्लृप्ता वेदेषु वैदिकैः।
तस्मादद्वैतवाक्यानां लक्षादपि न भीर्मम ॥ १४७ ॥

अद्वैतवाक्यानां सामानाधिकरण्यगर्भितानाम्। द्वैतवाक्यानां तद्विरोधापत्ति-रूपा भीः न। द्वैतवाक्यानां निरवकाशत्वात्। अद्वैताभिमतवाक्यानां अधिकरणार्थे सावकाशत्वाच्चेति भावः ॥ १४७ ॥

यथाश्रुतपदस्यार्थस्यायोगे पूर्वयोगिभिः।
व्यत्यासशासनान्नातिप्रसङ्गो यत्र कुत्रचित् ॥ १४८ ॥

वाक्यस्य याथार्थ्यरक्षणार्थं, 'व्यत्ययो बहुलं छन्दसि' इति सूत्रोक्तविभक्त्यर्थादिव्यत्ययः शास्त्रविहित इत्याह **यथाश्रुतेति**। एवंरूपो व्यत्ययश्च प्रागुक्तस्थले क्वचिदेव न सर्वत्रेति नातिप्रसङ्ग इत्याह **नेति** ॥ १४८ ॥

अतस्तवायुधं सर्वं बलान्नीतं परैर्युधि ॥ १४९ ॥

सामानाधिकरण्यं हि स्वरूपैक्यमभिलषतस्तवायुधम्। तच्च अनेकधा सावकाशितम्। भेदपरतयैव च समर्थितमिति अहो निरायुधस्य भटस्य दुर्दशेत्याह **अत इति** ॥ १४९ ॥

यदेकज्ञानतस्सर्वविज्ञानं च श्रुतौ श्रुतम्।
अतोऽपि न परात्मैक्यं सिद्ध्येदद्वैतवादिनाम्॥ १५० ॥

उद्दालकेन पुत्रमदापनिनीषया 'उत तमादेशमप्राक्षः येनाश्रुतं श्रुतं भवति इति तं प्रति, चोदना कृता। अनेन एकविज्ञानेन सर्वविज्ञानप्रतिज्ञानेन सर्वस्य जगतो ब्रह्मणाऽभेदः सिध्यतीति परप्रक्रिया। तां दूषयति **यदिति** ॥ १५० ॥

यदि स्याद्ब्रह्मविज्ञाने ज्ञेयं जगदिदं च ते।
तदा शङ्कावकाशः स्यान्नैवं किल भवन्मतम्॥ १५१ ॥

इदं चानुपपत्त्या अभेदगमकं इति परस्याशयः। न च स युक्तः। अस्या अर्थापत्तेः सर्वाङ्गविकलत्वादाभासत्वमिति वक्तुं आदौ तावदाक्षेपकस्य प्रमितत्वसिद्धिमाह **यदीति** ॥ १५१ ॥

निष्प्रकारकचिन्मात्रनिर्विकल्पकदृक्तव।
ब्रह्मदृग्जगतोऽज्ञानं तदा कस्यास्ति कथ्यताम्॥ १५२ ॥

एकब्रह्मविज्ञानेन सर्वविज्ञानं आक्षेपकं सर्वस्य ब्रह्मणैक्यमाक्षेप्यम्। तत्राक्षेपकस्य प्रमितत्वं अन्यथाऽनुपपद्यमानत्वं चेति अङ्गे। आक्षेप्यस्य प्रमाणाविरुद्धत्वं तदुपादकत्वं चेति। तत्र आक्षेपकं परारीत्येनासिद्धम्। मुमुक्षुं श्वेतकेतुं प्रति मोक्षहेतुभूतं ब्रह्मज्ञानं खल्वत्रोपदिष्यते। तच्च वेदान्तजन्यचरमवृत्तिज्ञानमेव। यदाह 'श्रुतमयेन ज्ञानेन तत्त्वमभिधाय चिन्तामयीमवस्थामवलम्बमानस्यान्तःकरणपरिणामात्मकं वृत्तिरूपं ज्ञानमुपजायते तेन भवेदविद्यानिवृत्तिरिति। (वादा.) तादृशं च ज्ञानं ब्रह्मप्रातिपदिकमात्रविषयकं

निष्प्रकारकमेव परस्याखण्डार्थवादिनो मतं इत्याह **तव ब्रह्मदृगिति**। जगत इति भिन्नं पदम्। तस्मिन् ज्ञाने जगतः प्रकारतया भानासंमतेरेवेत्याह **तदेति** ॥ ९५२ ॥

अपि चारोपितज्ञानं नाधिष्ठानस्य दर्शने।
अतोऽपि न जगज्ज्ञानं ब्रह्मज्ञानं भवन्मते ॥ ९५३ ॥

चरमब्रह्मविज्ञानप्रशंसार्थं खलु श्रुतिः।
अर्थवादमिमं वक्ति ततश्चरममेव तत्।
वाच्यं त्वयैकविज्ञानं कथं तत्रान्यदर्शनम् ॥ ९५४ ॥

अपि चेति भवन्मते ब्रह्माधिष्ठानं जगच्च तस्मिन्नारोपितम्। न हि अधिष्ठानयाथात्म्यापरोक्षज्ञानवतः तत्र आरोपितविषयकं क्वापि दृष्टचरम्। अपरोक्षदृशो मिथ्यादर्शनं न क्वचिद्भवेत्' इति। (तत्वो.) 'न हि शुक्तिज्ञो रजतज्ञ इत्युच्यते। विरोधात्तयोर्ज्ञानयोः। नेदं रजतमित्यरजतज्ञो हि शुक्तिज्ञो भवति' इति च भगवत्पादोक्तेः (वि.त.नि. ६३२)। अङ्गीकृतं च परैरेवैष नियमः "लोके शुक्त्यादितत्त्वं विजानतां यतोऽध्यस्तरूप्यादि अविज्ञातं भवति, अजानतामेव तु अध्यस्तं विज्ञातं भवति इति प्रसिद्धं, तथा ब्रह्मणि ज्ञेयत्वस्याध्यस्तत्वादेव न तत्त्वविदो ज्ञातं ब्रह्म पश्यन्तीत्यर्थः(आनन्दगिरि के. शां. भा. ९-११-३१)। **चरममेव तत्** मुमुक्षुं प्रत्युपदिष्टत्वात् ॥ ९५३ ॥ ९५४ ॥

अतो भ्रान्तजगज्ज्ञानमधिष्ठानात्मदर्शने।
ज्ञातमित्यपि नैकस्य ज्ञानात्सर्वस्य दृक्कव ॥ ९५५ ॥

तस्माद्भ्रमस्य द्वावंशौ स्त इत्यपि न ते गतिः।
भ्रमानुकूलसामान्यधीर्विज्ञानं कथं वद ॥ ९५६ ॥

यद्यपि भ्रमस्य द्वावंशौ अधिष्ठानसामान्यविषयकं आरोपितविषयकं चेति। तत्र अधिष्ठानसाधारणधर्मज्ञानं आरोपं प्रति च हेतुः। तथाऽपि न तदत्र श्रुत्या

विवक्षितम्। तस्य मोक्षाहेतुत्वेन विज्ञानपदेनोक्त्यसंभवादित्याह विज्ञानमिति ॥ ॥९५५ ॥ ९५६ ॥

एवमप्यखिलभ्रान्तजगदैक्यं भवेत्परम्।
अप्रशंस्य प्रशंसा स्यात्प्रक्रमस्याप्यतिक्रमः ॥ ९५७ ॥

तथात्वे वा भ्रान्तिफलकत्ववर्णनपरमेतद्वाक्यं प्रशंसारूपार्थवादात्मकं न स्यादित्याह **एवमिति** ॥ ९५७ ॥

एकज्ञानेन सर्वस्य ज्ञानं काण्वश्रुतिः पुरा।
प्रस्ताव्यपुनराहैतदमृतत्वमिति स्फुटम् ॥ ९५८ ॥

काण्वश्रुतिसमाख्ययाऽस्य ज्ञानहेतुत्वं समर्थयति **एकेति**। **एतदमृतत्वं**. एतज्ज्ञानं अमृतत्वहेतुः ॥ ९५८ ॥

लाङ्गलं जीवनमिति प्रोक्ते जीवनहेतुता।
यथा याति तथा मुक्तिहेतुता वागियं किल ॥ ९५९ ॥

निमित्तनैमित्तिकयोरभेदव्यपदेशं दृष्टान्तेन उपपादयति **लाङ्गलेनेति**। 'दधित्रपुसं प्रत्यक्षो ज्वरः' 'आयुर्वै घृतं' इत्यादिवैदिकप्रयोगोऽपि द्रष्टव्यः ॥ ९५९ ॥

अतः प्रमैव वाच्येयं सा ते चिन्मात्रगोचरा।
एकज्ञानेन सर्वस्य ज्ञानं तस्मात्कथंवद ॥ ९६० ॥

अतः भ्रमस्य मोक्षहेतुत्वासंभवात् ॥ ९६० ॥

तदनारोपरूपैव वाच्या सा चरमप्रमा।
सर्वस्य नास्तिताज्ञानमपि तत्र न ते मते ॥ ९६१ ॥

निर्विकल्पचरमज्ञाने जगदभावज्ञानस्यापि प्रकारतया भानं न संभवतीत्याह **सर्वस्येति** ॥ ९६१ ॥

यतो ह्यभावविषयं न प्राहुर्निर्विकल्पकम्।
सर्वस्याभावधीस्सा स्यात्सर्वज्ञानं तु तत्कथम्॥ १६२ ॥

निर्विकल्पकवादिभिरपि अभावनिर्विकल्पकं नाङ्गीकृतं चेत्याह **यत इति**। उपेत्याप्याह **सर्वस्येति** ॥ १६२ ॥

घटस्य नास्तिताज्ञानं घटज्ञानं हि को वदेत्।
न चेदद्वैतविज्ञानी परस्यात्वं तु भेददृक् ॥ १६३ ॥

अशाब्दश्चायं प्रजल्प इत्याह **घटस्येति**। **न चेत्** तथात्वेऽपि त्वं वैयात्येन तथा व्यवहरसि चेदतिप्रसङ्गवाह **अद्वैतेति** ॥ १६३ ॥

तदभावकथां वक्तुं तद्भावं कथयेद्धि कः।
अर्थाभावज्ञमर्थज्ञं वक्ति को वा पुमान्भुवि ॥ १६४ ॥

पुमानिति। एवं प्रलापपरः पशुबुद्धिरिति ध्वनिः ॥ १६४ ॥

किं चैवं सर्वविज्ञानमेकज्ञानाद्यदीष्यते।
तदा मिथ्याभूतसर्वजगदैक्यं भवेत्सतः ॥ १६५ ॥

जडजगदैक्याङ्गीकारे जडस्य मिथ्यात्वेन सतो ब्रह्मणो मिथ्यात्वापत्तिं प्रागुक्तां स्मारयति **तदेति** ॥ १६५ ॥

तस्मात्तदेकज्ञानेन सर्वज्ञानं श्रुतीरितम्।
तव नार्थाय कस्मैचिदनर्थायाभवत्परम्।
जीवैक्यस्यानुपायत्वाज्जडैक्यस्यैव चागतेः॥ १६६ ॥

अर्थाय जीवैक्यसिद्धिप्रयोजनाय। अनर्थाय भ्रान्तजडैक्यसिद्धये। तथा च 'सर्वं खल्विदं ब्रह्म' इति श्रुतिव्याख्यानोक्तसर्वदोषाणां तदवस्थतेति घट्टकुटीवृत्तान्तः ॥ १६६ ॥

अतो जैवैक्यमाशास्यं ज्ञाने ज्ञातमिदं जगत्।
प्रदृश्यमानमखिलं किल किं केन सङ्गतम् ॥ १६७ ॥

किञ्च काण्वश्रुतौ 'सर्वं खल्विदं विज्ञातं' इति इदंशब्दः श्रूयते। स च दृश्यमानजडपर एवेति जडैक्यसिद्धिदोषो वज्रलेप इत्याह **इदमिति** ॥ १६७ ॥

विरुद्धो हेतुरुक्तस्स्यान्मिथ्यात्वस्य तु साधने।
चरमब्रह्मविज्ञाने सर्वस्य ज्ञातता यतः ॥ १६८ ॥

जगति दृश्यत्वं नाम चरमप्रमाविषयत्वमिति व्याख्याने प्रमाविषयत्वस्य मिथ्यात्वाभावव्याप्तत्वेन दृश्यत्वहेतोर्विरुद्धतैवेत्याह **विरुद्ध इति** ॥ १६८ ॥

ब्रह्मवज्जगदेतच्च करोति परमार्थसत्।
अतः श्रुत्यर्थकथने तवेष्टं नैव सिद्ध्यति ॥ १६९ ॥

ब्रह्मैक्ये जडस्य परमार्थसत्त्वापत्तिमाह **ब्रह्मवदिति** ॥ १६९ ॥

अश्रुतार्थपरं त्वां तु श्रौतार्थो हन्ति धीमताम्॥ १७० ॥

अश्रुतेति जगदभावेत्यर्थः ॥ १७० ॥

अतस्सत्यत्वचित्त्वाद्यैस्सदृशत्वाच्चराचरम्।
तदङ्गेष्वाश्रितत्वाद्वा तज्ज्ञाने ज्ञायते जगत् ॥ १७१ ॥

धीमतामर्थमाह **अत इति**। सादृश्याभिव्यञ्जकं च सत्यत्वं साधारणम्। चित्त्वं जीवेषु। आदिपदेन मुक्तियोग्येषु इति यथायथं ग्राह्यम्॥ १७१ ॥

दृष्टैकधूमसादृश्याद्धूममात्रस्य धीर्न किम्।
व्याप्तिग्रहाय तच्छब्दवाच्यत्वस्य ग्रहाय वा ॥ १७२ ॥

दृष्टेति। समर्थितं चैतत् 'इति व्युत्पत्तिरपि हि सादृश्येनैव गम्यते' इत्यनुव्याख्यानव्याख्यासुधायां वैशेषिकनये । व्युत्पत्तिः व्याप्तेः कार्यकारणभावस्य, लक्ष्यलक्षणभावस्य च उपलक्षणम् ॥ १७२ ॥

नानालङ्कारगन्धाद्यैरलंकृतनिदर्शने ।
तदलङ्कारगन्धादिदर्शनं च न किं नृणाम् ॥ १७३ ॥

अद्भुतानीह यावन्ति भूमौ वियति वा जले ।
त्वयि विश्वात्मके तानि किं मेऽदृष्टं विपश्यतः ॥ १७४ ॥

आश्रितत्वादित्युक्तं उपपादयति **नानाऽलङ्कारेति** । **सर्वात्मके** सर्वाधारे । सर्वं आत्मनि मय्येति विग्रहः ॥ आत्मशब्दस्य स्वरूपार्थकत्वे त्वयीति अधिकरणसप्तमी विरोधः ॥ १७३ ॥ १७४ ॥

इत्युक्रूरवचः पश्य विश्वरूपं च तं स्मर ।
शिशोर्यस्य किलास्ये प्रागपश्यद्विश्वमम्बिका ॥ १७५ ॥

अंबिका यशोदा ॥ १७५ ॥

त्वयि दृष्टेऽखिला दृष्टा इति ग्रामेश्वरं नरम् ।
अन्यदर्शनजन्यस्य फलस्याप्यत्र संभवात् ॥ १७६ ॥

'प्रधानपुरुषज्ञानाद्ग्रामो ज्ञात इति व्यपदेशोऽस्ति' इति भगवत्पादोक्तिं हृदि कृत्वाऽऽह **त्वयीति** ॥ १७६ ॥

यथा वदन्ति सर्वेषां हरिं सर्वेश्वरं तथा ।
महाफलप्रदातारं प्रशंसति महाप्रभुम् ॥ १७७ ॥

सर्वेश्वरस्य हरेर्ज्ञाने अप्रधानभूतदेवतादिज्ञानसिद्धिरित्येतदेव एकविज्ञानेन सर्वविज्ञानोक्तेरभिप्रायः न तु अभेदो न वा मिथ्यात्वं इत्याह **महाफलेति** ॥ 'ज्ञानादेव सर्वे कामाः संपद्यते' इति श्रुतेः 'तावान्सर्वेषु वेदेषु ब्राह्मणस्य विजानतः' इति स्मृतेश्च ।

(न्या. २८४) अङ्गीकृतश्च सर्वविज्ञानस्य ज्ञातार्थं फलफलिभाव एवेति अद्वैतिभाष्यकारेणापि 'सर्वान् अपि वेदानधीत्य सर्वं चान्यद्वेद्यमधिगम्याप्यकृतार्थ एव भवति यावदात्मतत्त्वं न विजानाति इत्याख्यायिकातोऽवलभ्यते इति शां. भा. । अत्र विस्तरः भेदपराण्येव खलु ब्रह्मसूत्राणि इति ग्रन्थे (प. १०—११) ॥ १७७ ॥

अमुख्योऽर्थोऽपि मुख्यार्थगुणलाभाय कथ्यते ॥ १७८ ॥

श्रुतावमुख्यप्रयोगस्य प्रशंसैव प्रयोजनमित्याह **अमुख्येति** ॥ १७८ ॥

गङ्गापदेन तीरस्य लक्ष्यत्वे तस्य तत्पदात् ।
पावित्र्यमपि यत्सिद्ध्येद्वाक्यं च लघु जायते ॥ १७९ ॥

यदल्पपदवाक्येन बहोर्मुख्यार्थयोगिनः ।
अर्थस्य वक्त्री तद्वृत्तिरियं लोकमता मता ॥ १८० ॥

शब्दलाघवेन बह्वर्थबोधाय एवंविधोऽमुख्यप्रयोगो लोकसिद्ध इत्याह **गङ्गेति** ॥ १७९ ॥ १८० ॥

किं च ब्रह्मणि विज्ञाते सति तस्य प्रसादतः ।
सार्वज्ञं जायते नृणामिति सर्वस्य संमतम् ॥ १८१ ॥

अतः श्रुतिरियं साध्वी ब्रवीत्यखिलसंमतम् ।
इदमेवार्थमित्यासीत्सर्वं श्रुतिमनोहरम् ॥ १८२ ॥

अथवा रूढोपचारोऽयं इति न प्रयोजनगवेषणमित्याह **किं चेति**। 'यो मामेवमसंमूढो जानाति पुरुषोत्तमम् । **स सर्वविद्** इति भगवत्प्राधान्यज्ञानिनः सर्वज्ञत्वव्यवहारात् । सर्वज्ञत्वं च तत्तद्योग्यमेवेति अन्यदेतत् ॥ १८१ ॥ १८२ ॥

सर्वकर्तृत्वसार्वज्ञसर्वेशत्वादिसद्गुणैः ।
सहितस्य हरेर्ज्ञाने सर्वं च ज्ञायते यतः ॥ १८३ ॥

सर्वकर्तृत्वेति। कर्तृत्वादिविशेषणतया सर्वस्य सामान्यतः तत्तद्योग्यतानुरोधेन ज्ञानादिति भावः ॥ ९८३ ॥

अतोऽप्येकस्य विज्ञाने सर्वज्ञानं भवेन्मम।
निर्विकल्पकचिन्मात्रज्ञाने तेऽज्ञकुतोऽन्यदृक् ॥ ९८४ ॥

ममेति 'विष्णोः सर्वोत्कर्ष एव सर्वागमानां महातात्पर्यं' इत्यङ्गीकारिणः। **ते इति।** निर्विकल्पकज्ञानमेवालीकम्। तद्विषयतया अन्यज्ञानप्रत्याशा त्वतिदूरे इति भावः ॥ ९८४ ॥

बर्हिष्मन्नेतदाख्यानं परोक्षेण प्रकीर्तितम्।
यत्परोक्षप्रियो देवो भगवान्विश्वभावनः ॥ ९८५ ॥

इति भगवतोक्त्या च क्वचिद्वाग्वृत्तिरीदृशी।
श्रुतीनां च स्मृतीनां च तत्त्वं गूहयितुं महत् ॥ ९८६ ॥

अमुख्यवृत्तेः प्रयोजनमुक्तम्। त्वादृशानां तमोयोग्यानां मोहनमपि ज्ञानाङ्कुरसंरक्षणायापरं प्रयोजनमित्याह **गूहयितुमिति** ॥ ९८५ ॥ ९९६ ॥

तथा तत्त्वमसीत्याह श्रुतिर्ब्रह्म सदृक्षताम्।
गुणैः कतिपयैर्वक्तुं लोकवेदानुसारिणी ॥ ९८७ ॥

ब्रह्मसदृशतां तेन 'तद्वत्तमसि' इत्यर्थः। तदुक्तं 'तद्गुणसारत्वात्तु तद्व्यपदेशः प्राज्ञवत्' इति सूत्रभाष्ये 'भिन्ना जीवाः परो भिन्नस्तथाऽपि ज्ञानरूपतः। प्रोच्यन्ते ब्रह्मरूपेण वेदवादेषु सर्वशः' इति। 'अन्तरेणापि वर्सि अतिदेशोऽवगम्यते। अब्रह्मदत्तं ब्रह्मदत्त इत्याह तेन वयं मन्यामहे ब्रह्मदत्तवदयं भवती'ति महाभाष्योक्तेः (न्याया. २-२८ प. ५९५) ॥ ९८७ ॥

अतिशूरं नरं प्राहुश्शार्दूल इति यज्जनाः।
अग्निर्माणवकश्चेति यस्माद्वाक्चास्ति वैदिकी ॥ ९८८ ॥

लोकवेदसंमतिं प्रयोगस्य दर्शयति **अतिशूरमिति** ॥ १८८ ॥

अथवा जीवपरयोर्भेदं वक्तुं सविस्तरम्।
प्रावर्तत श्रुतिरियं नाभेदमिति मे मतिः ॥ १८९ ॥

सविस्तरमिति। तथा हि तत्त्वनिर्णये 'अतत्त्वमसीति नवकृत्वोपदेशः सदृष्टान्तकः इति ॥ १८९ ॥

स्वप्नावसानकालीनसुप्त्यवस्थां प्रबोधयन्।
स्वप्नान्तं सौम्य जानीहीत्याह शिष्यं गुरुः पुरा ॥ १९० ॥

'स्वप्नान्तं मे सौम्य विजानीहि' इत्युपक्रमवाक्यं व्याख्याति **स्वप्नेति**। स्वप्नान्तः स्वप्नावसानकालीना सुषुप्त्यवस्था। तत्र जागरस्वप्नयोः शरीरेन्द्रियमनसामितस्ततो विक्षेपेण श्रान्तस्य जीवस्य श्रमापनोदाय स्वापे परमेश्वरायत्तताऽभिधीयते ॥ ॥१९० ॥

यत्र स्वपिति नामायं पुरुषो जीवचेतनः।
स ता ब्रह्मचिता साकं संपन्नस्स्यात्तदाऽप्ययम्।
न तु तद्भावमाप्नोति सेऽयं सुप्तिदशा किल ॥ १९१ ॥

प्राज्ञेन संपरिष्वक्त इति शाखान्तरे श्रुतिः।
प्राज्ञेन संपरिष्वङ्गमेव सुप्तावकीर्तयत् ॥ १९२ ॥

सम्यगालिङ्गनं ह्येव संपरिष्वङ्ग ईर्यते।
सम्यक्प्राप्तिश्च संपत्तिर्भिन्नयोरेव किं न ते।
यदेकस्य न ते दृष्टे दृष्टे सर्वत्र च द्वयोः ॥ १९३ ॥

'यत्रायं पुरुषः स्वपिति नाम सता सोम्य तदा संपन्नो भवति' इति वाक्यशेषं व्याचष्टे **यत्रेति**। संपरिष्वक्त इत्यनन्तरं 'न बाह्यं किञ्चन वेद' इति वाक्यशेषः।

सपरिष्वङ्गः संपत्तिरिति उभे अपि भेदनियते इति भेदसिद्धिरित्याह **सम्यगिति** ॥ ॥१९१ ॥ १९२ ॥ १९३ ॥

अन्तर्हितस्य या प्राप्तिः प्रविष्टस्योदरे हरेः ।
सैवापीति शब्दशक्तिशोधनेन त्वभिन्नता ॥ १९४ ॥

'स्वं ह्यपीतो भवति' इति श्रुतिं विवृणोति **अन्तर्हित इति** । तिरोहितः सन् प्राप्तो भवतीत्येवार्थः । **न त्वभिन्न इति** । अपेरपि धातौ इणश्च गतौ निष्ठायाश्च कर्तरि शक्तेः क्लृप्तत्वादैक्ये योगरूढ्योरभावाच्च । ऐक्यार्थत्वे अतीत इत्यस्य भवतेश्चाकर्मकत्वेन श्रुतद्वितीयाऽयोगाच्च । अत्र विस्तरः न्यायामृते (२-२८ प. ५९७) **अन्यार्थेति** अभेदेत्यर्थः ॥ १९५ ॥

ति(क्ति)न्नन्तोऽत्र यदिण्धातुर्यत्पिधानार्थकोस्त्यपिः ।
अतोऽत्रान्यार्थविन्यासचिन्ता हन्ता फलैव ते ॥ १९५ ॥

सुप्त्युत्क्रान्त्योश्च भेदेन नेत्याह निर्णयसूत्रकृत् ।
यतस्सुप्तौ च मुक्तौ चाभिदा शास्त्रविदोदिता ।
अतो द्विर्बद्धभेदोऽयं सुबद्धोऽभूच्छ्रुतेर्गले ॥ १९६ ॥

सूत्रे च सुषुप्तौ भेदस्यैव समर्थितत्वाच्च न तमां अभेदार्थावकाश इत्याह **सुप्तीति शास्त्रविदा** निर्णायकसूत्रप्रणेत्रा । **द्विः** द्विवारं सुप्तौ मुक्तौ च ॥ १९६ ॥

सुप्तिश्चावान्तरा मुक्तिर्देहादेरप्ययात्तव ।
सुप्तौ मुक्तौ च यन्नास्ति तदैक्यं स्यात्कदा वद ॥ १९७ ॥

सुबद्धः मुक्तिप्रायसुप्तौ मुक्तौ चानुवृत्तस्य पारमार्थिकत्वावश्यंभावात् ॥ ॥१९७ ॥

सदृष्टान्तमिमामेव वेदः प्राबोधयद्दशाम् ।
यतः शकुनिसूत्राख्यनिदर्शनमदर्शयत् ॥ १९८ ॥

सदृष्टान्तमिति अन्यत्रापि श्रुतौ भिन्नश्येननीडदृष्टान्तोक्तिरनुसन्धेया ॥ ॥९९८ ॥

दार्ष्टान्तिके तत्र मनो मन्तृत्वाज्जीव एव तत्।
न चेदुपक्रमोऽन्यस्य स्याच्चान्यस्योपसंहृतिः ॥ ९९९ ॥

दार्ष्टान्तिके 'एवमेव खलु सोम्यैतन्मनः' इति वाक्ये 'मननान्मन उद्दिष्ट' इति प्रमाणाज्जीवः एव मनःशब्दार्थः। 'यत्रायं पुरुषः स्वपिति नाम' इति पुरुषशब्देन तस्यैवोपक्रान्तत्वादित्याह **मन इति** ॥ ९९९ ॥

शकुनेश्शकुनाच्चायं जीवस्तत्रापि जीवति।
यच्चेतनोपमा प्रायश्चेतनस्यैव शोभते ॥ १००० ॥

शकुनेः शकुनात् प्रवासोपक्रमे शुभसूचनात् न जीवभयं तथाऽत्रापि शकुनेश्चेतनरय जीवस्य दृष्टान्तीकरणान्न जीवभावापगमेन ऐक्यभयमिति साहित्यमुद्रयाऽऽह **जीव इति** ॥ १००० ॥

किञ्चान्तःकरणाख्यं ते मनो लीनं तदा तव।
प्राणसंश्रयता तस्य कथं लीनस्य कथ्यते ॥ १००१ ॥

मनःशब्दस्यान्तःकरणार्थकत्वं परस्यापि दुर्घटमित्याह **किञ्चेति**। प्राणबन्धनमित्युक्तं प्राणाश्रितत्वं प्रलीनस्य न संभवतीत्याह **प्राणेति** ॥ १००१ ॥

यतश्चोपरि तत्स्थाने प्रजाशब्दं हि जीवगम्।
सन्मूला एव सोम्येमाः प्रजा इति वदिष्यति।
अतो मनःप्राणशब्दौ जीवब्रह्मपराविमौ ॥ १००२ ।

इति भेदं सदृष्टान्तं प्राक्प्रस्ताव्यपुनर्गुरुः।
तत्त्वमस्यादिवाक्येन कथमैक्यं वदेद्वद ॥ १००३ ॥

यस्त्वारब्धार्थमुत्सृज्य द्विरूपाया गिरो भरात्।
मध्येऽन्यार्थमपि व्यर्थमाशास्ते मद्यपाय्यसौ ॥ १००४ ॥

स्वारब्धार्थं उपक्रमे सदृष्टान्तमुपपादितं भेदरूपार्थम्। **उत्सृज्य** दुराग्रहादपलप्य। द्विरूपायाः सावकाशायाः गिरः तत्त्वमसिवाक्यस्य **बलात्** आपातार्थे मोहात् **अन्यार्थं** अभेदरूपम्। **आशास्ते** केवलं दुराशां करोति। न तु पुनः स्वार्थसिद्धिः। **मद्यपायी** अतितामसः सर्वार्थान् विपरीतांश्च बुद्धिः सा पार्थ तामसी' इति लक्षणसमन्वयात् ॥१००२ ॥१००३ ॥ १००४ ॥

सत्यतत्त्वमसीत्यस्मदर्थे मुख्येन लक्षणा।
न ते श्लोक्यं नापि शक्यं शक्यैक्यं
तेन शोक्यसि ॥ १००५ ॥

सति अतत्वमिति पदच्छेदे मुख्ये मदर्थे सतीत्यन्वयः। न लक्षणा युक्तेति शेषः। शक्ययोः मुख्यार्थयोरैक्यम्। न शक्यं स्वीकारानर्हम्। न स्वीकृतं च। 'ऐक्यं नयोर्लक्षितयोर्न वाच्ययोः' इति तेनेवोक्तेः। **शोकी** श्रुतीनामखण्डार्थ-परत्वरूपाऽप्रामाण्यशङ्काऽनेन तमसि सुबहुलदुःखवान् ॥ ॥१००५ ॥

तत्त्वज्ञानश्रुतौ तस्मात्तत्त्वज्ञो मत्त एव सः ॥ १००६ ॥

तस्य भावः तत्त्वं ब्रह्मैक्यं तज्जानातीति तत्त्वज्ञः न तत्त्वज्ञः यथार्थज्ञानवान्न अत्र विरोधाभांसद्वयम्। तत्त्वज्ञः ब्रह्मैक्यज्ञानी न तत्त्वज्ञः। किन्तु ब्रह्मभावं स्वस्य अजानानः अतत्व एव तत्वज्ञः इति ॥ १००६ ॥

यत्सत्प्रतिष्ठसन्मूलसदायतनतां श्रुतिः।
प्रजाशब्दोक्तजीवानां वक्ति तत्रैव सादरम्।
अतस्त्रिधा प्रजानां च सतश्चोक्तैव भिन्नता ॥ १००७ ॥

सन्मूलाः इति सृष्टेः प्राक् । सदायतनाः इति मध्ये । सत्प्रतिष्ठाः इति मुक्तौ इत्येवं अवस्थात्रये सच्छब्दाभ्यासेन सतः ब्रह्मणः प्रजानां जीवानां च भेदकथनात् सादरमित्युक्तम् ॥ १००७ ॥

लवणोदकदृष्टान्ते स्पष्टं भेदो निदर्शितः ।
यन्नैक्यं भिन्नरसयोर्योगेऽप्यालोडनं परम् ॥ १००८ ॥

भिन्नरसयोः बहुव्रीहिः । जलस्य मधुरं लवणस्य लवणं रसमित्येवं भिन्नौ रसौ ययोस्तौ तयोः जललवणयोः । **योगेऽपि** मिश्रणेऽपि । **नैक्यं** न स्वरूपैक्यं किन्तु **आलोडनं** स्थानैक्यमेव ॥ १००८ ॥

यथा तप्तोदके रूपस्पर्शाभ्यामभिभूतयोः ।
अबग्न्योरुभयोर्यागस्तथैव लवणोदके ।
रूपाभिभूतलवणे रसस्याभिभवोजले ॥ १००९ ॥

यथेति तप्तोदके तेजसो रूपमात्राभिभवो न उष्णस्पर्शस्य जलस्य स्पर्शमात्राभिभवो न तु रूपस्य तथाऽपि स्वरूपभेदः, तथाऽत्रापि लवणस्य रूपाभिभवो न रसस्य, उदकस्य रसाभिभवो न रूपस्य स्वरूपे तु भिन्ने एवेत्याह **यथेति** ॥ १००९ ॥

नदीसमुद्रावप्येवं गङ्गासागरसङ्गमः ।
इति शास्त्रप्रसिद्धेश्च वृद्धानां च प्रसिद्धितः ।
नदीशुद्धोदसंयोगो वार्धे स्याल्लवणोदके ॥ १०१० ॥

शास्त्रप्रसिद्धितः 'सितासिते सरिते यत्र सङ्गते' इत्यादौ ॥ १०१० ॥

शुद्धे शुद्धोदकं सिक्तं तादृगेव भवेत्परम् ।
एकप्रकारोदकयोरप्यैक्यं न तयोः किल ॥ १०११ ॥

कैमुत्येन तत्र भेदमुपपादयति शुद्धे इति मुक्तावपि सरूपतैवेत्यत्र दृष्टान्तः। तदाऽपि न स्वरूपैक्यं किमु संसारे इति यथा। तथा समानप्रकारयोरपि शुद्धोदकयोर्यदा भेदः तदा विरुद्धप्रकारयोर्लवणमधुरोदकयोस्तथात्वं इति किमु वक्तव्यमिति ॥ १०११ ॥

स्वोक्ततादृक्त्वं च दार्ढ्यार्थमेवेत्यैक्यं व्यवच्छिनत्।
यतः श्रुतिस्ततस्तत्र तयोरैक्यं न सर्वथा ॥ १०१२ ॥

तादृगेव न तु तदेवेति स्वरूपैक्यव्युदासः सुस्फुट एवेत्याह **स्वेति** ॥ ॥१०१२ ॥

एवं चेत्कथमैक्यं स्याच्छुद्धोदलवणोदयोः।
वृद्धेः प्रत्यक्षसिद्धत्वादप्यैक्यं नोभयत्र च ॥ १०१३ ॥

प्रत्यक्षसिद्धत्वादिति द्वारि ईषद्वृद्धिः स्थूलमतीनां अपि। सूक्ष्मधियां तु सर्वत्र। भामत्यामपि नदीसमुद्रोदकयोरैक्यस्य सपरिकरं 'अवस्थितेरिति' सूत्रभाष्यव्याख्याने दूषितत्वाच्च। (न्याया. ५९८) ॥ १०१३ ॥

न हि रासोत्सवस्यान्ते बहुमूर्त्येकतां गते।
कृष्णो विशति नन्दस्य गृहद्वारमवर्धत ॥ १०१४ ॥

स्वरूपैक्ये तु न वृद्धिरित्येतन्निदर्शयति **न हीति** ॥ १०१४ ॥

नद्यम्बुयोगे वर्षासु वार्धिरप्यभिवर्धते ॥ १०१५ ॥

अभिवर्धते इदं तु मार्कण्डेयमुनेरनुभवसिद्धम्। प्रलयकालीनवर्षाजन्य-समुद्रवृद्धेस्तेनानुभूतत्वात्। इदानीं इतरेषां समुद्रस्य महत्त्वाद्वृद्ध्यदर्शनम् ॥ ॥१०१५ ॥

यतश्चोक्तं पुराणेषु सङ्गमे द्विगुणं फलम्।
अतश्च न तयोरैक्यमैक्ये यत्स्यात्फलैकता ॥ १०१६ ॥

द्विगुणम् । उपलक्षणम् । 'तत्राप्लुतासो दिवमुत्पतन्ति' । 'ब्रह्मज्ञानेन वा मुक्तिः प्रयागमरणेन वा' इत्याद्युक्तेः अधिकफलमित्यर्थः ॥ १०१६ ॥

समुद्रोदेऽपि लवणद्रव्यस्य च जलस्य च ।
संयोग एवेशकृतः सरिदब्ध्योस्तु किं पुनः ॥ १०१७ ॥

समुद्रोदेऽपीति एकदेवताकेऽपीत्यर्थः । किं पुनर्भिन्नभिन्नतत्तन्नद्यादिदेवताकेषु तत्तच्छरीरस्थानीयेषु नद्युदकेषु इति ॥ १०१७ ॥

पत्न्यस्तु सरितस्सर्वः पतिस्तु सरितां पतिः ।
तद्भेदो नेक्ष्यते पुंभिर्गाढालिङ्गनतः परम् ॥ १०१८ ॥

उक्तं प्रमेयं शृङ्गाररसेन मधुरयति **गाढेति** ॥ १०१८ ॥

न हि प्रधानदिक्पालो वरुणोऽसौ निजालये ।
पिता मुनीनामेकाकी शेते तारापतेस्सखा ॥ १०१९ ॥

प्रधानेति निरृति कुबेरादितः उत्तमेत्यर्थः । निजालये इति पत्नीभिः सहभावे हेतुः ॥ १०१९ ॥

न चेद्वर्षासु वार्ध्यम्बुमध्यान्नद्यम्बुवार्धराः ।
आनयन्ति कथं शुद्धं वर्षन्ति च ततस्ततः ॥ १०२० ॥

न चेत् पाथःपरमाणूनां भिन्नत्वाभावे । **वार्धराः** मेघाः । अत्रायं विशेषः 'स्वकीयमुदकं नद्यः समुद्रेनैव जानते । वायुस्तु तत्पृथग्भावं मेघे कृत्वा प्रवर्षति' इति स्मृतेर्ज्ञातव्यः । (वि. त. टी. श्रीनिवासती. ५६८) ॥ १०२० ॥

श्वेतं गङ्गोदकं स्वादु तुङ्गाम्बुयमुनाजलम् ।
नीलमित्यादिभेदोस्ति प्रत्यब्दमपि तज्जले ॥ १०२१ ॥

सोऽब्धौ च भिन्नभिन्नाम्बुसद्भावेन विना कथम् ।
न ह्यपूर्वं स वार्वाहः कुर्वीताम्बु स्थले स्थले ॥ १०२२ ॥

सर्वे च सङ्गमं ब्रूयस्त्वं ब्रूषे कथमेकताम् ।
हन्ताज्ञाश्च हसेयुस्त्वां पूर्णप्रज्ञभटास्तु किम् ॥ १०२३ ॥

वायुनैवं विवेकेन तत्तज्जलानयनप्रदेशे प्रत्यब्दं वर्षणादेव नदीजलानां रूपरसादिगुणभेदो निर्वहति नान्यथेत्याह **श्वेतमिति** । न मेघा वायुर्वा अपूर्वं रूपादिकं सृजन्तीति युक्तमित्याह **नेति** ॥ १०२१ ॥ १०२२ ॥ १०२३ ॥

सितासिते च नद्यौ द्वे प्रयागे सङ्गते किल ।
मिश्रतीर्थं किलैकत्र चित्रतीर्थोदसंग्रहः ॥ १०२४ ॥

निवृत्तिसङ्गमः सप्तनदीनां सङ्गमः किल ।
कृष्णाभीमरथीसङ्गं प्राहुरद्यापि सङ्गमम् ॥ १०२५ ॥

सितासिते सरितौ यत्र सङ्गते इति प्रयागेऽपि सङ्गम इत्येव व्यवहारः । सर्वेभ्यस्तीर्थेभ्यः किञ्चिज्जलं आहृत्य इन्द्रेण मिश्रीकृत्य निर्मितं सरोवरं मिश्रतीर्थं इति पुराणप्रसिद्धिः । तस्यापि मिश्रेत्येव व्यवहारः । न तु कुत्रापि ऐक्यमापन्नमिति । एवं निवृत्तिसङ्गममपि सङ्गम इत्येवाहुः । अतो लोकव्यवहारप्रतीपा तव प्रक्रियेत्याह **सिते इति** ॥ १०२४ ॥ १०२५ ॥

नानारससमाहारो मधुन्यप्येकता किल ।
वृद्धिश्च रसवैचित्र्यं नो चेत्तत्र कुतो वद ॥ १०२६ ॥

मधुमधुकृददृष्टान्ते तु स्पष्टं 'समवहारं एकतां गमयन्ति' इति श्रुतिरेव स्वयं 'समवहार एवैकता' इति रसमेलनमेव मधु न तु रसानां स्वरूपैक्यमिति व्याख्याति । अतो न तत्र तव कुचोद्यावकाशः ।स्वरूपैक्ये बाधकमाह **वृद्धिरिति** ॥ ॥ १०२६ ॥

सति संपद्य न विदुरिति सर्वत्र यच्छ्रुतिः ।
दार्ष्टान्तिकोपसंहारं कुरुतेऽतो न तत्कथा ॥ १०२७ ॥

'सति संपद्य न विदुः सति संपत्स्यामहे' इति ते इह व्याघ्रो वा सिंहो वा' इति सत आगम्य न विदुः सत आगच्छामहे इति न इह व्याघ्रो वा सिंहो वा' इति भेदापरिज्ञानेनानर्थवचनाच्च । न हि गृहादागतस्य गृहे प्रविष्टस्य च तदैक्यम्' । इति तत्त्वनिर्णयवाक्यं हृदि कृत्वाऽऽह **सतीति तत्कथा** ऐक्यकथा ॥ १०२७ ॥

यस्मात्प्राग्भिन्नयोरैक्यं न स्याद्यत्नशतैरपि ।
तस्मात्सर्वेऽपि दृष्टान्ताभेदस्यैव प्रसाधकाः ॥ १०२८ ॥

यस्मादिति न हि भिन्नमभिन्नत्वं यातीति न्यायादिति भावः ॥ १०२८ ॥

स त आगम्य न विदुः सति संपद्य चेति सा ।
मुक्तौ संपत्तिमेवाह सृष्टौ चागमनं ततः ॥ १०२९ ॥

सत आगम्येति सृष्टौ, सति संपद्येति मुक्तौ इति योग्यतयाऽन्वयः ॥ १०२९ ॥

कस्य च गम्यार्थादागन्तुश्चागमावधेः ।
अवश्यं भिन्नतावाच्या मध्ये वाच्या कथं न सा ॥ १०३० ॥

अधिकरणस्यापादानस्य च आधेयादेर्भेदः व्युत्पत्तिसिद्ध इत्याह **गमकस्येति** । एवं सृष्टौ मुक्तौ चेद्भेदः श्रुतिसिद्धो मध्येऽपि स भवेदेवेत्याह **मध्ये इति** ॥ १०३० ॥

अनाद्यनन्तकालीनामेवं जीवेशयोर्भिदाम् ।
न विदुर्ये ते भवन्ति सिंहव्याघ्रादयः किल ॥ १०३१ ॥

'यद्यद्भवन्ति तत्तदा भवन्ति' इति वाक्ये जीवानां विद्यमानभेदापरिज्ञानेन व्याघ्रादित्वापत्तिरूपस्यानर्थस्योक्तत्वात् दृष्टान्तवाक्ययोरपि विद्यमानभेदापरिज्ञान-मेव विवक्षितम् ॥१०३१ ॥

इति भेदाज्ञानिनिन्दां भूयो भूयः करोति या।
अभ्यासादर्थवादाच्च सा सम्यग्भेदतत्परा।
अतदित्येव गदितुं यतते न ततोऽन्यथा ॥ १०३२ ॥

सदायतनसन्मूलसत्प्रतिष्ठत्वकीर्तनात्।
स्थितौ सृष्टौ च मुक्तौ च भेदस्स्पष्टं निगद्यते ॥ १०३३ ॥

सा अतत्त्वमसीति वाक्। नेति। तदिति पदच्छेदं न सहते ॥ १०३२ ॥
॥१०३३ ॥

दार्ष्टान्तिकप्रकरणमेवं सर्वं हि शोधने।
अभूद्भेदप्रकरणं तदैक्यस्य न भूरियम् ॥ १०३४ ॥

इयं उपनिषत् भूः प्रतिपादिका ॥ १०३४ ॥

तावदेव चिरं तस्य यावन्मोक्ष्येत कर्मभिः।
प्रारब्धैरखिलैः पश्चात्सति संपद्यते किल ॥ १०३५ ॥

न चात्रोक्ता सत्संपत्तेरपरममोक्षविषयेति शङ्क्यम्। प्रारब्धकर्मावसानकालीनत्वात्। अपरममुक्तौ प्रारब्धकर्मलेशावश्यंभावादित्याह तावदेवेति। 'तस्य तावदेव चिरं यावन्न विमोक्ष्येऽथ संपत्स्यते' इति वाक्यमनेनोपादत्ते ॥ १०३५ । ।
॥१०३६ ॥

इति प्रारब्धनाशाच्च पश्चाद्भाविनि या श्रुता।
भिदा परममोक्षे ते कदा वा नास्ति सा वद ॥ १०३६ ॥

गम्यगन्तृतयाऽन्योन्यं किं न तत्रापि भिन्नता।
तन्न तामुन्नता वाक्के निन्हुवीत सतां मताम् ॥ १०३७ ॥

उन्नता वाक् दोषच्छादनाय उच्चैर्वचनम् ॥ १०३७ ॥

अतत्त्ववादिनामेव तच्चित्रं तत्त्ववादिता ॥ १०३८ ॥

प्रागुक्तं स्मारयति **अतत्त्वेति** ॥ १०३८ ॥

ततो वर्णादिना छिन्नं पदं सन्धायसा श्रुतिः ।
चरेद्भेदार्थलाभाय या ब्राह्मणजनप्रिया ॥ १०३९ ॥

वर्णादिना । वर्णानां चतुर्णामादिः ब्राह्मणः । अक्षराणां आदिरकारः । ब्राह्मणेन अकारप्रश्लेषेण छिन्ना इत्यावृत्त्या योज्यम् । सा श्रुतिः त्वं इति शब्दः । **चरेत्** विद्वत्सभायामिति शेषः ॥ १०३९ ॥

किञ्च शब्दोऽनित्य इति वाक्ये घटनिदर्शने ।
अनित्य इत्येव यथा पदच्छेदं विदो विदुः ॥ १०४० ॥

एवं शकुनिसूत्राख्यस्पष्टदृष्टान्तशक्तितः ।
आत्मा तत्त्वमसीत्यत्राप्यतद्ब्रह्मेति गम्यते ॥ १०४१ ॥

किञ्चेति 'शब्दो नित्यः कृतकत्वात् घटवत्' इति प्रयोगे प्रतिज्ञासन्दिग्धार्थोऽपि सधर्मघटदृष्टान्ताभिधानसामर्थ्यात् अनित्यताविषयेति निश्चीयते तद्वत् । यदा त्वेकमपि भेदविषयत्वेनासन्दिग्धं दृष्टान्ताभिधानं सन्दिग्धप्रतिज्ञावाक्यस्यार्थनिश्चयायालं तदा किमु वक्तव्यं नवस्वपि प्रकरणेषु न वा सन्दिग्धानि भेदविषयाणि दृष्टान्ताभिधानानि इति तत्त्वनिर्णयटीकां हृदि कृत्वाऽऽह **शब्द इति** ॥ १०४० ॥ १०४१ ॥

तस्माज्जीवेशभेदस्य साधिका भेदवागियम् ।
न ह्यतिस्तब्धबुद्धेस्स गुरुर्ब्रह्मैक्यमादिशेत् ॥ १०४२ ॥

प्रकरणविरुद्धोऽत्राभेदोपदेश इत्याह **न हीति** ॥ १०४२ ॥

अतः श्रुतिः केरलानां करवालमभूदियम् ।
धारा त्वत्पार्श्वगैवातिक्रूरा किं स्यात्तवानया ॥ १०४३ ॥

केरलानां करवालं स्वपरयोरुभयोरपि अभिमुखधारोपेतम् । तथाऽत्रोभयथाऽपि पदच्छेदावकाशवती । तत्रापि विशेषमाह **धारेति** । स्वाभिमुखा **अतिक्रूरा** नवविधदृष्टान्तशाणोत्तेजिता । पराभिमुखा तु शिलायामिव अविषये अभिदायां प्रयुक्ता कुण्ठिता साधनासमर्थेत्याह **किमिति** ॥ १०४३ ॥

किञ्च दृष्ट्वैव तं मुच्येतेत्याद्यागमराशिषु ।
ज्ञानमज्ञानमात्रस्य विरोधीति स्वकल्पितात् ।
युक्तिमात्राच्च भीतेन श्रौतोऽर्थो येन धिक्कृतः ॥ १०४४ ॥

स्वप्रक्रियाविरुद्धः परार्थ इत्याह **किञ्चेति** । **मुच्येत** मुच्यते । **इत्यादीति** 'तरति शोकमात्मवित्' । 'तमेवं विद्वानमृत इह भवति' इत्यादीत्यर्थः । **स्वकल्पितात्** अप्रामाणिकात् । वस्तुतः निवृत्तेः सत्यत्वेनैव व्याप्तेः गरुडध्यानसेतुदर्शनादिषु प्रमितत्वात् । **धिक्कृतः** अज्ञाने निवृत्ते, पश्चात् तदुपादानको मिथ्याभूतो बन्धो निवर्तते इति वदता इति शेषः ॥ १०४४ ॥

तस्य प्रत्यक्षसहितविरुद्धगुणवत्त्वतः ।
महायुक्तेर्विरोधेऽपि मुख्येऽर्थेऽद्य कुतो भरः ॥ १०४५ ॥

प्रत्यक्षेति नाहं निर्दुःख इत्यादिरूपेत्यर्थः । 'द्वासुपर्णे'त्याद्यागमसहितेत्यपि ग्राह्यम् । 'मुख्येऽर्थे' इति गुडजिह्विकामात्रम् । वस्तुतः पदद्वयलक्षणाश्रयणेनामुख्य एवार्थ इति ध्येयम् ॥ १०४५ ॥

अक्षस्य युक्तिश्रुत्यादेरमानत्वं यदीष्यते ।
युक्तिमात्रामानतायां हीनता का तवोच्यताम् ॥ १०४६ ॥

इष्यते स्वकल्पितयुक्तिविरोधात् । **तर्हि युक्तिमात्रेति** । सकलप्रमाणविरुद्ध-त्वत्कुकल्पितयुक्तीत्यर्थः ॥ १०४६ ॥

यद्यक्षादेरमानत्वं विरुद्धैक्यमपीष्यताम् ।
मानत्वे तु गुणत्यागः प्राणत्यागो भवेत्तव ॥ १०४७ ॥

यदीति । अयमाशयः प्रत्यक्षादिकं भेदावेदकं प्रमाणं न वा । द्वितीये विशिष्टैक्यमेव अङ्गीक्रियताम् । प्रत्यक्षादिविरोधस्याकिञ्चित्करत्वात् । आद्ये गुणत्यागस्य प्रमाणविरोधान्न लक्षणयैक्यसिद्धिरिति ॥ १०४७ ॥

विरुद्धैक्यस्य चायुक्तिर्वाच्या कुत्राऽप्यदर्शनात् ।
तर्ह्यक्षमानतावश्यं न चेदैक्यं विरुद्धयोः ॥ १०४८ ॥

ननु विरुद्धयोरैक्यं कुत्रापि न दृष्टं अतो विशिष्टैक्यं न युक्तमिति चेत् एवं तर्हि दृष्टमेव युक्तं अङ्गीकारार्हमित्यायातम् । तथा च प्रत्याक्षादिप्रामाण्यमवश्यं जातम् । एवं च स्वरूपैक्यस्य तद्विरुद्धस्य न सिद्धिः । तदुक्तं तत्त्वोद्योते 'दृष्टस्य वस्तुनो बलवद्दृष्टिं विना नान्यद् बाधकमि'ति ॥ १०४८ ॥

आदित्ये पुरुषो योऽसौ सोऽहमस्मीति च श्रुतिः ।
स यश्चायं पुरुषोऽस्ति यश्चादित्येऽस्ति सर्वदा ॥ १०४९ ॥

स एक इति विस्पष्टसमाख्या श्रुतिसख्यतः ।
अर्थलक्षणया ब्रूते सुस्थसूत्रोक्तवर्त्मना ॥ १०५० ॥

'योऽसावादित्ये पुरुषः सोऽहमस्मि' इति श्रुतौ अहंशब्दः अन्तर्यामिपरः । 'स यश्चायं पुरुषे यश्चासावादित्ये स एकः' इति समाख्यानुसारादित्याह **आदित्ये इति ।** समाख्यावाक्यं अन्तर्यामिरूपाभेदपरं इति स्पष्टम् । उभयत्रापि सप्तम्या निर्देशात् । **लक्षणया** अहंशब्दस्य अन्तर्यामिणि लक्षणया । इदं च मुखतः । वस्तुतस्तु अहमादिशब्दा अन्तर्यामिण्येव मुख्याः । 'तत्संबन्धात्तु जीवेषु तत्संबन्धादचित्स्वपि । वर्तन्ते उपचारेण' इति तत्त्वनिर्णयोक्तेरिति ध्येयम् । **सूत्रेति** न वक्तुरात्मोपदेशादित्यादिसूत्रेत्यर्थः ॥ १०४९ ॥ १०५० ॥

एकवाक्येऽपि चादित्य इत्याधारत्वकीर्तनात् ।
स्वस्याप्याधारतैवोक्ता किमर्केशोर्कपूजकः ॥ १०५१ ॥

आधारत्वम् । नियामकत्वेन पूज्यत्वम् । 'य आदित्ये तिष्ठन् — आदित्यं यमयति' इति अन्तर्यामिनयोदाहृतश्रुतेः । अहंशब्देन अर्कादप्यधमः तत्पूजको जीव उच्यते । तादृशस्य स इति तच्छब्दपरामृष्ट-अर्केशाभेदविधानं विरुद्धमित्याह **किमिति** ॥ १०५१ ॥

तत्स्पष्टभेदश्रुत्यक्षबाधे सति सतां मते ।
वृत्तित्रये च सत्यैक्यवाक्यं स्यात्क्व
विरुद्धयोः ॥ १०५२ ॥

वृत्तित्रये । 'तस्मात्परममुख्यत्वं विष्णावन्यत्र मुख्यता । उपलक्षणा च गौणी च तिस्रः शब्दस्य वृत्तयः' इति अनुव्याख्यानोक्तेः । **क्व विरुद्धयोरिति ।** विरोधे वृत्त्यन्तरस्यावश्यमाश्रयणीयत्वात् 'पूर्वायोगे परग्रहः' इति तत्रैवोक्तेः । । १०५२ ॥

किञ्चैकजीवब्रह्मैक्यं वाक्यो नानेन सेत्स्यति ।
सर्वैक्ये किं प्रमाणं ते श्रुत्यर्थो न किलार्थिकः ॥ १०५३ ॥

एकजीवः श्वेतकेतुः । अर्थात्सर्वजीवाभेदः इति चेन्नासौ श्रौतार्थ इत्याह **नेति ।** यश्चार्थादर्थः न स चोदनार्थ इति वचनात् ॥ १०५३ ॥

तत्तत्पदोक्तयोरैक्ये सुप्रसिद्धा विरुद्धता ।
पदद्वयस्य लक्ष्यत्वाल्लघ्व्येकपदलक्षणा ।
तत्संबन्धात्तत्पदेन जीवोक्तौ किं गतं तव ॥ १०५४ ॥

उक्तयोः जीवेशयोः **लक्ष्यत्वात्** लक्षणाश्रयणात् । **तत्पदेन** तदितिपदेन संबन्धश्च तदधीनत्वादिः प्रमाणान्तरानुगुणः ॥ १०५४ ॥

पञ्चम्यर्थे यत्तदिति पदं प्राहुर्यतोऽव्ययम्।
तदित्यस्यैव तस्मादित्यर्थो वा तेन कथ्यताम्।
ऋजुष्वनेकमार्गेषु सत्सु किं कुटिलाध्वना ॥ १०५५ ॥

प्राहुः 'तदस्य कौषारव शर्मदातुः' इत्यादौ सुबहुलप्रयोगात्। **अव्ययं** तथा च तदुपरि सर्वविभक्तिलोपः। **अनेकेति** विभक्त्यन्तराश्रयणेऽपि उपपद्यमानप्रकारेषु इत्यर्थः ॥ १०५५ ॥

किञ्च ब्रह्मेन्द्ररुद्रादिशब्दास्सर्वेऽपि सर्वदा।
तत्तद्विशिष्टार्थपरा विशिष्टैक्यं च ते मते।
न विद्यते चितोरैक्यं यतो लक्षणया तव ॥ १०५६ ॥

तद्देववासुदेवैक्यं वाक्यं नाख्याति ते क्वचित्।
अत्राप्यत्रापि यत्तेन द्विदेव पदनाशनात् ॥ १०५७ ॥

तत्तद्विशिष्टेति। कमलासनत्व-शचीपतित्वादिविशिष्टेत्यर्थः। **अत्रापि।** लुङ्। वाक्यस्य लज्जा भवतीत्यर्थः। **अत्रापि स ब्रह्मा स शिवः** इत्यादिवाक्येष्वपि। लज्जाहेतुः **द्विदेवेति** सर्वदेवेति तात्पर्यम्। **पदानि** सत्यलोकाधिपत्यादीनि। तेषां **शासनात्** मिथ्यात्वोक्त्याऽपलापात् ॥ १०५७ ॥

किञ्चावान्तरवाक्यं च महावाक्यं च ते मते।
सर्वलक्षणया ब्रह्मरूपमात्रपरं किल।
अतस्तव प्रक्रिययाऽप्यैक्ये मानं न किञ्चन ॥ १०५८ ॥

अवान्तरवाक्यं जीवब्रह्मरूपपदार्थप्रतिपादनपरं 'विज्ञानघनः' 'सत्यं ज्ञान'मित्यादिरूपम्। **महावाक्यं** ऐक्यप्रतिपादनपरं तत्त्वमसीत्यादिकम्। **ब्रह्मरूपमात्रपरं** संसर्गासङ्गि-प्रातिपदिकार्थमात्रपरं अखण्डार्थनिष्ठम्। ऐक्यरूपसंसर्गाबोधकम् ॥ १०५८ ॥

अखण्डार्थत्वसन्त्यागेनाभूदैक्यं भवन्मते ।
अखण्डार्थपरत्वेऽपि नाभूदैक्यं भवन्मते ॥ १०५९ ॥

सन्त्यागे विशिष्टार्थपरत्वे । **नेति** विरोधादित्यर्थः । **नेति** ऐक्याबोधकत्वादित्यर्थः । एवं उभयतः पाशारज्जुः ॥ १०५९ ॥

विशिष्टार्थपरत्वेऽपि विशेषणबलान्न तत् ।
अविशिष्टार्थनिष्ठत्वे साधकाभावतो न तत् ॥ १०६० ॥

उपपादयति **विशिष्टेति** ॥ १०६० ॥

ऐक्यस्यान्यस्य वा वाक्याद्वैशिष्ट्यं भासते यदि ।
निष्प्रकारकधीरं ते शब्दादिति गतं मतम् ।
तस्मादैक्यं न वै शक्यं वाक्यैः
साधयितुं त्वया ॥ १०६१ ॥

वैशिष्ट्यं संसर्गः । **वाक्यैः** तत्त्वमस्यादिभिः तेषां बोधकत्वस्यैव त्वयाऽनङ्गीकारात् । 'ज्ञानं च तस्य परात्मभावनिवृत्तिरेव । तज्ज्ञानं नैव जायते । (शा.भा.) इत्युक्तेः (भे. प. व्र. प.) । आकांक्षासन्निधियोग्यतानां अन्वयघटितत्वेन अन्वयाबोधकत्वे आकांक्षादिमत्त्वरूपवाक्यत्वस्यैवासंभवादिति न्यायामृतोक्त-दिशा ध्येयम् ॥ १०६१ ॥

यो स्मरन्त्यात्मनि भिदां निरुपाधिकयोगिनः ।
त्वं तानुपविशेत्याह विस्पष्टं श्रुतिगीतिका ।
स्फुटत्वाच्छ्रुतिमूलत्वात्फलवत्वाद्बलीयसी ॥ १०६२ ॥

इदानीं 'तर्हि न सन्न चासदुभयं न च कालजवः किमपि न तत्र शास्त्रमपकृष्य शयीत यदा । जनिमसतः सतो मृतिमजात्मनि ये च भिदां विपणमृते स्मरन्त्युपविश ध्वनिमरुवतः' इति प्रलयकालीन जीवेश्वरभेदप्रतिपादिकां श्रुतिगीतिकां व्याख्याति । **ये इति** । विपणमृते इत्यस्यार्थः **निरुपाधिकेति** । आशिषः काम्यफलस्याशासनं

विना इत्यर्थः। तथात्वे वणिक्त्वप्राप्तेः 'यस्त आशिष आशास्ते न स भृत्यः स वै वणिक्' इति प्रल्हादवचनात्। ये स्मरन्ति इत्यस्यार्थः **योगिन इति**। अखण्डस्मृतिरूपयोगवन्त इत्यर्थः। आरुषतः प्राणघोषं कुर्वतः वायोः। वायोः प्रसादात्। ल्यब्लोपः। अनुग्रहं निमित्तीकृत्य। **तेषां ध्वनिमुपविश** हृदये प्रवेशं कुरु। स्फुटत्वादिकं त्रयं बलीयस्त्वे हेतुः॥ १०६२ ॥

उपस्थितात्स्मर्तृतया जीवाख्यात्प्रतियोगिनः।
परमात्मनि भेदोऽत्र प्रलये प्रतिपाद्यते ॥ १०६३ ॥

आत्मनि प्रलयकर्तरि परमात्मनि धर्मिणि। भिदां स्मर्तृतया उपस्थितजीवप्रतियोगिकाम्। न सन्न चासदिति प्रलयज्ञापकम्। 'नासदासीन्नोसदासीत्' इति श्रुतेः॥ १०६३ ॥

अपकृष्य शयीतेति प्रस्तावः प्रलयस्य हि।
यस्सर्वस्य लये चास्ति सोऽस्त्येव परमात्मवत्॥ १०६४ ॥

शास्त्रं अपकृष्य वेदं पदसमन्वयवृत्त्या स्वप्रतिपादनपरं आपाद्य। **यः** भेदः। **सः**, परमार्थतः अस्त्येव, प्रलयकालीनावस्थितिमत्त्वात् परमात्मवत् इति युक्तिसंवादित्वेन उक्तं बलीयस्त्वं उपपादितम्॥ १०६४ ॥

फलं च स्मर्तृजीवेषु प्रवेशः किल नैकता ॥ १०६५ ॥

फलं च प्रवेशः भेदाविनाभूतः। 'न हि ग्रामं प्रविष्टस्य तदेकता' इति भगवत्पादोक्तेः॥ १०६५ ॥

तत्ते ब्रह्मैकता नाभूद्विरुद्धे दृग्गिरः परम्।
सभायामसहायस्य स्यादेकाकितयैकता ॥ १०६६ ॥

एकशब्दस्य असहायवाचित्वात् साधकप्रमाणसाहाय्यशून्यत्वादेव एकतेत्याह **सभायामिति**॥ १०६६ ॥

क्व शोकमोहौ स्नेहो वा भयं वा येऽज्ञसंभवाः ।
क्व चाखण्डितविज्ञानज्ञानैश्वर्येश्वरो हरिः ॥ १०६७ ॥

इति भागवते प्रोक्त्या सदा दोषोपमर्दने ।
सुशक्तमीशचैतन्यं तदशक्तमनीदृशम् ॥ १०६८ ॥

स्नेहः दुर्विषयेषु । **अज्ञसंभवाः** अविद्याक्षेत्रत्वमुत्तरेषामित्युक्तेः । **अखण्डितेति** । यावद्द्रव्यभावित्वात्स्वरूपभूतेत्यर्थः । तदर्थः **सदेत्यादिकम्** ॥ ॥१०६७ ॥ १०६८ ॥

जीवचैतन्यमिति तच्चैतन्यद्वयमेव हि ।
मिथोविरुद्धं नीचोच्चचितोरैक्यं कथं वद ॥ १०६९ ॥

इति हेतोः ॥ १०६९ ॥

एवं च ब्रह्मचैतन्यं नैव जीवस्य चित्क्वचित् ।
अभयत्वादमोहत्वादशोकत्वाच्च कुड्यवत् ॥ १०७० ॥

न चासिद्धिः तन्मूलाज्ञानरहितत्वादित्युक्तं अज्ञसंभवा इति अज्ञे एव संभावितानां अज्ञानशून्ये असंभवादिति भावः ॥ १०७० ॥

किं न श्रुतं हरिर्ब्रह्मरुद्राद्युत्कृष्टचेतनः ।
इति नामसहस्रस्थं पुण्यनाम महात्मनः ॥ १०७१ ॥

नामसहस्रस्थं वासुदेवसहस्रनामपठितम् ॥ १०७१ ॥

उत्कृष्टचेतनत्वोक्त्या चिन्मात्रमपि मापतेः ।
अत्युच्चं जीवचैतन्यादित्यर्थः किं न सिध्यति ॥ १०७२ ॥

चेतनश्चेतनानां इति श्रुतिप्रतिपाद्ये विष्णौ चेतनशब्दः अन्तर्भावितोत्कर्ष एव । चित् चेतन इति चानर्थान्तरम् । तथा च 'पवित्राणां पवित्रो यः' इत्यत्र पवित्राणामिति

निर्दिष्टवस्त्वपेक्षया पवित्र इति निर्दिष्टस्य स्वतन्त्रं निरतिशयं पावित्र्यं इव अत्रापि चेतनानामिति निर्दिष्टजीवचेतनापेक्षया चेतन इति निर्दिष्टस्य हरेः उत्कर्षसिद्धिर्निष्प्रत्यूह इत्याह **उत्कृष्टेति** ॥ १०७२ ॥

मायां व्युदस्य चिच्छक्त्या कैवल्येस्थितआत्मनि ।
इति भागवतोक्त्या च समर्था नृहरेर्हि चित् ॥ १०७३ ॥

तत्पूर्णापूर्णयोरशक्ता शक्तयोरुच्चनीचयोः ।
जीवब्रह्मचितोरैक्यमपि शक्यं कथं वद ॥ १०७४ ॥

अतः चिन्मात्रलक्षणायामपि ईशचितः स्वशक्त्यैव मायाव्युदासकत्वादुत्कृष्टत्वं अतथाभूतचितः सकाशादित्याह **मायामिति** ॥ १०७३ ॥ १०७४ ॥

वृथा मुण्डनमेवेदं तस्मात्तद्धर्ममुण्डनम् ।
न्यासानर्हस्य शूद्रस्य यथा मूर्धजमुण्डनम् ॥ १०७५ ॥

यतश्च मुण्डिता व्यक्तिरपि तेऽर्थस्य बाधिका ।
यस्माच्चिन्मात्रमप्यैशं शक्तं शोकादिधूनने ।
जैवं तु तदशक्तं चेत्युक्तं भागवते स्फुटम् ॥ १०७६ ॥

मुण्डनं भागत्यागलक्षणा । वृथा चितोरेव तरतमभावान्नैक्यसाधकम् । वृथात्वमेवोपपादयति **यत** इति ॥ १०७६ ॥

अतो न मुख्यतः काचिच्छ्रुतिर्वक्ति जगत्त्रये ।
तवापेक्षितमद्वैतं यत्सा वक्ति न तत्तव ॥ १०७७ ॥

अतो भक्षितेऽपि लशुने न शान्तो व्याधिरित्याभाणकविषयस्त्वमभूरित्याह **यदिति । सा** तत्त्वमस्यादिश्रुतिः । तदा **वक्ति** ऐक्यबोधकमिति तवाभिमतम् । **न तव** लक्षणापक्षेऽपि भेदबोधकत्वात् न त्वदनुकूला ॥ १०७७ ॥

पदद्वयेऽपि लक्ष्यार्थस्वीकारादेकलक्षणा ।
लघीयसी ततस्सर्वा श्रुतिः परमतानुगा ॥ १०७८ ॥

परमतानुगा सादृश्यादिगौणैक्यपरा ॥ १०७८ ॥

किं च मुख्यार्थपरयोश्शब्दयोर्लक्षणा तव ।
सामानाधिकरण्यार्थमात्रस्यामुख्यता मम ॥ १०७९ ॥

अतो गुणवती गौणीवृत्तिरेतादृशस्थले ।
आदरार्हा शिरश्छेदात्करच्छेदो यतो लघुः ॥ १०८० ॥

सामानाधिकरण्येति । अभेदबोधकविशेषणमात्रविभक्तीत्यर्थः । विशेष्यविभक्त्या नीलं घटमानय इत्यादौ कर्मत्वादिबोधनात् । तेन प्रत्ययार्थबाधेऽपि बहुबाधः समान इति दोषोऽलग्नको वेदितव्यः अत्र सुधायां सन्न्यायरत्नावल्याश्च फलतो विरोधाभावः तर्कताण्डवे 'लक्षणातो गौण्याः प्राबल्यनिर्णयः' इति भङ्गे उपपादितो द्रष्टव्यः ॥ १०७९ ॥ १०८० ॥

यदन्विताभिधायीनि पदान्यन्वयबोधनम् ।
उपसर्जनतः कुर्युस्तन्मुख्योऽर्थः पदोदितः ॥ १०८१ ॥

अयोग्यस्त्वन्वयोऽर्थो न मुख्यार्थो न तरामसौ ।
यद्युक्तायुक्तविन्याससंन्यासौ च गुणोचितौ ॥ १०८२ ॥

पदानि वाक्यस्थानि । **उपसर्जनतः** पदार्थविशेषणत्वेन । अन्वयश्च वाक्यबोध्यः प्रमाणाविरुद्ध एव भवेत् । अन्यथा पदानां योग्यताहाने तद्घटितवाक्यस्याप्रमाणत्वापत्तेः । **तत्** तस्मात् युक्तस्यान्वयस्य विन्यासः स्वीकारः अयुक्तस्य च परित्यागः इत्येतौ **गुणोचितौ** गौणीवृत्त्याश्रयणेनापि न्यायप्राप्तौ ॥ ॥१०८१ ॥ १०८२ ॥

योग्यान्वयं समादाय जहती बाधितं च तम् ।
मुख्यार्थावभिरक्षन्ती वृत्तिस्साति
(मही)बलीयसी ॥ १०८३ ॥

अमुख्यवृत्त्योः गौणीलक्षणयोः स्वरूपनिरूपणपूर्वकं बलाबले वक्ति । **योग्येत्यादिभिः** । योग्यान्वयं सादृश्याभेदरूपं समादाय । **बाधितं तं** स्वरूपैक्यरूपं अन्वयम् । 'सिंहो माणवक' इत्यत्र **मुख्यार्थौ** सिंहमाणवकरूपौ । **सा** गौणीवृत्तिः । बलीयसी लक्षणापेक्षयेति शेषः ॥ १०८३ ॥

यस्यां लक्ष्यार्थनिर्दिष्टे नास्ति तद्वाचकं पदम् ।
लक्षकेणैव बोध्योऽसौ युक्तोऽन्योऽप्यन्वयोऽस्ति न ।
अगत्या जहती मुख्यं वृत्तिस्साऽतिलघीयसी ॥ १०८४ ॥

आद्या गौणीति निर्दिष्टा द्वितीया लक्षणा किल ।
विरुद्धाकारसंपत्ती वृत्ती द्वे नात्र संशयः ॥ १०८५ ॥

यस्यां गङ्गायां घोष इत्यत्र गङ्गापदस्य तीरे लक्षणायाम् । **निर्दिष्टे** तीरे । **तद्वाचकं** तीरवाचकम् । **लक्षकेणैव** गङ्गापदेनैव । **असौ** तीरः **अगत्या** = सादृश्यान्तर्गणिकभेदे सत्यपि सादृष्यत्वरूपेणानुगतस्यैकस्य तात्पर्यविषयस्य अन्वयस्याभावात् । **सा** लक्षणा । **लघीयसी** गौणीतः । केचित् सादृष्यमपि संबन्धविशेषं विवक्षित्वा गौण्या लक्षणायामन्तर्भावमिच्छन्ति । तन्मतं खण्डयति **विरुद्धेति** । दूषणप्रकारे विस्तरः तर्कताण्डवे 'गौण्या लक्षणातो भेदसमर्थनं' इति भङ्गे अत्रोक्तबलवत्त्वप्रकारस्य प्रायिकत्वं तत्रैव व्यक्तम् ॥ १०८४ ॥ १०८५ ॥

जहत्स्वार्थाऽजहत्स्वार्थेत्याहुर्यल्लक्षणाद्वयम् ।
तदाद्यायां मुख्ययोगोऽप्यार्थिको न तु शाब्दिकः ।
वाक्यार्थोऽप्यन्वयस्तीरघोषयोरेव न त्वयम् ॥ १०८६ ॥

लक्षणायां **मुख्ययोगः** गङ्गासंबन्धः तीरेण। **आर्थिकः** लक्ष्य एव। **न शाब्दिकः** न वाच्यः। **न स्वयं** न गङ्गाघोषयोरपि। अजहत्स्वार्थलक्षणायां तु दध्युपघातकत्वरूपलक्ष्यताऽवच्छेदकरूपेण उपस्थिते काकेऽप्यन्वय इति विशेषः। लक्षणायामपि गङ्गाशब्दो गङ्गातीरत्वेनैव तीरोपस्थापक इत्यस्य पञ्चधोपपादनं तर्कताण्डवे 'लाक्षणिकादेरपि शक्यसंबन्धित्वादिनैव लक्ष्याद्युपस्थापकत्व-समर्थनम्' इति भङ्गे (६८) द्रष्टव्यम्॥ १०८६ ॥

लक्ष्यार्थो निर्विकल्पा धीर्यस्य तस्य मते पदम्।
मुख्यार्थयोगं मुख्यं च न वदेन्नापि लक्षयेत्॥ १०८७ ॥

निर्विकल्पा अन्वयानुभावकत्वशून्या। **यस्य** तार्किकस्य **पदं** लाक्षणिकादि-पदम्। अन्वयं स्वार्थं वा **न वदेत्** नापि **लक्षयेदिति**। 'वाचकमेवानुभावकम्। लाक्षणिकादिकं तु स्मारकमेव। शक्तस्यैवानुभावकत्वे तन्त्रत्वात्' इति मण्युक्तेः। अत्र विस्तरः तर्कताण्डवे 'लाक्षणिकादेरनुभावकत्वसमर्थनं' इति भङ्गे (६७)॥ ॥१०८७ ॥

पौनरुक्त्यात्सिंहपदं देवदत्तं न लक्षयेत्।
किन्तु सिंहात्मतां सिंहसादृश्यं वाऽस्य शंसति॥ १०८८ ॥

लक्षणायां मुख्यस्य प्रातिपदिकस्यैव अर्थत्यागः। गौण्यां तु अमुख्यस्य प्रत्ययमात्रस्य इति प्रागुक्तं गौण्याः प्राबल्यं स्मारयति। **पौनरुक्त्यादिति**। **किन्तु** प्रातिपदिकार्थात्यागेनैव॥ १०८८ ॥

अक्षस्य पक्षपातस्तु साक्षाद्भेदे प्रदृश्यते।
कामाच्च नानुमापेक्षेत्युक्तेश्शुष्कानुमाऽफला॥ १०८९ ॥

तस्मात्त्वदैक्यगाथाया मानं मूलं न दृश्यते।
कृष्णस्नेहविनाशाय सा निर्मूला लतेव ते ॥ १०९० ॥

सर्वप्रमाणविरुद्धा निर्मूला इयं तव प्रक्रिया कृष्णे परमात्मनि तद्गुणापलापेन स्नेहविनाशिनी इति लताश्लेषेण साहित्यमुद्रयाऽऽह **अक्षस्येति**। काचन मूलवहिता गुल्मादिस्थिता लता अङ्गाभ्यक्तस्नेहयुक्ततैलविनाशिनी इति प्रसिद्धिः ॥ ॥१०८९ ॥ १०९० ॥

पदद्वयोक्तयोरैक्ये विरोधान्नास्ति ते श्रुतिः ।
ऐक्यं न मुख्यतोऽर्थस्याल्लक्ष्यत्वे पदयोर्द्वयोः ॥ १०९१ ॥

अमुख्यार्थं च मुख्यार्थभेदश्रुतिशतार्दिता ।
कथं वक्ति श्रुतिर्मुख्यामुख्ययोर्मुख्यतः फलम् ॥ १०९२ ॥

नामुख्यान्न हि हर्यक्षस्याग्रे हरिणगर्जितम् ।
चिन्मात्रैक्ये न काऽप्यस्ति श्रुतिरित्यश्रुतं हि तत् ॥ १०९३ ॥

ऐक्यं चिन्मात्रैक्यम् । पदयोर्द्वयोरमुख्यार्थ इत्युत्तरेणान्वयः । श्रुतिः कथं वक्तीति योजना । तत्र हेतुः **भेदश्रुतीति**। **अर्दिता** बाधिता । नामुख्यात् फलमित्यस्यानुकर्षः । नेति निर्धर्मिताऽवच्छेदकशाब्दबोधस्यालीकत्वात् । चितश्च निर्धर्मिकत्वात् ॥ १०९१ ॥ १०९२ ॥ १०९३ ॥

प्रवव्राज तदद्वैतं त्वमिवाम्नायमन्दिरात् ।
शिरोमुण्डितमस्माभिर्बाह्येभ्यो भैक्षमाददे ॥ १०९४ ॥

त्वमिव जनानां वञ्चनायैव सन्यासभाक् इव । 'न वर्णाश्रमाचारधर्माः' इति मन्वानस्य कुतः वास्तवं प्रव्रजनमि'ति ध्वनिः । **शिरः** ऐक्यवाक्यं चिन्मात्रैक्यरूपादर्थात् प्रच्यावितम् । **बाह्येभ्यः** इति निर्विशेषचितः शून्यादविशेषात् इति भावः ॥ १०९४ ॥

स्वशिरः पातिवृक्षस्य च्छेदेनाधो मरिष्यति ।
भेदे भिन्नादिकल्पोक्तदोषेण स्वैक्यदोषवत् ॥ १०९५ ॥

'विशिष्टादिनिराकरणयुक्तीनामपि विशिष्टाद्यपेक्षत्वाज्जात्युत्तरमिति न युक्तिबाधाऽपी'ति तत्त्वोद्योतं हृदि कृत्वा खण्डनकारोक्तं भेदविकल्पदूषणं अभेदपक्षेऽपि साम्योक्त्या व्याघातेन दूषयति **स्वशिर इति** ॥ १०९५ ॥

शिशोर्जातस्य या रक्षां कुरुते जननी हि सा।
सर्वखण्डनकारस्तु पूतनायाः कुमारकः ॥ १०९६ ॥

शिशोः स्वाभिमतप्रमेयस्य। सा जननी स एव कथायामधिकारी ॥ ॥१०९६ ॥

सर्वं खण्डयतोप्यऽस्य खण्डनं रक्ष्यमेव हि।
आत्मा च रक्ष्यस्तत्काले भिक्षापात्रं करे भवेत् ॥ १०९७ ॥

'यदि भेददर्शनं न स्यात् तर्हि सकलव्यवहारविधुरः परः प्रसज्येत' इति वादावलीं अनुरुध्याह **सर्वमिति**। ऐक्यस्य बाधितत्वे भेदोन्मज्जनप्रसङ्गात्। **भिक्षेति** परेभ्यो भेदं भिक्षित्वा खलु त्वया आत्मभिन्नेभ्य आत्मा रक्ष्य इति भावः ॥ ॥१०९७ ॥

परन्यायैः परो दूष्यस्स्वार्थस्साध्यो मतो यदि।
याचिता अपि ते न्यायास्सन्याया वा न वा वद ॥ १०९८ ॥

'नापि परन्यायैः परस्य दूषणम्। परस्यापि स्वन्यायस्वक्रियाविरुद्ध-विकल्पसाधुत्वाप्रसिद्ध्या बोधयितुमशक्यत्वात्' इति वादावल्युक्तमाह **परेति** ॥ ॥१०९८ ॥

सन्यायाश्चेज्जितं तेन दुर्न्याया अपि चेज्जितम्।
स्वेष्टापुष्टेः किमु व्योमनीलिम्ना सोमनीलिमा ॥ १०९९ ॥

सन्न्याया इति पक्षे । **तेन** परेण त्वयैव तन्न्यायानां साधुत्वाङ्गीकारात् । दुर्न्याया इति चेत् न याचितैरपि तैः तव पक्षसिद्धिः । तदाह **स्वेष्टापुष्टेः** । स्वेन इष्टस्य खण्डनस्यापि असिद्धेः । तत्रार्थान्तरं **किमु इति** याचितस्य व्योमनीलिम्न एवाप्रामाणिकत्वात् ॥ १०९९ ॥

उष्ट्रः कण्टकमेवात्ति तृणं गोर्दर्दुरो मृदम् ।
शिलाकणान्कपोतोत्ति स्वयं शाल्योदनप्रियः ॥ ११०० ॥

स्वयमित्यपहासः स्वयमपि कण्टकाद्याहारवान् भवेरिति ॥ ११०० ॥

गोपुच्छग्रहणेनापि गोष्ठप्राप्तिर्भवेत्तव ।
गोष्ठात्तु स्वगृहप्राप्त्यै स्वयमेव यतेत हि ॥ ११०१ ॥

गोपुच्छग्रहणेन पराभ्युपगतप्रमाणाद्यभ्युपगमेन **गोष्ठप्राप्तिः** परसिद्धान्तसिद्धिः । **स्वगृहप्राप्त्यै** स्वाभ्युपगतचिन्मात्रस्य अनिर्वचनीयाविद्यादिकस्य सिद्ध्यै **स्वयमेव यतेत** अविद्यातत्कार्यमिथ्यात्वसाधकप्रमाणानां उपन्यस्य समर्थनीयत्वात् । पराक्रान्तं च परेण तदर्थम् ॥ ११०१ ॥

अभेदार्थे बाधिते तु श्रुतेरन्यार्थतां परः ।
ब्रूते परस्य न्यायेऽस्मिंस्त्वं कस्मान्न प्रवर्तसे ॥ ११०२ ॥

किञ्च 'वेदवेदानुसारेषु विरोधेऽन्यार्थकल्पना' इति न्यायम् । परो ब्रूते । तत्र तव न प्रवृत्तिः । प्रत्युत भेदवाक्यानां सर्वथाऽतत्त्वावेदकतैवेति त्वं आस्थितः । अतो रिक्थमिदं ते वचः परन्यायाङ्गीकार इतीत्याह **अभेदार्थे इति** ॥ ११०२ ॥

विच्छिद्य सिंहपुच्छादिपुरुषस्य करादि च ।
तयोरैक्यं वदन्तः के परे यद्याचको भवान् ॥ ११०३ ॥

किञ्च त्वया दुर्भाषिताः न्याया न केनापि परेणोक्ता इति अनेकधा निरूपयति **विच्छिद्येति** जहदजहल्लक्षणा न केनापि स्वीकृतेति भावः ॥ ११०३ ॥

परन्यायैः परो बोध्या इति वाङ्मात्रमेव ते ।
मिथ्याभूतप्रमाणेन कोऽर्थसिद्धिं परो वदेत् ॥ ११०४ ॥

ऐक्यवेदकवाक्यानां मानत्वं कः परो वदेत् ।
अन्येषां वेदभागानाममानत्वं च को वदेत् ।
शब्दादेवापरोक्षं च कः परो वक्ति भूतले ॥ ११०५ ॥

इत्थं न्यायस्यैव भेदान्नान्यस्य न्यायतस्तव ।
अर्थसिद्धिर्भवेन्मन्दस्वन्यायानुसृतौ च ते ।
वाच्या सर्वा व्यवस्थापि तेनास्थापि मतं परैः ॥ ११०६ ॥

एवं मिथ्याभूतस्य साधकत्वं, प्रत्यक्षादिसकलप्रमाणविरुद्धार्थे वाक्यानां प्रामाण्यं, तत्सिद्धार्थबोधकानां अमानत्वं, शब्दादेवापरोक्षं इत्यादीनि न केनापि परेण स्वीकृतानि । अत्र सर्वत्रापि अगत्या स्वन्यानुसृतिरेव वक्तव्या । तथैव परःप्रमेयं स्वं स्थापयेदेवेत्याह **मिथ्येत्यादिना**। अस्थापीति लुङ् ॥ ११०४ ॥ ११०५ ॥ ॥१००६ ॥

सोऽयमित्यादिवाक्येऽपि न त्यागोस्ति
पदार्थयोः ॥ ११०७ ॥

तत्त्वमस्यादिवाक्यं अखण्डार्थनिष्ठं अकार्यकारणद्रव्यमात्रनिष्ठत्वे सति समानाधिकृतत्वात् तन्मात्रप्रश्नोत्तरत्वात् । सोऽयं देवदत्त इति वाक्यवत् इति परानुमानं दूषयति **सोऽयमित्यादिना** । तत् दृष्टान्तः साध्यविकलः । अनुपपत्त्यभावेन सः अयं इति पदयोः लक्षणाऽऽश्रयणानुपपत्तेरित्याह **नेति** ॥ ११०७ ॥

प्राग्देशकालयोगस्यातीतत्वं वक्ति तत्पदम् ।
इदंपदं तु वक्त्येतद्देशकालानुबन्धिताम् ॥ ११०८ ॥

तद्देशकालयोगस्य ह्यस्य यं तत्पदोदितम्।
कस्त्यजेदन्यदस्त्येव विशेषणपदोदितम् ॥ ११०९ ॥

'अनित्यदेशकालसंबन्धित्वस्य सत्त्वान्न सोऽयं देवतेत्युपमा च' इति तत्त्वोद्योतवाक्यं विवृणोति **प्रागिति** सः इति। सः इति पदं खलु न अतीतदेशकालसंबन्धमाह येन तस्य अयमिति इदन्ताविधानकालेऽभावेन अनुपपत्त्या पदार्थस्वरूपमात्रे लक्षणाऽऽश्रयणं किं नाम तस्यातीतत्वमपि। अतीतत्वं च ध्वंस इदानीमस्त्येवेति काऽनुपपत्तिः इत्याह **क इति। अन्यत्** इदंता एतद्देशकालसंबन्धः। स तु अस्त्येवेत्यविवादम्। अतः न पदद्वयेऽपि लक्षणाऽवकाशः ॥ ११०८ ॥ ११०९ ॥

विशेष्यपदवाच्यस्य त्वीषत्त्यागोऽपि नेष्यते।
वाक्येऽस्मिन्नन्यवाक्ये तु मृद्घटस्स्वर्णमेव हि।
कर्णभूषणमित्याद्ये नैकत्यागेऽपि विद्यते ॥ १११० ॥

ऐक्यसिद्धये मृद्घटः सुवर्णभूषणं इत्यादिकमेव त्वया उदाहर्तुमुचितम्। तत्र तु एकस्यापि न त्याग इत्याह **मृदिति** ॥ १११० ॥

यो दण्डी कुण्डली चासाविति दण्डविशिष्टतः।
स्यात्कुण्डलविशिष्टैक्यं किमेके दण्डकुण्डले ॥ ११११ ॥

सामानाधिकरण्यं हि दण्डाश्रयस्य कुण्डलाश्रयेणैव तादात्म्यमवलम्बते न तु दण्डकुण्डलयोरित्याह **य इति** ॥ ११११ ॥

विशेष्योपादानकस्य विशिष्टस्य हि जन्मनि।
विशेषणं निमित्तं नस्तदैक्येऽस्यैकता कुतः ॥ १११२ ॥

विशेष्यः पुरुषः, विशिष्टः दण्डी, विशेषणं दण्डः। तत्र पुरुषोपादानकदण्ड्युत्पत्तौ दण्डः निमित्तकारणम्। **तदैक्ये** पुरुषाद्दण्डिनो भेदाभेदेन अभेदस्यापि सत्त्वे। **अस्य** दण्डस्य ॥ १११२ ॥

अथौद्धत्याद्विशिष्टैक्यं यदि क्वापि न मन्यसे ।
तर्हि दृष्टान्तशून्यत्वाद्गतमापादनं तव ॥ ११११३ ॥

एवं व्यभिचारे प्रदर्शिते तत्परिहाराय यदि वैयात्यात्कुत्रापि विशिष्टैक्यं नाङ्गीकरोमि इति ब्रूयात्तर्हि तर्के आपादकासिद्धिरित्याह **अथेति** ॥ १११३ ॥

अस्ति रूपविशिष्टैक्ये रूपैक्यमपि यद्यपि ।
भेदाभेदमते तच्च न ते तर्कनिदर्शनम् ॥ १११४ ॥

कार्यकारणभावाद्वा धर्मधर्मित्वतोऽपि वा ।
ईदृग्विशेषणैक्यस्य प्राप्तिस्तव ममापि च ॥ १११५ ॥

अप्रयोजकमेवाभूद्विशिष्टैक्यमिहावयोः ।
औपाधिकसमावेशे व्याप्यव्यापकता न हि ॥ १११६ ॥

रूपविशिष्टैक्ये रूपी घटः इत्यत्र रूपविशिष्टस्य घटेनैक्ये **रूपैक्यं** रूपस्य घटेनैक्यम् । **भेदाभेदमते** अयावद्द्रव्यभाविधर्माणां धर्मिणा भेदाभेदौ इति मते । तत्रोपाधिनिमित्त एवाभेदः काचित्कः न त्वत्तर्कोपयोगिव्याप्तिं प्रयोजयतीत्याह **औपाधिकेति** । 'सहदर्शनमात्रेण न व्याप्तिरवसीयते' इत्युक्तेः । सोपाधिकसंबन्धेनापि व्याप्त्यध्यवसाये वह्नेर्धूमेनापि तन्निश्चयः स्यादिति भावः ॥ ॥१११४ ॥ १११५ ॥ १११६ ॥

अतो निदर्शनं नेदं यदि भिन्ने विशेषणे ।
विशिष्टैक्यबलादेव स्यादैक्यमपि कुत्रचित् ॥ १११७ ॥

निदर्शनं तदेव स्यात्तच्च नाङ्गीकृतं त्वया ।
तदा निदर्शनं नेति सुष्ठूक्तं पूर्वसूरिभिः ॥ १११८ ॥

इदं रूपघटनिदर्शनम् । न व्याप्तिसाधनं न । तर्हि कीदृशं निदर्शनं व्याप्तिगमकं स्यादित्यत आह **यदीति** । **भिन्ने** कार्यकारणभावाद्युपाधिमन्तरेणापि

स्वभावत एव भिन्ने धूमवह्निरूपे विशेषणे **विशिष्टैक्यबलात्** धूमवतः वह्निमतश्च पर्वतस्य विशिष्टस्यैक्यबलात् **ऐक्यं** धूमवह्निरूपविशेषणयोरैक्यं स्यात्। तर्हि तदेव **निदर्शनं** व्याप्तिनिश्चायकं स्यात् इति उत्तरेणान्वयः। तादृशं निदर्शनं नास्ति त्वया नाङ्गीकृतं च। **सुष्ठु उक्तं** व्याप्तिविकलस्तव तर्काभासः इत्युक्तम् ॥१११७ ॥ ॥१११८ ॥

किञ्चैवमपि सार्वज्ञपूर्वधर्मविशिष्टतः।
अज्ञतादिविशिष्टाच्च चिन्मात्रैक्यमिहोच्यताम् ॥ १११९ ॥

यतोऽस्ति गुणगुण्यैक्यमपि जीवे हरौ च नः।
उक्तैतद्बाधकाभावाल्लक्षणावसरोऽत्र न ॥ ११२० ॥

विपर्यये पर्यवसानविकालोऽपीत्याह **किञ्चेति**। 'नास्ति च विशेषणयोः सर्वज्ञत्वाल्पज्ञतयोरैक्यं अतो विशिष्टयोर्जीवेशयोरपि नैक्यं इति अखण्डवादिना त्वया पर्यवसातव्यम्। न च तथा प्रकृते संभवति। अल्पज्ञत्वादिधर्माणां जीवेन चिता सर्वज्ञत्वादिधर्माणां परमात्मना चिता चाभिन्नत्वेन, जीवेशयोरिव तत्तदभिन्नयोर्विवशेषणयोश्चिन्मात्रैक्यस्य त्वद्रीत्यैव निष्प्रत्यूहत्वादित्याह **चिन्मात्रेति। उक्तैतद्बाधकाभावात्।** बाधकाभिमतस्य तर्कस्य आभासत्वादिति भावः ॥ ११२० ॥

विशेषणद्वयस्यात्र यद्यप्यस्ति विरुद्धता।
न सा दृष्टान्तवाक्ये मे तदेतौ द्राविडान्ध्रकौ ॥ ११२१ ॥

अत्र दार्ष्टान्तिके। **विरुद्धता** कदाऽपि असहावस्थानम्। **सा** विरुद्धता। **दृष्टान्तवाक्ये** सोऽयं देवदत्त इत्यत्र **मे न**। क्रमेण श्यामत्वरक्तत्वयोरेकस्मिन् फले इव तत्तेदन्तयोरपि एकस्मिन् देवदत्ते समावेशसंभवादेव। तदुक्तं न्यायामृते 'कालद्वयेन योगस्य क्रमेण स्थायि वस्तुनि। नैल्यरक्तत्ववत्सत्त्वात्तदुक्तौ का विरुद्धता' इति (२९३। प.४९१)। **एतौ** दृष्टान्तदार्ष्टान्तिकौ। **द्राविडान्ध्रकौ** अन्योन्यवार्तानभिज्ञौ ॥ ११२१ ॥

तत्ते दृष्टान्तचर्चेयं न दार्ष्टान्तिकसिद्धये।
क्रमेलकोयंकदली पक्वत्वङ्मोचनं च सा॥ ११२२॥

तत् तस्मात्। **न सिद्धये** प्रत्युत अखण्डार्थत्वखण्डनायैव। दृष्टान्तवाक्यस्य विशिष्टार्थकत्वादेव। तदुक्तं तत्त्वोद्योते 'अतः कैर्विशेषणैर्विशिष्ट इति प्रश्ने प्रकृष्टप्रकाश तद्देशकालादिविशिष्ट एव वाक्यार्थः' इति। अतः स्वरूपमात्र-प्रश्नोत्तरत्वहेतोः अखण्डार्थनिष्ठत्वरूपसाध्यस्य च अभावात् दृष्टान्तचर्चा त्वया क्रियमाणा सर्वाऽपि अनर्थायैव। तत्र दृष्टान्तः **क्रमेलकः** उष्ट्रः। **अयं** दार्ष्टान्तिकः। **सा** चर्चा। कदलीफलस्येव पुरुषार्थस्य हेतोः प्रमाणादिकस्य चर्चा, कण्टकभक्षयितुरिव जगत्कण्टकस्यैक्यस्य प्रतिपादयितुस्तस्य वाक्यस्य प्रमाणविचारोऽनर्थकर एवेति ध्वनिः॥ तथा हि। विशिष्टैक्यानुपपत्तावपि दण्डकुण्डलोपलक्षितयोरैक्यं विवक्ष्यते इति चेत् देवदत्तस्वरूपमात्रैक्यसिद्ध्या वाक्यवैयर्थ्यम्। अदण्डिव्यावृत्त्यादिसिद्ध्या सार्थक्यं इति च न युक्तम्। दण्डसंबन्धानुक्तौ व्यावर्तकत्वासिद्धेः। काकस्य उपलक्षकत्वमपि तस्य वा तत्कृतस्योत्तृणत्वादिधर्मस्य गृहसंबन्ध एव सिद्ध्यति। सर्वथा तदसंबन्धिन-स्तद्व्यावर्तकत्वमलौकिकम्। व्यावृत्तिवैशिष्ट्यासिद्ध्याऽपि सखण्डार्थत्वमेव। अभाववैशिष्ट्याङ्गीकारेऽपि तदपरिहारात्। व्यावृत्तेश्च भेदापरपर्यायत्वेन तदङ्गीकारस्य सुतरामनर्थकत्वात्। व्यावर्तकत्वं च न व्यावृत्तिजनकत्वम्। धर्मिस्वरूपाया व्यावृत्तेः धर्मिजनकेनैव उत्पत्तेः। विशेषणस्य वा उपलक्षणस्य वा तज्जनकत्वायोगात्। नापि व्यावृत्तिधीजनकत्वम्। धर्मिज्ञाने एव सर्वतो व्यावृत्तिज्ञानस्यापि सिद्धत्वात्। तदुक्तं तत्त्वनिर्णये 'भेदश्च स्वरूपदर्शन एव सिद्धः'। किन्तु व्यावृत्तिधीहेतुधीविषयत्वम्। तच्चानुमापकत्वं व्यावर्त्यसंबन्ध-मेवापेक्षते। पर्वतसंबन्धिनि एव धूमे अवह्निमद्व्यावर्तकत्वदर्शनात्। तथा च सत्यत्वादेः सर्वथा चिदसंबन्धिनः कथं व्यावर्तकत्वम्। ज्ञानं च विषयमनन्तर्भाव्य स्वसामग्रीमहिम्नैव ज्ञानान्तरव्यावृत्तम्। कलमबीजाद्भिन्ने वेत्रबीजे तथाभाव-दर्शनात्। देवदत्तसंबन्धित्वस्य उभयत्राविशेषात्। मध्येमार्गं पतितयो-स्तदभावाच्च॥ अतः उपलक्षणत्वेऽपि उपलक्ष्यसंबन्धस्यानिवार्यत्वेन सखण्डार्थमेव। विस्तरो न्यायामृते। (२१३)॥ ११२२॥

यथा धूमविशिष्टस्य वह्निवैशिष्ट्यवर्णने ।
न विशेषणयोरैक्यं न त्यागो नापि लक्षणा ॥ ११२३ ॥

विशिष्टैक्येऽपि न विशेषणैक्यं न वा विशेषणत्यागेन स्वरूपमात्रे लक्षणा इत्यत्र स्पष्टं दृष्टान्तमाह **यथेति** ॥ ११२३ ॥

तथा सति कथं व्याप्तिर्धूमवह्न्योः प्रसिद्ध्यति ।
व्याप्तिबोधार्थमेवैतद्वचनं सर्ववादिनाम् ॥ ११२४ ॥

विपक्षे व्याप्तेरेवासिद्धिं दोषमाह **तथेति** ॥ ११२४ ॥

इदं तु तत्पदं पूर्ववाक्योक्तगुणयुक्तताम् ।
ब्रह्मणो वक्ति देशादिव्यापकस्य न चापरम् ॥ ११२५ ॥

इदं तत्त्वमसीत्यत्र विद्यमानम् । न **चापरमिति** । देवदत्तस्येव तदेतद्देशकालसंबन्धिताम् । तस्या देशकालापरिच्छिन्नो सिद्धत्वेनाबोधनीयत्वात् ॥ ११२५ ॥

सत्यत्वात्मत्वैतदात्म्यपूर्वाः पूर्वपदोदिताः ।
गुणास्स्वार्थसमास्तेषां त्यागोऽर्थत्याग एव ते ॥ ११२६ ॥

पूर्वपदेति ऐतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा इति पूर्वपदेत्यर्थः । **ते इति** उक्तगुणानां त्वत्सिद्धान्तपरमप्रमेयत्वात् ॥ ११२६ ॥

अतः क्लीबविवाहार्थं चित्रस्त्रीप्रार्थनं तव ॥ ११२७ ॥

क्लीबेति सर्वथा ज्ञानरूपसूत्वजनकतत्त्वमसिवाक्येत्यर्थः । अखण्डार्थत्वं ज्ञानाजनकमिति चानर्थान्तरम् । सर्वेषां ज्ञानानां इदमित्थमिति सप्रकारकतयैव उत्पद्यमानत्वस्वरूपत्वात् । **चित्रस्त्रीप्रार्थनं** असंभविदृष्टान्तगवेषणम् ॥ ११२७ ॥

विशेष्यब्रह्मशब्दार्थसार्वज्ञादिगुणाम्बुधेः ।
निषेधः कुत्र दृष्टस्ते त्वं पदार्थगुणस्य च ॥ ११२८ ॥

किञ्चाविनाशी जीवोनुच्छित्तिधर्माश्रुतौश्रुतः ।
न कर्मणा कनीयान्यो नित्योऽस्य
महिमाऽपि च ॥ ११२९ ॥

गुणानां त्यागः न तन्मिथ्यात्वं प्रमाणाभावात् । प्रत्युत जीवगुणानां 'अविनाशी वे'त्यादिश्रुतिभिः, ईशगुणानां च 'न कर्मणा वर्धते' । 'एष नित्यो महिमा' इत्यादिभिः सत्यत्वेन सिद्धत्वादित्याह **विशेष्येति** ॥ ११२८ ॥ ११२२९ ॥

अतस्तद्गुणसन्त्यागः प्राणत्यागः श्रुतेर्भवेत् ।
परन्यायस्तु नैवास्ति दग्धारण्यमृगोऽभवः ॥ ११३० ॥

दग्धेति तस्य स्वतो वा वनाद्यांचितस्य वाऽऽहारस्याभावादित्याशयः ॥ ॥११३० ॥

यद्यैक्योक्तिबलादेव गुणानां बाधनं तदा ।
उत्पन्नबालमन्त्रेण विरोधग्रहनिग्रहः ।
निगृहीते च तस्मिंस्त्स्याद्बालस्योत्पादनं तव ॥ ११३१ ॥

वाक्येति तत्त्वमस्यादिवाक्येत्यर्थः । तदेवाद्यापि गहननिविष्टमिति नैक्यसाधनमित्यर्थः । तथा चान्योन्याश्रय इति भावः । तत्र दृष्टान्त **उत्पन्नेति** ॥ ॥११३१ ॥

सामान्यनिर्गुणोक्त्यापि न गुणोक्तेः पराभवः ।
यदग्नीषोमवाक्येनैव हिंसा वागपोद्यते ॥ ११३२ ॥

यदि तत्त्वं पदाभ्यां ते रूपमात्रनिरूपणम्।
चिच्चिदित्येव चोक्तं स्यात्कस्यैक्यं
तेन साध्यते ॥ ११३३ ॥

विशेषविषयकत्वेन निरवकाशत्वेन च गुणोक्तीनां प्राबल्ये दृष्टान्तः **यदिति**। निर्गुणवाक्यं तु सामान्यविषयकं प्राकृतगुणराहित्यार्थकत्वेन सावकाशं चेति भावः ॥ ११३२ ॥ ११३३ ॥

सोऽयमित्यत्र चोक्तं स्यात्प्राक्कालाद्यविवक्षणे।
देवदत्तो देवदत्तो घटो घट इति स्फुटम् ॥ ११३४ ॥

एवं च प्रत्यभिज्ञानस्वरूपस्यैव भर्जनात्।
स्थैर्यासिद्धिः पदार्थानां प्राप्ता च पुनरुक्तता ॥ ११३५ ॥

सोऽयमित्यत्र प्राक्कालाद्यविवक्षणे देवदत्तः देवदत्त इति स्फुटं उक्तं स्यादिति योजना। अतः अभिज्ञाद्वयात्प्रत्यभिज्ञायाः प्रमेयभेदो न स्यात्। एकस्मिन्कालद्वयसंबन्धस्याग्रहणात्। भेदभ्रमनिवृत्तिः स्थैर्यबोधकत्वं च न स्यात्। तथाच जितं क्षणिकवादिभिः। प्रत्यभिज्ञाव्यतिरिक्तस्य तन्निराकरणोपायस्याभावादिति भावः। एतेन यदुक्तं विवरणे 'सिद्धं तु निवर्तकत्वादि'ति। अभेदाबोधनेऽपि भेदभ्रमनिवर्तकत्वमात्रेण वाक्यप्रामाण्यमिति तदपि निरस्तम्। अभिज्ञाद्वयेनेव तन्निरासासंभवस्योक्तत्वात् ॥ ११३४ ॥ ११३५ ॥

पदेनानुदितो धर्मो नैव व्यावर्तको भवेत्।
न ह्ययं घट इत्युक्ते सिद्ध्येद्रक्तघटान्यता ॥ ११३६ ॥

तदेव विवृणोति **पदेनेति**। **धर्मः** सत्यत्वादिः। **व्यावर्तकः** असत्यादितः। निदर्शयति **नेति** किन्तु घटे रक्तत्वविरोधिश्यामत्वाद्युक्तावेवेति शेषः ॥ ११३६ ॥

अतस्त्वेष्टार्थसिद्ध्यर्थं तत्तदर्थपरिग्रहे ।
आवश्यके रूपमात्रलक्षणा कुत्र कथ्यताम् ॥ ११३७ ॥

रूपेति स्वरूपेत्यर्थः ॥ ११३७ ॥

पूर्वोत्तरत्वं चैकस्य स्यादेवोक्तव्यवस्थया ।
तत्सोऽयमिति वाक्यार्थ ऐक्यं स्यादविरोधतः ॥ ११३८ ॥

सार्वज्ञसर्वशक्तत्वपूर्णानन्दत्वपूर्वकः ।
तत्पदार्थो ब्रह्मगुणो दुःखित्वाज्ञत्वपूर्वकः ॥ ११३९ ॥

जैवो गुणस्त्वं पदार्थो यदि तत्त्वं पदोदितः ।
कथं पुनस्तयोरैक्यं स्यादत्यन्तविरुद्धयोः ॥ ११४० ॥

उक्तव्यवस्थयेति । यथोक्तं न्यायामृते 'तत्तादेरतीतत्वेऽपि यदान्विततया ज्ञाते एव तात्पर्यविषयीभूतेतरान्वयधीः तत्त्वरूपविशेषणत्वस्य संभवात्' इति अत एवाहुः सदसद्वा समानाधिकरणं विशेषणमि'ति च ॥ ११३८ ॥ ११३९ ॥ ११४० ॥

असीत्यैक्यस्य धर्माणां लटोक्ता वर्तमानता ।
श्रुत्युक्तधर्मस्याध्यासे त्वैक्याध्यासः
कुतो न ते ॥ ११४१ ॥

तत् त्वमसीत्यनेन तत् त्वंपदाभ्यां धर्माः, असीत्यैक्यं, लटा च वर्तमानता इति त्रयं उक्तम् । तत्र धर्माणां अध्याये ऐक्यस्यापि तथात्वं, ऐक्यस्य सत्यत्वे वा धर्माणामपि सत्यत्वं अवश्यं अङ्गीकार्यं श्रुत्युक्तत्वाविशेषात् इत्याह **असीति** ॥ ॥११४१ ॥

त्यजेदेकं कुलस्यार्थ इति न्यायमनुस्मर ॥ ११४२ ॥

इदं चोपेत्योक्तम् । वस्तुतस्तु बहुधर्मरक्षणाय एकस्यैक्यमात्रस्य परित्याग एवोचितः इत्याह **त्यजेदिति** ॥ ११४२ ॥

अद्याप्यसिद्धेरैक्यस्य धर्माध्यासः कुतो हरेः।
सत्यस्सो अस्य महिमेत्यस्ति हि श्रुतिरञ्जसा ॥ ११४३ ॥

ऐक्यवाक्यबलादेव धर्माध्याससिद्धिरिति न युक्तमित्याह **अद्यापीति** ॥ ॥११४३ ॥

अध्यस्तधर्माद्व्यावृत्तौ भवेच्छुक्तिरशुक्तिका।
इतरस्माद्विरूप्यत्वं व्यावर्तयति धर्मिणम् ॥ ११४४ ॥

किञ्च सर्वज्ञचाल्पज्ञाद्व्यावर्तयति धर्मिणम्।
व्यावृत्तिर्नामभेदोतो व्याहतिश्च ध्रुवा तव ॥ ११४५ ॥

वस्तुवृत्तिधर्मस्यैव व्यावर्तकत्वं न तु अध्यस्तस्येत्यनङ्गीकारेऽतिप्रसङ्गमाह **भवेदिति**। रूप्यत्वं विद्यमानमेव नत्वध्यस्तम् ॥ ११४४ ॥ ११४५ ॥

किञ्च कल्प्यमकल्प्यं वा सार्वज्ञं ब्रह्मणश्चितः।
सार्वज्ञरहितायास्ते शुद्धायास्स्वोपलक्षिताम् ॥ ११४६ ॥

चितं व्यावर्तयेन्न्यायसाम्याज्जीवचितो यथा।
जैवो धर्मोऽपि तच्छून्यचिन्मात्रात्स्वोप-
लक्षिताम् ॥ ११४७ ॥

चितं व्यावर्तयेदेव ततश्चिन्मात्रयोस्तव।
कथमैक्यमिदं वाक्यं वक्ति यौक्तिकसंसदि ॥ ११४८ ॥

चिन्मात्रैक्यं तु सर्वथा न सिद्ध्यतीत्याह त्रिभिः **किञ्चेत्यादिना**। कल्प्यमित्यनास्थया। **सार्वज्ञं** तत्पदोक्तम्। **ब्रह्मणः चितः** ब्रह्मचिति विद्यमानम्। सार्वज्ञरहितादिति हेतुगर्भम् ॥ **शुद्धायाः चितः** चिन्मात्रा। **स्वोपलक्षितां चितं** सर्वज्ञत्वोपलक्षितां ब्रह्मचितम्। **व्यावर्तयेत्** तत्र हेतुः न्यायसाम्यात् इति। साम्यस्थलं **जीवचितो यथेति**। एवं **जैवो धर्मः** अल्पज्ञत्वं त्वंपदोक्तम्।

स्वोपलक्षितां चितं अल्पज्ञत्वोपलक्षितां जीवचितम् । व्यावर्तयेदेव न्यायसाम्यात् ब्रह्मचितं यथा इति योजनीयम् । तथाच तदित्यस्य सर्वज्ञं ब्रह्मचिदेव न तु जीवचित् नापि चिन्मात्रं इत्यर्थः, त्वदित्यस्य च अल्पज्ञजीवचिदेव न तु ब्रह्मचित् नापि चिन्मात्रं इत्यर्थः संपन्न इति चिन्मात्रस्य पदद्वयेनापि व्यावर्तितत्वात् न कथंचित्तदैक्यसिद्धिरित्याशयः ॥ ११४६ ॥ ११४७ ॥ ११४८ ॥

व्यावृत्तेरनपेक्षायां चिच्चिदित्येव तद्वदेत् ।
का नो हानिरतो भेदवादिनां तत्त्ववादिनाम् ॥ ११४९ ॥

व्यावृत्तेरनपेक्षायां अन्यापोह एव शब्दार्थ इति बौद्धमतप्रमोषेण लक्षणचिन्मात्रैक्याङ्गीकारे । **का नो हानिः** प्रत्युत तदैव आगतः स एव पौनरुक्त्यवैयर्थ्यादिरूपः दुरात्मा दोषः पिशाचः इति भावः ॥ ११४९ ॥

अतः प्रत्यक्पराग्भावादल्पसाम्यांत्तयोस्सदा ।
सादृश्यैक्यपरैवेयं वाग्बिम्बप्रतिबिम्बयोः ॥ ११५० ॥

सादृश्यैक्येऽपि वाक्सिहो देवदत्त इति स्फुटा ।
मुखं चन्द्रः पदं पद्ममित्याद्याश्च सहस्रशः ॥ ११५१ ॥

'प्रतिबिम्बेष्वल्पसाम्यं' इति भाष्योक्तमाह **अल्पेति** ॥ ११५० ॥ ११५१ ॥

एकत्वरूपणे न स्यादुपमानोपमेययोः ।
रूपकाख्यो ह्यलङ्कारो वाक्यसौन्दर्यपोषकः ॥ ११५२ ॥

अतस्सार्वजनीनेऽर्थे सति सर्वा विरोधिनि ।
स्वतोऽन्यतो विरुद्धार्थं को नून्मादी वदेद्वद ॥ ११५३ ॥

यादृश्यैक्ये अभेदव्यवहारः 'अखिलाज्ञानमतध्वान्तदिवाकरः' इत्यत्रेव रूपकालङ्कारपोषक इत्याह **एकत्वेति** । एवं प्रयोगे लघुमाशब्देन बह्वर्थलाभश्च फलम् ॥ ११५२ ॥ ११५३ ॥

ईशाभेदस्य कथनं स्तब्धस्तब्धत्ववृद्धिदम्।
प्रकृतासङ्गतं च स्याच्छिष्यकल्पतरोर्गुरोः ॥ ११५४ ॥

शिष्यकल्पतरोः पुत्रवत्सलस्य उद्दालकमुनेः। **स्तब्धस्य** प्रागेवानूचानमानिनः स्तब्धस्य पुत्रस्य। स्तब्धत्ववृद्धिदः। 'ईश्वरोऽहमहं भोगी' इति अभेदानुसन्धानस्य स्तब्धतारूपत्वात् ॥ ११५४ ॥

मानेन स्तब्धचित्तस्य प्रतिबिम्बत्वरूपणे।
ईशाधीनत्वबोधाप्त्या वाक्यं स्यादतिसङ्गतम् ॥ ११५५ ॥

गर्वपरिहारप्रकरणत्वात् ईशाधीनत्वोक्तिरेव श्लिष्टेत्याह **मानेनेति**। तदुक्तं तत्त्वनिर्णये सर्वान् वेदानधीत्य महामना अनूचानमानी स्तब्ध एयास' इत्यात्मनोऽन्यं अनूचानत्वादिगुणप्रदं परमविज्ञाय स्तब्धस्य पराधीनत्वज्ञापनेन स्तब्धतां निरस्य तन्निष्ठा ह्यत्रोपदिश्यते इति ॥ ११५५ ॥

दृष्टेऽर्थेऽयुक्तशिष्टोक्तेस्तमेवार्थं विमर्शवान्।
को गृह्णीयाद्विषं भुंक्ष्वेत्युक्ते किं
विषमत्ति तत् ॥ ११५६ ॥

दृष्टेऽर्थे आपातप्रतीतार्थे अयुक्ता च सा शिष्टोक्तिः इति विग्रहः। शिष्टस्य आप्तस्य उक्तिः। आप्तोक्तस्यापि प्रमाणविरुद्धस्यापातार्थस्य, विमर्शवान् शिष्यः, कः तमेवार्थं अयुक्तमेवार्थं गृह्णीयात्। तत्र निदर्शनं **विषं भुंक्ष्वेति**। द्विषदन्नं न भोक्तव्यमिति तात्पर्येण आप्तेनोक्ते सति। **किं विषमत्ति** नैव अत्ति। किन्तु प्रमाणविरुद्धार्थप्रयोगेण तस्य क्रोधं अनुमाय, क्रोधस्य च आत्मनः शत्रुगृहान्न भक्षणोद्यमत इति च अनुमाय, द्विषदन्नस्य अभोक्तव्यतामेव वाक्यतात्पर्यार्थं निश्चिनोति। तदुक्तं 'वाक्यलिङ्गकानुमा हि सा' इति ॥ ११५६ ॥

अत एव गुरुश्शिष्यस्तब्धबुद्धिं पदे पदे।
विचारशीलां रचयन्स्पष्टं नाचष्ट कार्यवित् ॥ ११५७ ॥

तदाधीनोऽसीति स्पष्टमनुक्तौ कारणमाह विचारेति ॥ ११५७ ॥

अद्यापि बुद्धिवैशद्यसिद्ध्यर्थं वक्रमुद्रया ।
आलिख्य वर्णशिक्षायां मेधामाधावयन्ति हि ॥ ११५८ ॥

वक्रमुद्रया क्रममुल्लंघ्य ॥ ११५८ ॥

बोधोबुद्ध्यै तथा प्राह मन्तारं मन इत्यपि ।
अभ्रमाय प्रजाशब्दं तत्र प्रायुंक्त चोपरि ॥ ११५९ ॥

'मननान्मन उद्दिष्टा' इति विमर्शार्थं मन्तारं जीवं मनःशब्देन प्राह । मम भ्रमो मा भूदिति कृपया प्रजाशब्दप्रयोगेण तदर्थं व्यवृणोत् ॥ ११५९ ॥

अहंब्रह्मेति योऽनुक्त्वा त्वं ब्रह्मेत्याह मां गुरुः ।
अतो नास्य प्रतीतार्थ इत्यन्यार्थे करोन्मतिम् ॥ ११६० ॥

कथं स्वशिष्यस्य मम स्वाशिष्यब्रह्मतां वदेत् ।
कथं च दुःखिनोऽज्ञस्य ब्रह्मत्वमपि मेऽधुना ॥ ११६१ ॥

यदि जीवाभेद एव पित्रा जिज्ञापयिषितः तदा मदधिकस्य स्वस्यैव अग्रतः ब्रह्मतां 'अहं ब्रह्मेति शब्दविन्यासेन अवदिष्यत् । तथाऽनुक्त्वा अधमं मां 'त्वं ब्रह्मेति' उक्तवान् । अतः, **अस्य** वाक्यस्य । **न प्रतीतार्थः** प्रतीत एवार्थः, न तात्पर्यविषयभूतः । **स्वाशिष्यब्रह्मतां** स्वस्य अशिष्यरूपं प्रत्युत स्वामित्वेन नित्यं आराध्यदेवतारूपं यद् ब्रह्म, तदात्मतां तदैक्यम् । यद्वा स्वेन अशिष्या, उपदेष्टुमनर्हा अनर्थहेतुभूता या ब्रह्मता ब्रह्मैक्यं ताम् । **अधुना** असीत्युक्त्या वर्तमानकाले । स्वकाले 'नाहं निर्दुःख' इति भेदस्य अस्तितां गृह्णन् साक्षी तस्य त्रिकालबाध्यतामेव निश्चिनोतीति हृदयम् । तदुक्तं 'स्वकाले ह्यस्तितां गृह्णन् साक्षात्कारस्त्रिकालगम् । प्रतिषेधं निरुन्धानो गृह्णात्येवात्यबाध्यतामि'ति ॥ ११६१ ॥

प्रजामूलब्रह्मता स्यात्कथं तास्वधमस्य मे।
प्राणसंस्थस्य जीवस्य प्राणाख्यब्रह्मता च न।
सुप्तौ च येन संपन्नस्सो सुप्तौ स्यामहं कथम्॥ ११६२ ॥

प्रजामूलेति 'सन्मूलाः सोम्य इमाः सर्वाः प्रजाः' इत्यत्रोक्तेत्यर्थः। **प्राणसंस्थस्येति**। 'प्राणबन्धनं हि सोम्य मनः' इत्युक्तस्येति भावः। **संपन्नः** न तु एकीभूतः ॥ ११६२ ॥

करुणापूर्णगुरुणा तन्नात्र ब्रह्मतोच्यते।
ममेति निर्ममो भूत्वा पुनर्मीमांसकोऽभवत्॥ ११६३ ॥

निर्ममः ममैवेदं अनूचानत्वं इति स्तब्धतायाः निष्क्रान्तः ॥ ११६३ ॥

अस्ति सादृश्यमात्राच्च वस्तुवस्त्वन्तरात्मना।
कथ्यमानं तत्र तत्र सेयं वाक्तावतैव न ॥ ११६४ ॥

प्रतीचस्स्वनियन्तुश्च कथं सादृष्यमात्रतः।
पराचीशनियम्ये च मयीयं वाक्प्रवर्तताम् ॥ ११६५ ॥

प्रतिबिम्बं दर्पणस्थं मुखमित्येव लौकिकाः।
वदन्ति तन्नियम्योऽसौ परा क्व प्रतिदृश्यते॥ ११६६ ॥

तत्र तत्र आदित्यो यूपः, अग्निर्माणवकः इति लोकवेदयोः। **तावतैव** केवलं सादृश्यमात्रेण। किन्तु प्रतिबिम्बस्येव तन्नियम्यत्वेनापि। यथोक्तं भाष्ये 'अत एव भिन्नत्वतदधीनत्वतत्सादृश्यैरेव सूर्यकाद्युपमा' इति॥ ११६४॥ ११६५॥ ॥११६६ ॥

अतस्तद्विधतामेव लघूक्त्या मयि बोधयन्।
मतिं प्रचारयंश्चोचे नोचेदाचार्यता कथम् ॥ ११६७ ॥

तद्विधतां प्रतिमुखविधतां तदधीनत्वतत्सादृश्यपराक्त्वाभिमुख्यरूपाम् ॥ ॥११६७ ॥

तस्मात्प्रत्यक्पराग्भावो नियामकनियम्यता ।
अशब्दोच्चारणस्येव सादृश्यं चाल्पमेव मे ।
इति प्रबुध्य दुर्बुद्धिं त्यक्त्वा भक्तो भवत्प्रभोः ॥ ११६८ ॥

अथापि कृपया शिष्यस्यायोग्यार्थे प्रमादतः ।
गतिं निवारयंत्सूत्रशकुन्यादीन्यदर्शयत् ॥ ११६९ ॥

तदुक्तस्पष्टदृष्टान्ते स्वयोग्यां प्रतिबिम्बताम् ।
ज्ञात्वेशाधीनताबोधादस्तब्धोऽभूदिति स्थितम् ॥ ११७० ॥

अशब्दोच्चारणस्य शब्दोच्चारणरहितस्य प्रतिमुखस्य । अल्पमेव चित्वादिना न तु सार्वज्ञादितद्गतासाधारणधर्मैः ॥ ११६८ ॥ ११६९ ॥ ११७० ॥

किञ्च जीवब्रह्मभावो यदि तस्य विवक्षितः ।
तर्ह्यहं तदिति ब्रूयात्सर्वं तदिति वा वदेत् ।
त्वं तदित्युपदेशस्तु व्यर्थस्तद्भावमानिनि ॥ ११७१ ॥

तद्भावमानिनि ब्रह्मनिष्ठस्य स्वातन्त्र्यलक्षणस्य स्वस्मिन्नस्तीत्यनुसन्धानवति । व्यर्थः ज्ञातज्ञापकत्वेन निष्फलः ॥ ११७१ ॥

गर्बिष्ठगर्वनिर्वाणकुर्वन्गुर्वग्रणीरसौ
अतद्वस्तुत्वमित्याहेत्यस्ति शस्ता गतिश्च मे ॥ ११७२ ॥

अतः प्रकरणानुरोधाय अतदित्येव पदच्छेद इत्याह अत इति ॥ ११७२ ॥

त्वं वासुदेवो भगवानवतीर्णो जगत्पतिः ।
इति प्रस्तोभितोबालैर्मेने स्वात्मानमच्युतम् ॥ ११७३ ॥

कदाचित्पौण्ड्रको नाम काशीराजः प्रतापवान्।
वासुदेवोऽहमित्यज्ञो दूतं कृष्णाय प्राहिणोत्॥ ११७४ ॥

कत्थनन्तदुपाकर्ण्य पौण्ड्रकस्याल्पमेधसः।
उच्चकैरुग्रसेनाद्यास्सभ्याः प्रजहसुस्तदा ॥ ११७५ ॥

ये सोहंभावनामूलास्ते बालाः किल सर्वशः।
वञ्चनं किल तज्ज्ञानं कत्थनं किल तद्वचः ॥ ११७६ ॥

अज्ञोल्पमेधास्स किल यस्तत्र कृतनिश्चयः।
सभ्यानां न तदभ्याशयोग्यं हास्यं किलाखिलैः॥ ११७७ ॥

त्वमित्यादिभागवतश्लोकत्रयं अनूद्य तदभिप्रायं स्वयं विवृणोति **य इत्यादिभिः**। **बालाः** विवेकविधुराः। प्रस्तोभित इत्यस्यार्थः '**वञ्चनं किल**'इति। वञ्चित इत्यर्थः। **कत्थनं** अतिहीनं वचनं, मुधा श्लाघनम्। **तत्र** प्रतारकवाक्ये। **कृतनिश्चयः** याथार्थ्यनिश्चयवान्॥ ११७३ ॥ ११७४ ॥ ११७५ ॥ ११७६ ॥ ११७७ ॥

मुख्याधिकारी तद्भावे पौण्ड्रकाख्यो सुरः किल।
एवं विनिन्दितं सोऽहंभावं कः श्रद्धीत तत्॥ ११७८ ॥

मुख्याधिकारी निसर्गत 'ईश्वरोऽहं' इति आसुरभावनावान्॥ ११७८ ॥

यदि तत्त्वं महदिदं कथं निन्द्यं भवेत्सताम्।
सकृन्निन्दाऽपि निन्दैव किमु निन्दापदे पदे ॥ ११७९ ॥

अत्र अनेकधा अभ्यासेन ऐक्यस्य निन्दितत्वात् तत्र निन्दायां, भेदसत्यत्वे च तात्पर्यातिशयो ज्ञापित इत्याह **पदे पदे इति**॥ ११७९ ॥

नन्वसौ दूरमानीय शेते मामिह साधुवत्।
इति मत्वाऽच्युतं मूढस्स्वपदातमताडयत् ॥ ११८० ॥

नन्विति कालयवनस्य ऐक्यानुसन्धाननिरूपणम् ॥ ११८० ॥

पृथक्स्थिताच्युताज्ञानात्तत्सादृश्ययुते नृपे ।
यवनस्याच्युतमतिश्च्युतिकालेऽभवत्किल ॥ ११८१ ॥

पृथक् तत्रैव गुहायां पार्श्वतो निलीनतया । च्युतिकाले तमःसंस्थितिसाधनकाले । 'अथ च दैत्यहतिः तमसि स्थिरा नियतसंस्थितिरि'त्युक्तेः ॥ ११८१ ॥

एकस्मिन्नपि जीवेऽस्मिन्मूढस्याच्युतधीः किल ।
अतस्सर्वेषु जीवेषु सा धीर्मूढतमस्य हि ।
निनिन्द शुकयोगीन्द्रो यां सभास्थस्स्थले
स्थले ॥ ११८२ ॥

सभास्थः गङ्गातीरे मुनिसभास्थः ॥ ११८२ ॥

ईश्वरोऽहमिति ब्रूयुर्मदिरामत्तवृत्तयः ।
दैत्या इत्याह स मुनिर्व्यक्तं भूगोलनिर्णये ॥ ११८३ ॥

यस्मिन्नुपयुक्ते इति मैरेयीनाममदस्य पानानन्तरं इति पूर्वकथाऽनुसन्धेया । भूगोलनिर्णये पञ्चमस्कन्धे अधस्तनलोकवर्णनावसरे ॥ ११८३ ॥

यस्त्वया मन्दभाग्योक्तो मदन्यो जगदीश्वरः ।
क्वासौ यदि स सर्वत्र स्तम्भे कस्मान्न दृश्यते ॥ ११८४ ॥

य इति हिरण्यकशिपोर्विनाशाभिमुखस्य वचनम् ॥ ११८४ ॥

स्वान्येश्वरनिषेधेन स्वस्यैवेश्वरता हृदि ।
हिरण्यकशिपोश्चेति स्पष्टं ह्यत्र प्रतीयते ॥ ११८५ ॥

अत्र ईश्वरस्य अन्यत्वनिषेधे ऐक्यानुसन्धानं सुतरां ज्ञायते ॥ ११८५ ॥

इति भागवते प्रोक्तं तत्र तत्र कथान्तरे ।
अत्राधिकारिणस्सर्वे श्रूयन्ते क्रूरराक्षसाः ॥ ११८६ ॥

ईश्वरोऽहमहं भोगी सिद्धोऽहं बलवान्सुखी ।
असत्यमप्रतिष्ठं ते जगदाहुरनीश्वरम् ॥ ११८७ ॥

इदं गीतासु कृष्णेन ह्यासुरीं पार्थ मे शृणु ।
इत्यारभ्योदितं तस्मान्मतमेतद्धि रक्षसाम् ॥ ११८८ ॥

अतोऽपि जीवभेदोऽयं बुधैर्मान्यो मुमुक्षुभिः ॥ ११८९ ॥

नीतायां ऐक्यभावनाया विशिष्य आसुरत्वेन अवधारितत्वाच्च न तत्तत्त्वमित्याह **ईश्वर इति** । 'असत्यमप्रतिष्ठं' इत्यादिकं तत्रैव वाक्यान्तरम् । अत्र जगदन्तःपातिनां सर्वज्ञत्वाल्पज्ञत्वादीनां मिथ्यात्वेन भागत्यागलक्षणाश्रयणं निन्दितमिति प्रकृतोपयोगः ॥ ११८६ ॥ ११८७ ॥ ११८८ ॥ ११८९ ॥

इत्यैक्यनिन्दनाद्ग्रन्थे स्पष्टं ग्रन्थकृतैव हि ।
क्वचिदापाततः प्राप्तं नैक्यं वाक्यार्थ इष्यते ॥ ११९० ॥

स्पष्टं निरवकाशम् । तदुक्तं वादावल्ल्यां 'असत्यमप्रतिष्ठं ये जगदाहुरनीश्वरं' इति निरवकाशस्मृतिविरोधश्चेति । तदुक्तं 'शास्त्रं हि असन्निकृष्टेऽर्थे शब्दविज्ञानं' इति 'असन्निकृष्टशब्देन द्वयमत्र जिहासितम् । ताद्रूप्येण परिच्छेदः तद्विपर्ययतोऽपि चेति च ॥ ११९० ॥

अविरुद्धे तु वाक्यार्थे यथा श्रुतपरिग्रहः ।
विरुद्धे सति वाक्यार्थे वृत्तिवृत्त्यन्तरे सताम् ॥ ११९१ ॥

वृत्त्यन्तरं इति 'पूर्वायोगे परग्रह' इत्युक्तेः ॥ ११९१ ॥

एवं च भवदद्वैतभिक्षू राक्षसमन्दिरे ।
भैक्षार्थमागमत्तेषां नाशे चानशनो पतत् ॥ ११९२ ॥

एवं चेति श्रुतिस्मृतिषु कुत्रापि तदभीप्सितैक्यभिक्षाया अलाभात् ततो बहिष्कृतत्वाच्च ॥ ११९२ ॥

सुपर्णौ द्वौ सहयुजौ सखायौ देहपिप्पलम् ।
ब्रह्मजीवाभिधौ नित्यं स स्वजाते परावरौ ॥ ११९३ ॥

तयोर्मध्ये ब्रह्मणोऽन्यो यस्तु जीवाभिधः खगः ।
स पुण्यपापकर्मोत्थं फलमत्ति सुखासुखम् ॥ ११९४ ॥

जीवादन्यस्तु यः पक्षी परमात्माभिधो महान् ।
सोऽनश्नन्नभितो नित्यं चाकशीति महाप्रभुः ॥ ११९५ ॥

इति श्रुतिस्तयोर्भेदं स्पष्टमाह स युक्तिकम् ।
अन्यावकाशशून्या सा मान्या केन न वादिना ॥ ११९६ ॥

द्वा सुपर्णेति श्रुतिं 'ॐ स्थित्यदनाभ्यां च' इति सूत्रभाष्योक्तदिशा सपरिकरं व्याख्याति । **सुपर्णावित्यादिभिः** । वृक्षमित्यस्यार्थः देहपिप्पलमिति । परीत्यस्यार्थः नित्यमिति । **तयोः** । मध्ये इति शेषः । **अन्यः** परमात्मनः इति पूरणीयम् । जीवाभिधः इति । पिप्पलं कर्मफलं सुखासुखम् । **अनश्नन्** भोगनिरपेक्षम् । **अभि** अभितः नित्यम् ॥ ११९३ ॥ ११९४ ॥ ११९५ ॥ ११९६ ॥

यस्माज्जीवेशयोर्भेदव्याप्य द्वित्वाख्ययुक्तितः ।
प्राक्प्रसाध्यभिदां पश्चादशनानशनाख्यया ।
विरुद्धधर्मयुक्त्या च बलीयस्यात्तयोर्भिदाम् ॥ ११९७ ॥

पुनः प्रसाध्या पश्चाच्च श्रुतिस्स्पष्टं द्विधर्मिणीम् ।
अन्यो सावयमन्यश्चेत्याह जीवेशयोर्भिदाम् ॥ ११९८ ॥

अन्यावकाशशून्या इत्येतदुपपादयति **यस्मादित्यादिभिः** । **द्वित्वाख्ययुक्तितः** द्वित्वस्य उत्सर्गतः भेदव्याप्तत्वेऽपि 'द्वित्वं चैकस्य युज्यते' इत्युक्तेः क्वचिदपवादात् आह **विरुद्धेति** । बलीयस्या इति च ॥ ११९८ ॥

तस्माद्द्विरूपया युक्त्या श्रुत्या चोभयरूपया ।
साधयन्ती तयोर्भेदं केन मान्या न वादिना ॥ ११९९ ॥

अभ्यासश्चोपपत्ती च तात्पर्यद्योतकं त्रयम् ।
लिङ्गं यतोऽस्ति तत्स्वार्थान्नैव चाल्या कथञ्चन ॥ १२०० ॥

तद्विरुद्धा सावकाशा श्रुतिरैक्यं कथं वदेत् ।
प्रबलायाविरोधेन दुर्बलार्थान्तरं भजेत् ॥ १२०१ ॥

द्विधर्मिणीं भिदा तयोरन्य इति जीवधर्मिकं भेदम् ॥ ११९९ ॥ १२०० ॥ ॥१२०१ ॥

द्वौ बुद्धिजीवावित्याहुस्साङ्ख्यास्त्वत्पूर्वपक्षिणः ।
त्वं तु जीवपरात्मानौ द्वौ हृदीति प्रसाधयन् ॥ १२०२ ॥

अत्रोक्तौ पक्षिणौ जीवपरावेव कुतः बुद्धिजीवौ किं न स्यातामित्याशङ्कां परसंमतिप्रदर्शनेन युक्तिभिश्चापाकरोति **द्वावित्यादिभिः** । **पूर्वपक्षिणः** गुहां प्रविष्टावात्मानौ हि तद्दर्शनात्' इति नये सांख्याः ॥ १२०२ ॥

तज्जीवपरमात्मानौ खगौ तव ममापि च ।
तद्भेदबोधिका सेयं श्रुतिरित्यपि संमतम् ॥ १२०३ ॥

तत् तस्मात् । तयोरिति वा । स भेदः व्यावहारिक इति तु कुकल्पना निर्मूलेत्यन्यदेतत् ॥ किञ्च तत्र यथा बुद्धिजीवाविति परीत्योक्तं तथा तत्त्वमसीत्यत्र सिद्धान्तेऽपि उपादानस्य अविद्यारूपप्रकृतेः उपादेयस्य देहेन्द्रियादेश्चाभेद एवार्थः व्याख्यायताम् । किं जहदजहल्लक्षणया चिन्मात्रैक्यकल्पनादुर्व्यसनेन । अविद्या हि

ब्रह्म विशेषणं, देहाद्युपाधिः तदुपादानको जीवस्य। तथा च नागृहीतविशेषणान्यायेन विशेष्यांशे बाधे विशेषणयोः अविद्यातत्कार्ययोरभेदो न्यायप्राप्तः । उभयोरपि जडत्वादुपपन्नश्च ।

अपि च वृक्षस्य प्रकृतिरूपतया बुद्धेरपि तद्विकारत्वेन तदेकदेशत्वेन च नात्रोक्तः परिष्वङ्गो युक्तः । बुद्धिजीवयोर्जडाजडयोः सख्यं च दुर्घटम् । सुपर्णावेतौ सयुजौ सखायौ' इत्यत्र भागवते स्पष्टं जीवपरमात्मपरत्वेन व्याख्यानात् तद्विरोधश्च । आथर्वणभाष्ये अस्यैव वाक्यस्य जीवपरमात्मपरत्वेन भाषितत्वेन तद्विरोधश्च । तदेतदभिप्रेत्योक्तं **तवापि च ममापि चेति** ॥ १२०३ ॥

सुखदुःखाद्यनुभवो जीवसाक्षी किलावयोः ।
बुद्धिस्तु घटपूर्वार्थबुद्धिर्न सुखदुःखधीः ॥ १२०४ ॥

युक्त्यन्तरेणापि अत्र कर्मफलं सुखदुःखं अत्ति इत्युक्तः जीव एव न बुद्धिरित्याह **सुखेति** । 'स दुःखी स सुखी चैव, स जीव इति कीर्तितः' इति परमश्रुतौ तस्य तत्तल्लक्षणत्वेनोक्तेः । मनोवृत्तिस्तु बाह्यार्थविषयिण्येवेत्याह **बुद्धिरिति** ॥ ॥१२०४ ॥

अतोत्ता जीव एवात्र न बुद्धिर्बुद्धिमन्मते ।
यत्पिप्पलं कर्मफलं सुखदुःखे च ते स्मृते ॥ १२०५ ॥

अदनं च तयोस्साक्षादीक्षणं निजसाक्षिणा ।
अनश्नन्परमात्मैव योभितोपि प्रकाशते ॥ १२०६ ॥

अदनं च रससाक्षात्कारः साक्षिणैवेत्याह **अदनं चेति** ॥ १२०५ ॥ १२०६ ॥

सोऽनश्नन्पारमार्थ्येन सोऽत्ति चापरमार्थतः ।
इति शङ्का पिशाचीं तु हन्ति युक्ति नृकेसरी ॥ १२०७ ॥

य एवात्ति स वानश्नंश्चेति श्रूयते यदि ।
तदोत्थानं भवेदस्य नैवमाह श्रुतिस्सती ॥ १२०८ ॥

नन्वत्र अपारमार्थ्येन अत्ति पारमार्थ्येन अनश्नन् इति पदद्वयं अध्याह्रियते । अतो न भेदसिद्धिरिति मन्दाशङ्कां हिनस्ति **स इत्यादिभिस्त्रिभिः** । अत्र अन्यः अन्यः इति सुस्पष्टं द्वयोरेव श्रवणात् अनुपपत्तिरेव नास्ति । यच्छमनाय अध्याहारप्रयास इत्याह **य इति** ॥ १२०७ ॥ १२०८ ॥

अत्त्यन्योयमनश्नंश्च तथान्य इति सा जगौ ।
अतस्तच्छ्रुतमन्यत्र जीवे त्वश्रुतमेव हि ।
अभूदनशनं तेन वदनं मुद्रितं तव ॥ १२०९ ॥

तत् अनदनं अभिचाकशनं च ॥ १२०९ ॥

यदेतच्छ्रुतमिथ्यात्वमश्रुतस्य च सत्यता ।
वदेत्तद्वैदिकं मन्यस्त्वन्न्यायेन न किं शुभा ॥ १२१० ॥

एवं वदतः जीवे श्रुतस्य अशनस्य हानिः अश्रुतस्य अनशनस्य च स्यादित्याह **यदिति** ॥ १२१० ॥

न चेच्छङ्का पिशाचीयं व्याहति प्रमदाकुलम् ।
हन्यादन्यायवाक्सा च त्वन्न्यायेन न किं शुभा ॥ १२११ ॥

किञ्चानश्नन्निितिपदमशनाभाववाचकम् ।
अश्नन्नित्यशनं वक्ति कथमेकत्र ते वद ॥ १२१२ ॥

इयं अश्रुतपदाध्याहारेण प्रमाणविरुद्धार्थघटना । व्याहति प्रमदाकुलं, कर्म हन्यादिति योजना । 'मे माता वन्ध्या' इत्यादिके सर्वत्रापि अपरमार्थतः माता, परमार्थतः वन्ध्या इति समाधानस्य सुकरत्वादिति भावः । तथा च ईदृशी व्याहतिग्रस्ता अन्यायवाक् सर्वाऽपि शुभैव स्यात् ॥ १२११ ॥ १२१२ ॥

भावाभावविरोधस्य न चेच्छान्तिर्भविष्यति ।
ततश्च भावरूपं ते नैवाज्ञानं प्रसिद्ध्यति ॥ १२१३ ॥

अभावाज्ञानवादो हि भावाभावविरोधतः ।
निवार्यते त्वया तस्याभावेऽसौ केन वार्यते ॥ १२१४ ॥

एवं भावाभावविरोधस्यैवापलापे तव भावरूपाज्ञानासिद्धिरेव स्यादित्याह **ततश्चेति**। स्वप्रकाशेन चैतन्येन आध्यात्मिकसंबन्धस्य विद्यमानत्वेऽपि ज्ञानाभावघटनाय खलु भावरूपमज्ञानमावरणं त्वयैष्टव्यम् । न च तदुक्तम् । इदानीं त्वदुक्तरीत्या ज्ञाने सत्यपि ज्ञानाभावस्य अन्यतरस्य मिथ्यात्वकल्पनेनैवोपपत्तौ अज्ञानरूपावरणकल्पनस्य क्वावकाश इति भावः ॥ १२१३ ॥ १२१४ ॥

जगच्च ब्रह्मणि सदा सदेव स्यादखण्डितम् ।
तदभावाख्यबाधोऽपि स्यात्तयोरविरोधतः ॥ १२१५ ॥

सदेव परमार्थतः । **बाधोऽपि** अपरमार्थतः ॥ १२१५ ॥

भावाभावविरोधोऽतो वाच्यस्सर्वात्मना त्वया ।
अभावेन सह स्थित्या मिथ्यात्वाशाप्यतो गता ॥ १२१६ ॥

भावाभावरूपत्वस्य तृतीयप्रकारस्यैवं संभवेन मिथ्यात्वरूपचतुर्थप्रकारोऽपि न सिद्ध्येदिति आह **मिथ्यात्वेति** ॥ १२१६ ॥

विरोधेऽप्यविरोधेऽपि ततस्सा घटते न ते ॥ १२१७ ॥

विरोधे अन्यतरत्वस्यैव अविरोधे उभयात्मकत्वस्य संभवेन, **सा** मिथ्यात्वाशा ॥ १२१७ ॥

भावाभावविरोधे हि स्वोक्तमिथ्यात्ववाग्गता ।
स्वाभावेन सह स्थित्या यतो मिथ्यात्वमुच्यते ॥ १२१८ ॥

विरोधे स्वात्यन्ताभावसमानाधिकरणत्वरूपमिथ्यात्वलक्षणमेव व्यासज्यत इत्याह **स्वोक्तेति** ॥ १२१८ ॥

अविरोधे जगत्सत्स्याद्भावाज्ञानं च भर्जितम् ॥ १२१९ ॥

अविरोधे अत्यन्ताभावस्यापारमार्थिकत्वे मिथ्याभूतमिथ्यात्वकत्वेन जगत् सत्स्यात् । **भर्जितं** प्रागुक्तदिशैव ॥ १२१९ ॥

तथापि लोकतो भीत्या भावज्ञानरिरिक्षया ।
विरोध एव श्लाघ्यस्ते यो योग्यो बुधसंसदि ॥ १२२० ॥

तथाऽपि पक्षद्वयेऽपि त्वत्सिद्धान्तहानावपि । विरोधपक्ष एव श्लाघ्यः । तत्र हेतुद्वयं लोकत इति भावाज्ञानेति च । भावाज्ञानं खलु त्वन्मतजीवातुः । तदसंभवे त्वन्मतमखिलमपाकृतं स्यादिति भावः ॥ १२२० ॥

अतो धर्मद्वयस्यास्य भिद्येते धर्मिणावपि ॥ १२२१ ॥

अतः विरोध्यङ्गीकारस्यावश्यकत्वात् । **धर्मद्वयस्य** अशनानशनरूपस्य । **धर्मिणौ** जीवपरमात्मानौ ॥ १२२१ ॥

यथास्थितपदस्यार्थायोगेऽध्याहार इष्यते ।
जीवशयोर्द्वयोस्सत्त्वादर्थो युक्ततरोऽभवत् ।
अतोऽध्याहार एवैष दोषाध्याहार एव ते ॥ १२२२ ॥

प्रमाणसिद्धघटनाय खलु अध्याहारः । त्वदुक्तस्तु तद्विघटनायैव जात इति दोष एवेत्याह **यथास्थितेति** ॥ १२२२ ॥

यद्येवमपि ते प्रीतिरध्याहारे महीयसी ।
तदाध्याहरभावार्थपरमेकं हि लाघवात् ॥ १२२३ ॥

ततश्च पारमार्थ्येन तौ धर्मौ धर्मिणोर्द्वयोः ।
धर्मभूतौ तयोर्भेदं स्थिरीकुरुत एव हि ॥ १२२४ ॥

अपीत्यनेन अध्याहारपक्षं गर्हयति । बाधकाभावेन पारमार्थस्य स्वतःसिद्धेः । एकं पदं पारमार्थ्येनेति पदम् । स्थिरीकुरु भेदकधर्माणां पारमार्थ्यकथनेनेति भावः ॥ ॥१२२४ ॥

मुक्तोऽपि ब्रह्मणा साकं सर्वान्कामान्किलाश्नुते ।
पारमार्थ्यं च तदशने युक्तं नापरमार्थता ॥ १२२५ ॥

सोऽश्नुते इति मुक्तावपि अशनस्य श्रुतत्वात् तदपारमार्थ्यं अश्रौतं चेत्याह मुक्त इति ॥ १२२५ ॥

अतो जीवेशयोर्भेदः श्रुत्यर्थस्सुतरामभूत् ।
श्रुतेः प्रच्यावनं तस्माच्छ्रुतप्रच्यावनं तव ॥ १२२६ ॥

अतः बुद्धिजीवपरिग्रहपक्षस्य दूषितत्वात् ॥ आविद्यकबुद्धेर्मुक्तावभावात् । तत्परतयाऽर्थकथने श्रुतिप्रच्यावनं ततश्च तव श्रुतप्रच्यावनं वेदान्तश्रवणरहितेति व्यवस्थापकं च ॥ १२२६ ॥

अतो यथाश्रुतश्रुत्या तवानर्थस्स्थिरोऽभवत् ।
अध्याहारे तु सोऽनर्थो ह्यनिवर्त्यो भवेत्तव ॥ १२२७ ॥

कथं द्वितैकदैकत्र वृथेवमपि कल्पने ।
किमेकस्मिन्नपि घटे धर्मद्वित्वाद् द्वितोच्यते ॥ १२२८ ॥

अपि च अस्तु कथञ्चिद्धर्मयोरेकत्र घटना । सर्वथा धर्मिणि द्वित्वानुपपत्तिरेवेत्याह किमिति ॥ १२२७ ॥ १२२८ ॥

किन्तु रूपरसादीनां बहुत्वे द्वित्व एव च ।
रसवान्रूपवांश्चैको घट इत्यवकीर्त्यते ॥ १२२९ ॥

अविरुद्धधर्माणामेकत्र वृत्तिरविरुद्धैवेत्याह **रूपेति** ॥ १२२९ ॥

नचेत्सौन्दर्यधैर्याभ्यां भार्ये द्वे भवतस्तव ।
अतः पुनर्विवाहार्थमपुत्रस्य वृथा श्रमः ॥ १२३० ॥

अन्यथाऽतिप्रसङ्गोक्त्या परमपहसति **न चेदिति** ॥ १२३० ॥

विद्यामयो नित्यमुक्तो वेदात्मानं किल प्रभुः ।
पिप्पलादं स्वतोऽन्यं स वेदाविद्यान्धचक्षुषम् ॥ १२३१ ॥

'आत्मानमन्यं च स वेद विद्वानपिप्पलादो न तु पिप्पलादः । योऽविद्ययान्धः स तु नित्यबद्धो विद्यामयो यः स तु नित्यमुक्तः' इति भागवतश्लोकं अर्थतः अनुवदति **विद्यामय इति** ॥ १२३१ ॥

इति भागवतोक्तिस्सा यतो वक्ति ततोऽनुमा ।
विमतो जीवपरयोर्भेदोऽयं परमार्थसत् ॥ १२३२ ॥

संसारोन्मुक्तचैतन्योल्लेख्यत्वान्मौक्तसौख्यवत् ।
इति जीवब्रह्मभेदं साधयत्यागमानुगा ॥ १२३३ ॥

ततः उक्तितः लब्धा भेदपारमार्थसाधिका **अनुमा** आगमाऽनुगा आगमानुसारिणीति उत्तरेणान्वयः ।**उल्लेख्यत्वात्** संबन्धित्वात् । **मौक्तसौख्यवत्** 'श्रोत्रियस्य चाकामहतस्य' इत्यत्र तारतम्येनोक्तमौक्तानन्दवत् ॥ १२३३ ॥

तर्कं च कर्कशं सा वाग्वैलक्षण्यमलक्षयत् ।
यत्र त्वस्येतिवाक्यस्याप्यापातार्थमपाकरोत् ॥ १२३४ ॥

विपक्षे बाधकं विरुद्धलक्षणयोगित्वानुपपत्तिरूपं नित्यबद्धत्वनित्यमुक्तत्वादि विरुद्धलक्षणोक्त्या **अलक्षयत्** अज्ञापयत् । **आपातार्थं** स्वपरज्ञानाभावरूपम् । 'आत्मानमन्यं च वेद' इति निरूपणात् ॥ १२३४ ॥

तस्माद्द्वित्वाख्ययुक्तेश्च भोगाभोगाख्ययुक्तितः ।
अन्यत्वश्रुतितश्चाभूदन्योन्याभाववागियम् ॥ १२३५ ॥

अन्योन्याभाववाक् परमार्थतो भेदसाधिका वाक् । इयं द्वा सुपर्णेति श्रुतिः ॥ ॥१२३५ ॥

न केवलं स्थानबुद्धिभेदमात्रेण भिन्नता ।
किन्तु स्वरूपभेदोऽयमिति साधयितुं श्रुतिः ।
सखायौ सयुजौ चेति पदद्वयमुदाहरत् ॥ १२३६ ॥

ननु यथा भवद्भिरैक्यवाक्यानि सादृश्यादैक्यपरतया योज्यन्ते तथाऽस्या अपि श्रुतेः स्थानभेदपरतया मतिभेदपरतया सावकाशनं स्यात् । न स्यात् । अत्रैव सयुजाविति स्थानभेदस्य सखायाविति मतिभेदस्य च प्रतिषेधादित्याह **नेति** ॥ ॥१२३६ ॥

तौ चेतनौ स्थिरीकर्तुं सुपर्णावित्यरूरुपत् ।
स्वतोभिकाशनोक्त्यात तत्रैकमकरोत्प्रभुम् ॥ १२३७ ॥

चेतनौ न बुद्धिजीवौ । **स्वतः अभिकाशनेति** दुःखानत्तृत्वं, विषयान्विनाऽपि पूर्णत्वं, स्ववशेनैवादनं, इत्याद्यर्थः तत्त्वप्रदीपोदाहृतप्रमाणैरवसेयः ॥ १२३७ ॥

यदिमौ द्वौ च संयोगात्सयुजाविति शब्दितौ ।
अतोऽन्ते यद्धि सायुज्यं तच्च योगात्मकं जगौ ॥ १२३८ ॥

अतश्शङ्का पिशाचीः सा श्रुतिरेव न्यवारयत् ॥ १२३९ ॥

मोक्षे सायुज्यशब्दस्यापार्थकत्वं वदन्तो रामानुजीया अपि अनेनैव निरस्ता इत्याह **संयोगादिति** सह युज्येते इति व्युत्पत्त्येति भावः । तदुक्तं 'आदत्ते हरिहस्तेन, हरिदृष्ट्यैव पश्यति' इत्यादि भाष्ये ॥ १२३८ ॥ १२३९ ॥

एकं भाविभवच्चैकमित्याशां हन्ति लङ्द्वयम्।
मुक्तस्याप्यवृतोक्तेश्च नैराश्यं परमं सुखम् ॥ १२४० ॥

एकं अनशनम्। **भावि** मुक्तिकालीनम्। **एकं** अशनं **भवत्** संसारकालीनम्। **लङ्द्वयं** अत्ति अनश्नन् इति। **मुक्तस्यापि** 'सोऽश्नुते सर्वान् कामान्' इति श्रुतौ कथितस्य। **नैराश्यं** स्वमतसमर्थनाशापरित्यागः। 'नैराश्यं परमं सुखमिति पिङ्गलया शिक्षितस्य भागवतोक्तस्य धर्मस्य तव परिहारार्थमेव प्रवृत्तिरिति ध्वनिः ॥ १२४० ॥

स्याद्रक्तिमेति श्यामत्वदशायामपि किं घटः।
रक्त इत्युच्यते सद्भिस्ततोऽप्येतदपार्थकम् ॥ १२४१ ॥

भाविनिवर्तमानत्वप्रयोगं निदर्शनेन खण्डयति **स्यादिति** ॥ १२४१ ॥

किञ्चैक्यवाक्यवाक्यस्य वृथैवं क्लिष्टकल्पना।
ऋजोर्यथा श्रुतार्थस्य त्यागे हेतोरभावतः ॥ १२४२ ॥

ऐक्यवाक्यं प्रबलमस्ति न वा। उभयथाऽपि अस्य वाक्यस्य बुद्धिजीवपरत्वेन अवस्थाभेदपरत्वेन वा क्लिष्टकल्पना न युक्तेत्याह **किञ्चेति**। **बाधसंभवात्** न हि प्रमाणबाधितस्याग्न्यनुष्णत्वस्योपपत्तये उपपादकं क्लेशेन कल्प्यत इति भावः ॥ १२४२ ॥

दौर्बल्ये चैक्यवाक्यस्य वृथैवं क्लिष्टकल्पना।
ऋजोर्यथा श्रुतार्थस्य त्यागे हेतोरभावतः ॥ १२४३ ॥

हेतोरभावत इति बाधकाभावे उत्सर्गतः सिद्धस्य त्यागायोगादेवेति भावः ॥ ॥१२४३ ॥

व्यावहारिकभेदं ते का वा वक्ति श्रुतिस्तयोः ।
वाक्यस्यास्य कुसृष्ट्यैवम(न्यार्थी)-
न्यथाकरणे वद ॥ १२४४ ॥

सिध्यतु भेदः । किन्तु स व्यावहारिक इति चेत् स किं सत्यो मिथ्या वा । आद्ये अनुज्ञया वर्तामहे । व्यावहारिकत्वविशेषणं व्यर्थं च । न द्वितीयः निर्मूलत्वात्कल्पनाया इत्याह **का वेति** ॥ १२४४ ॥

सिद्धभेदानुवादश्च कस्मिन्वाक्ये प्रकथ्यते ।
भेदोपास्तेश्च किं मूलमतश्चायं वृथा श्रमः ॥ १२४५ ॥

अनुवाद एवायं भेदस्येति चेत् स किं श्रुतिसिद्धस्य अथ प्रमाणान्तरेण । नाद्यः 'तद्धैक आहुः' इत्यत्रेव अनुवादलिङ्गाभावादित्याह **कस्मिन्निति**। सर्वथा श्रुत्यसिद्धत्वे उपायनार्थत्वगतिकथनायोगादिति आह **भेदेति**। प्रमाणान्तरसिद्धत्वे च तद्विरोधादेवाप्रामाण्यमभेदागमस्य । तेन च तस्या प्रामाण्याभावे नानुवादकत्वं भेदवाक्यानां' इत्यादि तत्त्वनिर्णयोक्तदोषापातात् ॥ १२४५ ॥

परप्रयोजनार्थं हि परमात्मा प्रवर्तते ।
सुरां सुधां च दुस्साध्यां किं संसाध्य स्वयं पपौ ।
असुरांश्च सुरांश्चैव यथायोग्यमपाययत् ॥ १२४६ ॥

परमात्मनः सर्वत्र प्रवृत्तिः आनन्दोद्रेकेण परप्रयोजनार्था, 'पूर्णानन्दस्य तस्येह प्रयोजनमतिः कुतः' इति भाष्योक्तं पुराणसंवादेन द्रढयति **सुरां सुधां चेति**। एतेनाशनानशने **सुरां सुधां चेति**। एतेनाशनानशने श्रुत्युक्ते समर्थिते ॥ १२४६ ॥

स हि सर्वं जगदिदं व्याप्य नारायणः स्थितः ।
तत्रैव देवदैत्यादिष्वावेशस्य प्रकीर्तनात् ॥ १२४७ ॥

सोऽनश्नन्देहिनां देहेऽप्यश्नंश्चान्यस्तथैव हि ।
प्रेरकप्रेर्यरूपौ तौ कथं न द्वौ तनौ तनौ ॥ १२४८ ॥

तत्रैव मथनसमयसमय एव । **आवेशस्येति** 'तेषां बलवीर्यमीरयन् । उद्दीपयन्देवगणांश्च विष्णुरिति कीर्तनात् । एतेन समानं वृक्षमिति श्रुत्युक्तस्य संवाद उक्तः ॥ १२४७ ॥ १२४८ ॥

ईश्वरस्सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति ।
भ्रामयन्सर्वभूतानि यन्त्रारूढानि मायया ॥ १२४९ ॥

श्रुत्युक्तार्थे गीतावाक्यं संवादयति **ईश्वर इति** ॥ १२४९ ॥

न मां कर्माणि लिम्पन्ति न मे कर्मफले स्पृहा ।
इति गीतासु हरिणा गीतां गाथामनुस्मर ॥ १२५० ॥

अनश्नन्नित्युक्तशुभाशुभलेपाभावे गीतां प्रमाणयति **न मामिति** ॥ १२५० ॥

अन्ते संहृत्य योऽनेकान्विप्रर्षिविबुधादिकान् ।
न लिप्यते पापकेन कनीयान्न स कर्मणा ॥ १२५१ ॥

अन्ते प्रलये । न लिप्यते । हत्वा स इमांल्लोकान् न हन्ति न निबध्यते इति गीतोक्तेः । कनीयान्नेत्यनेन न कर्मणा वर्धते नो कनीयान्' इति श्रुतेः ॥ १२५१ ॥

यो सक्तस्सन्विविक्तश्च साक्षी किल नृणां हृदि ।
स पापमूलदुःखानि नैव भुंक्त इति स्मृतेः ॥ १२५२ ॥

'योऽसक्तः सन्' इत्यनेन 'नमोऽसक्तविविक्तसाक्षिणे' इति भागवते वाक्यं, नैव भुंक्ते' इत्यनेन न वै स आत्माऽऽत्मवतां महेश्वरो भुंक्ते हि दुःखं इति वाक्यं च सूचयति ॥ १२५२ ॥

श्रुतेश्च युक्तितश्चेशंस्सिद्धो विद्वज्जनप्रियः ।
यश्च स्वकृतपापौघैर्नरकाननुगच्छति ॥ १२५३ ॥

आधिना व्याधिना देहेऽप्यनीशः क्लेशभाक्सदा ।
उभावश्नदनश्नन्तौ कथं नेमौ तनौ तनौ ॥ १२५४ ॥

नित्याऽतादृशस्तु जीवाख्यपक्षी इत्याह **यश्चेति**। **आधिव्याधीति च** ॥ ॥१२५४ ॥

उद्गते सति जीवाख्यचैतन्यांशे कलेवरात् ।
देहव्यापि तदाऽप्यन्यचैतन्य किल ते मते ॥ १२५५ ॥

न चेदनारोपितोऽसौ देहस्स्यात्पतितो भुवि ।
नाधिष्ठानं विनाऽध्यासो न चैतन्यं
विना च तत् ॥ १२५६ ॥

एवं चाश्नदनश्नन्तो चिदंशौ द्वौ यतो बलात् ।
तच्छ्रुतिस्तत्परैवास्तु किमर्था क्लिष्टकल्पना ॥ १२५७ ॥

परप्रक्रिययैव प्रतिदेहं चैतन्यद्वयसिद्धिप्रकारं दर्शयति **उद्गते इत्यादिभ्याम्**। **चैतन्यांशे** बुद्ध्युपाधिके । **न चेत्** उत्क्रमणानन्तरं ब्रह्मचैतन्यमधिष्ठानभूतं देहे नास्ति चेत् । **पतितः** स्वरूपेण अत्यन्ताभावप्रतियोगी । अधिष्ठानाभावे मृतकलेवरस्याप्यवस्थानायोगादिति ध्येयम् । **नाधिष्ठानमिति**। शून्यवादे इव मायावादे निरधिष्ठानकभ्रमानङ्गीकारात् । **तत्** चैतन्यम् । अन्यस्य मिथ्यात्वेन अधिष्ठानत्वायोगात् ॥ १२५५ ॥ १२५६ ॥ १२५७ ॥

श्रावयन्ती भिदां तस्य व्यावहारिकतादिकम् ।
कपोलक्लृप्तमश्रौतधिक्कृत्यैव श्रुतिर्द्वयोः ॥ १२५८ ॥

सायुज्यसख्या सादृश्यस्वातन्त्र्यादिविशेषणैः ।
उपसर्गेण च व्याप्तिं प्रबोध्यैक्यगिरां गतिम् ॥ १२५९ ॥

सगुणत्वं च संसाध्य लिटा मिथ्याश्रुतेर्गतिम् ।
लटा तद्बाधकं चोक्त्वा माध्वराद्धान्तमुद्दधे ॥ १२६० ॥

एतस्याः श्रुतेः सकलसिद्धान्तप्रमेयसाधकत्वप्रकारं विविनक्ति **त्रिभिः श्रावयन्तीत्यादिना।** द्वौ, अन्यः, अन्यः इत्यादिशब्दैः॥ **धिक्कृत्य** मोक्षेऽपि सहभावादिभेदकधर्मकथनेन। **विशेषणैः** सयुजौ, सखायौ, अनश्नन्, इत्यादिभिः। **सायुज्यसख्यसादृश्यस्वातन्त्र्यादि** इति द्वितीयान्तम्। प्रबोध्य इत्यनेनान्वयः। **उपसर्गेण अभीत्यनेन, व्याप्तिं च प्रबोध्य** प्रतिपाद्य यद्वा स्वातन्त्र्यादिविशेषणैः इत्येकं पदम्। व्याप्तिं गुणतो व्याप्तिं प्रबोध्येत्यर्थः। **ऐक्यगिरां गतिं** सादृश्यैक्येत्यादिकं संसाध्य। **लिटा** सस्वजाते इत्यत्र प्रत्ययेन **मिथ्याश्रुतेर्गतिं** 'असदि चेन्न धर्मान्तरेण वाक्यशेषादि'ति सूत्रोक्तां गतिम्। **लटा** अनश्नन्, अत्ति इत्यत्रत्येन **तद्बाधकं** स्वरूपेण निषेधरूपमिथ्यात्वबाधकं उक्त्वा। **उद्दधे** समर्थयामास ॥ १२५८ ॥ १२५९ ॥ १२६० ॥

व्यावहारिकभेदस्य साधिका भेदवाग्यदि ।
तवैक्यवाक्यं किं न स्यात्तादृगर्थपरं तदा ॥ १२६१ ॥

तादृगर्थपरं व्यावहारिकैक्यपरम्। **तदा** तद्बोधकपदाभावेऽपि तथाभावकल्पने ॥ १२६१ ॥

न चेत्प्रत्यक्षसाहित्यबाधाभ्यां किं विधीयताम् ।
मृतस्य प्रेतकर्म स्याज्जीवतस्तु कथं वद ॥ १२६२ ॥

प्रत्यक्षं 'नाहं निर्दुःखः' इत्यादि साक्षिप्रत्यक्षं, **साहित्यं** मोक्षेऽपि 'सहाश्नुते', 'उपसंक्रम्य' इति श्रुत्युक्तं भेदकधर्मानुमानं, एताभ्यां निर्दोषश्रुतिसाक्षिभ्यां यौ बाधौ ताभ्यां **किं विधीयतां** कस्य प्रतिषेध उच्यताम्। **मृतस्य** अप्रामाणिकस्य ऐक्यस्यैव **प्रेतकर्म** बाधः। **जीवतः** सकलप्रमाणप्रमितस्य बाधानर्हस्य। तथा च उपेत्य ऐक्यप्रतिबन्दी प्रागुक्ता। वस्तुतस्तु ऐक्यस्यैव व्यावहारिकत्वेन त्वदभिमतबाधो युक्त इत्युक्तं भवति ॥ १२६२ ॥

यदि ब्रह्मप्रमामात्रबाध्यो भेदस्ततः पुरा ।
व्यवहारपदं प्राप्तो व्यावहारिक इष्यते ॥ १२६३ ॥

तर्हि नाहं सर्ववेत्ता न सर्वेशोऽहमित्यपि ।
प्रत्यक्षबाधादधुना स्यादैक्यं प्रातिभासिकम् ॥ १२६४ ॥

ननु ब्रह्मप्रमाबाध्यो भेदः अतो व्यावहारिकः । ऐक्यं तु न तथेति चेत् न । 'यदा पश्यः पश्यते रुक्मवर्णं कर्तारमीशं पुरुषं ब्रह्मयोनिं' 'तमेवं विद्वानमृत इह भवति' इत्यादिमोक्षहेतुब्रह्मप्रमापकैर्वाक्यैः कर्तृत्वेशत्वब्रह्मयोनित्वादिना भेदस्यैव श्रावणाद्विरुद्धो हेतुरिति दोषे सत्येव दोषान्तरमाह **यदीति** । **प्रत्यक्षेति** ब्रह्मप्रमान्येति भावः ॥ १२६३ ॥

ब्रह्मप्रमाऽन्यबाध्यं यत्तद्धिते प्रातिभासिकम् ।
नचेद्रज्जुभुजङ्गाद्यं कथं स्यात्प्रातिभासिकम् ॥ १२६५ ॥

रज्जुप्रत्यक्षवद्भेदप्रत्यक्षं किं न बाधकम् ॥ १२६६ ॥

ब्रह्मप्रमाऽन्येन बाध्यत्वं प्रातिभासिकत्वं इति परपरिभाषा । अत एव रज्जुभुजङ्गादिकं प्रातिभासिकं तेनोच्यते । 'नायं सर्पः किन्तु रज्जुरि'ति प्रत्यक्षं निर्दोषत्वाद्यथा बाधकं तथैव नाहं निर्दुःख ईश्वरः किन्तु दुःखी जीव एवेति साक्षिप्रत्यक्षं नित्यनिर्दोषत्वाद्बाधकमेवेत्याह किं न बाधकमिति ॥ १२६५ ॥ ॥१२६६ ॥

अतो वृश्चिकतो भीत्या पलायनपरस्य ते ।
महोरगबिले स्थूले पातो जातो विचारय ।
यद्भेदसाम्यतो भीतस्यासीदैक्येति नीचता ॥ १२६७ ॥

ततोऽपहसनीयाभाजकविषयता परस्यापतितेत्याह **वृश्चिकेति** । **यत्** यस्मात्कारणात् **साम्यतः** भेदस्यापि पारमार्थिकत्वे ऐक्यसाम्यं आपद्यते इति असहनतया तस्य व्यावहारिकत्वसाधने प्रवर्तमानस्य **ऐक्ये** स्वसिषाधयिषित एव

अतिनीचता भेदापेक्षया **अतिनीचता** प्रातिभासिकता आपतिता। अतः साधूक्तं भागवते 'महदवज्ञा कात्स्न्येंनात्मन एव प्रतिफलति' इति ॥ १२६७ ॥

व्यावहारिकमानं हि प्रातिभासिकमानतः।
बलवत्ते मते तस्मादैक्यं स्याद्धि बहिष्कृतम् ॥ १२६८ ॥

निष्प्रमाणकं सत्त्रैविध्यं तत्र च अवान्तरबलाबलकल्पनस्य अयं अनर्थविपाक इत्याह **व्यावहारिकेति** ॥ १२६८ ॥

व्यावहारिकतायां च बाधाभावो यदीष्यते।
सिद्धं समीहितं तर्हि न चेदतिविगर्हितम् ॥ १२६९ ॥

अतत्वावेदकत्वाप्त्या यच्छ्रुतेर्मानता गता।
इदं च बौद्धराद्धान्तवार्धिमध्यप्रवेशनम् ॥ १२७० ॥

किञ्च व्यावहारिकं नाम तत्त्वमेव चेत् व्यर्थं तेन सत्यविशेषणम्। न हि कश्चिल्लौकिको वैदिको वा भेदस्य व्यावहारिकतां नाभ्युपैति। अप्राप्ते शास्त्रमर्थवदि न्यायात्। अतत्त्वं चेत् **अतिविगर्हितं** अवैदिकं मायामत आपन्नम्। श्रुतेरप्रामाण्यापातात्। तदुक्तं वादावल्यां 'अतत्वावेदकं प्रमाणं चेद्व्याघातः' इति। **बौद्धेति** तदुक्तं वार्तिके 'सत्यं चेत् संवृतिः केयं मृदा चेत्सत्यता कथम्। वञ्चनार्थमुपन्यासः' इति ॥ १२७० ॥

उभयोर्मानतासिद्ध्यै यो यतेत स वैदिकः।
अतो मुख्यामुख्यवृत्त्या वयं गुप्त्यै यतेमहि।
न चेद्वेदघ्न एवासौ गवोरेकघ्नगोघ्नवत् ॥ १२७१ ॥

यद्यमानत्वमेकस्या वक्तुं युक्तं श्रुतावपि।
तर्हि मीमांसकाचार्याः पुर्याः कार्यास्त्वया
बहिः ॥ १२७२ ॥

वैदिकः वेदवेदानुसारेषु विरोधेऽन्यार्थकल्पना' इति वचनात्। **गोघ्नवत्** इति व्यक्तमेतद्गुणसौरभे ॥ १२७१ ॥ १२७२ ॥

पौरुषेयेषु पुरुषविप्रलिप्सादिकारणात्।
युक्ता द्विविधता बुद्धाद्युक्ताविव न सा श्रुतौ ॥ १२७३ ॥

'इतराविरुद्धानि प्रलम्भभ्रमजान्यपि' इति स्मृत्युक्तमाह **पौरुषेयेषु** इति ॥ ॥१२७३ ॥

विप्रलिप्सा प्रमादश्च भ्रमश्च स्याद्धि पुंसु यत्।
अपौरुषेयवचने मुख्यामुख्यार्थतैव तत् ॥ १२७४ ॥

तत् निर्दोषत्वेन सर्वथाऽप्रामाण्यस्याशक्यत्वात् ॥ १२७४ ॥

किञ्च त्वच्छ्रुतिबाधात्सा व्यावहारिकवाग्भवेत्।
अपौरुषेयवचने मुख्यामुख्यार्थतैव तत् ॥ १२७५ ॥

त्वच्छ्रुतिबाधात्। तवैक्यश्रुत्या बाधे सति। **सा** भेदश्रुतिः। **व्यावहारिकवाक्** व्यावहारिकभेदप्रतिपादिका। **तवश्रुतिः** त्वदभिलषितैक्य-प्रतिपादिका। तथा चान्योन्याश्रयः ॥ १२७५ ॥

व्यावहरिकता चेयं न युक्ता या त्वयोदिता ॥ १२७६ ॥

ब्रह्मज्ञानेतरज्ञानाबाध्यत्वे सति तद्धिया।
यद्बाध्यं तस्य भावो हि व्यावहारिकता तव ॥ १२७७ ॥

न युक्ता विकल्पासहत्वात्। तथा हि किं इदं व्यावहारिकत्वम्। ब्रह्मज्ञानेतरज्ञानाबाध्यत्वे सति ब्रह्मज्ञानबाध्यत्वं उत ब्रह्मप्रमेतराबाध्यत्वे सति तद्बाध्यत्वम् ॥ १२७७ ॥

यतो सत्त्वास्थिरत्वादिब्रह्मणः प्रमयैव हि ।
ब्रह्मण्यारोपितं बाध्यं तच्च ते प्रातिभासिकम् ।। १२७८ ।।

नाद्यः ब्रह्मण्यारोपिते प्रातिभासिके क्षणिकत्वे असत्त्वे चातिव्याप्तेरित्याह **यत इति** ।। १२७८ ।।

प्रमापदप्रवेशेऽपि नोक्तदोषप्रतिक्रिया ।
प्रमा यथार्थधीरेवं नोचेद्व्यर्थं विशेषणम् ।। १२७९ ।।

न द्वितीयः । दोषतादवस्थ्यात् ब्रह्म स्थिरं सत्यं इत्यस्यापि प्रमात्वादेव । आह **यथार्थधीरिति** । **एवं नोचेत्** प्रमा यथार्थधीर्नयेनोक्तदोषः । किन्तु वेदान्तजन्या निर्विकल्पा चरमप्रमैवेति चेत् एवं तर्हि ब्रह्मप्रमान्येनाबाध्यत्वविशेषणं व्यर्थम् । अस्मिन्पक्षे इयं शुक्तिरिति ज्ञानस्याप्रमात्वेन शुक्तिरजते प्रमेतरप्रमाऽबाध्यत्वस्यैव सत्त्वेन विशेषणनिवेशेऽपि अतिव्याप्त्यपरिहारात् ।। १२७९ ।।

देहात्मैक्यं नभो नैल्यं प्रातिभासिकमेव ते ।
ब्रह्मप्रमान्याबाध्यं च बाध्यं चरमतद्धिया ।। १२८० ।।

देहात्मैक्यभ्रमः नभोनैल्यभ्रमः इत्येतयोः ब्रह्मप्रमयैव बाध्यत्वं इति परो मनुते । तथाऽपि तयोः प्रातिभासिकत्वं अङ्गीकरोति । तत्रोक्तलक्षणस्यातिव्याप्तिरित्याह **देहेति** ।। १२८० ।।

नियमेनेतरज्ञानाबाध्ये तद्बाधयोग्यता ।
कथं स्यान्न हि तत्तस्य योग्यं यन्न कदाचन ।। १२८१ ।।

ब्रह्मप्रमान्याबाध्यत्वे सति तज्ज्ञानबाध्यता ।
कथमुक्तेष्वतिव्याप्ता व्यावहारिकता वद ।। १२८२ ।।

इतरज्ञानाबाध्यत्वेऽपि बाधयोग्यता तयोरस्ति अतो नोक्तदोष इत्यत आह **न हि तदिति** । सहकारिविरहप्रयुक्तफलानुपधानं हि योग्यता । यदा कदाऽपि वा तेन

फलनिष्पत्तौ तस्य तज्जननयोग्यता कल्प्यते । अत्र तु न कदाऽपि बाधो दृष्टः इति बाध्यत्वयोग्यताकल्पनाया अवकाश एव न। तथा सति यवबीजेऽपि कलमाङ्कुरजननयोग्यता कल्प्येतेति भावः ॥ १२८१ ॥ १२८२ ॥

किञ्च ब्रह्मप्रमान्याबाध्यत्वमात्रं न सोचिता ।
ब्रह्मणो बाध्यतापत्तेस्तत्प्रमा बाध्यतापि च ॥ १२८३ ॥

मात्रपदेन ब्रह्मप्रमाबाध्यत्वरूपविशेष्यदलस्य व्यवच्छेदः। **सा** व्यावहारिकता । ब्रह्मणः सर्वथाऽबाध्यत्वेन तत्र लक्षणस्यातिव्याप्त्यापत्तेरित्याह **ब्रह्मण इति** । तर्हि ब्रह्मप्रमाबाध्यत्वं लक्षणमस्तु इति च नेत्याह **तदिति** ॥ १२८३ ॥

बाधश्च नास्तिताबोधो नाप्रतीतिस्तु केवला ।
असतो बाध्यतापत्तेरपसिद्धान्ततोऽपि च ॥ १२८४ ॥

कुत इत्यतः बाधस्यैव त्वया दुर्निरुपत्वादित्याह **बाध इति**। स किं नास्तिताबोधः, 'अविद्या सहकार्येण नासीदस्ति भविष्यति' इति तदुक्तेः। उत अप्रतीतिमात्रं आद्ये वक्ष्यामः। द्वितीय आह **असत इति** तथा च तत्रातिव्याप्तिः। **अपसिद्धान्ततोऽपि चेति**। नासत्त्वस्यास्ति बाधकमित्यात्मवचनविरोधात् ॥ ॥१२८४ ॥

सर्वप्रकारशून्यैव निर्विकल्पकधीस्तव ।
ब्रह्मप्रमा तया कस्य साधनं बाधनं वद ॥ १२८५ ॥

ज्ञानत्वे सविषयकत्वं तन्त्रम्। इदमित्थं इति हि सर्वा धीः। चरमं ज्ञानं च निर्विषयकं परस्याभिमतम् । तथा च तस्य ज्ञानत्वमेवासंभवि कुतस्तेन साधनं बाधनं वा शक्यनिरूपणमित्याह **कस्येति** ॥ १२८५ ॥

अतो भेदाख्यरत्नस्य जगत्कल्पद्रुमस्य च ।
पारमार्थिकतापन्ना बाधाभावाद्धि सर्वदा ।
त्वद्रीत्यैव न मद्रीत्या चित्रा ते शास्त्रकर्तृता ॥ १२८६ ॥

शास्त्रकर्तृता अखण्डार्थपरं इति वाचोभङ्ग्या शास्त्रमबोधकमिति निरूपणात् **चित्रा**। लोकबहिष्कृता ॥ १२८६ ॥

निष्प्रकारकधीर्या ते भेदाभेदप्रमा न सा।
तत्त्वं किल तथाप्येकमतत्वमपरं किल ॥ १२८७ ॥

ज्ञानमेव न दूरे तस्य प्रमात्वं इत्याह **नेति**। तथा च अबोधकेन बोध्यं तत्त्वं ऐक्यं प्रमापकैः सकलप्रमाणैः साधितो भेदः अतत्त्वं इति अपहासः इत्याह **किलेति** ॥ ॥१२८७ ॥

यदि बाधस्तेन नाशस्तदा दण्डादिनाश्यता।
दृष्टा घटादौ यत्तस्मान्न स्युस्ते व्यावहारिकाः ॥ १२८८ ॥

तन्नाश्यत्वमेव तद्बाध इति चेद्घटे ब्रह्मज्ञानानाश्ये मुद्गरप्रहारादिना नाश्ये अव्याप्तिरित्याह **यदीति** ॥ १२८८ ॥

उपादानाज्ञाननाशद्वारा ज्ञानं हि नाशकम्।
अनादेरस्य भेदस्य तन्न स्याज्ज्ञाननाश्यता ॥ १२८९ ॥

किञ्च ज्ञानस्य न साक्षात्प्रपञ्चनाशकत्वमभिमतं किन्तु उपादानाज्ञान-नाशनद्वारैव। यथाऽऽह 'अज्ञानस्य स्वकार्येण प्रविलीनेन वा सह ज्ञानेन निवृतिर्बाधः' इति। तथा च अनादेरत एव निरुपादानकस्य भेदस्य न बाध इति तत्राव्याप्तिः ॥ १२८९ ॥

अज्ञानोपादानके ते रूप्यादौ प्रातिभासिके।
अस्त्येव ज्ञाननाशत्वमतोऽप्येतदलक्षणम् ॥ १२९० ॥

ज्ञाननाश्यत्वं व्यावहारिकत्वं चेत्प्रातिभासिके रूप्यादावतिव्याप्तिरित्याह **अज्ञानोपादानके** इति ॥ १२९० ॥

शुक्त्यवच्छिन्नचिज्ज्ञानं ब्रह्मज्ञानं च तत्तव ॥ १२९१ ॥

ननु तथापि रूप्यस्य शुक्तिज्ञानेनैव नाश्यत्वं न ब्रह्मज्ञानेन इत्यतः तव मते तदवच्छिन्नचैतन्यज्ञानमेव तज्ज्ञानं, आध्यासिकसंबन्धाभ्युपगमात् तच्च ब्रह्मज्ञानमेव 'सर्वप्रत्ययवेद्ये च ब्रह्मरूपे व्यवस्थिते' इति सुरेश्वरवार्तिकोक्तेरित्याह **शुक्तीति** ॥ ॥१२९१ ॥

ज्ञानान्नाशेऽपि मिथ्यात्वे हेतुरज्ञानकार्यता ।
सा चास्ति शुक्तिरूप्यादौ
नास्ति भेदाद्यनादिषु ॥ १२९२ ॥

तथा च पूर्वोक्तदोषद्वयानिस्तार एवेत्याह **ज्ञानान्नाशेऽपि इति** ॥ १२९२ ॥

ब्रह्मज्ञानेतरज्ञानानाश्यत्वस्य प्रवेशने ।
घटादिवृत्तिनाश्येषु तूलाज्ञानेषु लक्षणम् ।
अव्यापकं स्यात्तद्योगे मूलस्यापसृतौ भवेत् ॥ १२९३ ॥

ननु मन्मते अज्ञानं द्विविधम् । तूलाज्ञानं मूलाज्ञानं चेति । तत्र संसारमूलाज्ञानं निवर्तयत् ब्रह्मज्ञानं चरमज्ञानमेव । न तु शुक्त्यवच्छिन्नचैतन्यविषयकम् । तन्निवृत्तिद्वारा निवर्त्यत्वमेव च बाधः । ब्रह्मज्ञानेतरज्ञानानाश्यत्वं च लक्षणे विशेषणं निवेश्यते । शुक्तिरूप्यं च तदितरेण युक्त्यवच्छिन्नचैतन्यज्ञानेनापि निवर्तते । अतो नातिव्याप्तिरिति चेत् । तथाऽपि अनादिभेदादिष्वव्याप्तेरपरिहार एव । दोषान्तरं चाह **घटादीति** । ब्रह्मज्ञानेन तन्निवृत्त्यनङ्गीकारात् । **तद्योगे** मूलाज्ञानसंबन्धे । मूलाज्ञानस्य तदाऽनाशेऽपि, भीरुभटवदपसरणाभ्युपगमेऽपीति भावः, मूलाज्ञानसंबन्ध एवाव्याप्तिः । मूलाज्ञानसंबन्धस्य ब्रह्मज्ञानेतरज्ञाननाश्यत्वस्यैव प्राप्त्या विशेषणाभावेनाव्याप्तिरित्याशयः ॥ १२९३ ॥

किञ्च ब्रह्मज्ञाननाश्यं ब्रह्मज्ञानं तवापि न ।
आत्माश्रयादतस्तत्रैवाव्याप्तिरभवद्ध्रुवा ॥ १२९४ ॥

स्वाभाववतिकाले स्वस्य भावरूपव्याघातपर्यवसानभिया, स्वस्य स्वनाशकतं नाङ्गीकृतम्। न हि नखाग्रेण स्वनखाग्रमेव छेद्यमुपलब्धं' इति परेणोक्तेः प्रागभावः प्रतियोगिहेतुरिति पक्षे तन्मात्रस्याहेतुत्ववत् प्रतियोगी ध्वंसहेतुरिति पक्षेऽपि अतिप्रसङ्गेन (क्षणिकत्वापत्तिरूपेन श्री.) तन्मात्रस्याहेतुत्वात्। दग्धदाह्यदहनस्यापीशेच्छादिनैव नाशात् (न्या. ४।३।६३५)। अतः ब्रह्मज्ञान एव लक्षणस्याव्याप्तिः। न च तदपि अलक्ष्यं अद्वैतहान्यापत्तेः। नापि प्रत्यक् स्वरूपं वेदान्तजन्यत्वानुपपत्तेः। नापि च अज्ञाननिवृत्तिद्वारा स्वनिवर्तकत्वम्। त्रिक्षणावस्थायिनः तृतीयक्षणे स्वयमेव नष्टत्वेन नाशकत्वायोगात्। तदेतदभिप्रेत्योक्तं **ध्रुवेति** ॥ १२९४ ॥

बाध्यत्वे निर्विकल्पा धीर्न जगद्धीषयेन्मम।
नाश्यत्वे स्वविनाश्या धीर्न जगद्धीषयेन्मम ॥ १२९५ ॥

तथा च निवृत्तिर्बाधश्चेत् निर्विकल्पकस्य बाधकत्वायोगेन न तद्बाधधीः। नाशश्चेत् स्वखिन्नेवाव्याप्तिः। रूप्यादौ निन्यनिवृत्ते नष्टमित्यननुभवेन तत्राप्यव्याप्तिः॥ अधिष्ठानवत्सत्येऽज्ञानेऽतिव्याप्तिश्च तदुक्तं न्यायामृते 'विज्ञाननाश्यता मिथ्यारूप्यादौ नानुभूयते। किं त्वदधिष्ठानवत्सतो तदज्ञानेऽनुभूयते इति (१।१।प. ४०) ॥ १२९५ ॥

किञ्च प्रारब्धकर्माणि ब्रह्मज्ञानादनन्तरम्।
स्थायीनि भोगक्षय्याणि तेष्वव्याप्तिर्द्विधा-
ऽप्यभूत् ॥ १२९६ ॥

द्विधाऽपि बाधः नाशः इति पक्षद्वयेऽपि। अविद्यालेशसंस्कारादिकमपि समानयोगक्षेमम्। तस्यापि भोगनाश्यत्वेन तत्रापि अव्याप्तिः ॥ १२९६ ॥

अर्थक्रियाकारितैव व्यावहारिकता यदि।
शशशृङ्गमभूतत्वं परमार्थतरं तदा ॥ १२९७ ॥

परमार्थतरं इति तस्य लक्षणसद्भावशङ्काया अप्यविषयत्वात् ॥ १२९७ ॥

उपादानं निमित्तं वा भ्रमाधिष्ठानमेव वा।
ब्रह्मत्वपरमार्थत्वादुपेक्ष्यमभवत्तव ॥ १२९८ ॥

ब्रह्मण्यतिव्याप्तिश्च। 'न चात्मन्यर्थक्रियाकारित्वं मास्तीति वाच्यम्। तस्य निखिलप्रपञ्चकारणत्वेन श्रुतिशतसमधिगतत्वात्' (वादा.) पररीत्याऽप्याह **उपादानमिति**। उपादाननिमित्तं वा इत्यनास्था। विवर्तोपादानत्वपक्षे आह **अधिष्ठानमेव वेति**। अन्ततः अज्ञानसाधकताङ्गीकृतैव। 'साधकत्वं सतस्तेन साक्षिणा सिद्धिमिच्छता। स्वीकृतमि'ति उक्तेः। अस्त्वतिव्याप्तिः किं तत इत्यत आह **अपरमार्थत्वादुपेक्ष्यं इति** ॥ १२९८ ॥

मुक्तेश्च साधको मुक्तो मुक्तिदं चाभवन्मृषा ॥ १२९९ ॥

तदुक्तं गौडपादकारिकायां 'न बद्धो न च साधकः। न मुमुक्षुर्न वै मुक्त इत्येषा परमार्थता' इति। तदप्यस्तु इति वैयात्येन वदन्तं प्रति तु 'कशावेत्रादिकं तु तस्करस्योत्तरं भवेदित्युक्त्यैव गतिः ॥ १२९९ ॥

भयकम्पादिहेतुत्वं रज्जुसर्पस्य ते मते।
स्वाप्नस्य चास्ति तेनेदं व्यावहारिकता कथम् ॥ १३०० ॥

प्रातिभासिक एवार्थो ज्ञानं च प्रातिभासिकम्।
इति यो वक्ति किं नास्य प्रातिभासिकमर्थकृत् ॥ १३०१ ॥

प्रातिभासिके रज्जुसर्पादौ स्वाप्ने रम्भासम्भोगादौ चातिव्याप्तिः। न च प्रातिभासिकपदार्थज्ञानमेवार्थक्रियाकारीति युक्तम्। त्वन्मते प्रतिभासातिरिक्त-प्रातिभासिकानङ्गीकारादित्याह **भयेति** ॥ १३०० ॥ १३०१ ॥

अतत्वमभवत्तेऽन्नं तृणं तत्वमभूदहो ॥ १३०२ ॥

पशोरर्थक्रियाऽर्हं तव च अनर्हं तृणमेव तव व्यावहारिकत्वाभावात् तत्वमभूत् तेन विरुद्धं लक्षणं आचक्षाणस्य तव पशुत्वमेवाभूदित्यपहासः ॥ १३०२ ॥

समर्थायां प्रवृत्तौ तु प्रामाण्यं हीयते किल।
असमर्थप्रवृत्तौ तु प्रामाण्यमुपचीयते ॥ १३०३ ॥

तदिदमापन्नं गोशृङ्गज्ञानमप्रमाणं समर्थप्रवृत्तिजनकत्वात्। अतथाभूतं शशशृङ्गज्ञानमेव प्रमाणमिति। अपहसति **किलेति** ॥ १३०३ ॥

इयं हि शास्त्रमर्यादा न वार्यादायवेदिभिः।
यत्सार्थक्यं परस्याह वैयर्थ्यं स्वस्य स स्वयम् ॥ १३०४ ॥

इयं = भेदः मोक्षरूपार्थक्रियाकारी व्यावहारिकः अतत्वम्। ऐक्यं अतथाभूतं तत्त्वं इत्येवंरूपा। **न वार्या** आदाय वेदिभिः इति पदच्छेदः। व्याहतभाषिणा परेणास्मदभिलषितस्यैवार्थस्य शब्दभेदेन साधनात् ॥ १३०४ ॥

सत्त्वमर्थक्रियाकृत्त्वं तेन च क्षणिकं जगत्।
यो वक्ति तेन ते सख्यं महदासीद्भवान्तरे।
अर्थक्रियाकारि सर्वं यस्त्वं मिथ्येति कत्थसे ॥ १३०५ ॥

एतादृशं च मिथ्यात्वं भेदस्यास्तु सदा मम।
मुक्तिं च सद्यस्सन्दध्याद्य एवं व्यावहारिकः ॥ १३०६ ॥

'सर्वं क्षणिकं अर्थक्रियाकारित्वात्' इति क्षणिकत्वादिमतं व्याहतेर्हेयम्। व्याहतत्वेन उभयोः सख्यम्। तदुक्तमनुव्याख्याने 'पूर्वमध्यापरकलाविकलः क्षण इष्यते' इति। 'विनाशो चेन्न तत्कार्यं' इति च। तथा च न तन्मते संस्काररूपार्थक्रियासाधकत्वं तदुक्तं तत्रैव 'उत्तरोत्पत्तिमात्रेण विनाशात्पूर्ववस्तुतः। न संस्कारार्पकत्वं' इति, 'मायावादिवदेवासावुपेक्ष्यो भूतिमिच्छता' इति च ॥
॥१३०५ ॥ १३०६ ॥

महातत्त्वं तवैक्यं च न भेदस्य विरोधकृत्।
अतो यमप्रतिद्वन्द्वो द्वन्द्वं सर्वत्र साधयेत् ॥ १३०७ ॥

न विरोधकृत् अर्थक्रियाऽनर्हत्वात्। अयं भेदः। द्वन्द्वं भेदव्यवहारम्॥ ॥१३०७॥

नाप्यविद्याकार्यता ते व्यावहारिकतोचिता।
अविद्यायामभावेन भेदेऽनादावभावतः।
सत्वाच्च रज्जुसर्पादिप्रातिभासिकराशिषु ॥ १३०८ ॥

अविद्यायां आत्माश्रयात्। अनुपादानकत्वाच्च। व्यक्तिभेदकल्पने च अनवस्थाद्यापत्तेः। 'अज्ञानस्य च मिथ्यात्वमज्ञानादिति कल्पने। अनवस्थितिस्तथा च स्यादन्योन्याश्रयताऽथ वा' इत्युक्तेः। भेदे उपलक्षणम्। ईशे अविद्यासंयोगे, जीवे चेत्यपि ग्राह्यम्॥ १३०८॥

न हि हानमुपादानमभिलापोऽपि वा तव।
व्यवहारो मतस्तस्मात्तदर्हत्वं च सा न ते ॥ १३०९ ॥

या ब्रह्मण्यभिलापार्हे सदादेये मुमुक्षुभिः।
हेये च शुक्तिरूप्यादौ जगतीव प्रदृश्यते ॥ १३१० ॥

व्यवहारयोग्यत्वं व्यावहारिकता इत्यपि न युक्तम्। अत्र व्यवहारः हानमुपादानं अभिलापो वा इति वक्तव्यम्। लक्षणं ब्रह्मणि पारमार्थिकेऽतिव्याप्तं इत्याहं येति। सदादेये सदा आदेये इति पदच्छेदः। जगति व्यावहारिके वियदादौ॥ ॥१३०९॥ १३१०॥

उभयत्र ह्यतिव्याप्ता कथं मध्यस्य सा दशा॥ १३११ ॥

व्यावहारिकतोक्तिस्तद्व्यवहारज्ञसंसदि।
न भाति प्राङ्गणकथा न हि भाति रणाङ्गणे॥ १३१२ ॥

सा व्यवहारयोग्यतारूपा। योग्यतायां योग्यतान्तराभावात् व्यवहारयोग्यतायामव्याप्तिश्च ध्येया ॥ १३११ ॥ १३१२ ॥

प्रत्यक्षश्रुतियुक्तीनां विरोधादैक्यमेव ते।
स्याद्व्यावहारिकं सिंहदेवदत्तादिकैक्यवत् ॥ १३१३ ॥

व्यावहारिकं बाध्यम् ॥ १३१३ ॥

सादृश्यैक्यपरत्वे स्यादेव वाव्यावहारिकम्।
न चेत्पूर्वोक्तमार्गेण स्यात्तद्धि प्रातिभासिकम्॥ १३१४ ॥

भेदस्तु श्रुतियुक्तिभ्यां प्रत्यक्षेण च साधितः।
ब्रह्मवत्पारमार्थ्यार्हः कथं स्याद्व्यावहारिकः ॥ १३१५ ॥

वा अव्यावहारिकं इति पदच्छेदः। पारमार्थिकं इत्यर्थः॥ १३१४ ॥ ॥१३१५ ॥

भेदस्तन्मतिभेदादेर्विरोध्यैक्यस्य चोद्धृतेः।
त्रिधाऽपि परमार्थोऽभूद्योत्युच्च ब्रह्मधर्मिकः ॥ १३१६ ॥

मतिभेदादेः आदिपदेन स्थानभेदग्रहणम्। सयुजौ सखायौ इति वचनात् **उद्धृतेः** निरासात्। **ऐक्यस्य** स्वरूपैक्यस्य। **उद्धृतेः** त्वयैवासाधकत्वकथनेन निरासात्। चशब्देन भेदस्य पूर्वोक्तप्रमाणत्रयसिद्धत्वसमुच्चयः। एवं **त्रिधा अत्युच्चब्रह्मधर्मिकः।** परमार्थब्रह्मस्वरूपत्वादिति हेत्वन्तरम्। तुल्यवित्तिवेद्यतया इतरधर्मिकोऽपि परमार्थ एव सेत्स्यतीत्याशयः ॥ १३१६ ॥

एवमाविद्यकं भेदमथवौपाधिकं वदन्।
प्रष्टव्यो यद्यविद्याद्यैः कृतत्वं तस्य कीर्त्यते ॥ १३१७ ॥

तदा तवापसिद्धान्तः षडस्माकमनादयः।
इत्याहुः किल ते पूर्वे तस्माज्जीवेशयोर्भिदा।
अनादिस्ते ततस्तस्याः कृतत्वोक्तिरविद्यया ॥ १३१८ ॥

आविद्यकं औपाधिकं इत्यत्र उभयत्र विकल्पः। न अविद्यादिकार्यत्वम्। अपसिद्धान्तात्। अनादिभेदस्य कार्यत्वासंभवात्। **अविद्यया** स्वसिद्धान्तापरिज्ञानेन ॥ १३१७ ॥ १३१८ ॥

यदि तज्ज्ञापितत्वाच्च भेदे दोषः प्रभाष्यते।
तदैक्यमपि दोषि स्यात्तच्च मानसवेदने।
आज्ञा नाज्ज्ञापितं किं न किं वा
देहाद्युपाधिभिः ॥ १३१९ ॥

न तज्ज्ञापितत्वम्। ऐक्येऽपि दोषप्रसरात्। तस्यापि देहान्तःकरणाद्युपाधिभिर्ज्ञापितत्वात् ॥ १३१९ ॥

अविद्याकार्यमखिलं कार्यं किल भवन्मते।
एवं सत्यैक्यधीरं ते किं ते हन्तैतदन्तरा ॥ १३२० ॥

अखिलं कार्यं देहेन्द्रियादिकम्। अविद्याकार्यम्। ब्रह्मातिरिक्तस्य सर्वस्य न कार्यत्वोपगमात्। **अन्ते** तत्त्वमस्यादिवाक्योक्तसम्यग्धीजन्मकाले। **एतदन्तरा** अविद्यां विना। देहाद्युपाधिभिर्ज्ञापितत्वे अविद्याज्ञापितत्वमेव पर्यवस्यति ॥ ॥१३२० ॥

अविद्यमानं भातीति वादो नादौ कथं वद।
बन्धेऽप्याविद्यकत्वं तदन्धते निर्निबन्धनम् ॥ १३२१ ॥

भेदः न अविद्यमानः अनादित्वात् ऐक्यवत् इति प्रयोगः अभिप्रेतः। न च दृष्टान्तः साध्यसाधनविकलः। ऐक्यस्य ब्रह्मस्वरूपत्वोपगमात्। बन्धोऽप्यत्र पक्षत्वे नाभिमत एवेत्याह **बन्ध इति** ॥ १३२१ ॥

अतस्तत्संबन्धमात्राद्यद्यवद्यं निगद्यते ।
तर्ह्यैक्यस्याप्यवद्यं स्यात्तदज्ञानावृतं हि ते ॥ १३२२ ॥

अविद्यासंबन्धित्वमात्रं अविद्यकत्वं इत्यपि पक्षः दुष्ट इत्याह **अतः इति** । **अवद्यं** आविद्यकत्वदोषः । तत् ऐक्यम् । **अज्ञानावृतं** ब्रह्मस्वरूपत्वात् ॥ १३२२ ॥

यतो ब्रह्मचितोऽप्यस्ति तत्संसर्गोपवर्गतः ।
पुरा ततस्सापि भेदसमैवासीन्मते तव ॥ १३२३ ॥

सा विशुद्धा ब्रह्मचित् । **तव मते** 'अविद्यातच्चितोर्योगः' इति अनादिरेव शुद्धचितः अविद्यासंसर्गः इति वादिनो मते ॥ १३२३ ॥

अज्ञाननाशाद्भेदस्य नाशे ब्रह्मापि नश्यतु ॥ १३२४ ॥

यद्यज्ञानानुपादानं ब्रह्मतन्नाशनाशिन ।
तर्ह्यनादिविभेदोऽयं कुतस्तन्नाशनाशवान् ॥ १३२५ ॥

नापि अविद्यानाशनाश्यत्वं औपाधिकत्वम् । अनादेर्भेदस्य तदसंभवात् । अन्यथा अनादित्वाविशेषात् ब्रह्मणोऽपि तन्नाशनाश्यत्वेन औपाधिकत्वापातात् । अनादित्वेन तत्र परिहारे भेदस्यापि तथेत्याह **अज्ञानेति** ॥ १३२४ ॥ १३२५ ॥

तद्ब्रह्मसमसामर्थ्यो भेदो भेद्यो न केनचित् ॥ १३२६ ॥

भेद्यः दूषणार्हः ॥ १३२६ ॥

किञ्च मायानिवृत्तौ च स्मर्यते श्रूयते च या ।
साभिदानपरैर्भेद्या भिनत्ति निखिलं जगत् ॥ १३२७ ॥

मायानिवृत्तौ मोक्षे 'अविद्याऽस्तमयो मोक्षः' इति तदुक्तेः । **सा भिदा** पञ्चविधो भेदः । **भिनत्ति** पञ्चधा जडजीवादिकं परस्परं व्यावर्तयति ॥ १३२७ ॥

यद्ब्रह्मणा सहेत्युक्तं मुक्तौ तन्नासती भिदा।
व्रणादप्यधिको बाधस्सहोक्त्याऽद्वैतवादिनः ॥ १३२८ ॥

श्रूयते इत्युक्तं प्रमाणयति **सहेति**। **व्रणादिति** अन्त्यकाले भगन्दरव्रणपीडितेन शिष्यान्प्रति तथोक्तेः इति कथा ॥ १३२८ ॥

अपि स्वरूपनिष्पत्तौ समीपप्राप्तिरुच्यते।
परंज्योतिरिति श्रुत्या तत्त्यागार्हा कथं भिदा ॥ १३२९ ॥

पूर्वोक्तब्रह्मसूत्राणि भेदमाघोषयन्ति हि।
अभेदोक्तीस्तिरस्कृत्य कुतस्तस्य ह्यसत्यता।
अतो भेदश्रुतेरग्रे कस्य स्यात्प्रत्यवस्थितिः ॥ १३३० ॥

उपसंपद्येत्यत्र सामीप्यवाचिना उपशब्देनापि मुक्तौ भेदसिद्धिरित्याह **समीपेति**। तदुक्तं 'अतिक्रमं वदन्तं तमुपशब्दो निवारयेदि'ति ॥ १३२९ ॥
॥१३३० ॥

अनादिवेदवाक्येषु परापरकथा वृथा।
निषेधविधिवार्ताद्धा दग्धाग्नीषोमपावके ॥ १३३१ ॥

यत्तूक्तं वाचस्पतिना पूर्वस्य परेण बाध इति तदपाकरोति **अनादीति**। तथा च अभेदवाक्यानां भेदवाक्येभ्यः परत्वमसिद्धम्। अतो न तेषां तेन भेदवाक्येभ्यः प्राबल्यसिद्धिरिति ॥ विधितो निषेधप्राबल्यमित्यपि न नियम इत्याह **दग्धेति**। तत्र 'मा हिंस्यात्सर्वा भूतानि' इति निषेधापेक्षया 'अग्नीषोमीयं पशुमालभेते'ति विधेरेव प्राबल्यस्य दृष्टेः। तथा च तत्र तव न्यायः दग्धः व्यभिचरित इति ध्वनिः ॥ १३३१ ॥

परस्मात्पूर्वबाधश्चेत्स्मृत्या स्याच्छ्रुतिबाधनम्।
परस्माज्जगतः पूर्वब्रह्मबाधश्च ते भवेत् ॥ १३३२ ॥

बहुत्वनिरवकाशत्वादिकमेव प्राबल्यप्रयोजकं न केवलं परत्वं निषेधरूपत्वं वा। 'द्विविधं बलवत्त्वं च बहुत्वाच्च स्वभावतः। तयोः स्वभावो बलवानुपजीव्यादिकश्च सः' इति तत्त्वनिर्णयोक्तिं समर्थयमानः केवलं परत्वस्य प्राबल्यप्रयोजकत्वेऽतिप्रसङ्गमाह **स्मृत्येति** ॥ १३३२ ॥

निषेधाद्विधिबाधश्चेद्बौद्धोक्त्या धर्मबाधनम्।
तथा शून्यत्वकथया ब्रह्मबाध्यं भवेत्तव ॥ १३३३ ॥

निषेधमात्रस्य बाधकत्वप्रयोजकत्वे च दोषान्तराण्याह **निषेधादिति**। **शून्यत्वकथया** बौद्धसंबन्धिन्या 'शून्यं तत्त्वमविज्ञेयमि'त्यादिरूपया। यद्वा 'असदेवेदमग्र आसीदि'ति निषेधश्रुत्या 'सत्यज्ञानमनन्तं' इति श्रुतेः। इदं उपलक्षणम्। 'परत्वं तु प्रमानन्तरभ्रमे व्यभिचारि दृश्यते च नक्त्वा सेडिति परं प्रति मृडेत्यादिपूर्वं बाधकम्' इत्यादिकं चात्र पूर्वत्र चानुसन्धेयम्। (न्याया. १ । १४ प. ११८) ॥ १३३३ ॥

परया भार्यया कार्यनिषेधपरया तव।
पतिस्त्वं गृहकृत्यानां विधाता हन्त बाध्यसे ॥ १३३४ ॥

लोकरीत्या परन्यायं अपहसति **परयेति** ॥ १३३४ ॥

किञ्च पूर्वं निषेध्यं च तादात्म्यमभवत्तव।
भेदः परो निषेधो मे योऽन्योन्याभावरूपकः ॥ १३३५ ॥

अतस्त्वन्न्याय एवायं चित्रं मत्कार्यसाधकः।
यद्बलादैक्यवाक्यानां बाधिका भेदवागभूत् ॥ १३३६ ॥

अतो निरवकाशं यत्तदेव बलवत्तरम्।
दुर्बलं सावकाशं स्यादिति सर्वं मनोरमम् ॥ १३३७ ॥

स्वव्याघातकरश्चायं परस्य न्याय इत्याह **किञ्चेति** ॥ १३३५ ॥ १३३६ ॥ ॥१३३७ ॥

यद्यन्यतः सिद्धभेदस्यानुवादेन मे श्रुतिः ।
न भेदसाधिका तर्हि स्वप्रकाशत्वशक्तितः ॥ १३३८ ॥

सिद्धस्य ब्रह्मसत्त्वस्याप्यनुवादपरा श्रुतिः ।
अस्ति ब्रह्मेत्यादिरूपा न तत्सत्त्वं प्रसाधयेत् ॥ १३३९ ॥

असिद्धबोधकं शून्यवाक्यं स्यादैक्यवाक्यवत् ।
अतोऽपि ब्रह्मभेदोऽयं ब्रह्मसंमित एव हि ॥ १३४० ॥

अवादकत्वेन भेदवाक्यानां दौर्बल्यं इत्येतन्निराह **तर्हीति** ॥ १३३८ ॥ ॥१३३९ ॥ १३४० ॥

यदि प्रत्यक्षसिद्धस्य सा भेदस्यानुवादिनी ।
तर्हीशधर्मिको भेदो भीमसेनगदा भवत् ।
यतोन्यपदयुग्मेन भेदौ द्वावप्युदीरितौ ॥ १३४१ ॥

'न च जीवेश्वरभेदः सिद्ध इत्यनुवादकत्वं भेदवाक्यानाम् । आगमं विनेश्वरस्यैवासिद्धेः' इति तत्त्वनिर्णयानुरोधेनाह **यदीति** ईश्वरस्य अत एव तद्धर्मिकस्य तत्स्वरूपस्य भेदस्य प्रत्यक्षेण सिद्ध्यसंभवात् । 'अन्यः अत्ती'ति जीवधर्मिकः, 'अन्यः अनश्नन्नि'त्यनेनेश्वरधर्मिक इति द्वयोरपि लाभो ज्ञेयः ॥ ॥१३४१ ॥

अथ प्रत्यक्षसिद्धस्य जीवभेदस्य च श्रुतिः ।
कुतोऽनुवादं कुरुते तूष्णीं वा दूषणाय वा ॥ १३४२ ॥

आद्ये द्विर्बद्धभेदोऽसौ कुबद्धोऽभून्न संशयः ।
न चेत्स्वोक्तार्थनिर्णीत्यै शासनानुसृतिर्वृथा ॥ १३४३ ॥

तूष्णीं समानविषयकत्वमात्रेण। **सुबद्धः** तदुक्तं 'बहुप्रमाणसंवादश्च दार्ढ्यहेतुरेवे'ति। **निर्णीत्यै** न्यायालयादिषु। **शासनं** शिलाशासनम्॥ १३४२॥ ॥१३४३॥

मानस्य मानसंवादे प्रामाण्यावधृतिः किल।
चित्रसत्वौषधेनाभूत्काचच्छेदेक्षिणतीक्ष्णता।
अतोतिबलवद्वैरात्स्यादैक्यस्य पलायनम्॥ १३४४॥

काचच्छेदे अक्षिदोषनिरासे। तथा अत्रापि अप्रामाण्यशङ्कानिरासः दार्ढ्यहेतुरेव। यथोक्तम्। 'तच्च यावद्यावदधिकं प्रमीयते तत्तदनुसारिणीं निःशङ्कां क्षिप्रप्रवृत्तिं प्रसूते इत्यनुभवसिद्धम्। तथा च प्रामाण्यमेव स्वकार्यातिशयवशेनातिशयवदुच्यते इति। **पलायनं** बाधः। यथोक्तं 'बहुप्रमाणनिषेधादेवैकस्याप्रामाण्यं दृष्टं शुक्तिरजतादौ' इति॥ १३४४॥

द्वितीये दूषणं किं तदैक्यवाक्यं यदीष्यते।
तदाऽन्योन्याश्रयो दोषो वैर्याश्लेषोपमस्तव॥ १३४५॥

द्वितीये दूषणार्थं अनुवादः इति पक्षे। किं तद्दूषणम्॥ १३४५॥

दूषणार्थानुवादित्वे सिद्धभेदपरश्रुतेः।
निरङ्कुशैक्यवागैक्यमुक्त्वा तां दूषयेत्स्वयम्॥ १३४६॥

सिद्धेऽस्या दूषकत्वे च दूषणार्थानुवादिनी।
सा स्यादिति न कस्य स्यादन्योन्याश्रयदूषणम्॥ १३४७॥

भेदश्रुतेः अनुवादित्वे तत एव दुर्बलत्वे सिद्धे सति, ऐक्यवाक्यं भेदवाक्याबाधेन निरङ्कुशं सत् स्वार्थपरं स्यात्। ततश्च भेदवाक्यस्य दूषकं स्यात्। सिद्धे तस्य दूषकत्वे भेदवाक्यमनुवादकं स्यादिति अन्योन्याश्रय इत्याह **दूषणार्थेति**॥ १३४६॥ १३४७॥

श्वानं गृहाण भिक्षा मे मास्त्वित्याभाणकं स्मर।
यदन्योन्याश्रयशुना दंष्ट्रा परशुनार्दिते।
दूरेऽभूद्दूषणार्थानुवादित्वान्नस्य भोजनम् ॥ १३४८ ॥

तथा च श्वानदशनभिया भिक्षाया इव अन्योन्याश्रयभिया अनुवादित्वोक्तिस्त्वया त्याज्येत्याह **श्वानमिति** ॥ १३४८ ॥

दृढप्रत्यक्षवैरोऽपि श्रुतिरैक्यं कथं वदेत्।
अबाधितो हि वाक्यार्थो योग्यतावश्यकी
न किम्॥ १३४९ ॥

'न च प्रत्यक्षसिद्धं अन्येन केनापि बाध्यं दृष्टं' इति तत्त्वोद्योतं हृदि कृत्वाऽऽह **दृढेति**। वाक्यप्रामाण्यस्य प्रमाणविरोधाभावलक्षणयोग्यताघटितत्वादिति भावः ॥ ॥१३४९ ॥

यदा प्रत्यक्षबाधायाप्यैक्यवाक्यं व्रजेत्तव।
तदा बलवती भेदश्रुतिर्हन्याद्धि पृष्ठतः ॥ १३५० ॥

'प्रत्यक्षानुमानसिद्धत्वे भेदस्य तद्विरोधादेवाप्रामाण्यमभेदागमस्य। तेन च तस्याप्रामाण्ये नानुवादकत्वं भेदवाक्यानाम्। न हि बलवतोऽनुवादकत्वं दार्ढ्यहेतुत्वात्' इति तत्त्वनिर्णयमनुरुध्याह **यदेति**। **प्रवर्तते** अपौरुषेयत्वाभिमानेन बलवती। तदा न्यायसाम्येन बलवती भेदश्रुतिः दैवादागत प्रत्यक्षादिप्रमाणान्तरसंवादेन ऐक्यवाक्यापेक्षया बलीयसी च। **हन्यात्** अभेदश्रुतिं स्वार्थात्प्रच्यावयेत् ॥ १३५० ॥

अथ भेदश्रुतिं रोद्धुंयदा निववृते ततः।
तदा तां पृष्ठतो हन्यात्स साक्षी बलवत्तरः ॥ १३५१ ॥

निववृते प्रत्यक्षस्य स्वभावप्राबल्यनिमित्तात् बलवत्तरा भेदश्रुतिसंवादेन सुदृढा च ॥ १३५१ ॥

तस्मादुभाभ्यां युद्धेन क्लिश्येदैक्यश्रुतिस्तव ।
अतस्तां क्लेशनाशाय शीघ्रमर्थान्तरे नय ॥ १३५२ ॥

शीघ्रं प्रामाण्यरूपप्राणरक्षणाय । अर्थान्तरं सादृश्याद्यैक्ये ॥ १३५२ ॥

किञ्च प्रत्यक्षबाधाय नालं वाक्यशतान्यपि ।
अन्योन्याश्रयदोषेण तथा दोषान्तरेण च ॥ १३५३ ॥

किञ्चेति उक्तं हि परेणापि गीताभाष्ये (अ. १८) अग्निः अनुष्णः, अग्निः न प्रकाशते इति ब्रुवत् श्रुतिशतं अपि प्रामाण्यं नाश्नुते । अतीन्द्रियविषयकत्वात्तत्प्रामाण्यस्ये'ति ॥ १३५३ ॥

प्रत्यक्षबाधे वाक्यं तदैक्यं वक्ति ह्यबाधितम् ।
वाक्येनैवाक्षबाधे च कथं नान्योन्यसंश्रयः ॥ १३५४ ॥

वाक्येनैव यदाक्षस्य दृढस्यापि प्रबाधनम् ।
गङ्गायां घोष इति वाक्कुर्याद्घोषवतीं नदीम् ।
साक्षाद्बाधेन तत्त्यागे गतमैक्यं भवत्करात् ॥ १३५५ ॥

अन्योन्यसंश्रय इति । न च वैपरीत्यं शक्यम् । प्रत्यक्षस्य जात्या अनुपसञ्जातविरोधित्वात् शीघ्रगामित्वात् विशेषविषयत्वात् निरवकाशत्वात् बहुप्रमाणसंवादित्वाच्च प्राबल्यादिति भावः । विस्तरः न्यायामृते (१-१०) । एवं प्रत्यक्षस्य शब्दबाध्यत्वे बाधकानि तत्रैव (१-१३) प्रकरणे व्युत्पादितान्यनुसन्धेयानि । तदुक्तं 'यजमान प्रस्तरत्वं यथा नार्थः श्रुतेरभूत् । ब्रह्मत्वमपि जीवस्य प्रत्यक्षस्याविशेषतः' इति । अनु. ॥ १३५४ ॥ १३५५ ॥

त्यज वा लक्षणावृत्तिं भज वा तत्त्वविन्मतम् ।
व्रज वाऽन्यत्रवाणीमुत्सृज्य वा बुधसंसदि ॥ १३५६ ॥

वैदिकत्वाभिमानेन कथाप्रवेशमभिलषतो द्वयी गतिः परस्य। प्रत्यक्षापेक्षया शब्दस्य दौर्बल्यं वा इति अन्यतरपक्षाश्रयणम्। दौर्बल्ये लक्षणापक्षमवधीर्य विशिष्टयोरैक्यमङ्गीकर्तव्यम्। तच्च तवानिष्टम्। 'कथमेकत्वमनयोर्घटते विपरीतयोः। प्रत्यक्षेण विरोधोऽयमुभयोरुपलभ्यते' इति त्वद्भाष्यकारवचनात्। प्राबल्ये तदविरोधाय तत्त्ववाद्युक्तदिशा सादृश्यैक्यमर्थं स्वीकुरु। तथा च दत्तजलाञ्जलिः स्वरूपैक्यवादः। तथा चागतिकतया छद्मवैदिकवेषनिर्मोकेन वैदिकसभायाः बहिष्कृतो भूयारित्याह **त्यजेति** ॥ १३५६ ॥

दृढभेदश्रुतेर्वैराद्दृढप्रत्यक्षवैरतः।
नाभेदमागमो वक्ति जीवस्य परमस्य च ॥ १३५७ ॥

'निर्दोषश्रुतिसाक्षिभ्यां प्रमिते ब्रह्मजीवयोः। सर्वशक्त्यल्पशक्तित्वे मिथ्येति च न युज्यते' इत्याह **दृढेति** ॥ १३५७ ॥

अतः प्रत्यक्षयोग्यार्थे प्रत्यक्षं बलवत्सदा।
अतीन्द्रियार्थमात्रे तु प्रबला वागिति स्थितम् ॥ १३५८ ॥

एवं च प्राबल्यमागमस्यैव जात्या तेषु त्रिषु स्मृतं इति वचनं अतीन्द्रियार्थविषय एव वा बहुविषयकत्वेन वा इति निष्टङ्कितमित्याह **अत इति** तदुक्तं तत्त्वनिर्णये 'प्रत्यक्षादिरागमस्य प्राबल्येऽपि नोपजीव्यविरोधे प्रामाण्यं' इति। 'न चानुभवविरोधे आगमप्रामाण्यम्। आगमप्रामाण्यानुभवस्यैवाप्रामाण्यप्राप्तेरि'ति च ॥ १३५८ ॥

अक्षसिद्धानुवादेऽपि का हानिरिति चिन्त्यते।
याथार्थ्यमेव मानत्वं तस्य हानिर्न काचन।
न चेत्स्मृतिरमानं स्यात्स्मृतिकर्तृव्यपेक्षया ॥ १३५९ ॥

अपि च अनुवादः कथं दोषः। याथार्थ्यस्याहानेः। अन्यथा स्मृतीनां श्रुत्यर्थानुवादित्वेनाप्रामाण्यं प्रसज्यते इत्याह **न चेदिति** ॥ १३५९ ॥

एकस्यामानमन्यस्य कथं मानं भवेद्वद।
प्रमात्वमप्रमात्वं च न ह्येकत्रैव धर्मिणि ॥ १३६० ॥

समानविषयकत्वे द्वयोरपि प्रामाण्यं वा स्यात् अप्रामाण्यमेव वा। न तु अन्यतरस्य प्रामाण्यं अपरस्य चाप्रामाण्यम्। **धर्मिणि** विषयसप्तमी। समानविषयकत्वे इत्यर्थः। वस्तुनो द्वैरूप्यत्वापत्तिरन्यथा इति भावः ॥ १३६० ॥

अनपेक्षितमेकस्य परस्यान्नत्वमानता।
परबोधनकाले तु तस्यापि तदपेक्षितम् ॥ १३६१ ॥

अणुवादे कथञ्चिद्वैयर्थ्यमेव स्यात्। न त्वेवामानत्वमित्याह **अनपेक्षितमिति**। तदपि न सर्वत्र। तदुक्तं 'सर्वाविवादस्थल एव कथञ्चिदनुवादकत्वम्'। अत्र तु अद्वैतवादिनां एव विवाददर्शनान्न तदित्याह **परेति** ॥ १३६१ ॥

प्रत्यक्षसिद्धभेदस्याप्यपलापे कृतोद्यमम्।
परं बोधयितुं भेदवादी वादोऽप्यपेक्षते।
अक्षसिद्धानुवादात्तन्न दोषः कोऽपि दृश्यते ॥ १३६२ ॥

वा अदः इति पदच्छेदः। **न दोष** इति। तदुक्तं 'प्रत्यक्षादिना भेदो येनानिश्चितस्तदर्थपरं वाक्यमित्युत्तरमि'ति (तत्त्वनिर्णय ४३९) ॥ १३६२ ॥

दूषणार्थानुवादे तु दूषणेनैव दूष्यता।
अक्षसिद्ध्या न दोषोऽभूत्किं शून्यत्वं न दूष्यते ॥ १३६३ ॥

किं चानुवादित्वं कुतो दोषः। किं प्रबलदूषणसद्भावात् उत तद्विषयस्यान्येनैव सिद्धत्वात्। आद्ये तेनैव दुष्टत्वे किं सिद्धत्वोक्तिदुर्व्यसनेन। द्वितीये प्रबलदूषणाभावात् उत्सर्गेन एव प्रामाण्यसिद्धेः अनुवादित्वेनापि कीदृशो दोषः स्यादित्याह **दूषणेति**। **शून्यत्वमिति**। अक्षासिद्धमपीत्युपस्कर्तव्यम् ॥ १३६३ ॥

दूषणं नैव भेदेऽस्ति भेदं तत्साधयेच्छ्रुतिः ।
अक्षासिना छिन्नपदा यद्वद्ग्राभूत्परश्रुतिः ॥ १३६४ ॥

इदं च कृत्वाचिन्तया अनुवादस्यादोषत्वसमर्थनायोक्तम् । वस्तुतस्तु नात्र बाधकमस्त्यपीत्याह **दूषणमिति** ॥ १३६४ ॥

अपि चामानतस्सिद्धिर्दूषणेनाप्यपेक्ष्यते ।
दृढमानेन सिद्धिस्तु भवेद्दूषणदूषणम् ॥ १३६५ ॥

अपि च प्रमाणाभासेन प्रतिवादिसिद्धोऽर्थो भवति दूषणाधिकारी । सुदृढप्रमाणेन सिद्धत्वे तु तन्निरसनाय प्रवृत्तं दूषणं स्वयमेव तेन दूषितं भवतीत्याह **दृढेति** ॥ १३६५ ॥

दूषणेनैव मानस्यामानत्वेऽन्योन्यसंश्रयः ।
अतोऽक्षसिद्ध्या दोषोक्तिरदोषज्ञत्वसाधिका ॥ १३६६ ॥

वैपरीत्ये प्रागुक्तमन्योन्याश्रयं स्मारयति **दूषणेनैवेति** ॥ १३६६ ॥

विरज्येतोत्तमश्लोकगुणानामनुवादतः ।
क इत्यादिव्यासवाक्यान्यनुवादं स्तुवन्ति हि ॥ १३६७ ॥

अनुवादो न केवलं न दोषः किन्तु मोक्षहेतुरित्यत्र भागवतं प्रमाणयति **विरज्येतेति** । 'निवृत्ततर्षैरुपगीयमानाद्भवौषधाच्छ्रोतृमनोऽभिरामात् । क उत्तमश्लोकगुणानुवादात् पुमान्विरज्येत विनाऽतिमुग्धात्' इति भागवते अनुवादः स्तूयते ॥ १३६७ ॥

निवृत्ततर्षप्रेयस्त्वं भवस्यौषधता तथा ।
मनःश्रोत्रप्रियत्वं च मिथ्याज्ञान्यतिदूरता ॥ १३६८ ॥

स्तुतिपरधर्मानाह **निवृत्तेति** ॥ १३६८ ॥

महामानत्व एवैते युज्येरन्धर्मराशयः ।
अमानत्वे तु भज्येरन्निति मन्यामहे वयम् ॥ १३६९ ॥

अतः प्रमाणसंवादादनुवादो महत्तरम् ।
मानमित्येव जानीहि न लुनीहि सतां मतम् ॥ १३७० ॥

तथा च अनुवादस्य परमप्रामाण्यसिद्धिर्दुवरित्याह ॥ १३६९ ॥ १३७० ॥

स्यादेकैकमते शङ्का सर्वस्याभिमते तु न ।
अन्नं हि कस्य वा नान्नं प्रत्यक्षं मानमेव तत् ॥ १३७१ ॥

सर्ववादिसंप्रतिपत्तेरपि प्रत्यक्षं बलवत्तरं प्रमाणमित्याह **स्यादिति**। तत्सिद्धमन्नं केनाप्यन्येन प्रमाणेन अपोद्यत इत्याह **अन्नं हीति**। तदुक्तं 'न हि अन्नत्वे दुर्घटे तस्यानन्नत्वं भवति। दृष्ट्यबाधितदृष्टस्य। न हि युक्तिपरा जितः क्षुधिते नान्नमत्ती'ति (तत्वो-) ॥ १३७१ ॥

अतो नादिमतप्राप्ततदैक्यस्यानुवादनम् ।
तद्धैक आहुरसदेवेदमग्र इति श्रुतौ ।
ब्रह्मासत्त्वानुवादाभं दोषार्हमिति शोभते ॥ १३७२ ॥

अतो भेदश्रुतिभिर्निषेधार्थमैक्यस्यैवानुवाद इति युक्तम्। अनादौ वेदे कथं सादिमतप्राप्तमनूद्यत इति चेन्न। मतानामप्यनादित्वात्। तदुक्तं अनादिकालतो वृत्ताः समया हि प्रवाहत' इति (अनु. २-२-१) अन्यथा त्वयाऽखण्डवादानारम्भप्रसङ्गः। 'तद्धैक आहुः असदेवेदमग्र आसीदिति' इति बौद्धमतानुवादस्य वेदे दर्शनाच्च इत्याह **अत इति** ॥ १३७२ ॥

दोषानर्हाक्षसिद्धस्य त्वनुवादोऽपि वादवत् ।
न चेद्बहुमहावाक्याशास्यमैक्यं परस्परम् ।
अनुवक्ति भिदा श्रुत्या भेत्तुं सुन्दोपसुन्दवत् ॥ १३७३ ॥

दोषानर्हेति। तदुक्तं तर्कताण्डवे (१-४-७५) 'द्वारिणा द्वारं सत्त्वेनार्थविषयकग्रहणे द्वारिणोऽपि सत्त्वेनार्थविषयते'ति। अनुवादमात्रस्य दोषत्वेऽतिप्रसङ्गमाह **न चेदिति।** नवकृत्वः उक्तानां तत्त्वमसिवाक्यानां वा महावाक्यानां वा परस्परं अनुवादकत्वेन भेदश्रुत्या बाधनापत्तेः। अनुवादत्वे पूर्वापरीभावस्याप्रयोजकत्वात्। प्रत्यक्षप्राप्तानुवादः श्रुतिप्राप्तानुवाद इति तु वैषम्यमात्रम् ॥ १३७३ ॥

इत्यैक्यमपि शोच्यं स्यात्तन्मानान्तरसिद्धता।
दाढ्यायैवेति वक्तव्यं सर्वैरपि विवेकिभिः ॥ १३७४ ॥

शोच्यं स्यात् इति तदुक्तं तत्त्वनिर्णये (४३०) तथा सति अभ्यासादेरप्यप्रामाण्यहेतुत्वं स्यादिति ॥ १३७४ ॥

सर्वार्थान्स्वत एवाह प्रलयेऽपि सती श्रुतिः।
सृष्टौ तदुदितानर्थान्सर्वे वेदानुसारतः ॥ १३७५ ॥

अनुमिन्वन्ति पश्यन्ति वदन्ति च ततस्ततः।
अतोऽन्यदनुवादि स्याच्छ्रुतिस्त्वन्यानपेक्षिणी ॥ १३७६ ॥

लौकिकप्रमाणप्रवृत्तेः पुरा प्रलय एव सर्वार्थप्रतिपादिका श्रुतिः नानुवादित्वशङ्काऽर्हा इत्याह **सर्वार्थाविति** ॥ १३७५ ॥ १३७६ ॥

किञ्चानुवक्ति यन्नित्यं नानित्यमनुवर्तते ॥ १३७७ ॥

किञ्चेति अनित्यं नित्यमनुवक्ति नित्यं नानित्यमनुवर्तते इति योजना ॥ ॥१३७७ ॥

ये केऽन्य इति वा साऽन्यप्रोक्ततामपि यत्स्फुटम्।
दूष्यानुवादे वदति तत्स्वोक्तं न निषेधति ॥ १३७८ ॥

इति मन्यामहे दूष्यं दूषणं चैकवाक्यगम्।
करोति शाखान्तरगातच्छाखान्तरवर्तिनाम्।
न दूषणाय यतते वाक्यानामिति मे मतिः ॥ १३७९ ॥

'यद्वदन्तीति वचनं परिहारे विशेषयुक्तिं च विना अनुवादकत्वायोगात्' इति वादावलीं हृदिकृत्वाऽऽह **ये के इति**। अनुवादकलिङ्गाभावे सोक्तत्वस्यैव प्राप्त्या न तन्निषेध इत्याह **तदिति**। किञ्चैकस्मिन्नेव महावाक्ये अनुवादनिषेधौ दृष्टौ। न तु शाखान्तरस्य शाखान्तरस्थेन निषेध इत्याह **करोतीति** ॥ १३७८ ॥ १३७९ ॥

तस्मादृक्संहितावाक्ये सयुक्तिकमुदीरितम्।
कुतस्सा दूषयेत्स्वार्थं सूक्तेऽस्मिन्नास्ति दूषणम्॥ १३८० ॥

सूक्तं चेदं तदैव स्यात्तत्त्वमेव वदेद्यदि।
अतत्त्वकथकं सूक्तमिति च व्याहतं वचः ॥ १३८१ ॥

प्रकृते तु भेदवाक्यानि शाखान्तरस्थसूक्तगतानि। अतोऽपि न निषेध इत्याह **तस्मादिति**। सूक्तनाम्नाऽपि न तदुक्तस्य निषेधार्हतेत्याह **सूक्तेति**। अन्यथा दुरुक्तैव तस्य स्यादित्याह **व्याहतं इति** ॥ १३८१ ॥

उदितेऽनुदिते होमविधात्र्यपि न दूष्यते।
अविरुद्धा त्वियं वाणी कुतो वा दूष्यतां व्रजेत्॥ १३८२ ॥

एकत्रैवोदितयोरपि शाखाभेदाश्रयणेन मीमांसकैरविरोधो व्यवस्थाप्यते। भेदवाक्यानि तु भिन्नस्थानस्थितानि अविरुद्धानि च। अत एषां दूषणं अनुचिततरमित्याह **उदित इति** ॥ १३८२ ॥

अतो भेदश्रुतेरग्रे क एकः प्रतितिष्ठति।
विरुद्धधर्मौ नीचोच्चौ जीवेशौ द्वाविमौ विना॥ १३८३ ॥

साहित्यमुद्रया भेदश्रुतेरप्रतिभटनां रञ्जयति **अत इति**। यथा वीरभटस्याग्रे एकमात्रस्य नावस्थितिः तथा भेदाख्यभीमस्याग्रे नैक्यवाक्यस्यावस्थितिः ॥ जीवेशाविव कृष्णार्जुनौ तु अनुकूलावेवेति ध्वनिः ॥ १३८३ ॥

अनुवादादिरूपोऽयमित्याकारास्ति न श्रुतिः।
त्वद्वाक्येन ममाश्वासः कल्पनाबीजमुच्यताम् ॥ १३८४ ॥

ऐक्योक्तेरन्यथायोगात्परं कल्प्यमिदं त्वया।
सा त्वद्यापि रणोद्योगादव्यावृत्तपदद्वया ॥ १३८५ ॥

वृत्त्यन्तरे क्षिप्तपदा मानत्रयभयार्दिता।
मुख्यार्थेनाकरोच्छ्रद्धामग्न्या सेचनवागिव ॥ १३८६ ॥

किञ्चानुवादे बीजं किं तथात्वप्रतिपादकश्रुतिः, त्वद्वाक्यं, उत ऐक्यवाक् । नाद्यः तदभावादित्याह **नेति**। न द्वितीयः मम त्वयि अनाश्वासात् । न तृतीयः । पदद्वयस्य सावकाशितत्वेन तदसाधकत्वात् । अन्यत्र पादद्वयेति ध्वंनिः । मुख्यार्थस्य 'अग्निना सिञ्चती'ति शक्ये वाक्ये इव प्रत्यक्षेण बाधादिति भावः ॥ १३८५ ॥ १३८६ ॥

अतो यथाश्रुतो वाक्यस्यार्थो वाच्यो मनीषिभिः।
अविरुद्धः स्वपरतस्तथा मानान्तरादपि ॥ १३८७ ॥

अविरुद्ध इति। ऐक्यं तु स्वपरविरुद्धं सकलप्रमाणविरुद्धं चेति भावः ॥ ॥१३८७॥

अविद्यमानो भेदोऽयं यद्युपास्त्यर्थमुच्यते।
तर्हि त्र्यक्षस्सहस्राक्षः सहस्राक्षस्त्रिलोचनः ॥ १३८८ ॥

कुतो न कीर्त्यते ध्यातुं तस्माद्यद्वस्तु यादृशम्।
तत्तथैव वदेद्वेदो ध्यातुं वा द्रष्टुमेव वा ॥ १३८९ ॥

यदुक्तं विवरणे 'श्रवणमङ्गि। प्रमाणस्य प्रमेयाद्यवगमं प्रत्यव्यवधानात्। मनननिदिध्यासने तु चित्तस्य तदेकाग्रवृत्तिकार्यद्वारेण ब्रह्मानुभवहेतुतां प्रपद्येते इति। तदेवं अङ्गाङ्गीभावेन समानविषयकत्वावश्यंभावेऽपि निदिध्यासनापरपर्याय-ध्यानस्य अविद्यमानविषयकत्वं श्रवणस्य विद्यमानविषयकत्वं चाहुः। भेदस्य च अविद्यमानत्वं केवलमुपासनार्थं तदुक्तिर्भेदश्रुतिषु इति सङ्गिरन्ते। तदेतदपाकर्तुं उपक्रमते **अविद्यमानेत्यादिभिः।** तस्मादिति तदुक्तमनुव्याख्याने (४-१-५) 'न किञ्चिदन्यथा ज्ञेयं ध्येयं वा तेन कुत्रचित्। किमु सर्वोत्तमो विष्णुरि'ति ॥ १३८९ ॥

सत्यं वदेति योऽन्यस्याऽप्यसत्योक्तिं निवारयेत्।
स वेदः सर्वमर्यादारक्षको नानृतं वदेत् ॥ १३९० ॥

यो यो देवो यया कृत्या येन लिङ्गेन यैर्गुणैः।
वर्तते श्रुतिरप्येषा तं तं ब्रूते तथा तथा।
न व्यत्यासात्क्वचिद्वक्ति ततस्सत्यव्रतैव सा ॥ १३९१ ॥

नेति 'नाविद्यमानं ब्रुवते वेदा ध्यातुं न वैदिकाः' इति प्रमाणात् ॥ १३९० ॥
॥१३९१ ॥

किञ्चोपास्त्यै भिदोक्तिश्चेदैक्योक्तिश्च कथं न ते।
उपासीतेति तु पदं नोभयत्रापि दृश्यते ॥ १३९२ ॥

उभयत्र 'तत्त्वमसि द्वा सुपर्णेत्यत्र ॥ १३९२ ॥

कल्पना चेत्क्व सा न स्याद्वस्तुतस्त्वैक्यमेव ते।
सर्वप्रत्यक्षतो बाधादुपास्यं स्यादसिद्धि तत् ॥ १३९३ ॥

अनृतात्पातकं वक्ति यो वेदो न स कुत्रचित्।
वदेदनृतमन्यार्थमिति मन्यामहे वयम् ॥ १३९४ ॥

उपस्थितेति पदं द्वासुपर्णेति श्रुतौ कल्प्यते इति चेदैक्यवाक्येऽपि कल्प्यताम्। किञ्च ऐक्यवाक्य एव प्रमाणविरुद्धे तत् कल्पनं न्याय्यमित्याह **सर्वेति** ॥ १३९३ ॥ १३९४ ॥

न चेन्मोहार्थमनृतं वेदो वक्तीति वादिनः।
बौद्धाद्याः केन दूष्यन्ते भूष्यन्ते वा श्रुतेर्गुणाः ॥ १३९५ ॥

श्रुतेरनृततां क्वापि वदतीति वचस्तु यत्।
श्रुतिप्रामाण्यरक्षायै तदन्यार्थं वदेद्बुधः ॥ १३९६ ॥

यत् 'नैदं यदिदमुपासत' इति वचः। तदित्यनेन संबन्धः ॥ १३९५ ॥ ॥१३९६ ॥

अतो नेदं यदिदमित्यादिवाक्यं न बाधकम्।
वाच्योऽन्योर्थः श्रुतेर्गुप्त्यै त्वयापि च मयापि च ॥ १३९७ ॥

अतः श्रुतिप्रामाण्यरक्षायै। **अन्योऽर्थ इति**। तदुक्तं ता. चन्द्रिकायां (१-१-७) श्रुतेः श्रद्धालुना श्रुत्योर्विषयभेदेन तात्त्विकविषयत्वस्यैव वक्तव्यत्वाच्चेति ॥ ॥१३९७ ॥

उपासनार्थं धनवान्किमनुश्रियते त्वया।
अधनो वानरः कश्चित्स्वानुभूतिं विचारय ॥ १३९८ ॥

विषनिर्हरणे शक्तो ध्यातव्यो गरुडस्त्वया।
सर्पदष्टेन किमुत काकोलूकादिपक्षिणः ॥ १३९९ ॥

विघ्नध्वंसाय विघ्नेशो विद्याप्त्यै शारदा त्वया।
मृत्युञ्जयो मृत्युजित्यै कुतस्संसेव्यते वद ॥ १४०० ॥

लोकानुभवविरुद्धा चैषा प्रक्रियेत्याह **उपासनार्थमिति** ॥ १३९८ ॥ ॥१३९९ ॥ १४०० ॥

अविद्यमानस्सविता सन्ध्योपास्त्यै किमीर्यते।
स्वामानतां स्वयं कर्तुं किमुन्मत्तवचः श्रुतिः ॥ १४०१ ॥

उन्मत्तवचः। अहं मूक इति वचः ॥ १४०१ ॥ १४०२ ॥

सत्यं वदेति या वाणी वक्ति धर्मानुशासनम्।
असत्यं किल सा वक्ति ध्यातुं सर्वत्र सर्वदा ॥ १४०२ ॥

यत्र प्रतीके न हि स इत्थं सूत्रकृतैव हि।
अविद्यमानस्योपास्तिर्न क्वाप्यस्तीति
साधितम् ॥ १४०३ ॥

'न प्रतीके न हि सः' इति सूत्रकृता अविद्यमानोपासना प्रतिषिद्धा चेत्याह **यत इति** ॥ १४०३ ॥

यतः प्रतीकं नैवात्मा तत आत्मत्वभावना।
न तत्रेति हि सूत्रार्थस्तवापि च ममापि च ॥ १४०४ ॥

तस्मादविद्यमानस्य भेदस्योत्कीर्तनं श्रुतौ।
उपासनार्थमिति यन्मतं तत्त्वविगर्हितम् ॥ १४०५ ॥

तत्रापि सः अर्थः मान्यः। यथाऽऽह 'न प्रतीकेष्वात्नमतिं बध्नीयात्। न हि उपासकः प्रतीकानि' इति ॥ १४०४ ॥ १४०५ ॥

स्थूलोपास्तावरुन्धत्यास्ताराप्यारात्स्थितेक्ष्यताम्।
भेदोपास्त्या त्वभेदस्य विरुद्धस्य कथं दृशिः ॥ १४०६ ॥

यदपि जल्पितं सविशेषभेदोपासना निर्विशेषाभेदसाक्षात्कारस्य द्वारं इति। यथाऽऽह 'निर्विशेषं परं ब्रह्म साक्षात्कर्तुमनीश्वराः। ये मन्दास्तेऽनुकम्प्यन्ते सविशेषनिरूपणैरि'ति तदपि निराह **स्थूलेति।** तत्र समीपस्थत्वात् द्वारत्वसंभवेऽपि

प्रकृते अभेदाभावात्मकस्य विरुद्धस्य द्वारत्वमसंभवीत्याह **विरुद्धस्येति** ॥ ॥१४०६ ॥

सोपासनैव तां स्थूलां किमण्वीकृत्य दर्शयेत् ।
किं वा भिन्नकटाहस्याप्यभेदो भेदचिन्तया ॥ १४०७ ॥

यदि पुनस्तदेव तदिति उपदेशः तर्हि तथा ज्ञातवतो विरोचनस्येव सूक्ष्मज्ञानेच्छानिवृत्तिरेव स्यात् । सूक्ष्मोपदेशः पश्चादनाकांक्षित एव । तज्ज्ञानस्य तज्ज्ञानहेतुत्वासंभवः एव । न हि उपासना अघटितघटनाशक्तिमती येन स्थूलामपि स्वसामर्थ्येनाण्वीकुर्यादित्याह **सेति** । तथा सत्यतिप्रसङ्गमाह **किमिति** ॥ १४०७ ॥

उत्कर्षश्चेदुपास्य स्यान्मिथ्यार्थोऽपि मते तव ।
नीचजीवोच्चताहेतुस्तादृगैक्यं न नो भिदा ॥ १४०८ ॥

अविद्यमानभेदस्य नोपासा तेन शोभते ।
अविद्यमानमेवैक्यमुपास्यं स्यात्सुखेन ते ॥ १४०९ ॥

मते तवेति यदाह 'क्षत्तरि खलु राजदृष्टिः क्रियते । ननु राज्ञि क्षत्तृदृष्टिरिति । **तादृक्** नीचे उच्चत्वबुद्धिः । **नः** अस्मदभिमता **भिदा** भेदोपासना न त्वदुक्तानुसारिणी । अतः त्वत्प्रक्रियया ऐक्यस्यैवोपासनं तेन च मिथ्यात्वं युक्तमिति भावः ॥ १४०८ ॥ १४०९ ॥

यदि ध्यानाय मिथ्यार्थं प्रथयेत्प्रथिता श्रुतिः ।
तदा दृष्ट्यै तवैक्यं च मिथ्यार्थं न कुतो वदेत् ॥ १४१० ॥

किञ्च मिथ्याभूतभेदोपासनेन सत्यैक्यदृष्टिर्भवतीति ते मतम् । तथा माऽस्तु कार्यकारणयोर्वैरूप्यप्रसङ्गात् । अद्वितीयश्रुतिः भेदमिव अविद्यमानमेवैक्यमुपदिशतीत्यस्तु । तस्यान्यतरपक्षपाताभावात् । एवं च मिथ्याभेदोपासनेन मिथ्यैक्यदृष्टिः तेन च अविद्यानिवृत्तिः इत्यस्तु । घटवृत्त्या घटाविद्यानिवृत्तिरिव । तथा

चोक्तवैरूप्यमपि परिहृतं भवति । कृतं भेदस्यैवाविद्यमानत्वग्रहणदुर्व्यवसानेनेत्याह **यदीत्यादिभिः** ॥ १४१० ॥

घटवृत्त्येव तद्वृत्याऽप्यविद्यानाश इष्यताम् ।
मिथ्यार्थदृष्ट्याऽप्यानन्दः किं न तात्कालिको नृणाम् ।
अतस्तयाऽपि मुक्तिः स्याद्यथा प्रागुक्तयादृशिः ॥ १४११ ॥

न च मिथ्यादृष्ट्या फलसिद्धिरदृष्टेति शङ्क्यम् । मिथ्याभूतरूप्यदृष्ट्या तात्कालिकानन्दानुभवस्यापि दर्शनात् । इत्याह **मिथ्येति** ॥ १४११ ॥

द्वयोरेकस्य सत्यत्वे निर्वैरस्यास्तु लाघवात् ।
अभेदस्ते जगद्धन्ति भेदः सर्वं च रक्षति ॥ १४१२ ॥

एवमपि अन्यतरस्य सत्यत्वपक्षपाते भेदस्य सत्यत्वमेवाङ्गीकारार्हं निर्वैरत्वात् । तत्कुतः इत्यत आह **अभेद इति** ॥ १४१२ ॥

सर्वमस्मीत्युपासीतेत्यैक्योपास्तिस्तव श्रुता ।
भेदक्र्च नस्तथा नाह त्वन्नयस्त्वां निहन्त्यहो ॥ १४१३ ॥

तव **ऐक्योपास्तिः** । त्वदभिमतैक्यस्यैवोपास्यत्वम् । **श्रुता** 'सर्वमस्मीत्युपासीत तद्व्रतं' इति छान्दोग्ये । **नः** **भेदक्र्च** अस्मदभिमतभेदप्रतिपादिका ऋक् तु । **तथा न** श्रुता । 'सर्वं भिन्नमित्युपासीत' इत्येवंरूपाया ऋचः क्वाप्यभावात् । **त्वन्न्यायः** उपास्यं मिथ्या इति न्यायः । **त्वां** **निहन्ति** त्वदभिमतैक्यस्यैव मिथ्यात्वं संपादयति ॥ १४१३ ॥

किञ्चोपास्या यदि भिया तया सिद्धं समीहितम् ।
तं यथोपासते देवं तथैव भवतीति हि ॥ १४१४ ॥

श्रुत्या मुक्तावुपास्यस्य यत्सत्त्वमवधार्यते ।
तस्मादुपास्यो भेदोऽयं मुक्तौ चासीन्निराकुलः ।
अत एव मृषोपास्तिर्न चकास्ति श्रुतेर्मते ॥ १४१५ ॥

किञ्चोपासनायाः फलविधायिनी 'यथा यथा उपासते तथैव भवती'ति श्रुतिः उपासनाफलयोरेकरूपतामवधारयति । एवं च भेदोपासनया सिध्यन् मोक्षकालीनः भेदः पारमार्थिक एव सेत्स्यतीत्याह **निराकुल इति** ॥ १४१४ ॥ १४१५ ॥

ततोनुपास्यं नैर्गुण्यं न कदापि भवेन्नृणाम् ।
सगुणं तु सदोपास्य स्वयं च सगुणो भवेत् ॥ १४१६ ॥

नैर्गुण्यं तत एव ऐक्यं अनुपास्यम् । सगुणत्वे ऐक्यायोगात् । तेन प्रकृतोपसंहारः । अनुपास्यमिति हेतुगर्भं विशेषणम् । यस्मात् त्वया नैर्गुण्यं तत एवैक्यं चोपास्यतया नाङ्गीकृतं तस्मात् तदुभयं कदाऽपि मोक्षेऽपि न भवेत् । यथा यथोपासते तथैव भवतीति श्रुतेः । त्वयाङ्गीकृतभेदोपासनं तु सगुणोपासनमेव । अतः तदुपासनेन मोक्षेऽपि श्रुत्यनुसारेण सगुण एव भवतीत्याह **सगुण इति** । **सगुणः** स्वरूपभूततत्तद्योग्यानन्दादिशुभगुणाविर्भाववान् ॥ १४१६ ॥

मुक्तौ च स्वस्य नैर्दोष्यं यदवश्यमपेक्षितम् ।
अतोऽज्ञानक्लेशनाशजन्माद्यं न स्मरेद्धरौ ।
इति सिद्धं ततोऽवद्य शून्योऽप्यासीद्रमापतिः ॥ १४१७ ॥

मुक्ताविति । 'प्रीत्या मोक्षपरत्वाच्च तात्पर्यं नैव दूषणे' इति भगवत्पादोक्तेः ॥ ॥१४१७ ॥

अनुपास्यमतत्त्वं च कुतो वक्ति श्रुतिः क्वचित् ।
तस्मादापाततो दोषश्रुतिवद्भाति या श्रुतिः ।
साऽप्युपास्य गुणार्थैव न दोषार्थेति चागतम् ॥ १४१८ ॥

तस्मादापाततः इति । 'चिन्त्या अचिन्त्याश्च तयैव दोषाः श्रुताश्च नाज्ञैर्हि तथा प्रतीताः' । इति श्रुतेः ॥ १४१८ ॥

उपास्त्यनर्हमैक्यं ते न मोक्षे नारिसंसृतौ ।
उपास्त्यभावान्मुक्तौ न नेदानीमावृतत्वतः ॥ १४१९ ॥

उपास्त्यनर्हत्वेन उपास्त्यभावात्, उपासनाफलयोरेकरूपतायाः स्थितेरैक्यं मुक्तौ न एवं आवृतत्वात्संसारेऽपि नेति त्वद्रीत्यैव कदाऽपि ऐक्यस्य अनवस्थितिरेवेत्याह **उपास्तीति** ॥ १४१९ ॥

तस्मादुपास्यं सगुणं ब्रह्मैवासीद्धि निर्मलम् ।
मुक्तिदत्वाद्विमुक्तिश्च तस्यासादृश्यमित्यपि ॥ १४२० ॥

तथैवेति वदन्ती सा श्रुतिराह ततोऽपि मे ।
भिदैव सुस्था ब्रह्मैक्यं पदाहतमभूत्तव ॥ १४२१ ॥

निर्मलमित्यनेन शबलस्य व्यवच्छेदः ॥ १४२० ॥ १४२१ ॥

उपास्योपासकत्वस्य मुक्तावप्यनुवर्तनम् ।
तथैवेति हि सर्वस्याप्यवधृत्या श्रुतिर्जगौ ॥ १४२२ ॥

'तथैव भवती'ति श्रुतौ सादृश्योक्त्या मुक्तावपि स्वामिभृत्यभावेन उपास्योपासकभावोऽनुवर्तते इति एवं सादृश्यं, एवं देवानां बहुगुणैः ब्रह्मणा त्वखिलैरित्येवं उपासनायां तारतम्येन संसारिष्वानन्दतारतम्यस्येव 'श्रोत्रियस्य चाकामहतस्य' इत्युक्तदिशा तत्रापि मुक्तौ तारतम्यं, इत्येवं प्रमाणाविरुद्धं सादृश्यं ऊहनीयम् । तदेतदाह **सर्वस्येति** ॥ १४२२ ॥

यतस्सारूप्यमोक्षोऽयं सर्वोपास्ति कृतां श्रुतः ।
अतस्सालोक्यसामीप्यसायुज्येषु च स ध्रुवः ॥ १४२३ ॥

एवं 'उपास्ते' इति सामान्यप्रयोगेण चतुर्विधमोक्षभाजामपि 'तथैव भवति' इत्युक्तः पूर्वोक्त इत्थंभावः साधारण इति ज्ञापितो भवतीत्याह **यत इति** ॥ १४२३ ॥

श्रुतिरेषा बलवती सर्वश्रुत्युक्तसंपदम् ।
स्वज्ञातिरक्षणोद्युक्तानापहर्तुं विमुञ्चति ॥ १४२४ ॥

बलवती सावधारणेन फलकथनरूपतात्पर्यलिङ्गवत्त्वेन च । सर्वाः याः श्रुतयः उपासने फले च तारतम्यं अभिधात्र्यः ताभिरुक्तां साधनफलयोस्तरतमभावेन सदृशारूपतां संपदं **अपहर्तुं** मिथ्यार्थपरतया अन्यथयितुं तदुक्तं भाष्ये (३,३,३) 'ज्ञानं चोपासनं चैव मुक्तावानन्द एव च । यथाधिकारं देवानां भवत्येवोत्तरोत्तरं' इति ॥ ॥१४२४ ॥

उपासते हि यदिदं नेदं ब्रह्मेति तु श्रुतिः ।
उपास्यमानप्रतिमा नैव ब्रह्मेति शंसति ॥ १४२५ ॥

'यन्मनसा न मनुते येनाऽऽहुर्मनो मतम् । तदेव ब्रह्मत्वं विद्धि नेदं यदिदमुपासते' इति मां प्रति शङ्करवाक्यम् । तत्र उपास्यस्य मिथ्यात्वं, ततश्च उपासनाया मिथ्याभूतार्थविषयकत्वं मुखतः प्रतीयते । तन्निराह **उपासते इत्यादिभिः** । **प्रतिमा** मानसवासनापरिणतवस्त्वित्यर्थः । सन्निधानात् ब्रह्मप्रतिबिम्बभूतम् । **नैव ब्रह्मेति** ॐ तथाऽन्यत्प्रतिषेधात् ३.२.३७ इति सूत्रे प्रतिषेधात् ॥ १४२५ ॥

ब्रह्मणस्सन्निधानाच्च तदुपास्तिर्दिदृक्षताम् ।
राजद्वारोपास्तितोऽपि राज्ञः स्याद्धि प्रसन्नता ॥ १४२६ ॥

एवं तर्हि ब्रह्मसाक्षात्कारार्थिनः कुतस्तदुपासते इत्यतो ब्रह्मानुग्रहद्वारा तद्दर्शनोपायत्वादित्याह **ब्रह्मण इति** । तदुक्तं 'ब्रह्मैव प्रतिबिम्बे यदतस्तेषां फलप्रदम्' इति । तत्र लौकिकदृष्टान्तः **राजेति** ॥ १४२६ ॥

उपासते सदा भोगैर्नरा यदुदरंभराः ।
जीवरूपमिदं ब्रह्म नेत्यर्थं चाह सा श्रुतिः ॥ १४२७ ॥

श्रुतेः अनुगुणमर्थान्तरमाह **उपासत इति भोगैः** फलपुष्पादिसमर्पणैः । **यत्** राजादिकं जीवचैतन्यम् । उदरंभरा इति निन्दनेन मा गृधः कस्य चिद्धनं इति निषेधो ज्ञाप्यते । **तत् ब्रह्म न** ॥ १४२७ ॥

तव त्वतिविरुद्धस्योपास्त्यैव स्यात्कथं फलम् ।
महाविरुद्धमग्न्यर्थी किमम्बुमथनं चरेत् ।
किं वा शुक्तेरुपास्त्यैव रूप्यप्राप्त्या धनी
भवान् ॥ १४२८ ॥

निर्विशेषसाक्षात्कारस्य सविशेषोपासनं द्वारमिति परप्रक्रियाऽत्यन्तं विरुद्धा इति सदृष्टान्तमाह **अग्नीति शुक्तेरिति च** ॥ १४२८ ॥

किञ्च शाखाग्रचन्द्रैक्यं ध्यातव्यं किल ते मते ।
स्थूलैवारुन्धतीत्वेन ध्येया सूक्ष्मत्वसिद्धये ।
एवं चैक्यमुपास्यं वा भेदो वाभूद्विचारय ॥ १४२९ ॥

स्थूलारुन्धतीदृष्टान्तः त्वत्प्रतिकूल एव । यथा तत्र स्थूलताराया अरुन्धतीनक्षत्रस्यैक्यं चिन्त्यते तथा अत्रापि ऐक्यमेव उपासनाविषय इत्यापातादित्याह **किं चेति** ॥ १४२९ ॥

स्थूलभास्वरताराया ध्याने सूक्ष्माल्पभास्वरा ।
तारैव दृश्यते व्योम नीरूपं न हि दृश्यते ॥ १४३० ॥

एवं च सगुणोपास्त्या निर्गुणेक्षोपमानसा ।
यद्ध्येयस्सगुणोऽत्रापि प्राप्योऽपि स गुणो
यतः ॥ १४३१ ॥

स्थूलतारायाः सूक्ष्मनक्षत्रस्य चोभयेषां शुक्लभास्वरं रूपमस्तीति तद्दर्शनयोः द्वारद्वारिभाव इति वक्तुं युक्तम्। एवं सगुणोपासनं सगुणदर्शनस्यैव द्वारं भवेत्। नत्वेव निर्गुणस्येत्याह **स्थूलेति** ॥ १४३० ॥ १४३१ ॥

अस्माकं तु मनोरूपप्रतिमास्थूलभास्वरा।
उपास्यमाना स्तान्तस्थां ज्ञानानन्दमयप्रभाम् ॥ १४३२ ॥

अतिसूक्ष्मां हरेर्मूर्तिं दर्शयेदिति वादिनाम्।
तवोपमैवानुपमाबलमासीद्विवेचने ॥ १४३३ ॥

मन्मते नैष दोष इत्याह **अस्माकमिति** अनुपमेति उद्देश्यभूतोपमाया विशेषणम्। न बलमिति विधेयस्य। तेन न स्त्रीलिङ्गानुपपत्तिः ॥ १४३२ ॥ ॥१४३३ ॥

अरणीस्थानलप्राप्तिररण्योर्मथने यथा।
तथानुकूलान्यसेवाऽप्यन्यप्राप्त्यै भवेन्मम।
तुहिनानुसृतिः किं स्याद्दहनप्राप्तये वद ॥ १४३४ ॥

अनुकूलस्यैव द्वारभावः ननु प्रतिकूलस्येत्युभयत्र दृष्टान्तमाह **अरणीति तुहिनेति च** ॥ १४३४ ॥

गुरोश्चरणकैङ्कर्यं गुरुकैङ्कर्यमेव यत्।
अतस्तत्प्रतिमाध्यानमपि तद्ध्यानमेव नः ॥ १४३५ ॥

तद्ध्यानमेव तस्य तत्र सन्निहितत्वेन फलप्रदत्वादिति भावः ॥ १४३५ ॥

एवं चात्मैव सेव्योऽभूद्ध्यातव्योऽभूत्स एव हि।
श्रुतयः स्मृतयस्तस्मादुपास्यं प्राहुरीश्वरम् ॥ १४३६ ॥

श्रुतयः स्मृतयश्चेति "आत्मानमेव लोकमुपासीत" "नमस्यन्तश्च मां भक्त्या नित्ययुक्ता उपासत" इत्यादयः ॥ १४३६ ॥

अधिष्ठानतया तत्र ह्युपास्यं यदमुख्यतः।
न तद्ब्रह्मेति च प्राहुर्मुख्योपास्यं च तं जगुः ॥ १४३७ ॥

'न प्रतीके न हि सः' इति सूत्रोक्तमाह **अधिष्ठानतयेति**। तथा च नाम्नि ब्रह्मेत्युपासीत इत्येवार्थः ॥ १४३७ ॥

वस्तुतस्सूक्ष्मतारायास्समीपस्थेति लौकिकः।
स्थूलां तारां दर्शयन्ति तद्भावं तत्र को वदेत् ॥ १४३८ ॥

द्वारमपि द्वारत्वेनैवोपदिशति न तु तदेव तदिति। अतो मिथ्योपास्तेर्न कोऽपि दृष्टान्त इत्याह **वस्तुतस्त्विति** ॥ १४३८ ॥

शाखाग्रदेशे नेन्दोश्च स्यादादेशो विवेकिनाम्।
शाखाग्रैक्यं तु को वक्ति मिथ्योपास्तः क्व
तेऽस्ति तत् ॥ १४३९ ॥

क्वेति धनिकानां इन्द्रचन्द्राद्युक्तिस्तु प्रशंसामात्रं न तु द्वारतया तवैक्याभिप्रायेण इति भावः ॥ १४३९ ॥

किञ्चैवमप्युपास्येऽस्मिन्भेदे स्याद्ब्रह्मणोऽन्यता।
मिथ्यात्वं तु कुतो हेतोरघटो नास्ति किं पटः ॥ १४४० ॥

अस्तु वा भेदः उपास्यः भिन्नस्य मिथ्यात्वं कुतः। अघटः पटः घटाद्भिन्नः इति ज्ञातः इत्येतावता पटस्य मिथ्यात्वमित्याह **किञ्चेति** ॥ १४४० ॥

उपासते तु यदिदं नेदं ब्रह्मेति तु श्रुतिः।
यदुपास्यं न तद्ब्रह्मेत्याह तन्नास्तिता कुतः ॥ १४४१ ॥

तथा च श्रुत्या उपास्यस्य ब्रह्मभिन्नत्वमेवायाति न मिथ्यात्वमित्याह **उपासत इति** ॥ १४४१ ॥

न चेत्तद्विदितादन्यदेवेति श्रुत्युपक्रमात्।
ज्ञेयं च ब्रह्म नेति स्तां ज्ञानोपास्ती मृषार्थयोः ॥ १४४२ ॥

नेदं यदिदं उपासते इत्यत्र उपास्याद्भिन्नत्वोक्तिमात्रेण यदि उपास्यं मिथ्येति ब्रूषे तर्हि 'अन्यदेव विदितात्' इति तत्रैव ब्रह्मणः ज्ञेयादन्यत्वोक्त्या ज्ञेयस्यापि मिथ्यात्वप्राप्त्या ज्ञानोपासने उभे अपि मिथ्याभूतार्थविषयके स्यातामित्याह **न चेत्** ॥ ॥१४४२ ॥

सामस्त्याज्ञानमात्रेण ज्ञेयादन्यद्यदीष्यते ।
तर्ह्युपास्यादन्यदस्तु समस्तोपास्त्यशक्तितः ॥ १४४३ ॥

यदि अविदितात् इत्यतः प्राक् साकल्येनेति पदं अध्याहृत्य साकल्येनावेद्यं ब्रह्मेत्यर्थो वर्ण्यते तर्हि उपासते इत्यतः पूर्वमपि तत्पदाध्याहारेण साकल्येनोपास्यं नेत्येवंभावो वर्ण्यतां इत्याह **समस्तोपास्त्यशक्तित** इति। सामस्त्येन ब्रह्मोपास्तावन्येषामशक्तितः इत्यर्थः ॥ १४४३ ॥

आत्मा वेत्येकवाक्योक्ते ज्ञानोपास्ती कथं द्वयोः ।
अनन्तोपास्ति विधयो बाध्यं तेनोक्तिमात्रतः ॥ १४४४ ॥

आत्मेति 'आत्मा वाऽरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्य' इत्येकस्मिन्वाक्ये दर्शनं निदिध्यासनं चेति ज्ञानोपास्ती विधीयेते । तत्र एकस्यैव आत्मशब्दवाच्यस्य ज्ञेयत्वे सत्यत्वं उपास्यत्वे तु मिथ्यात्वं इति विरुद्धं द्वैरूप्यं न घटते"। अतः अनन्तानां उपासनाविधायकवाक्यानां त्वदुक्तिमात्रेण मिथ्योपासनार्थकत्वं न युक्तमिति भावः ॥ १४४४ ॥

अतः श्रुतिस्मृतिशतैर्विहितोऽपास्ति गौरवात्।
अन्यार्थमनुकूलं वा भजेदर्थमियं श्रुतिः ॥ १४४५ ॥

इयं श्रुतिः नेदं यदिदमुपासते इति श्रुतिः ॥ १४४५ ॥

साक्षिसिद्धमिदं जीव ते रूपं ब्रह्म नो पते।
यदा स तत्परं ब्रह्मेत्याह सेयं श्रुतिः किल ॥ १४४६ ॥

तस्माज्जीवेशभेदस्य साधिकेयमभूच्छ्रुतिः।
उपास्यस्य तु मिथ्यात्वं निर्निमित्तमभूत्तव ॥ १४४७ ॥

तलवकारभाष्योक्तं श्रुतेरर्थान्तरमाह **साक्षीति**। हे जीव **इदं** दुःखित्वबद्धत्वादिना साक्षिप्रमितं जीवचैतन्यं ब्रह्म न। किन्तु **यत् ते उप आस** यत् 'सयुजौ' इति श्रुत्युक्तदिशा तव समीपे एकस्थानस्थितं आस्ते तदेव परं ब्रह्मेति ॥ ॥१४४६ ॥ १४४७ ॥

तृणं दग्धुं न शक्तोऽग्निर्मरुच्चालयितुं किल।
गतागतोक्तिप्रत्युक्तिव्यापारैश्चेतनौ हि तौ।
अशक्तमेवं चैतन्यं देवानामस्ति तद्वदि ॥ १४४८ ॥

विलक्षणतमं ह्येतच्चैतन्यद्वितयं यदा।
सुराणामपि ह्यस्ति नराणां हृदि का कथा ॥ १४४९ ॥

विरुद्धार्थक्रियाकारि वैलक्षण्यमिदं तयोः।
कथं ह्युपास्त्या मिथ्या स्यात्किमुपास्ति-
विषाङ्कुरः ॥ १४५० ॥

तलवकारोपनिषद्युक्ता कथा जीवब्रह्मभेदं संस्थापयतीत्याह। **अग्निरित्यादिना**। अग्निमरुदादिदेवा अपि तत्प्रेरणां विना तृणदाहचालनादावप्यशक्ताः ।यक्षस्य परमात्मनः अन्तर्यामिणः प्रभावेणैव तैरसुराः पराजिता इति स्पष्टं तत्र वर्ण्यते। एवं श्रुतियुक्तिसिद्धो भेदः नोपास्यत्वमात्रेण बाधमर्हतीति भावः ॥ ॥१४४८ ॥ १४४९ ॥ १४५० ॥

यथा यथा ज्ञानिनस्तमधीश्वरमुपासते ।
वस्तुस्थित्या तथैवासौ भवतीशो न चान्यथा ॥ १४५१ ॥

इत्येकवचनान्तस्य भवतीत्यस्य सत्त्वतः ।
अर्थोऽयमपि च श्रौतो मिथ्योपास्तिस्ततोऽपि न ॥ १४५२ ॥

श्रुतेरर्थान्तरं वदन् उपास्यस्य सत्यत्वं स्थिरीकरोति **यथेति**। उपासते इति बहुवचनस्य भवति इत्येकवचनस्य चैककर्तृत्वेऽनुपपत्त्या उपासते इत्यत्र तं इति भवतीत्यत्र असौ इति पदं अध्याहृत्यार्थो वर्णनीय इत्याह **तमिति असाविति च**। **तथैव** उपासनानुसारेण भिन्नः सविशेष एव न तु पुनः अभिन्नो निर्विशेषश्चेत्याह **वस्तुस्थित्या इति** ॥१४५१ ॥ १४५२ ॥

प्राग्विभक्तेर्विपरिणत्यार्थोऽत्र तु यथा श्रुतः ।
त्रयोर्थास्सर्ववेदेष्वित्यस्ति यद्व्यासशासनम् ॥ १४५३ ॥

त्रयोऽर्थाः इति 'त्र्यर्थतां श्रुतिषु वित्त' इति वचनात् ॥ १४५३ ॥

अहो न चरमन्त्येते तथैवात्महनश्च ते ।
उपासते ये त्वसत्यमित्याह श्रुतिगीतिका ॥ १४५४ ॥

अतो विनिन्दितामेतां कथं वक्ति श्रुतिस्सती ।
तेनोपास्यं समस्तं च सत्यमित्यागतं बलात् ॥ १४५५ ॥

'न च रमन्त्यहो असदुपासनया आत्महनो जनाः' इति श्रुतिगीतिकायां मिथ्योपासनस्य निन्दितत्वाच्च न पराभिमतः श्रुत्यर्थ इत्याह **अहो इति** ॥ १४५४ ॥ ॥१४५५ ॥

ध्यानाय मननं तस्मै श्रवणं दर्शनाय तत् ।
इति तेऽपि मतं तस्माद्दृष्टिध्यानेन भिन्नयोः ॥ १४५६ ॥

न चेत्तवाश्रुतध्यानमश्नुते क्षणमेव वा।
आपतेत द्वयं चापि न युक्तं नापि ते मतम् ॥ १४५७ ॥

अपसिद्धान्तं च परस्याह **ध्यानायेति**। तस्मै **मननाय** 'श्रवणजं ज्ञानं पूर्ववृत्तं' इति सुधोक्तेः। तत् श्रवणं दर्शनायेति ते मतं इत्यन्वयः। स्वमते शब्दस्यापरोक्षज्ञानहेतुताया दूषितत्वात् (न्याया. ३। १। प. ६३५) स्वमते तु निदिध्यासनमेवाङ्गि श्रवणं तु तदङ्गमित्यन्यदेतत्। श्रवणध्यानदर्शनानां समानविषयकत्वं हि परस्य सिद्धान्तः। न चेत् ध्यानापरोक्षयोः समानविषयकत्वं न चेत् ॥ १४५६ ॥ १४५७ ॥

श्रवणं करणं तत्त्वसाक्षात्कारश्च तत्फलम्।
श्रवणादेव च ध्यानं तत्रान्योऽर्थः कुतोऽपतत् ॥ १४५८ ॥

अन्यः अर्थः श्रवणाविषयः मिथ्याभूतः ॥ १४५८ ॥

किञ्चासंभावनोच्छित्त्यै मननं किल ते मते।
ध्यानं च विपरीतार्थभावनोच्छित्तये किल ॥ १४५९ ॥

तद्ध्यानं विपरीतार्थविषयं चेत्कथं ततः।
विपरीतार्थविषयभावनोच्छिद्यते वद ॥ १४६० ॥

विपरीतेति। श्रवणाद्विपरीतेत्यर्थः ॥ १४५९ ॥ १४६० ॥

न चेदुन्मत्तवार्ता स्याच्छास्त्रवार्ता तवाखिला ॥ १४६१ ॥

उन्मत्तवार्ता पूर्वोत्तरविरोधात् सकलप्रमाणविरोधादपसिद्धान्ताच्च ॥ ॥१४६१ ॥

तन्निर्गुणार्थश्रवणे ध्यानं निर्गुणगोचरम्।
त्वयापि सर्वथा वाच्यं न चेदङ्गाङ्गितैव न ॥ १४६२ ॥

अङ्गाङ्गिता त्वन्मते श्रवणस्याङ्गिता ध्यानस्याङ्गता। वस्तुगत्या वैपरीत्यम्। सर्वथा समानविषयकत्वमावश्यकमेवेति भावः ॥ १४६२ ॥

यतः फलैक्ये सति सा बोध्यैक्ये च फलैकता।
सत्यार्थश्रवणे तस्मात्सत्यार्थस्यैव भावना ॥ १४६३ ॥

मिथ्यार्थश्रवणे तु स्यान्मिथ्यार्थस्यापि भावना।
तस्मादुपास्यो भेदोऽस्तु सत्योऽप्यस्तु श्रुतीरितः ॥ १४६४ ॥

फलं त्वन्मते निर्विशेषसाक्षात्कारः। बोध्यः निर्विशेषम्। तथा च श्रवणस्य तद्विषयकत्वे ध्यानस्यापि भेदोपासनं त्वन्मते दुर्घटम्। श्रवणस्य मिथ्यार्थत्वं व्यापकं, तच्च त्वया नाङ्गीकृतम्। तच्च व्यावर्तमानं ध्यानस्य मिथ्यार्थकत्वं व्यावर्त्य सत्यार्थकत्वं व्यवस्थापयति। एवं च भेदस्योपास्यत्वेऽपि सत्यत्वमेव सिद्ध्यतीत्याह **तस्मादिति** ॥ १४६३ ॥ १४६४ ॥

उपास्तेरेव बलतो मिथ्यात्वं तु तवापि न।
अतः पूर्वोक्तवेदर्चोऽप्यापातार्थो न यौक्तिकः ॥ १४६५ ॥

ऋक् 'नेदं मदिदं' इत्यादिका ॥ १४६५ ॥

योग्यार्थे तां निनीषोस्ते गुरुरासीज्जगद्गुरुः।
अतो भेदश्रुतेरर्थं न भेत्तुं कोऽपि शक्नुयात् ॥ १४६६ ॥

ते गुरुः इति तेन त्वया अकामेनापि मद्भाष्यकृदुक्तः अर्थ एव उपेयः इति भावः ॥ १४६६ ॥

पदद्वयाविरुद्धोऽयं श्रुत्यर्थः केन चाल्यते।
तत्पदाभ्यां विरुद्धं तु तदैक्यं चलनोचितम्॥ १४६७ ॥

तत्त्वमसीति वाक्यस्य भेदे निरवकाशत्वं, ऐक्ये तु सादृश्यादिपरत्वेन सावकाशत्वं इत्याह **पदद्वयेति** ॥ १४६७ ॥

पश्येज्जीवो यदा रुग्मवर्णं कर्तारमीश्वरम् ।
पुरुषं ब्रह्मपितरं तदा त्यक्त्वा तमोऽञ्जनम् ।
विधूय सकलं कर्म परं साम्यमुपैति च ॥ १४६८ ॥

'यदा पश्यः पश्यते रुक्मवर्णं कर्तारमीशं पुरुषं ब्रह्मयोनिम् । तदा विद्वान्पुण्यपापे विधूय निरञ्जनः परमं साम्यमुपैति' इति श्रुतिं अर्थतोऽनुवदति **पश्येदिति** ॥ १४६८ ॥

इति जीवेशभेदस्य साक्षात्कारेण हि श्रुतिः ।
परमं मोक्षमाचष्ट मुक्तस्यापि भिन्नताम् ॥ १४६९ ॥

न ह्यञ्जनाख्यतमसः कर्मणोः पुण्यपापयोः ।
क्षयः परमसाम्यं च महामोक्षमृते भवेत् ॥ १४७० ॥

अनया श्रुत्या सिद्धान्तसकलप्रमेयसिद्धिप्रकारमाह इतीत्यादिभिः । **भेदस्येति** । कर्तृत्व-ईशत्व- पुरुषत्वलक्षणपूर्णत्व-चतुर्मुखयोनित्वादिविरुद्ध-धर्मकथनेनेति भावः । मोक्षस्य परमत्वसिद्धिप्रकारमाह **न हीति अञ्जनं** अविद्याख्यं तमः । पुण्यपापविधूनने विशेषः 'तदधिगम'नयभाष्यटीकाऽनुसारेणावसेयः ॥ ॥१४७० ॥

साकारस्य सवर्णस्य कर्तुस्सर्वेश्वरस्य च ।
साक्षात्कारोऽस्य भेदादेः किं न
साक्षात्कृतिर्वद ॥ १४७१ ॥

अस्य भिन्नस्य । **भेदादेः** आदिपदेन अकारादिभेदकधर्माणां ग्रहणम् । **किं न इति** । तेषां तत्स्वरूपत्वादिति भावः ॥ १४७१ ॥

यदा तदेतिशब्दाभ्यां पारंपर्यनिषेधनात्।
साक्षान्मोक्षोपयोगित्वं ज्ञानस्यास्य निगद्यते ॥ १४७२ ॥

साक्षादिति। 'स्वोदयात्फलदं ज्ञानं' इत्युक्तेः। प्रसादस्तु ईश्वरगतः न अधिकारिनिष्ठः इति भावः ॥ १४७२ ॥

अतस्साकारतावर्णः कर्तृत्वेशत्वपूर्वकः।
महिमा ब्रह्मपितृता भिदा चाबाध्यतामगात्॥ १४७३ ॥

यतस्साम्यं द्वयोरेव ततो मोक्षेऽपि भिन्नता ॥ १४७४ ॥

अतः मोक्षोपयोगिज्ञानविषयत्वात् ॥ १४७३ ॥ १४७४ ॥

एवं च तत्त्ववाद्युक्ततत्त्वसर्वस्वमेव हि।
तत्त्वमासीदतत्त्वस्य दर्शनान्न हि मुक्तता।
अतोऽपि शङ्का पङ्कस्य नावकाशोऽत्र कश्चन ॥ १४७५ ॥

अत्र भेदे तत्पारमार्थ्ये च ॥ १४७५ ॥

भिन्नाभिन्नादिकल्पोक्तदूषणैर्भेददूषणम्।
जात्युत्तरं हि तत्सर्वं यत्खण्डनकृताकृतम्।
व्यावहारिकभेदस्याप्यपलापप्रसङ्गतः ॥ १४७६ ॥

पूर्वं अभेदपक्षेऽपि समानः प्रसङ्ग इत्युक्तम्। इदानीं व्यावहारिकभेदपक्षेऽपि इत्युक्तेः पूर्वोक्ताद्भेदः ॥ १४७६ ॥

भेदभेदेऽनवस्थानमभेदे चैकशेषता।
भेदाभेदे विरोधश्चेत्येतद्धि तव दूषणम् ॥ १४७७ ॥

तद्दूषणप्रकारं खण्डनसौकर्यायानुवदति भेदभेदे इति तदुक्तं वादावल्यां 'तत्तद्भेदस्य भेदान्तरभेदेऽनवस्थानादि'ति। एकशेषता। इत्युपलक्षणम्।

संबन्धितया प्रतीतिः अपर्यायशब्दवाच्यत्वं इत्यादिसकलभेदव्यवहारानुपपत्तयो ग्राह्याः । अतः चतुर्थप्रकारस्य अनिर्वचनीयत्वस्य सिद्धिरिति परस्य हृदयम् ॥ ॥१४७७ ॥

आत्माश्रयानवस्थाद्यैर्दोषैर्भेदस्य दूषणे ।
व्यावहारिकताऽप्यस्य कथं स्याद्या मता तव ॥ १४७८ ॥

यदि भेददर्शनं वास्तवं स्यात् तर्हि अन्योन्याश्रयादिकं स्यात् इति खलु आपादनीयम् । तत्र च व्याप्तिवैधुर्यमिति वादावल्युक्तदूषणे स्थिते तस्य स्फुटत्वाद्दोषान्तरमाह । **व्यावहारिकतेति** । तथा च प्रतितर्कपराहतिः ॥ १४७८ ॥

किं घटः पटहेतुस्ते पटो वा घटहेतुकः ।
किं स्वयं स्वोपरिघटः किं स्याद्घटपरंपरा ॥ १४७९ ॥

तद्व्यावहारिकेऽप्यर्थे दोषा न स्युरिमे कथम् ॥ १४८० ॥

अतस्ते व्यवहाराय समाधानं हि यद्भवेत् ।
तदेव पारमार्थ्येऽपि समाधानं भविष्यति ॥ १४८१ ॥

व्यावहारिकत्वेऽपि उक्तदोषाणां न परिहार इत्याह । **किं घटः इति** । उत्पत्तौ दोषमुक्त्वा प्रवृत्तावप्याह **किं स्वयमिति** ॥ १४८० ॥ १४८१ ॥

किञ्च ते परमार्थैक्ये विकल्पो दूषणानि च ।
भवन्त्येतानि सर्वाणि ततस्तच्च मरिष्यति ॥ १४८२ ॥

स्वाभिलषितस्याभेदस्याप्यसिद्धेरिति उक्तं स्मारयति इदं चोपलक्षणम् । ब्रह्मण्यपि प्रपञ्चाद्भिन्नं अभिन्नं वा इत्यादि विकल्पदोषाः समा एवेति वादावल्युक्तं च ग्राह्यम् । ततश्च ब्रह्मापि अनिर्वचनीयं स्यादिति ॥ १४८२ ॥

मृतसञ्जीवनं तत्र यत्स्याद्भेदेऽपि तद्भवेत् ।
अतो यत्किञ्चिदेवैतदिति सर्वं मनोरमम् ॥ १४८३ ॥

यत् विशेषः। यत्किञ्चिदिति तदुक्तं उदयनेन 'एतामेव जातिमवष्टभ्य शुष्कतर्कवादिनम्। बौद्धचार्वाकवेदान्तिनां बालव्यामोहहेतवः कण्ठकोलाहलाः' इति ॥ १४८३ ॥

या श्रुतिर्नेति नेत्यात्मा गृह्य इत्यादिरूपिणी।
साऽप्यात्मानं जडाज्जीवाद्भिन्नं वर्णयति
स्फुटम्॥ १४८४ ॥

जडं नात्मा जीवचिच्च नात्मेत्यर्थो भवेन्मम।
तव द्विधा निषेधस्याभावेन द्वौ नञौ वृथा ॥ १४८५ ॥

नेति नेति इति द्विरभिधानसार्थक्याय योग्यमध्याहारमाह **जडं न जीवचिच्च नेति**। परार्थे तु तद्वैयर्थ्यमेवेत्याह **तवेति** ॥ १४८५ ॥

यथा घटो नेति पटो गृह्य इत्युदिते सति।
घटादत्यन्तभिन्नोऽसौ पटस्सिद्ध्येन्न चापरम्॥ १४८६ ॥

अनेन भेदस्यैव सिद्धिर्न मिथ्यात्वमित्यत्र दृष्टान्तमाह **यथेति** ॥ १४८६ ॥

तथा जडजगन्नेति गृह्यो जीवजगच्च न।
इत्यात्मा गृह्य इत्युक्ते कथमत्यन्तभिन्नता।
जडजीवाख्यजगतो न सिद्ध्येत्परमात्मनः ॥ १४८७ ॥

द्विर्निषेधबलाज्जीवजडयोश्च ग्रहो ध्रुवः।
मिथ्यात्वाशानुपूर्वोक्तनिदर्शनपराहता ॥ १४८८ ॥

प्रकृते सङ्गमयति **तथेति** ॥ १४८७ ॥ १४८८ ॥

अन्यमीशमिति प्राह जीवादन्यमधीश्वरम्।
श्रुतिः प्राग्द्वासुपर्णेति प्रोक्तवाक्यसमाख्यया॥ १४८९ ॥

घटकुड्यवदन्यत्वे साम्यं स्यात्तेन तं श्रुतिः ।
ईशमाह गुणाख्यं च महिमानं पुनर्जगौ ॥ १४९० ॥

'जुष्टं यदा पश्यत्यन्यमीशमस्य महिमानमिति वीतशोकः' इति श्रुतिं भेदे प्रमाणयति **अन्यमिति** ॥ १४८९ ॥ १४९० ॥

त्रितयज्ञानतो जीवो वीतशोको भवेत्किल ।
इतिशब्देन तज्ज्ञानं सप्रकारकमाह च ॥ १४९१ ॥

त्रितयं अन्यं ईशं महिमानं चेत्येतत्त्रितयं **सप्रकारकमिति ।** निष्प्रकारकज्ञानस्यालीकत्वादिति भावः ॥ १४९१ ॥

साक्षान्मोक्षप्रदत्वोक्त्या तत्त्वमासीदिदं त्रयम् ।
तस्मादभेदस्साम्यं च नैर्गुण्यं च निराकृतम् ॥ १४९२ ॥

साम्यं अत्यन्तसाम्यम् । परमं साम्यमित्यत्रोक्तं साम्यं च जरामरणादिराहित्येनैवेति सर्गेऽपि नोपजायन्ते प्रलये न व्यथन्ति च इति गीतायामेव विवरणात् ॥ १४९२ ॥

वीतशोक इति प्राह यतस्स ज्ञानिनः फलम् ।
ततो जीवेशभेदेऽस्यास्तात्पर्यं चावगम्यते ॥ १४९३ ॥

तात्पर्यं फलरूपतल्लिङ्गोक्त्या ॥ १४९३ ॥

एष सर्वेश्वर इति काचिद्वक्ति तमीश्वरम् ।
स सर्वस्य वशी सर्वस्येशान इति चापरा ।
अतस्सयुक्तिकः स्वामिभृत्यभेदः श्रुतौ श्रुतः ॥ १४९४ ॥

सयुक्तिकः इति तत्रैव वाक्यशेषे सर्वज्ञत्वसर्ववशित्वादियुक्तीनामुक्तत्वादिति भावः ॥ १४९४ ॥

य आत्मनि सदा तिष्ठन्नात्मनोऽन्तर इत्यपि ।
तेऽन्तर्याम्येष इत्याद्याः श्रुतयस्सूत्रसूचिताः ।
जगुर्जीवेशयोर्भेदं शतशोथ सहस्रशः ॥ १४९५ ॥

'य आत्मनि तिष्ठन्' इति श्रुतिः अद्वैतिभाष्येऽपि भेदपरत्वेनाङ्गीकृता (भे.प.ब्र.सू. प.४७) ॥ १४९५ ॥

उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः ।
यो लोकत्रयमाविश्य बिभर्त्यव्यय ईश्वरः ।
इति गीतासु भेदोऽयं सयुक्तिकमुदाहृतः ॥ १४९६ ॥

सयुक्तिकमिति । प्रवेश-भरणकर्तृत्वादि भेदकधर्मोक्तेः ॥ १४९६ ॥

विद्यात्मनि भिदा बोध इति भागवते हरिः ।
विद्या केति पुरा पृष्टो भिदा बोधं
किलोक्तवान् ॥ १४९७ ॥

आत्मनि जीवसमुदायधर्मिकः परमात्मप्रतियोगिकः । यद्वा आत्मशब्देन परमात्मग्रहणे तद्धर्मिको वा भेदः ग्राह्यः । भिदा अबोध इति पदच्छेदे प्रश्नोत्तरयोः स्फुटाऽसङ्गतिरित्याह क इति ॥ १४९७ ॥

चेतनेष्वात्मसु भिदा जात्येकवचनादियम् ।
अबोध इति च च्छेदे बोधच्छेदो भविष्यति ।
बोधाभावं हि को बोद्धा विद्यां बुद्धिमते
वदेत् ॥ १४९८ ॥

राजा तत्पुरुषो मेने नान्यस्य पदसेवनम् ।
बहुव्रीहेस्तु चोरस्य स्याच्चास्यान्यानुयायिता ॥ १४९९ ॥

बहुव्रीहिस्तु जघन्यत्वात् संभवति तत्पुरुषे नाश्रयणीय इति साहित्यमुद्रयाऽऽह **राजेति । नान्यस्येति** । स्वपदमात्रमात्रप्रधानः । **चोरस्य** चौर्येण बहुव्रीहिमतः ॥ १४९९ ॥

श्रेष्ठं पदं समारूढः कथं नीचो बुभूषति ।
शङ्कास्कन्दितमूर्तिस्सा विद्या नोर्ध्वं यियासति ॥ १५०० ॥

दम इन्द्रियनिग्रह इत्यादिपूर्ववाक्येषु उद्देश्यवाचकपदानां पूर्वं पाठात्तत्रायानुरोधेन विद्यामुद्दिश्य भिदा बोधत्वं विधीयते इति अवश्यं वाच्यम् । अन्यथा प्रायपाठविरोधापत्तेः । इन्द्रियनिग्रह इत्यादिषु तत्पुरुषत्वेन विधेयत्वं संभवति विशेष्यपदत्वात् । भिदाबोध इत्यत्र बहुव्रीह्याश्रयणे तस्य विशेषणपदत्वापत्त्या विशेष्यं पदान्तरमध्याहार्यम् । तथा च अध्याहार एव दोषः । अनुवादकमेव विद्यापदं विधेयकोटौ विशेष्यत्वेन संबध्यते इति चेत्तत्राह **श्रेष्ठमिति** । अनुवादकं हि पदं श्रेष्ठम् । शङ्काऽऽस्कन्दितमूर्तित्वात् । तत्तादृशं अनुवादपरं **ऊर्ध्वं** विधेयपरस्य भिदाबोध इति पदस्य विशेष्यतां **न यियासति** । अन्वयायोग्यमिति भावः । विरुद्धत्रिकद्वयापत्तेः ॥ १५०० ॥

स्थानान्तरेष्वदृष्टो स्यानस्थानद्वयसङ्गमः ।
स्त्रीपुंसयोश्च योगोऽयं सूते दोषकुमारकम् ॥ १५०१ ॥

अध्याहारपक्षे दोषान्तरमाह **स्थानान्तरेषु इति** । पूर्वत्र शमो मन्निष्ठताबुद्धेः इत्यादौ सर्वत्र केवलं उद्देश्यपरपदानि विधेयपरपदेभ्यो नियमेन पूर्वमेव प्रयुक्तानि । अत्रैव पुनः तस्य उभयत्र सङ्गमः विरुद्धः । किञ्चैवमपि बहुव्रीहेर्विशेषणपदत्वेन विशेष्य समानलिङ्गवत्त्वस्य नियतेः, भिदायाः अबोधो यस्याः सा भिदाबोधा अविद्येत्येव स्यात् न पुनः भिदाबोध इति । दोषं साहित्यमुद्रयाऽऽह **स्त्रीपुरुषयोरिति । योगः** विशेषणविशेष्यभावेन प्रयोगः ॥ १५०१ ॥

अध्याहारो बहुव्रीहिवृद्ध्यै किं स्याद्विचारय ॥ १५०२ ॥

'यत्रानवसरोऽन्यत्र' इत्युक्तां अध्याहारमर्यादामुल्लङ्घ्य कुतोऽयं स्वच्छन्दाध्याहारो बहुव्रीहिसमासपक्षस्य क्षपणकर एव न पोषक इति श्लेषेणाह **बह्विति**। अधिकः आहारः सञ्चितस्य व्रीहेः क्षपणहेतुरेव यथा तथेति ध्वनिः ॥ ॥१५०२ ॥

तर्हि सत्सदसच्चासन्न च कालजवोऽपि न।
यदा शास्त्रं समाकृष्य शयीत सलिले हरिः॥ १५०३ ॥

आरुवन्दे हि देवेषु वायुस्तस्य प्रसादतः ॥ १५०४ ॥

तदा प्रागसतो जन्म सतो मृतिमथात्मनि।
भिदां च ये पणमृते स्मरन्तीशसृतेर्गताः ॥ १५०५ ॥

तेषामुपविशाम्नाय ध्वनिं वैकुण्ठवासिनाम्।
इत्याह श्रुतिगीतायां भगवान्बादरायणः ॥ १५०६ ॥

मूर्तामूर्ताख्यभूतानां लयो ब्रह्मलयः किल।
कालस्य रूपमात्रं तु तदाप्यस्ति जवोस्य न।
जरामरणयोग्यस्य जवार्हजगतः क्षयात् ॥ १५०७ ॥

एतद्वाक्यस्य भेदपरत्वं पूर्वोदाहृतश्रुतिगीतिकावाक्यविवरणेन द्रढयति **तर्हीत्यादिभिः**। अत्र भेदस्मरणस्य मुक्तिकालीनत्ववर्णनेन भेदस्य तात्त्विकत्वम्। सदसन्नेति मूर्तामूर्तात्मकजगत्प्रलयोक्त्या परान्तकालत्वोक्तिः। **सलिले** 'अप्रकेतं सलिलमासीत्' इत्युक्तप्रलयोदधौ। महोदधिशयोन्तक इत्युक्तेः। **सृतेः गताः** 'अस्माल्लोकात्प्रेत्य' इत्युक्त्या मुक्ताः। परमात्मनि जगज्जन्ममरणादिकारणत्वलक्षणं महिमानमनुसन्धाय स्वभावशक्त्या फलनैरपेक्ष्येण आत्मनि भिदां स्मरन्ति ॥ ॥१५०३ ॥ १५०४ ॥ १५०५ ॥ १५०६ ॥ १५०७ ॥

नित्यवेदात्मकं शास्त्रमपकृष्य स्वहृद्गुहाम् ।
प्रवेश्य शेते किल स वटपत्रपुटे प्रभुः ॥ १५०८ ॥

अपकृष्य पदसमन्वयपरत्वं समापाद्य ॥ १५०८ ॥

एवं च ब्रह्मकल्पान्ते सन्ति सन्तस्स्मरन्ति च ।
जगतां जन्ममरणे परमात्मनि सर्वतः ॥ १५०९ ॥

भिदां चेत्यागतं स्पष्टं शयानस्य तु देहिता ।
स्मर्तृणां बहुता चार्थात्प्राप्ता शब्दार्थविन्मते ॥ १५१० ॥

यतो जडद्वयं मुक्तो मुक्ताश्च बहवो भवन् ।
तेनाद्वितीयतामुक्तौ शुक्तौ रूप्यमभूत्तव ॥ १५११ ॥

देहिता इति मुक्तप्राप्यस्य साकारता, स्मरन्तीति बहुवचनेन मुक्तानां बहुत्वं यदेति शास्त्रमिति च कालो वेद इति जडद्वयस्य इत्यादिसिद्धिः । तेन 'यत्र तु सर्वमात्मैवाभूत्' इत्यत्र अद्वैतिभिः कल्पितः अद्वितीयतावादो निराकृतो ध्येयः ॥ ॥१५०९ ॥ १५१० ॥ १५११ ॥

जीवन्मुक्तिर्हि देहादौ सति मुक्तिरियं परा ।
परान्तकालादपरो मुक्तेः कालो न यौक्तिकः ॥ १५१२ ॥

सकलप्रपञ्चनाशश्रवणान्नेयं जीवन्मुक्तिः किन्तु परममुक्तिरेव । जीवन्मुक्तौ देहादीनामवस्थितेरित्याह **जीवदिति**। **मुक्तेः** परममुक्तेः **अपरः कालः** अपरमुक्तिकालः इति यावत् ॥ १५१२ ॥

तदापि भेदस्तद्बोधश्चास्ति श्रौतस्मृतेर्बलात् ॥ १५१३ ॥

आत्मनीति हि सप्तम्या यद्भेदाधारतोदिता ।
अतस्तत्परमं तत्त्वं विद्या तद्बोध एव हि ॥ १५१४ ॥

बोधः स्मरन्तीत्युक्तः । सन्ततं हरिस्मरणं तद्धर्मिकभेदस्मरणमेवेति हृदयः । आधारता भेदव्याप्तलिङ्गम् । **श्रौतस्मृतेः** श्रुतिगीतिकायाः पञ्चमवेदस्य । **तद्बोध एव** भिदाबोधः न तु भिदाया अबोधः ॥ १५१३ ॥ १५१४ ॥

भेददृष्ट्याऽभिमानेन निस्सङ्गेनापि कर्मणा ।
इत्याह स प्रभुर्व्यासो मोक्षसाधनबोधने ॥ १५१५ ॥

मोक्षसाधनेषु प्राधान्येन भेदसाक्षात्कारस्य भागवते पठनादपि न अबोधः विद्याशब्दार्थ इत्याह **भेदेति।** दृशिर्हि साक्षात्कारः। 'दृष्ट्वैव तं मुच्यते' इत्युक्तब्रह्मसाक्षात्कारः अपि भेदसाक्षात्कार एव। भेदस्य तद्धर्मिकस्य तत्स्वरूपत्वात् ॥ १५१५ ॥

भगवत्यभिमानो हि भक्तिर्निस्सङ्ग कर्म च ।
निवृत्तिस्सैव विद्वद्भिर्विरक्तिरिति चोच्यते ॥ १५१६ ॥

अभितो हरेः **मानेन** बहुमानेन आग्रहेण च। **निःसङ्गेनापि कर्मणा** फलाभिसन्धिरहितनिवृत्तकर्मणा च मुक्तः सन् 'कर्तृत्वात्सगुणं ब्रह्म पुरुषं पुरुषर्षभम् । स संगत्य' इत्युत्तरवाक्येनान्वयः ॥ १५१६ ॥

भेददृष्टिं च तत्पंक्तौ ज्ञानाख्यां यां पुरा जगौ ।
अकाराख्यकुठारेण किं तां हन्ति मुरान्तकः ॥ १५१७ ॥

पुरा जगौ भागवते तृतीयस्कन्धे । **तां** भेददृष्टिम् । किं हन्ति । दशमस्कन्धे भिदाया अबोधेन इत्युक्तिकुठारेण कथं निषेधतिं । स्वव्याघातापातात् । **मुरान्तकः** । ऐक्यवादिनः मुरासुरस्य संहर्ता ॥ १५१७ ॥

तदबोधस्तवैवासीद्भेदोयमकुतो भयः ॥ १५१८ ॥

अबोधः विपरीतबोधः । तव अपव्याख्यातुः ॥ १५१८ ॥

द्विरूपाप्येकरूपाया रथिं सारथितां व्यधात्।
सेयं वाक्पार्थकल्पा मे त्वं चापार्थो भवो ध्रुवम्॥ १५१९ ॥

साहित्यमुद्रया रञ्जयति **द्विरूपेति**। अविमर्शकाले अबोध इति वस्तुगत्या बोध इति द्विरूपेत्यर्थः। उत्तरगोग्रहणकाले पार्थः अविवेकेन कुरूणां प्राक् सारथिवत् अनन्तरं रचितया यथेति ध्वनिः। वाक् भागवतवाक्यं **पार्थकल्पा** पार्थसदृशी॥ **अपार्थः** प्रत्युत्तरासमर्थः॥ १५१९॥

अतो मम गृहान्नीता भवतोऽप्युत्तरा कृतीः।
गा गृह्णामि न सन्देहस्त्वं तु दुर्योधनो भवः॥ १५२०॥

मम **गृहात्** सदागमात् **नीताः** दुराग्रहेण अन्यथा योजिताः। उत्तररूपाः गाः वाक्यानि। गृह्णामि याथातथ्येन योजयामि। **दुर्योधनः** कथायामसमर्थः॥ ॥१५२०॥

यथैषा पुरुषेच्छाया एतस्मिन्नेतदाततम्।
इति श्रुत्या यतो बिम्बप्रतिबिम्बत्वमुच्यते ॥ १५२१॥

बिम्बप्रतिबिम्बभावस्वरूपं निर्धारयन् तच्छ्रुत्या भेदसिद्धिप्रकारं दर्शयति **यथेति**। 'छाया यथा पुंसदृशी पुमधीना च दृश्यते। एवमेवात्मकाः सर्वे ब्रह्माद्याः परमात्मनः' इति वाक्यशेषः॥ १५२१॥

श्रुत्या सर्वोपसंहारी दृष्टान्तोयमुदीरितः।
उपमा शास्त्रतत्त्वज्ञा मुख्यां तामुपमां विदुः ॥ १५२२॥

सर्वोपसंहारी असति प्रमाणविरोधे सर्वधर्मैः दार्ष्टान्तिकसाम्यस्य उपसंहारपरा॥ १५२२॥

छाया हि पुरुषाकारा पुरुषाधीनचेष्टिता ।
भिन्ना च जीवे तादृक्त्वं सिद्धं दृष्टान्तशोधने ॥ १५२३ ॥

छायाख्यतमसः पुंसो भिन्नता सर्वसंमता ।
पुनराधेयतोक्त्या सा सतात्पर्यमुदीर्यते ॥ १५२४ ॥

छायाशब्देन उक्तः भेदः पुनः एतस्मिन् इति ब्रह्मण आधारत्वेन एतदिति जीवजातस्य च आधेयत्वेन उक्त्या सतात्पर्यं ज्ञाप्यते इत्याह **सतात्पर्यमिति** ॥ ॥१५२४ ॥

जीवस्य भृत्यता चायाच्छायाशब्दप्रयोगतः ।
अनुकूलं प्रियं भृत्यं छायेत्याहुः प्रियंवदाः ॥ १५२५ ॥

आहुरिति आर्षरामायणे सीताया रामं वनगमनोद्यतं प्रति वचनं 'पादच्छाया भविष्यामि' इति । तवानुकूला प्रिया सेवापरा च इति हि तत्र छायाशब्दार्थः ॥ ॥१५२५ ॥

प्रतिबिम्बत्वमप्यस्य तच्छब्दादेव सिद्ध्यति ।
प्रतिबिम्बं प्रतिच्छायेत्याहुर्यदनुशासने ॥ १५२६ ॥

साम्यं यत्किञ्चिदेवेति दृष्टं दृष्टान्त एव हि ।
न हि ज्ञानबलादेश्च च्छाया पुरुषसंमिता ॥ १५२७ ॥

बिम्बप्रतिबिम्बयोरपि सर्वत्र यथायोग्यमेव साम्यं न तु सर्वथा । अतः छाया ज्ञानबलादेः न हि पुरुषसंमिता इति योजना । अतः पूर्वोक्तं प्रियत्वं सेवकत्वं च सात्त्विकजीवापेक्षयैवेति विवेको बोध्यः । इतरेषां तु सादृश्यं तदधीनत्व-तत्सदृशत्वादिनैवेति भावः ॥ १५२७ ॥

आधारता स्वामिता च तथा साकारता हरेः ।
सिद्धा पुरुषदृष्टान्तात्तच्छब्दात्पूर्णताऽपि च ॥ १५२८ ॥

यद्विशेष्यपदं दार्ष्टान्तिकेऽप्यावर्त्यमेव तत् ॥ १५२९ ॥

दृष्टान्तगतं पुरुषपदं दार्ष्टान्तिकेऽपि आवर्तनीयम्। तस्य एतस्मिन् इति दार्ष्टान्तिकगतेन पदेनान्वयः। अत्र तस्य पुरुसनोतीति व्युत्पत्त्या पूर्ण इत्यर्थः। **एतत् आततमिति** जीवजातस्य तस्मिन्नाश्रितत्वोक्तेः। अन्नात्पुरुषः इत्यत्र पुरुषशब्दस्य देहपरत्वेऽपि स वा एष पुरुषोऽन्नरसमयः' इत्यत्र रसशब्देन विशेषणात् सारभूतविष्णुप्रतिपादकत्वमिव एकस्य अर्थद्वयं योग्यतया युक्तम्। तेन च दृष्टान्तबलेन दार्ष्टान्तिके सिद्धान्गुणानाह **साधारतेति** ॥ १५२८ ॥ १५२९ ॥

यथा तथेत्युक्तसाम्यं शब्दसाम्येति शोभते।
छायाख्योपमया जीवमेवैतदिति वाग्जगौ ॥ १५३० ॥

शब्दसाम्ये एतस्मिन् **पुरुषे** = पूर्णे परमात्मनि **एतत् छाया** छायोपमं जीवजातं इत्येवं उभयत्र पुरुषशब्दस्य छायाशब्दस्य च साम्ये इत्यर्थः ॥ १५३० ॥

साकारस्य सदृक्षो यत्साकारः स्यान्न चापरः।
न चेद्यथातथाशब्दौ वितथाविति मे मतिः ॥ १५३१ ॥

साकारः जीवः। जीवचितां साकारत्वं मौक्तभोगादिना गुणसौरभे प्रागुपपादितमिति भावः ॥ १५३१ ॥

बाधितं तु विना सर्वं साम्यं तौ नैव मुञ्चतः।
किं न सर्पोपमारज्जौ सर्पाकारेण केवलम् ॥ १५३२ ॥

केवलं इति। न तु अभिसर्पणादिता। तथा च सादृश्याभिव्यञ्जको धर्मः प्रमाणाविरुद्ध एव क्लृप्त इति भावः ॥ १५३२ ॥

रूपं रूपं प्रतीन्द्राख्यहरेर्जीवस्तनौ तनौ।
प्रतिरूपो बभूवेति स्पष्टं तद्रूपरूपिता ॥ १५३३ ॥

उक्ता श्रुतौ ततोऽप्येतौ साकारौ तत्कृतोपमौ ।
इति सिद्धं तथा तत्र बिम्बस्येन्द्रत्वमीरितम् ॥ १५३४ ॥

परमैश्वर्यरूपं तज्जीवाः सर्वेऽप्यतादृशाः ।
अतो विसदृशत्वं च तयैव प्रोक्तमेतयोः ॥ १५३५ ॥

तद्रूपरूपिता । तस्य इन्द्रस्य परमैश्वर्यशालिनः हरेः आकारेण किञ्चित्सदृशाकारवत्त्वम् ॥ १५३३ ॥ १५३४ ॥ १५३५ ॥

एवं च प्रतिरूपोऽयं रूपाद्विसदृशत्वतः ।
भिन्नश्छायावदित्यच्छारत्नच्छायापि हृत्तमः ।
तिरस्करोति तेनोक्ताप्युपमाऽसकलोपमा ॥ १५३६ ॥

बिम्बप्रतिबिम्बभावोक्त्या भेदस्यानुमानेन सिद्धौ प्रयोगप्रकारमाह **एवं चेति** । **ज्ञानच्छाया** अनुमानाख्या । **हृत्तमः** ऐक्यविषयकं अन्यथाज्ञानम् । **असकलोपमा** न अत्यन्तसादृश्यपरा ॥ १५३६ ॥

विष्णोश्च बिम्बता तस्माद्भिन्नस्यैवात्र वर्ण्यते ॥ १५३७ ॥

किञ्चित्साम्यादधीनत्वाज्जीवस्य प्रतिबिम्बता ।
विष्णोश्च बिम्बता किं न भिन्नयोरेव वर्ण्यते ॥ १५३८ ॥

तस्मात् परमैश्वर्यवाचीन्द्रशब्दप्रयोगबलात् ॥ १५३७ ॥ १५३८ ॥

बिम्बस्य प्रतिबिम्बैक्यं न स्मरोक्तं न विस्मर ॥ १५३९ ॥

उक्तं छायाशब्देन उक्तं भेदम् ॥ १५३९ ॥

छायापुरुषदृष्टान्ताद्बिम्बस्य परमात्मनः ।
प्रतिबिम्बात्मकाज्जीवाद्भेदस्योक्तश्रुतौ श्रुतेः ॥ १५४० ॥

तदेव विवृणोति **छायेति** ॥ १५४० ॥

प्रत्यक्परागभावतो हि विषयो विषयी न ते ।
मूलभाष्ये कथं तर्हि पराक्प्रत्यगभिन्नता ॥ १५४१ ॥

अतः प्रत्यक्परागभावात्प्रतिबिम्बस्तु बिम्बतः ।
भिन्नो विसदृशत्वाच्च ज्ञानज्ञेयवदेव हि ॥ १५४२ ॥

किञ्च त्वयाऽप्यध्यासभाष्ये विषयविषयिणोर्भेदसाधने युष्मदस्मत्पदोक्तः पराक् प्रत्यग्भावः हेतुकृतः । स एव च मया बिम्बप्रतिबिम्बयोः भेदेऽपि हेतूक्रियते । अतो न केवलं विसदृशत्वतः, किन्तु त्वदुपगतेन अनेनापि हेतुना भेदसिद्धिर्निष्प्रत्यूहेत्याह **अत इति** ॥ १५४२ ॥

सत्यश्चायमबाध्यत्वाद्ब्रह्मवत्प्रतिबिम्बकः ।
न हि सादृश्यमप्यस्य कार्त्स्न्येनैक्ये तु
का कथा ॥ १५४३ ॥

अबाध्यत्वात् न चासिद्धिः । नायं प्रतिबिम्बः इति वा मास्त्यत्र प्रतिबिम्ब इति वा बाधस्याननुभवादेव । कालान्तरे देशान्तरे निषेधस्तु न त्रिकालसर्वदेशस्थनिषेधं साधयतीति भावः । विसदृशत्वहेतुः न भेदेऽप्रयोजकः । हेतूच्छित्तिरूपबाधकसद्भावादित्याह **न हि इति** ॥ १५४३ ॥

किं विमर्दो मृगमदे दर्पणप्रतिबिम्बिते ॥ १५४४ ॥

विसदृशधर्माः न्यायामृते (२ ।३२ प. ६०७) एकीकृत्य उक्ताः । न्यूनाधिकपरिमाणत्व-चलत्वा-चलत्व-उपाधिसंयुक्तत्वासंयुक्तत्व-त्वगादिग्राह्यत्वाग्राह्यत्व-प्रत्यक्त्वपराक्त्वरूपेण कस्तूरी तत्प्रतिबिम्बयोः सौरभतदभावरूपेण गुडतत्प्रतिबिम्बयोर्माधुर्यतदाभरूपेण वह्नितत्प्रतिबिम्बयोरौष्ण्यतदभावरूपेण पर्वततत्प्रतिबिम्बरूपयोर्गुरुत्वतदभावरूपेण इत्यादिना संगृह्योक्ता अनुसन्धेयाः । ते च भेदसाधकाः । तथा च भेदे अनेकानि अनुमानानि प्रमाणयति किमित्यादिभिः । **विमर्दः** परिमलः ॥ १५४४ ॥

परिमाणस्पर्शगन्धगुरुत्वैकत्वतोऽन्यता ।
व्योमाग्निपुष्पगिर्यर्केष्वस्त्येव प्रतिरूपतः ॥ १५४५ ॥

परिमाणादिभेदकधर्मेभ्यः हेतुभ्यः क्रमेण व्योमादिषु प्रतिरूपतः प्रतिबिम्बप्रतियोगिकवैसादृश्यस्य विद्यमानत्वात् त्वदन्यता अस्त्येव इति योजना ॥ ॥१५४५ ॥

रूपमात्रेण सादृश्यं वैसादृश्यं त्वनेकधा ।
किं ते वार्यन्तरस्थाब्दस्तनितैर्वनिता हताः ॥ १५४६ ॥

रूपमात्रेण आकारमात्रेण । वैसादृश्यं तूक्तरीत्या सुबहुधा । अतः अत्यल्पमेव सादृश्यम् । शब्दतदभावाभ्यां वैसादृश्ये दृष्टान्तः **अब्दस्तनितैः** मेघगर्जनैः ॥ ॥१५४६ ॥

किञ्चिद्वैसादृश्यतो हि न गौर्गवयता(मगा)मियात् ।
वैसादृश्ये त्वनेकस्मिन्दृश्ये पश्यैकता कुतः ॥ १५४७ ॥

'यदा पश्यः पश्यते' इत्यत्र पश्यतीति **पश्यो** जीवः । **दृष्यः** रुक्मवर्णादिः ईशः । अतः मुक्तावपि तथैव भवतीत्यत्रोक्तं सादृश्यं निर्दुःखत्वादिरूपेणात्यल्पमेव । जगद्व्यापारवर्जमित्यादिनोक्तं वैसादृश्यं त्वनेकप्रकारम् । अतो मुक्तावपि जीवेशयोरपि भेद एव ॥ १५४७ ॥

वृत्तिवैचित्र्यतश्शब्दमात्रेणैक्यं विरुद्धयोः ।
किं गङ्गापदसङ्गेऽपि तीरस्य स्यात्प्रवाहिता ॥ १५४८ ॥

एवं विरुद्धधर्मेषु सत्स्वपि, यत्र क्वचित्प्रतिमुखे मुखशब्दप्रयोगः, [illegible] गङ्गापदमिव अमुख्यवृत्त्यैव नेयः इत्याह **वृत्तीति** ॥ १५४८ ॥

प्रत्यक्पराग्भावतो हि विषयो विषयी न ते ।
मूलभाष्ये कथं तर्हि पराक्प्रत्यगभिन्नता ॥ १५४१ ॥

अतः प्रत्यक्पराग्भावात्प्रतिबिम्बस्तु बिम्बतः ।
भिन्नो विसदृशत्वाच्च ज्ञानज्ञेयवदेव हि ॥ १५४२ ॥

किञ्च त्वयाऽप्यध्यासभाष्ये विषयविषयिणोर्भेदसाधने युष्मदस्मत्पदोक्तः पराक् प्रत्यग्भावः हेतुकृतः । स एव च मया बिम्बप्रतिबिम्बयोः भेदेऽपि हेतूक्रियते । अतो न केवलं विसदृशत्वतः, किन्तु त्वदुपगतेन अनेनापि हेतुना भेदसिद्धिर्निष्प्रत्यूहेत्याह **अत इति** ॥ १५४२ ॥

सत्यश्चायमबाध्यत्वाद्ब्रह्मवत्प्रतिबिम्बकः ।
न हि सादृश्यमप्यस्य कार्त्स्न्येनैक्ये तु
का कथा ॥ १५४३ ॥

अबाध्यत्वात् न चासिद्धिः । नायं प्रतिबिम्बः इति वा मास्त्यत्र प्रतिबिम्ब इति वा बाधस्याननुभवादेव । कालान्तरे देशान्तरे निषेधस्तु न त्रिकालसर्वदेशस्थनिषेधं साधयतीति भावः । विसदृशत्वहेतुः न भेदेऽप्रयोजकः । हेतूच्छित्तिरूपबाधक-सद्भावादित्याह **न हि इति** ॥ १५४३ ॥

किं विमर्दो मृगमदे दर्पणप्रतिबिम्बिते ॥ १५४४ ॥

विसदृशधर्माः न्यायामृते (२ ।३२ प. ६०७) एकीकृत्य उक्ताः । न्यूनाधिक-परिमाणत्व-चलत्वा-चलत्व-उपाधिसंयुक्तत्वासंयुक्तत्व-त्वगादिग्राह्यत्वाग्राह्यत्व-प्रत्यक्त्वपराक्त्वरूपेण कस्तूरी तत्प्रतिबिम्बयोः सौरभतदभावरूपेण गुडतत्प्रतिबिम्बयोर्माधुर्यतदाभरूपेण वह्नितत्प्रतिबिम्बयोरौष्ण्यतदभावरूपेण पर्वततत्प्रतिबिम्बरूपयोर्गुरुत्वतदभावरूपेण इत्यादिना संगृह्योक्ता अनुसन्धेयाः । ते च भेदसाधकाः । तथा च भेदे अनेकानि अनुमानानि प्रमाणयति किमित्यादिभिः । **विमर्दः** परिमलः ॥ १५४४ ॥

परिमाणस्पर्शगन्धगुरुत्वैकत्वतोऽन्यता ।
व्योमाग्निपुष्पगिर्यर्केष्वस्त्येव प्रतिरूपतः ॥ १५४५ ॥

परिमाणादिभेदकधर्मेभ्यः हेतुभ्यः क्रमेण व्योमादिषु प्रतिरूपतः प्रतिबिम्बप्रतियोगिकवैसादृश्यस्य विद्यमानत्वात् त्वदन्यता अस्त्येव इति योजना ॥ ॥१५४५ ॥

रूपमात्रेण सादृश्यं वैसादृश्यं त्वनेकधा ।
किं ते वार्यन्तरस्थाब्दस्तनितैर्वनिता हताः ॥ १५४६ ॥

रूपमात्रेण आकारमात्रेण । वैसादृश्यं तूक्तरीत्या सुबहुधा । अतः अत्यल्पमेव सादृश्यम् । शब्दतदभावाभ्यां वैसादृश्ये दृष्टान्तः **अब्दस्तनितैः** मेघगर्जनैः ॥ ॥१५४६ ॥

किञ्चिद्वैसादृश्यतो हि न गौर्गवयता(मगा)मियात् ।
वैसादृश्ये त्वनेकस्मिन्दृश्ये पश्यैकता कुतः ॥ १५४७ ॥

'यदा पश्यः पश्यते' इत्यत्र पश्यतीति **पश्यो** जीवः । **दृष्यः** रुक्मवर्णादिः ईशः । अतः मुक्तावपि तथैव भवतीत्यत्रोक्तं सादृश्यं निर्दुःखत्वादिरूपेणात्यल्पमेव । जगद्व्यापारवर्जमित्यादिनोक्तं वैसादृश्यं त्वनेकप्रकारम् । अतो मुक्तावपि जीवेशयोरपि भेद एव ॥ १५४७ ॥

वृत्तिवैचित्र्यतश्शब्दमात्रेणैक्यं विरुद्धयोः ।
किं गङ्गापदसङ्गेऽपि तीरस्य स्यात्प्रवाहिता ॥ १५४८ ॥

एवं विरुद्धधर्मेषु सत्स्वपि, यत्र क्वचित्प्रतिमुखे मुखशब्दप्रयोगः सः, तीरे गङ्गापदमिव अमुख्यवृत्त्यैव नेयः इत्याह **वृत्तीति** ॥ १५४८ ॥

द्वाविमाविति विस्पष्टदृष्टेरपि तयोर्भिदा ।
द्वाविमाविति पार्श्वस्थो यतः पश्यति तौ सदा ।
अतः प्रत्यक्षतोऽप्यत्र भेदस्सिद्धो विवेकिनाम् ॥ १५४९ ॥

द्वाविमौ बिम्बप्रतिबिम्बौ न त्वेक इति पार्श्वस्थस्थाबाधितप्रत्यक्षेणापि तयोरत्यन्तभेदसिद्धिरित्याह **द्वाविति** ॥ १५४९ ॥

न द्वाविमावेक एवेत्यैक्यधीरस्ति किं क्वचित् ।
तस्मादबाधितं भेदप्रत्यक्षमभवद्धि तत् ॥ १५५० ॥

अबाधमुपपादयति **नेति** ॥ १५५० ॥

तदेवेदं मुखमिति व्यवहारस्तु साम्यतः ।
स एवायं राम इति यथा चित्रस्थिताकृतौ ॥ १५५१ ॥

चित्रसिंहो यथा सिंहो मुखं प्रतिमुखं तथा ॥ १५५२ ॥

यत्र क्वापि प्रतिमुखे तदेवेदं मुखं इति व्यवहारः स तु चित्रलिखितरामे रामशब्द इव रूढोपचार इत्याह **तदिति** ॥ १५५१ ॥ १५५२ ॥

कथं न दह्यते वक्त्रं तप्तवार्यन्तराविशत् ।
कथं च न व्रणं वक्त्रे कांस्यादर्शप्रवेशिनि ॥ १५५३ ॥

ऐक्ये बाधकान्तराण्याह **कथमिति** । तप्तवार्यन्तराविशत् इति वाक्यविशेषणम् ॥ १५५३ ॥

करस्थे दर्पणे हस्ती यद्यष्टैश्वर्यतो विशेत् ।
कथं शिशुस्तं बिभृयाद्गजशालोद्यमो वृथा ॥ १५५४ ॥

अष्टाशीतिसहस्राणि विस्तीर्णो योजनस्य यः ।
दर्पणेऽल्पप्रमाणेऽसौ कथं विशति चन्द्रमाः ॥ १५५५ ॥

परिमाणवैसादृश्यानङ्गीकारे बाधकमाह **करस्य इति कथं विशेदिति** अणिमैश्वर्याभावेनेति भावः। कथं तं बिभृयादिति प्रसङ्गान्तरम्। अणिमैश्वर्यमन्तरेति भावः। **वृथेति** दर्पण एवास्थानसंभवात्। अष्टैश्वर्य इति परिहासः॥ १५५४॥ ॥१५५५॥

यदि तप्तोदकेत्युष्णे वक्रमेव विशेन्नृणाम्।
तदा दाहो भवेत्तस्य कवोष्णादपि यस्य भीः॥ १५५६॥

नृणां अग्निस्तम्भाद्यैश्वर्यविकलानाम्॥ १५५६॥

यद्यम्बुनि चिरं नृणां वक्रमेव विशेत्तदा।
शिक्षा स्यात्तस्करस्येव यद्विभेत्यघमर्षणात्॥ १५५७॥

अम्बुनि शीताम्बुनि। अतः पूर्वस्माद्विशेषः। **अघमर्षणात्** अल्पशीतस्पर्शात्॥ १५५७॥

नैमित्तिकं हि तत्कार्यं निमित्ते सति जायते।
तदपाये नाशवच्च सूर्यात्पद्मविकासवत् ॥ १५५८॥

त्रपुसीसस्वर्णसर्पिश्चन्द्रकान्तद्रवत्ववत्।
जलौष्ण्यवद्ग्रहग्रस्तमर्त्यसत्त्वविशेषवत् ॥ १५५९॥

नैमित्तिक प्रतिमुखनाशे मुखसन्निधिरूपनिमित्तकारणनाशः प्रयोजकः। तत्र अनेकानि निदर्शनानि **सूर्यात् इत्यादीनि।** सावित्रतेजोऽपगमात् पद्मविकासनाशवदिति भावः॥ द्रवत्वं त्रपुसीसादिभिः प्रत्येकं संबध्यते। अग्निसन्निधानं तत्र निमित्तम्। मर्त्यस्य बलविशेषे ग्रहावेशः निमित्तम्॥ १५५८॥ ॥१५५९॥

औपाधिकं प्रतिमुखं मुखे सत्येव दृश्यते।
मुखस्यापगमे चास्य न दृष्टत्वाष्टता च न ॥ १५६०॥

दार्ष्टान्तिके योजयति **औपाधिकमिति**। **अस्य** मुखसन्निधिरूपनिमित्तस्य। **नष्टत्वात् दृष्टता न**। नाशे सति नाशात् अनन्तरं दृष्टता न ॥ १५६० ॥

निमित्तं बिम्बसान्निध्यं कर्ता नारायणः प्रभुः।
उपादानमुपाधिश्चेत्कार्यं वार्यमिदं कथम् ॥ १५६१ ॥

मुखव्यतिरेकेण प्रतिमुखं, मिथ्या, प्रत्येकं तत्कारणाभावादिति केचित्समास्थिताः। तान् असिद्धियुक्त्या दूषयति **निमित्तमिति**। **वार्यं** अपलापार्हम् ॥ १५६१ ॥

कार्यात्मना विवरणाद्विकारो दर्पणस्य च।
तन्तोरिवानुमन्तव्यो हन्तव्योऽर्थः कथं वद ॥ १५६२ ॥

विकरणात् विक्रियादर्शनात्। **विकारः** सूक्ष्मोऽपीति शेषः। तत्र दृष्टान्तः **तन्तोरिवेति**। मृदादेरिव स्थूलविकारस्य तत्राप्यदर्शनात्। **अर्थः** प्रमितः। **हन्तव्यः** अपलपनीयः ॥ १५६२ ॥

बहिर्विकारशून्यस्य जठरस्य यथान्तरे।
गुल्मग्रन्थिविकारः स्यात्तथा यं च भविष्यति ॥ १५६३ ॥

आन्तर एवायं विकार इत्यत्र दृष्टान्तो **गुल्मेति** ॥ १५६३ ॥

घटात्मना विकरणं मनसो योऽनुमन्यते।
प्रतिबिम्बात्मनोपाधेर्विकारोऽयं कुतोऽस्य न ॥ १५६४ ॥

अन्तःकरणं निर्गत्य घटाद्यात्मना परिणमते। अतो घटे वृत्तिव्याप्यत्वमेव दृश्यत्वमिति हि मायिनो मतम्। अणुनो मनसो घटात्मना विकारः असंभवी अपि स्वमताग्रहमात्रेण स्वीकृतः। तस्य तादृशस्य तव प्रमितदर्पणविकारानङ्गीकारो निर्निबन्धन इत्याह **घटेति** ॥ १५६४ ॥

द्वारं विना यत्प्रवेष्टुं नालं मृण्मयभित्तिषु ।
कथं कांस्यं दृढद्रव्यं तद्विशेन्मृदुलं मुखम्   ॥ १५६५ ॥

पूर्वं व्रणः स्यादिति दूषितम् । इदानीं प्रवेश एव दुर्लभ इति दूषयति **द्वारमिति** ॥ १५६५ ॥

यदि वक्त्रं जलस्यान्तःप्रविष्टं सत्प्रदृश्यते ।
पराग्भावस्तर्हि कुतो न हि मज्जन्मुखेस्त्यसौ ॥ १५६६ ॥

प्रत्यक् पराग्भावरूपं वैसादृश्यं ऐक्ये बाधकमाह **यदीति । मज्जन्मुखे बिम्बे** ॥ १५६६ ॥

जलस्थं चेद् बहिर्न स्याद् बहिस्स्थं च जले कुतः ।
मज्जन्मुखमिवैकत्वादेकत्रैव भवेद्धि तत्   ॥ १५६७ ॥

पार्श्वस्थस्य द्वे इमे इति प्रागुक्तं प्रत्यक्षबाधं ऐक्यस्य स्मारयति **जलस्थेति** ॥ ॥१५६७ ॥

यद्यादर्शे मुखं सत्ते दोषोऽयं दुस्तरस्तदा ।
न चेत्तदाधारता धीर्भ्रमत्वान्नैव साधिका   ॥ १५६८ ॥

न चेदिति । आदर्शे मुखं वस्तुगत्या विद्यमानं न चेत् । **धीः** आदर्शे मुखं इति मुखाधारता धीः । **साधिका** ऐक्यस्येति शेषः ॥ १५६८ ॥

या च दर्पणसंबन्धाच्चक्षुषः पृष्ठतो गतिः ।
मुखस्यैवेक्षणं चोक्तं तच्चित्रमिति मे मतिः ॥ १५६९ ॥

नयच्छैलान्निववृते न क्रूरादनलादपि ।
तच्चक्षुः पश्यतस्स्वास्यं जलात्किल निवर्तते ॥ १५७० ॥

दर्पणाभिहता दृष्टिः परावृत्य स्वमाननम्। व्याप्नुवन्त्यभिमुख्येन व्यत्यस्तं दर्शयेन्मुखम्। इति परस्य ऐक्ये प्रक्रियान्तरमपि दूषयति **या चेत्यादिभिः** ॥ ॥१५६९ ॥ १५७० ॥

यतः शिलाया योगेऽपि दारुप्रोतमुखश्शरः।
यथागतं तथा याति पृष्ठं पृष्ठं मुखं मुखम्॥ १५७१ ॥

अस्मिन्पक्षे प्रत्यक् पराग्भावे। दुरुपपाद इत्याह **यतः इति** ॥ १५७१ ॥

ततश्चक्षुः परावृत्तिरपि स्यादीदृशी परम्।
पुंवत्किं वक्तुमुचिता निवृत्तिः स्वेच्छया जडे॥ १५७२ ॥

परावर्तनं पुंधर्मः अचेतने चक्षुषि न घटते इत्याह **स्वेच्छयेति** ॥ १५७२ ॥

एवं चेत्कुड्यकुम्भादि दृष्ट्वा दृष्ट्वा निवृत्तिमत्।
किं चक्षुरीक्षते स्वास्यं तस्ये इनतपोधिकम्॥ १५७३ ॥

एवं चेत् = अचेतनस्यापि सतः येन केनचित्प्रतिहतस्य परावृत्तिरङ्गीक्रियते चेत्। **स्वास्यं** स्वाधारभूतं मुखम्। **इह** दर्पणविषये। तपः इत्यपहासः ॥ १५७३ ॥

किञ्चैवं सति तद्बुद्धेराकारः स्यादिदं मुखम्।
इत्येव दर्पणादीनां सत्येवं दर्शनं च न।
दर्पणे मुखमित्येवमाकारस्त्वष्टमो रसः ॥ १५७४ ॥

एवं सति मुखमात्रस्य दर्शने सति। (इदं मुखं इत्याकारः)। **तद्बुद्धेः** = परावृत्य मुखमात्रं विषयीकुर्वत्या बुद्धेः स्यात्। न तु दर्पणे मुखं इति सार्वजनीनः आकारः। दर्पस्य बुद्ध्या उल्लेखः सप्तमो रसः। मुखाधारतया उल्लेखस्तु अष्टमो रसः ॥ १५७४ ॥

अथार्थार्थाभिसंबन्धाद्द्विधाभूतस्य चक्षुषः।
धीद्वयं यदि जायेत हीयेत तव धीस्तदा ॥ १५७५ ॥

ननु चक्षुषि भागद्वयमङ्गीक्रियते। एकेन भागेन परावृत्य मुखस्य अपरेण च दर्पणस्य च दर्शनं संभवतीति चेत् न अनानुभविकं धीद्वयं कल्पयतः तव धीरेव हीयेत ॥ १५७५ ॥

विरुद्धदिग्द्वयस्थार्थसंबन्धस्त्वेकचक्षुषः।
यतो न दृश्यते नृणां ततोऽप्येतदसङ्गतम् ॥ १५७६ ॥

किं च चक्षुषा एकस्यां दिशि सतोर्द्वयोर्युगपद्दर्शनसंभवेऽपि विरुद्धदिक्संस्थितयोः मुखदर्पणयोः सहैव दर्शनमसंभावितमित्याह **विरुद्धेति** ॥ ॥१५७६ ॥

किञ्चैवमपि धीर्द्वन्द्वं कथं स्यान्मनसाणुना।
समूहालंबना धीश्चेत्स मोहालम्बनो वदन् ॥ १५७७ ॥

इदं धीद्वंद्वं न मनसा उत्पत्तुं युक्तम्। चक्षुषा सह मनसोऽपि बहिर्निर्गमनमङ्गीकुर्वतस्तव अजोर्मनसो धीद्वयजननाय द्विधाभावायोगात्। समूहालंबनमेकमेवेदं ज्ञानमिति तु मोहमूलम्। तथा सति इमौ मुखदर्पणौ इति तदाकारः स्यात् इत्याह **किञ्चेति** ॥ १५७७ ॥

किञ्चावाङ्मुखपुंसोक्षिपरावृत्येक्षतां मुखम्।
तद्रुद्धबहुदूरस्थमित्रमैत्री कुतो वद ॥ १५७८ ॥

अवाङ्मुखस्य जले स्वमुखं सूर्यमण्डलं चेति द्वयमपि दृश्यते इत्यविवादम्। तत्र तव प्रक्रियया परावृत्य स्वमुखस्य दर्शनमिति कथञ्चिद्वक्तुं शक्यत्वेऽपि सूर्यमण्डलदर्शनं दुःशकम्। तत्र हेतुः तद्रुद्धस्य मुखेन प्रतिबद्धस्य बहुदूरस्थस्य चेति। मित्रमैत्री सूर्यदर्शनम् ॥ १५७८ ॥

किञ्चैवं सति भूषास्थरत्नलक्षेषु बिम्बितम्।
मुखं स्वमीक्षमाणस्य धीः स्यादेकं मुखं त्विति ॥ १५७९ ॥

अनेकोपाधिस्थले अनेके प्रतिबिम्बास्तावद् दृश्यन्ते। तदपि अशक्यमापन्नम्। बिम्बस्यैकत्वादेव। न हि रत्नरूपोपाधिभेदे मुखस्यापि भेद इत्याह **किञ्चैवमिति** ॥ १५७९ ॥

कपोलः कल्पकस्तत्ते दोष्णो योग्यो न चक्षुषः ॥ १५८० ॥

इयं द्वैधीभावप्रक्रिया स्वकपोले कल्पयितुं न शक्या। स्वकपोलस्य स्वचक्षुदर्शनायोगात्। अत इयं सर्वाऽपि कल्पना स्वकल्पनामूलैव। एतादृशस्य कुकल्पकशीलस्य तव कपोलस्य न चक्षुःसंयोगः किन्तु स्वहस्तेन ताडनरूपाभिघात एव समुचित इत्याह **कपोल इति**। तदुक्तं भगवत्पादैः 'कशावेत्रादिकं तस्य तस्करस्योत्तरं भवेत्' इति ॥ १५८० ॥

अतस्तत्तादृशं वस्तु लघुभूतं हि जन्यते।
बिम्बोपाध्योः सन्निधानात्कथं स्याद्धि
तदेव तत् ॥ १५८१ ॥

तथा च प्रतिबिम्बो बिम्बाद्भिद्यते तत्कारणविलक्षणकारणजन्यत्वात् यवाङ्कुरात्कलमाङ्कुरवत् इति प्रयोगोऽभिमतः। न चासिद्धिः इत्याह **बिम्बोपाध्योः सन्निधानादिति**। तदेव निमित्तकारणं अदृश्यादिकं च। दर्पणः उपादानं त्विति समर्थितम्। न चाप्रयोजकतेत्याह **तादृशं** तदधीनत्वे सति तेन सदृशं कथं तदेव स्यात्। विरुद्धधर्माधिकरणत्वात् ॥ १५८१ ॥

प्रतिबिम्बस्य मिथ्यात्वे सत्यबिम्बाद् भवेद्भिदा।
प्रतिबिम्बस्य सत्यत्वे द्विस्वभावत्वतो भिदा ॥ १५८२ ॥

मिथ्याभूतस्यापि साधकत्वसाधनावसरे, असत्येन प्रतिबिम्बेन बिम्बानुमानमुदाहरन्तो मायावादिनः क्वचित्प्रतिबिम्बो मिथ्येत्यभिप्रयन्ति। क्वचिदभेदाशयेन सत्य इति। तत्र आद्ये दोषमाह **प्रतिबिम्बस्येति**। तथा च तयोरभेदोक्तिः स्वव्याहता। द्वितीयस्तु तयोः विरुद्धस्वभावत्वादनुचित इति वदति **द्विस्वभावत्वादिति**। तथा च सर्वथा तयोर्भेदो निराबाधः ॥ १५८२ ॥

कथं च प्रतिबिम्बस्य मिथ्यात्वं यौक्तिकं विदाम्।
न ह्यस्ति बाधिका नायं प्रतिबिम्ब इति प्रमा ॥ १५८३ ॥

बाधाभावान्मिथ्यात्वं न युक्तं इत्याह विदां प्रामाण्यस्वतस्त्ववादिनाम् ॥ ॥१५८३ ॥

दृष्टा बाधितकार्यस्याप्यन्यथानुपपत्तितः।
कल्प्यं स्यात्कारणं सर्वं यथेशः कलमाङ्कुरात् ॥ १५८४ ॥

दर्पणस्य उपादानत्वाभावमुपेत्यापि प्रतिबन्द्याप्रतिबिम्बसत्यतां परेणैवाङ्गीकारयति **दृष्टेति**। तदुक्तं भगवत्पादैः 'न हि अन्नत्वे दुर्घटे तस्यानन्नत्वं भवति' इति। प्रपञ्चितं च प्राग्गुणसौरभे 'प्रमाणदृष्टघटना कार्या सैव यथामति। न शक्यते चेत्सर्वेशाचिन्त्यशक्त्यैव सेत्स्यति' इति ॥ १५८४ ॥

अस्तूपाधिविकारोऽसौ तद्रूपरसादिवत्।
निमित्तमात्रजन्यो वा भावोऽप्येको-
ऽस्त्वभाववत् ॥ १५८५ ॥

कार्यस्य प्रमितत्वेन दर्पणस्य स्पष्टं विकारदर्शनेऽप्युपादानत्वं कथञ्चिदुपपाद्यमित्याह तद्रूपरसादिवत् इति। अस्तु इत्यनेन सिद्धान्ते द्रव्यस्य स्वगुणादीन्प्रति उपादानत्वाभावेनानास्थां द्योतयति। नायमस्ति च नियमे। यत्कार्यमात्रं सोपादानकमेवेत्याह **अभाववदिति**। प्रध्वंसरूपकार्यस्य निरुपादानत्वदर्शनात् ॥ १५८५ ॥

उपादानस्य चादृष्ट्या कार्यदृष्ट्या च तादृशी।
अवस्था कल्प्यतेऽभावे भावे किं न तथाविधे ॥ १५८६ ॥

तत्र प्रमितत्वात्कार्यस्य तथा भावः अगत्या कल्पनीय इति चेत्सममत्रापीत्याह **कल्प्यते अभावे इति। तथा विधे** = प्रमिते ॥ १५८६ ॥

सर्वथा दृष्टकार्यस्य ह्यपलापो न युज्यते ।
न चेदीशप्लुतं त्याज्यं नारिकेलफले जलम् ॥ १५८७ ॥

न चेत् प्रमितस्य कथञ्चिदुपपादकान्तरं कल्पयित्वा निर्वाहो न क्रियते चेत् । त्याज्यं अपलपनीयम् ॥ १५८७ ॥

अतः स्वाप्नपदार्थस्य प्राहुः संस्कारजन्यताम् ।
न स्वप्न इति बाधस्याभावादर्थक्रियाकृतेः ॥ १५८८ ॥

प्राहुः मनोगतांश्च संस्कारान्स्वेच्छया परमेश्वरः । प्रदर्शयति जीवाय स स्वप्न इति गीयते इत्यादिश्रुतिस्मृतयः । उक्तं च परैरपि वासनामयी सृष्टिः श्लिष्टेति उत्तरमाह उच्यते इति (बृ. शां. आनन्द ४ । ३ । १०) [भे.प.ब्र.सू. १ प. १९४] ॥ ॥१५८८ ॥

मुखशब्दः प्रतिमुखे सोपचारः कथं न ते ।
मुखं प्रति स्थितं यत्स्यात्तद्धि प्रतिमुखाभिधम् ॥ १५८९ ॥

प्रतिमुखमिति संज्ञाभेदेनापि मुखात्तस्य भेदसिद्धिरित्युपपादयति **प्रतिस्थितं** आभिमुख्येन पराक्त्वेन स्थितम् । यत्र क्वचित् प्रतिमुखे यः मुखशब्दप्रयोगः स उपचारादेवेति सुबहुधा प्राङ् निदर्शितमिति भावः ॥ १५८९ ॥

कथं तदेव च मुखं तस्मात्प्रत्यक्पराक्स्थितेः ।
संज्ञाभेदात्कर्मभेदाद्बिम्बोऽन्यः प्रतिबिम्बतः ॥ १५९० ॥

सौरभार्थमुपसंहरति **कथमिति । तदेव** प्रतिमुखमेव । तथा हि । प्रतिमुखमेवमुख इति किमत्यन्तसादृश्यधीरुपन्यस्ता प्रत्यभिज्ञा वा । नाद्यः । तयैक्यासिद्धेः । अन्त्ये असिद्धिः । चैत्रप्रतिबिम्बमेव दृष्टं न तु चैत्रः इति भेदानुभवबाधितत्वात् । स्वनेत्रगोलकादौ स्वस्याभिज्ञाभावेन प्रत्यभिज्ञाऽयोगात् (न्या. २ । ३२ - प. ६०७) । तस्मादित्यस्यैव विवरणं प्रत्यगित्यादिहेतुत्रयेण । प्रत्यक्पराग्भावादित्यनेन पार्श्वस्थस्य इमौ बिम्बप्रतिबिम्बौ इति भेदे प्रत्यक्षं

प्रमाणयति। **संज्ञाभेदात्** बिम्बः प्रतिबिम्ब इति च नामभेदात्। अङ्गीकृतं च मीमांसकैः नामभेदः स्वाभिधेयभेदं प्रयोजयतीति। ज्योतिरित्यादिनामधेयेन तन्नामकयागस्य प्रकृतज्योतिष्टोमादियागाद्भेदः 'संज्ञा चोत्पतिसंयोगादि'त्यत्रोक्तः। (तर्कताण्डव द्वि.प.प. ३६९)। **कर्मभेदात्** दाहशेष = शब्दव्यवहारादिकर्मभेदात्। प्रतिबिम्बस्य बिम्बाधीनैव क्रिया इत्येवं कर्मभेदाच्च। यथोक्तं गीताभाष्ये 'न हि प्रतिबिम्बस्य स्वातन्त्र्येण क्रिया' इति। दार्ष्टान्तिकस्य एतत्सौरभपरमप्रमेयस्य जीवेश्वरभेदस्य समर्थनपरतयाऽपि श्लोकोऽयं योजनीयः। तथा हि मुखशब्दस्य उत्तमपरत्वात्परमात्माऽर्थः। 'मणिर्मुखं प्रधानं चेत्युत्तमस्य वचो भवेत्' इति स्मृतेः। तथा च 'कथं तदेव च मुखं' इति वचनविन्यासेन 'अर्थाच्छ्रुतेश्च गुणतो निजरूपतश्च नित्यान्य एव **कथमस्मि स इत्यपि स्यात्'** इति भगवत्पादोक्तिं संवादयति। **प्रत्यगिति** अन्तर्यामीत्यर्थः। अस्य भेदव्यवस्थापकत्वं अन्तर्यामिनये व्यक्तम्। अत्र च विषदीकृतम् (श्लो. २१२-२८५) **संज्ञाभेदः** अनन्तः आनन्दमयः आत्मा, इत्यादिभिः भगवदसाधारणसंज्ञाभिर्ज्ञापितो भेदः। (श्लो. १-१३३) **कर्मभेदः** स्थित्यदनाभ्यामिति सूत्रोक्तः पिप्पलादनानदनरूपः। एतेभ्यो हेतुभ्यः **बिम्बः** विष्णुः। **प्रतिबिम्बतः**। बहुवचनात्पञ्चम्यर्थे तसिः जीवेभ्यः॥ १५९०॥

वादिराजाख्ययतिना साधिता युक्तिमल्लिका।
भेदसौरभसर्वस्वमथ विष्णोर्न्यवेदयत् ॥ १५९१॥

इति
श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमद्वादिराजतीर्थश्रीमत्पूज्यचरणविरचितायां युक्तिमल्लिकायां भेदसौरभं संपूर्णम्॥

युक्तिमल्लिका एतद्ग्रन्थाभिमानिनी भारती। **साधिता** सव्यापारीकृता। व्यापारश्च प्रसन्नतैव। इदमेव हि देवतायाः स्वेन साधनं नाम। प्रसन्नतां प्रापिता इति यावत्। **भेदसौरभसर्वस्वं** भेदस्य यत्सौरभं तज्ज्ञानस्य मोक्षहेतुत्वसमर्थनरूपं तद्रूपं समस्तं अर्हणम्। 'विविक्तदृष्टिस्तदुतार्हणं मे' इति भागवतोक्तेः। विष्णोः सर्वस्वं विष्णोः न्यवेदयत् इति आवृत्त्या योजनीयम्। तथा च अर्घ्यं सिन्धोरित्यत्रेव

तदीयस्यैव तस्मिन् समर्पणं इति कर्मणि अभिमानत्यागः ज्ञापितः। **विष्णोः** प्रीतये इत्युपस्कारः। **न्यवेदयत्** स्वप्राणनाथस्य मातरिश्वनः द्वारा। तस्यैव समर्पणाधिकारात्। तदुक्तं 'तस्मिन्नपो मातरिश्वा दधाति' इति। मङ्गलप्रयोजनकेनाथशब्देन अन्तेऽपि मङ्गलमनुष्ठितमिति ध्येयम्। आनन्तर्याभिधायकेन अनन्तरं करिष्यमाणविश्वफलसौरभयोः तत्पूजात्वेन सङ्कल्पनं च।

यत्कारुण्यवशेनेयं विवृती रचिता मया।
श्रीसत्याभिज्ञतीर्थार्याः प्रीयन्तां ते सदा मयि ॥

इति श्रीपूज्यपादश्रीसत्याभिज्ञतीर्थश्रीचरणचरणाराधकेन श्रीसत्यप्रमोदतीर्थमुनीन्द्रेण विरचिता भेदसौरभविवृतिः संपूर्णा ॥

॥ श्रीकृष्णार्पणमस्तु ॥